THE KÁVYA PRAKÁŚA

OR

A TREATISE ON SANSKRITA RHETORIC,

BY

MAMMATA BHATTA,

WITH

EXPLANATORY AND ILLUSTRATIVE NOTES

BY

PUNDIT MAHEŚA CHANDRA NYÁYARATNA, C.I.E

Principal Calcutta Sanskrit College

EDITED BY HIS PUPIL,

SYÁMÁ CHARAN KAVIRATNA

SECOND EDITION

Calcutta:

P. M SOOR & CO,

CROWN PRESS, 2, GOABAGAN STREET

1886

BHARATIYA VIDYA BHAVAN
S. N.
LIBRARY

CALCUTTA
Printed by P. M. Saor & Co.
Crown Press, No. 8 Goabagan Street

काव्यप्रकाशः

अलङ्कारसन्दर्भः ।

BIHAR BHAVAN LIBRARY. S N.....

मम्मटभट्ट-विरचितः ।

कलिकाता-संस्कृतविद्यालयाध्यक्ष-

श्रीमहेशचन्द्रन्यायरत्न-

सङ्कलित-तात्पर्य्यविवरणान्वितः ।

तस्य कालेन

श्रीश्यामाचरण कविरत्नेन

संशोधितः

(द्वितीयं संस्करणम् ।)

कलिकाता-राजधान्याम्

पि, एम्, बूर कोम्पानिना गोयाबागान ष्ट्रीट्स्थ २ संख्यक-

भवने क्राउन्यन्त्रे मुद्रितः ।

शकाब्दः १८०८ । खृः १८८६ ।

BHARATIYA VIDYA BHAVAN
S N.....
LIBRARY.

विज्ञापनम् ।

काव्यप्रकाशोऽयमलङ्कारशास्त्रेष्वेकतमो निबन्धः । यस्मिन् खलवगते काव्यस्य निर्माणे स्वरूपदोषगुणालङ्कारादीनामवधारणे च शक्तिरुन्मिषति, तदलङ्कारशास्त्रम् । यथा च व्याकरणम् भाषायां व्युत्पत्त्यै अपेक्ष्यते, तथा अलङ्कारशास्त्रमपि काव्ये नैपुण्यायेति (१) एतदप्यवश्यमध्येतव्येष्वन्तर्भावमर्हति ।

यत्तु, अलङ्कारशास्त्रमश्लीलतया नोपदेशार्हमित्यर्वाचीनानां भ्रमः, तत्र केचन नवीना अलङ्कारनिबन्धकृत एव मूलम्, ते हि काव्यमात्रनिरूपणाय प्रवृत्तेऽप्यलङ्कारशास्त्रे, प्रसङ्गात् सविस्तरं शृङ्गाररसमपि निर्णिन्युः, उदाजह्रुश्च प्रायशः शृङ्गारविषयकाण्येव काव्यानीति । वामनदण्डि-

---

(१) न केवलमलङ्कारशास्त्रं विना काव्ये नैपुण्यमेव न भवति, अपितु वाक्यदोषादोषदृष्टिरपि न जायते। यो हि अलङ्कारशास्त्रं न जानाति, केवलं व्याकरणादिकमेव जानाति, स कथं जानीयात् 'चिन्मात्रमिव च्युतोऽसि करत-' इति 'गुणैरनल्पैः प्रथितो यशोभिरिव सङ्गतैः' इति उपमयोः उक्तोऽपि उपमानोपमेययोर्लिङ्गभेदे पूर्वं दुष्टं न परमिति ? एवं जघनकाञ्चीकर्णावतंसपदयोरविशिष्टेऽपि पौनरुक्त्ये पूर्वं दुष्टं परमदुष्टमिति ? यथाच पूर्वयोर्दुष्टत्वं न परयो, तथा क्रमेण ३२० दृष्टे ३२१ दृष्टे च प्रकाशितता प्रतिपादितम् ।

प्रभृतीनान्तूर्द्धतनानामालङ्कारिकाणां नैताहशी रीतिः। तर्हि अलङ्कारनिबन्धेषु शृङ्गाररसादयो न निरूपिताः, नापि चातीवाश्लीलानि उदाहरणानि प्रदर्शितानि। वस्तुतः प्रायः संस्कृतकवीनामेष महान् दोषः, यत् सर्व्वत्रैव शृङ्गाररसमेव व्यवहर्त्तुमीहन्ते स्म, किमधिकम्, मङ्गलमाचरन्नोऽपि देवविषयकमपि शृङ्गाररसमवर्णयन् (२), आनयंश्चाप्रासङ्गिकेष्वपि विषयेषु (अन्ततः दृष्टान्तविधयापि) शृङ्गाररसम् (३)।

अलङ्कारशास्त्रं कदा केन प्रथममाविष्कृतमिति निर्णेतुं न शक्यमस्माभिः। परन्तु, प्रसिद्धेषु सर्व्वेष्वेव अलङ्कारनिबन्धेषु कालिदासकृतेरुद्धरणात् कालिदासादुत्तरकालमेवास्य बाहुल्येन चर्च्चाऽजनीति सम्भाव्यते।

सत्यप्यस्मिन् दोषगुणादीनामपि निरूपणीयत्वेऽस्यालङ्कारनाम्नैव व्यपदेशस्य बीजं वयं तत्त्वतो न विद्मः। परन्तु, अलङ्क्रियतेऽनेनेतिकरणव्युत्पत्तिनिष्पन्नो यमकोपमादिबोधको नायमलङ्कारशब्दः, किन्तु, अलङ्कृतिरलङ्कार इतिभावव्युत्पन्नो दोषापगमगुणालङ्कारसम्बलनकृतसौन्दर्य्यपरः, तत्प्रतिपादकत्वादेव चास्यालङ्कारनाम्ना व्यपदेश इत्युद्भावयामः। अत्र साधकञ्च वामनसन्दर्भमुदाहरामः, "काव्यं ग्राह्यमल-

---

(२) यथा, 'चक्राणि पञ्च कुचयो प्रतिबिम्बितानि दृष्ट्वा दशाननसमागमसंभ्रमेण। भूयोऽपि शैलपरिवर्त्तभयेन गाढमालिङ्गितो गिरिजया गिरिशः पुनातु' इति, 'मानापनोदनविनोदनते गिरीशे ...' इत्यादि च (खण्डने)।

(३) यथा, 'चक्रोर्य्ये यत्र चतुरा चन्द्रिकापानकर्म्मणि।
विनाऽञ्जनेन निपुणा सदृशो रमनर्म्मणि' इति॥

ङ्कारात् । १ । । सौन्दर्य्यमलङ्कारः । २ । अलङ्कृतिः अलङ्कारः । करणव्युत्पत्त्या पुनरलङ्कारशब्दो यमकोपमादिषु वर्त्तते । स दोषगुणालङ्कारहानादानाभ्याम् । ३ । स खलु अलङ्कारो दोषहानात् गुणालङ्कारयोरादानाच्च सम्पाद्य कवेः" इति ।

अलङ्कारनिबन्धाश्च बहवो विद्यन्ते, तेषु अस्मदवलोकितानां रौद्रोदनिरूपण - वाग्भटालङ्कार - वामनसूत्रवृत्ति दण्डिकृत-काव्यादर्श - भोजदेवकृतसरस्वतीकण्ठाभरण - महिमभट्टकृत व्यक्तिविवेकाभिनवगुप्तकृतालोचनग्रन्थानाम् (४) अधमनः, पीयूषवर्षकृतचन्द्रालोकाप्पदीक्षितकृतचित्रमीमांसा तत्कृत कुवलयानन्द - विश्वनाथकृतसाहित्यदर्पण - गोविन्दठक्कुरकृत-काव्यप्रदीप - जगन्नाथकृतरसगङ्गाधर-केशवमिश्रकृतालङ्कार-शेखर प्रभाकरकृतालङ्काररहस्यानामदृष्टतनोऽयं काव्यप्रकाशः ।

सर्वेषामेवालङ्कारशास्त्राणां काव्यमेव प्रतिपाद्यमिति तदुपयोगितया सर्व्वत्रैव (कुवलयानन्दं विहाय, तत्रालङ्कार-एव निरूपितः) दोषगुणालङ्काराः (५) निरूपिताः, रसा-दयस्तु क्वचित् निरूपिताः क्वचिच्च न । तथाहि वाग्भटालङ्का-

---

(४) व्यक्तिविवेकालोचनग्रन्थौ यत्र खण्डितावेव सङ्गतिं न तावग्रेसरौ दृष्टौ । भट्टलोल्लटादीनां निबन्धा नास्माभिरधिगता इति नात्र तेषामुल्लेखः कृतः । *दण्डकशादयश्च कतिचेदकाव्यालङ्कारप्रतिपादकाः, रसवदादिकीर्त्तनमात्रेण रसादि-प्रतिपादकाः, नैते अलङ्कारशास्त्रा व्यपदेशमर्हन्तीति न तेषामुल्लेखितवान् ।*

(५) रीतिरपि सर्व्वत्र निरूपिता, किन्तु क्वचित् स्वातन्त्र्येण, क्वचित्तु गुणा लङ्कारयोरन्तरितेति तस्या न स्वातन्त्र्येणोल्लेखः कृतः ।

रादौ रसो निरूपितः, वामनवृत्त्यादौ न। वामनवृत्तौ काव्यसमयशब्दशुद्धी(६)निरूपिते अन्यत्र न। वाभटालङ्कारे काव्यकरणप्रणाली लिखिता, नान्यत्र। चन्द्रालोके काव्यधर्मो लक्षणं (७)न्यरूपि नान्यत्र। काव्यप्रकाशादौ अभिधालक्षणाव्यञ्जनारूपाः शब्दवृत्तयः(८)निरूपिताः, न वाभटालङ्कारादौ। साहित्यदर्पणे दृश्यकाव्यं नाटकादि न्यरूपि, नान्यत्र कुत्रचित्। एवमन्यदपि ज्ञेयम्। दोषगुणालङ्काराश्च सर्वे एव न सर्वत्र समानाः, वामनभोजादिमते त्वलङ्कारदोषाः स्वतन्त्राः सन्ति, विश्वेश्वरविद्याधरादिमानाः केचन दोषाः स्वतन्त्रा न सन्ति, मम्मटादिमते तद्विपरीतम्। दण्डिमते दोषा दशैव, भोजमते पदवाक्यवाक्यार्थगताः दोषाः प्रत्येकं षोडश, अन्यमते चान्यसङ्ख्याकाः। गुणा वामनादिमते शब्दगता अर्थगताश्च प्रत्येकं दश, भोजमते चतुर्विंशतिः, एवं दोषाभावरूपा

---

(६) 'नैकं पदं हि प्रयोज्यं प्रायेण' इत्यादिनियमः काव्यसमयः। स च मम्मटादिमते अनुपयुक्तत्वदोषाभावादौ पर्य्यवस्यति। 'रूढ्यर्थैकत्वेऽपि नेष्यः' इत्यादिवैयाकरणसिद्धान्तः शब्दशुद्धिः। सा च व्याकरणशास्त्रविषयतया मम्मटादिभिरुपेक्षिता।

(७) 'अल्पाक्षरा विचित्रार्थव्यक्तिरक्षरसंहतिः।
यथाकथञ्चिदनुगतः शूरः शौरिरयं पुनः' इत्यादिरूपम्।

अक्षरसंहतिर्नाम शब्दगुणस्तु वामनादिमते व्यासरूपे अर्थगुणे ओजसि अन्तर्भूतम्। मम्मटमते वैचित्र्यमात्रं सत् न स्वतन्त्राभिधानार्हम्।

(८) शब्दवृत्तीनां विचारोऽतिप्राचीनेषु वामनवाभटदण्डिभोजरुद्रादिग्रन्थेषु न दृश्यते। तेषामधुनैवैष एष विचारः प्रादर्शि।

वशेषिकनामानो बहवः। मम्मटादिमते न शब्दार्थगताः किन्तु रसगतास्त्रय एव ते। दण्डिभोजादिमते प्रहेलिकादयः अलङ्काराः न वक्रोक्त्यादयः, वामनमम्मटादिमते तु तद्वैपरीत्यम्।

एवं काव्यलक्षणेऽपि परस्परं मतद्वैधं विद्यते, गुणालङ्कारयुक्तौ शब्दार्थौ काव्यमिति वामनमतम्। अदोषावित्यधिकविशेषणयुक्तौ तौ इति मम्मटमतम्। एवमेव प्रभाकरमतम्। निर्दोषं गुणालङ्काररसवत् वाक्यं काव्यमिति भोजमतम्। गुणालङ्काररीतिरसोपेतः साधुशब्दार्थसन्दर्भः काव्यमिति वाग्भटमतम्। निर्दोषं गुणालङ्कारलक्षणरीतिवृत्तिमत् वाक्यं काव्यमिति पीयूषवर्षमतम्। रसादिमद्वाक्यं काव्यमिति शौद्धोदनिमतम्। एवमेव विश्वनाथादिमतम्। दृष्टार्थोपेता पदावली काव्यमिति दण्डिमतम्। "रमणीयार्थप्रतिपादकः शब्दः काव्यम्" इति जगन्नाथमतम्। ध्वन्यात्मकं वाक्यं काव्यमिति महिमभट्टमतम्। रसालङ्कारयुक्तं सुखविशेषसाधनं वा काव्यमिति केशवमिश्रमतम्। एवमन्यमतेऽप्यन्यविधम् (६)।

---

(६) 'काव्यशब्दोऽयं गुणालङ्कारयुक्तयो. शब्दार्थयोर्वर्त्तते' इति वामनवृत्ति। 'निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतं रसान्वितं कवि कुर्वन् कीर्तिं प्रीतिञ्च विन्दति' इति सरस्वतीकण्ठाभरणम्। 'साधुशब्दार्थसन्दर्भं गुणालङ्कारभूषितं स्फुटरीतिरसोपेतं काव्यं कुर्वीत कीर्तये' इति वाग्भटालङ्कार। 'निर्दोषा लक्षणवती सरीतिर्गुणभूषिता। सालङ्काररसानेकवृत्तिर्वाक् काव्यनामभाक्' इति चन्द्रालोक। 'काव्यं रसादिमत् वाक्यं श्रुतं सुखविशेषकृत्' इति शौद्धोदनि-

अलङ्कारनिबन्धाना रचनाप्रणाल्योऽपि विविधाः। वामन-सूत्रादौ दोषगुणालङ्काराः क्रमेण निरूपिताः। काव्या-दर्शादौ तु प्रथमं गुणः ततोऽलङ्कारः ततश्च दोष इति, (किन्तु सर्व्वत्रैव प्रथमं काव्यलक्षणमभ्यधायि)। वामनेन दर्शनशास्त्रसूत्ररीत्या सूत्राणि प्रणीय (१०), तेषां वृत्तिर-कारि, उदाहृतञ्चान्यकृतं काव्यम्। वाभटदण्डिप्रभृतिभिः पद्येनैव लक्षणमुदाहरणं लक्षणसमन्वयविचारादिकञ्च सर्व्वं प्रादर्शि (११)। एषैव पीयूषवर्षादीना रीतिः। भोजदेवा-दिभिः लक्षणादिकं पद्येन, विचारादिकं गद्येनाकारि। मम्मटादिभिर्वक्तव्यविषयः कारिकया संक्षेपेण प्रदर्श्य, वृत्त्या विस्तारितः, उदाहारि च अन्यप्रणीतमेव काव्यम्। जगन्नाथा-दिभिस्तु उदाहरणादन्यत् सर्व्वं गद्येनालेखि, व्यरचि च पद्येन सर्व्वमेव नूतनमुदाहरणम् (१२)। इत्येवं बङ्गीय

सूत्रम्। 'शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली' इति काव्यादर्शे। 'आदि-पदेन अलङ्कारपरिग्रहः, तथाच तदुभयान्यतरत्वं सुखविशेषसाधनत्वं वा लक्षणम्' इति अलङ्कारशेखरे।

(१०) सूत्रं वामनलक्षणमन्यलक्षणं वेति वामनवृत्तितो न ज्ञायते, किन्तु "यत्तु वामनेन उक्तम् 'रीतिरात्मा काव्यस्य' इति" इति साहित्यदर्पणादिदर्शनात् वामनलक्षणं सूत्रमिति व्यवह्रियते। 'रीतिरात्मा काव्यस्य' इति हि सूत्रम्।

(११) 'प्रसादवत् प्रसिद्धार्थम् (लक्षणम्) इन्दोरिन्दीवरद्युति। लक्ष्म लक्ष्मी' तनोतीति (उदाहरणम्) प्रतीतिसुभगं वच (समन्वय.)' इतिदण्डी।

(१२) 'निबोध नूतनमुदाहरणानुरूप काव्यं यथाऽयं निर्मित न परस्य किञ्चित्। किं सेव्यते सुमनसा मनसापि गन्ध कस्तूरिकालवनयक्लिश्यता मृगेण' इति रसगङ्गाधरे।

विभिन्नरूपत्वेऽप्यलङ्कारनिबन्धानां मुख्यफलांशे प्रायस्तुल्यतैव यस्य-कस्यचिदेव हि निबन्धस्य पाठात् स्थूलतः काव्यतत्त्वावगतिर्भवत्येवेति।

प्राचीनतराणां वामनवाभटदण्डिभोजदेवादीनां निबन्धाः अतीव प्रसन्नाः प्रायो विचारविहीनाश्च, स्थूलतः प्रकृतविषयप्रतिपादनार्थमेव हि ते प्रवृत्ताः—इति तदंशे तेषां निर्विवाद एवोत्कर्षः। युक्त्या स्वोक्तिमुपपादयतां सूक्ष्मञ्च विषयमाविष्कुर्वतां पुनर्मम्मटादीनां कठिना अपि निबन्धाः प्रतिपाद्यांशे नितराम् उत्कर्षमाश्रयन्ते।

प्राचीनेषु अलङ्कारनिबन्धेषु (अस्मदव लोकितेषु) वामनवृत्तिरेव उत्कृष्टा, तस्यां हि क्वापि क्वापि स्वोक्तौ समीचीना युक्तिरुद्भाविता, (शब्दशुद्धिं विना) अप्रासङ्गिकविषयो नावर्णि, नापि च श्रृङ्गाररसः, यदनुषङ्गात् अश्लीलतादोषस्य सम्भवः, अतएव नास्ति तत्राश्लीलता-दोष, नापि चेयं वृत्तिरतीव विस्तृता। प्रसिद्धेषु तावदलङ्कारनिबन्धेषु बालानां प्रथमपाठोयोगिनी एषैवेति मन्यामहे।

नवीनेषु निबन्धेषु रसगङ्गाधर एव प्रधानम्। अत्र हि नैकोऽपि विषयः (प्रायः) निर्युक्तिक उक्तः, प्रत्युत सर्व्वएव ते अतीव सूक्ष्मानुसन्धानेन निर्णीताः, (नवीनत्वेऽपि) नातीवाश्लीलतादोषः, नापिच रचनायाः काठिन्यं, (यच्च क्वापि क्वापि काठिन्यं दृश्यते, तत् प्रतिपाद्यविषयाणां दोषः, न ग्रन्थकर्त्तुः)। यानि नवीनानि उदाहरणानि प्रणीतानि,

तानि अतीवमनोहराणि (ततश्च अस्यावलोकने प्रसङ्गादभिनवकाव्यावगतिरपि भवति)। इत्येवमस्य बहवो गुणाः विद्यन्ते, केवलमेको दोषः, यदनेकत्र नैयायिकसमयानुसारितर्केण दूषणभूषणादिकरणमिति (१३)। तथाप्यलङ्कारशास्त्रे व्युत्पित्सूनामेतदध्ययनमतीवावश्यकमित्यङ्गीकुर्मः।

काव्यप्रकाशोऽपि नापकृष्टः, अत्र हि अश्लीलार्थः कोऽपि (दर्पण इव) न प्रतिपादितः, (केवलमुदाहरणान्येव कानिचिदश्लीलानि), नापिच लक्षणायाः अलङ्काराणाञ्च (दर्पण इव) निरर्थकमचमत्कारिणः बहवः भेदाः प्रदर्शिताः, वामनवाभटाद्यनालोचिता व्यञ्जना वृत्तिः व्यङ्ग्यार्थश्च सोपपत्ति सविस्तरञ्च न्यरूपि। दोषाश्च वामनदण्डिवाभटभोजदेवादिकृतानेकान् निबन्धानपेक्ष्य अत्र समीचीनतया निरूपिताः, वामनोक्तदशगुणानां स्वाभिमतगुणदोषाभावयोरन्तर्भावाय सुष्ठु युक्तिकौशलं प्रादर्शि। प्रायशः उत्कृष्टा एवालङ्कारा निरूपिताः, अनेकत्र लिपे सारवत्तापि विद्यते। इत्येवमत्र यथा बहवो गुणा विद्यन्ते, तथा दोषा अपि केचन। तथापि काव्यानुपयोगी, सङ्केतः कुत्र गृह्यते? गौर्वाहीक इत्यत्र कुत्र लक्षणा इत्यादेर्विचार, अनुप्रासोपमादीनलङ्कारान् अनिरूप्यैव तद्घटितध्वनिप्रभेदप्रदर्शनम्, यो हि अनुप्रासोपमादिकं न जानाति, स कथं तन्मूलकं ध्वनिप्रभेदम्

(१३) 'अपिच काव्यपदप्रवृत्तिनिमित्तं शब्दार्थयोर्व्यापकं, प्रत्येकपर्याप्तं वा?' इत्यादि। एतच्च नालङ्कारशास्त्रीयविचाराङ्गम्, यदुक्तं 'कठोरतार्किकाशयैरलङ्कारपरिक्रिया। वाणीकुठारकुद्दालैर्नालमन्तरवद्रुमम्' इति।

अवगुध्येत, अन्योदाहरणसम्भवेऽपि शृङ्गारोदाहरणप्रदर्शनेन निरर्थमश्लीलीकरणम्, तथा उपमालङ्कारस्य (वैयाकरण-रीत्या) क्यच्क्यङादिभेदेन अचमत्कारितया विभजनम्। सन्त्येवैवमादयो दोषाः बङ्गनिबन्धसाधारणाः, किन्त्वयमेको महान् दोषः, यत् कस्यचित्कस्यचिदंशस्य (१४) अभिप्रायो दुरधिगम इति, यं कृतधियोऽपि कृतिनस्तत्त्वतोऽधिगन्तुं नार्हन्ति। किमधिकम् एकेन यदंशस्य (१५) योऽभिप्रायोऽवाधारि, अन्येन तदंशस्यैव तद्विपरीत इति। अत एवास्य बह्वयटीकाः विद्यन्ते। (सम्भावयामः) काव्यप्रकाशस्य पण्डितसमाजे समादरणीयतायां काठिन्यमप्येको हेतुः, प्रायो हि पण्डिताः समीचीनविषयमपि प्रसादगुणवन्तं सन्दर्भं नाद्रियन्ते, निःसारमपि दुर्बोधमेव बहु मन्यन्ते। आस्तां तावत् काठिन्यं, तथाप्येषोऽप्यवश्यं पाठ्यो ग्रन्थः, साहित्यदर्पणाद्यपेक्षया गौरवत्तयोत्कृष्टश्चेत्यवश्यमङ्गीकुर्मः।

काव्यप्रकाशस्य द्वावंशौ कारिका वृत्तिश्चेति, 'भरतमुनिप्रणीता कारिका या अलङ्कारसूत्रनाम्ना व्यवह्रियते, मम्मटप्रणीता तु वृत्तिः, सैव काव्यप्रकाशनामभाक्' इति बङ्गीयाना प्रवादः। एनमेव प्रवादमवलम्ब्य काव्यप्रकाशादर्श-नामटीकाकृता महेश्वरेणालेखि, 'सुकुमारान् राजकुमारान् स्वादुप्रवृत्तिहारा गच्छने तर्कादिशास्त्रे प्रवर्त्तयितुम्

---

(१४) 'अनयोर्मध्यस्य लक्षणस्य च' (१२ पृष्ठे) इत्यादेः।

(१५) शेषविचारादे (२०६ पृष्ठे)।

अग्निपुराणादिभ्य उद्धृत्य काव्यरसास्वादकारणमलङ्कार-गणं भरतमुनिः कारिकाभिः संक्षिप्य प्रणिनाय।..... सम्प्रति ताः कारिकाः सोदाहरणं व्याख्यातुं कारिका-ग्रन्थादिभूतां नियतिकृतनियमरहितामिति चादिकारिकां व्याख्यातुमुपन्यस्यति ग्रन्थारम्भे इति' इति।

अविचारविजृम्भित एवायं प्रवादः, यदि कारिकाकृदेव भरतमुनिः स्यात् तदा चतुर्थेऽह्निके [३१ पृष्ठे] कारिकया उक्तस्यार्थस्य प्रमाणतया 'उक्तं हि भरतेन' इत्यादिना भरतोक्तिरुद्धृता न स्यात्। कः खल्वनुन्मत्तस्वयमुक्तायेव तदुक्तिं प्रमाणतया उपन्यस्यति। अपि च नाट्यसूत्रकृदेव (१६) भरतः प्रसङ्गात् रसादिविषयकान्यपि सूत्राण्येव प्रणिनाय, नत्वलङ्कारसूत्राण्यपि। अत एव नाट्याचार्यतयैव तस्य प्रसिद्धिः (१७)। अलङ्कारसूत्रतया प्रसिद्धं द्वयमेवाधिगत-मस्माभिः, एकं गौडोदनिकृतम्, अपरं वामनकृतम् (१८)। किन्तु गौडोदनिसूत्रोक्तकाव्यलक्षणविलक्षणं काव्यलक्षण-

---

(१६) 'यं नाट्यवेदं वेदेभ्यः आदायादाय ब्रह्मा कृतवान्, यत्सम्बद्धमभिनयं भरतश्चकार' इतिदमरूपम् १ पृ०।

(१७) '..... भरतमुन्यादिकृतिनं नाट्याचार्यं नमस्कुर्मः' इति नाट्य-प्रकाशः।

(१८) 'अलङ्कारविधायी सूत्रकारो भगवान् गौडोदनिः .. काव्यस्य सरूपमाह काव्यं रसादिमत् वाक्यम्' इति अलङ्कारोदयः। '..... काव्या-लङ्कारसूत्राणां सर्वा वृत्तिर्विधीयते' इति वामनसूत्रवृत्तिः।

माविष्कुर्वन् वामनसूत्रञ्च [१८१ पृष्ठे] दूषयन् मम्मटो नानयोः प्रामाण्यमङ्गीचकार।

ततश्च 'वृत्तिकृन्मम्मट एव कारिकामपि प्रणिनाय' इति पाश्चात्यानां प्रवाद एव साधीयान्। कारिकया अनुक्तायाः अपि वृत्त्युपदर्शितमालोपमायाः दृष्टान्ततासङ्गावयन्ती 'माला तु पूर्ववत्' [२४६ पृष्ठे] इति कारिकैवास्य प्रवादस्य प्रामाण्यं व्यवस्थापयति, एषा हि 'पूर्ववत्' इत्यनेन मालोपमायाः पूर्वोक्ततां व्यनक्ति, न च मालोपमा कारिकया पूर्वमुक्ता, किन्तु वृत्त्यैवेति। अत्रानुकूलानि च बहूनि ग्रन्थकृल्लिखनानि सन्ति। तथाहि "यत्तु येनास्यभ्युदितेन..... इत्यत्र समासोक्तिरनुग्राहिकेति मम्मटभट्टैरुक्तम्, तत्र विचार्य्यते, अत्र विशेषणसाम्यमहिम्ना प्रतीयमानः कापुरुषदृष्टान्तः किं प्रस्तुतः, आहोस्विदप्रस्तुतः? आद्ये समासोक्तेर्विषय एव नास्ति, 'परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः' इति समासोक्तेर्लक्षणस्य तैरेवोक्तत्वात्" इति रसगङ्गाधरः। "प्रथमं कारणं विवृतः सावतरणिकां (१९) कारिकामाह, 'अस्य कारणमाह शक्तिर्निपुणता...' इति" इति निदर्शनम् (२०)। 'दुरितशान्तये ग्रन्थकृत् संस्तौति, नियतिकृतेति'

---

(१९) अवतरणिका तु वृत्तिरूपा, तथाच येनैव वृत्तिरकारि तेनैव कारिकेत्यायाति, वृत्तिकृत्तु मम्मटः।

(२०) अवतरणे निदर्शनमन्यत्र ग्रन्थकृतो नामानुल्लेखात् कोऽसौ निदर्शनकृत्? इति वयं तत्त्वतो न जानीमः, वृत्तावेवस्तु वासवदत्ताविज्ञापने (१६ पृष्ठे) 'पण्डिताः किंवदन्त्यनुसारिणः सभ्यास्तत्कारिणश्च' इति कथयन् अनुपदमेव 'निदर्शनं

कृतिकाव्यप्रदीपव्याख्यानावसरे 'ग्रन्थकृत् मम्मटः' इति उद्द्योतः। 'तच्च तद्दोषौ शब्दार्थौ ' इति प्रकाशकारेण(२१) उक्तम्' इति रसप्रदीपः।

सत्यं मम्मट एव कारिकाकृत्, किन्तु नासौ सर्व्वा अभिनवाः कारिकाश्चकार, क्वचिदविकला क्वचिच्च अंशतो विकला कृत्वा अन्यकृतिमपि (तत्तत्कृतिना नामान्यनुल्लिख्यैव), स्वकृतावन्तर्भावयामास, तथाहि रसतरङ्गिण्या भानुदेवधृतं 'शृङ्गारहास्य ' इति भरतसूत्रं 'रतिर्हासश्च ' इति च तत्सूत्रं, वामनवृत्तिस्थं 'कर्णावतंसादिपदे ' इति श्लोकश्च अविकलमेव [यथाक्रमं ४० पृष्ठे, ४४ पृष्ठे, १५४ पृष्ठे] स्वकृते कारिकायाः अन्तश्चिक्षेप, तथा 'प्रयान्ति रसरूपताम्' इत्यन्त्यमंशं 'समाख्यातास्तु नामतः' इत्यन्ययाकृत्य व्यभिचारिभावविभाजकानि 'निर्व्वेदग्लानि ' इत्यादीनि भानुदेवधृतानि भरतसूत्राण्यपि [४५ पृष्ठे] जग्राहेति।

गितिकण्ठकृतम्' इति कथमवधृत्य लिलेखेति वयं न जानीमः। निदर्शनकारो हि स्वनामानुल्लिख्य 'प्रणम्य सारदां काव्यप्रकाशो बोधसिद्धये। पदार्थविवृतिद्वारा गितिकण्ठस्य दर्श्यते' इति प्रतिज्ञाय गितिकण्ठस्य (गिरस्य) आगमप्रसिद्धान् षट्त्रिंशत्तत्त्वरूपान् पदार्थान् प्रदर्श्य काव्यप्रकाशं व्याचख्यौ। ग्रन्थोल्लाससमाप्तौ च 'इति श्रीकाव्यप्रकाशे गितिकण्ठविबोधने काव्योद्देशदर्शनं प्रथमम्' इति लिलेख। अन्यत्रापि च स्वनाम नोल्लिलेख। कथं वा इलसाढेनोक्तिमात्रादेव व्याकरणमवलम्बेत। प्रतिज्ञाश्लोकस्य—'गितिकण्ठस्य'-इत्यत्र षष्ठीविभक्तिं कर्त्तरि विहितेति स्वीकृत्य।

(२१) इत्ते प्रकाशरूपते सर्व्वेषामैकमत्येन न तत्प्रामाण्याय यतामहे।

मम्मटेन वामनप्रदर्शिता एव शब्दार्थगुणा अलङ्कार-दोषाश्च उद्धृत्य दूषिताः। काव्यस्य स्वरूपं कारणञ्च वामनोक्त-प्रतिकृतिरूपमेव (२२) प्रदर्शितमिति (सम्भावयामः) मम्मटस्य काव्यप्रकाशनिर्म्माणार्थमवलम्बनीयेषु निबन्धेषु एकतमो वामननिबन्ध इति।

काव्यप्रकाशस्य उल्लासाभिधेयाः दश विभागाः। तत्र प्रथमे विभागे क्रमेण काव्यस्य फलं कारणं स्वरूपम् उत्तम-मध्यमाधमरूप-त्रिविधप्रभेदश्च न्यरूपि। द्वितीये शब्दार्थ-विभागः, आर्थी व्यञ्जना, वाचकशब्दः, मतभेदेन सङ्केतितार्थः, लक्षणा, लक्षणामूला व्यञ्जना, अभिधामूला च सा। तृतीये अर्थस्य व्यञ्जकता। चतुर्थे ध्वनिकाव्यप्रभेदाः, रसभावादयः। पञ्चमे मध्यमकाव्यप्रभेदाः व्यञ्जनावृत्तिसंस्थापनयुक्तिश्च। षष्ठे अधमकाव्यप्रभेदयोः स्वरूपम्। सप्तमे दोषाः, कुत्रचित् तेषामदोषता च। अष्टमे गुणालङ्कारयोर्लक्षणम्, त्रयो गुणाः, वामनोक्तदशगुणानाञ्च स्वोक्तेष्वन्तर्भावः। नवमे

---

(२२) तददोषौ शब्दार्थौ सगुणावित्ति स्वरूपाभिधायिका, 'काव्यं ग्राह्य-मलङ्कारात्। स दोषगुणालङ्कारहानादानाभ्याम्' इति वामनसूत्रद्वयमनुवदति। तथा शक्तिर्निपुणतेति कारणाभिधायिका कारिका, 'लोको विद्या प्रकीर्णञ्च काव्याङ्गानि। लोको लोकवृत्तम्। लोक स्थावरजङ्गमात्मा तस्य वर्त्तनं वृत्तिरिति' इत्यारभ्य, 'कवित्वबीजं प्रतिभानम्। कवित्वस्य बीजं प्रतिभानं जन्मान्तरानुभवसंस्कारः, यस्मात् विना काव्यं निष्पद्यते, निष्पन्नं वा हासाय तनं स्यात्' इत्यन्तं वामनसन्दर्भमनुवदति। काव्यटस्तु 'प्रतिभा कारणं तस्य व्युत्पत्तिस्तु विभूषणम्। भूयोत्पत्तिरदभ्यास एवं काव्यव्यवस्थिति' इति माह।

रीतयः, शब्दालङ्काराश्च । दशमे अर्थालङ्काराः वामनोक्तानामलङ्कारदोषाणां स्वोक्तेष्वन्तर्भावश्च न्यरूपि ।

काव्यप्रकाशकृतो मम्मटस्येतिवृत्तं न किमप्यास्माभिः, केवलं निदर्शनग्रन्थात् (२३) एतदवगम्यते, यत् शैवोऽयमासीदिति (२४)। मम्मटः कं देशं जन्मना अलञ्चकारेति निर्णयप्रवृत्ताः, कदाचित् 'काश्मीरदेशीयः' इति सम्भावयामः, यदस्य मम्मटेतिनाम देशान्तरासुलभस्य काश्मीरेतिहासराजतरङ्गिणी-सप्तमतरङ्ग-१०४१ श्लोकादुल्लिखितधम्मटेत्यादिनाम्नः साहश्यमनुभवति । कदाचित्तु मिथिलातिप्रसिद्धेन भट्टित्युपनाम्ना 'मैथिलः' इति । किन्तु तत्त्वतः किमपि निर्णेतुं न शक्नुमः । एवं कदा अनेन काव्यप्रकाशो निरमायीत्यपि दुर्निरूप्यम् ।

कश्चित्तु रत्नावलीनाटिकासमयावधारणपरम् अध्यापकवरस्य फोरेस् हिस्यान् उद्दलसन् साहेबस्य सिद्धान्तं संस्मरन् काव्यप्रकाशे रत्नावलीमुद्धृतामालोक्य ब्रूयात् १११३ परिमिताब्दात् उत्तरकालमेव सन्दर्भो मम्मटेन निरमायीति निरधारयत् । अध्यापकवर उद्दलसन् साहेबो हि कल्हणकृते राजतरङ्गिणीनामनि काश्मीरेतिहासनिबन्धे, हर्षनृपतेः

---

(२३) 'इति विद्यागणप्रसिद्धा षड्विंशत्तत्तदीयाखण्डितसकलसकटप्रकटितसत्स्वरूपविदामस्मदुक्त सज्ञानकुलको मम्मटनामा दैशिकवर' इति।

(२४) वस्तुतः मम्मट शैव एवेति निदर्शो नास्ति। निदर्शनकर्ता तु अत्र शैवागमप्रदर्शनार्थमेव मम्मटस्य शैवत्वमारोप्य, इतिविद्यागणप्रसिद्धेत्यादि विशेषणं दत्तवानिति सम्भावयाम ।

'सोऽयेपदेश्यभाषाज्ञः सर्व्वभाषासु सत्कविः ।
कृत्स्नविद्यानिधिः प्राप ख्यातिं देशान्तरेष्वपि ॥
(७म ६११ श्लोकः) ।

इतिविशेषणं पश्यन्नेव (सम्भावयामः) रत्नावलीप्रस्तावनायां, श्रीहर्षो निपुणः कविरितिश्लोकस्थितस्य श्रीहर्षपदस्य श्रिया (श्रीयुक्तः) हर्षः (हर्षनामा) इति व्युत्पत्तिं मनसि कल्पयन् काश्मीराधिपतेर्हर्षस्यैव कृती रत्नावलीति समादधे (२५) निश्चिकाय च काश्मीरेतिहासदर्शनेन, पृ० १११३ संख्यकाब्दे हर्षः काश्मीरराजसिंहासनमारुरोहेति ।

परन्तु राजतरङ्गिण्यां सविस्तरं वर्णितेऽपि हर्षदेवचरिते रत्नावल्या अनुल्लेखात्, श्रीहर्षेतिसमुदितपदस्यैव (न तु हर्षेत्येतावन्मात्रस्य) रत्नावलीकर्त्रामतया ग्रन्थकृद्भिः (२६) उक्तत्वाच्च, न केवलं साधारणविशेषणमवलम्ब्य रत्नावली हर्षकृतिरित्यङ्गीकर्त्तुमुत्सहामहे ।

वस्तुतः काश्मीराधिपतेर्हर्षदेवस्य पूर्व्वमपि रत्नावली आसीद्-

---

(२५) IN HIS HINDU THEATRE

(२६) 'श्रीहर्षादेर्धावकादीनामिव धनम्' इति काव्यप्रकाशव्याख्यानावसरे 'श्रीहर्षो राजा ... धावकेन रत्नावली' नाटिकां तन्नाम्ना स्वया बहुधनं लब्धम्' इति प्रकाशदर्पे मङ्केश्वरः । 'धावकः कविः । स हि श्रीहर्षनाम्ना रत्नावलीं स्वया बहुधनं लब्धवान्' इति व्याख्याते नागेशभट्टः । 'श्रीहर्षस्य राज्ञो नाम्ना रत्नावलीनाटिकां स्वया धावककाव्यकर्त्रिबहुधनं लब्धवान् इति प्रसिद्धम्' इति प्रकाशप्रभायां वैद्यनाथः । तथा 'धावकनामा कविः स्वकृतां रत्नावलीं नाम नाटिकां विक्रीय श्रीहर्षनाम्नो राज्ञः सकाशात् बहुधनं प्राप्येति पुराणवृत्तम्' इति प्रकाशतिलके जयराम ।

इत्यनुपदमेव प्रतिपादयिष्यते, ततः कथं स तां निबबन्ध ? मालवाधिपतिर्भोजो हि सरस्वतीकण्ठाभरणे (२७) बद्धशो रत्नावलीम् दधार। भोजदेवश्च ३-दिनोत्तर-७-मासाधिक-५५-मितवर्षाण्येव(२८) राज्यम् प्रत्यपालयत्। यदा च हर्ष-देवपितामहोऽनन्तदेवः काश्मीरं प्रतिपालयामास, तदैव भोजो मालवम्(२९)। अनन्तदेवश्च खृ० १०६५ मिताब्दस्याभ्यन्तरे राजा आसीदिति (३०) भोजदेवस्यापि स एव राज्यकाल इति निर्णीयते। इममेव किञ्चिन्नूनाधिकं भोजदेव-राज्यकालतया सर्व्व एव (डुंलण्डीयानिंलण्डीयाः) इतिहास-वेत्तारो मेनिरे (३१)। अहल्सन्साहेबेन दशकुमार-

---

(२७) मालवाधिपतेर्भोजदेवस्य इति. सरस्वतीकण्ठाभरणमिति अहल्सन्-साहेबोऽपि मेने, नाम्यत्र कस्यापि वैमत्यं दृश्यते। लिखितञ्च अन्यत्रास्माभिरेव।

(२८) 'पञ्चाशत्पञ्चवर्षाणि सप्त मासा दिनत्रयम्।
भोजराजेन भोक्तव्यम् सगौड' दक्षिणापथम्' इति भोजप्रबन्ध।
एवमेव भोजचरितादय., तत्तच्च नात्राशे भोजप्रबन्धस्याप्रामाण्यग्रहो कार्य्यो।

(२९) 'मालवाधिपतिर्भोज' प्रहितैः रत्नसञ्चयैः।
अकारयत् येन कण्ठाभोजनं कटकेश्वरे॥'
इति अनन्तदेवेनिष्टत्तरणेनावसरे अहणराजतरङ्गिणीसम्मतरङ्गस्य १६० श्लोकः।

(३०) अनन्तदेवो हि अनन्तरं प्रतिपादयिष्यमाणात् हर्षदेवराज्यकालात् खृ० १०८१-मिताब्दात् २६-मितवर्षपूर्वं काश्मीरेष्वधितिष्ठासीदिति। एतच्च क०रा० त० ७ त० पाठात् किंवा ७ तरङ्गस्य ११६ मितश्लोकादधि-२१६ मित-श्लोकपर्य्यन्तादेवं ०२४ मितश्लोकाच्चावगम्यते।

(३१) See Asiatic Society's Journal for 1865, Vol. xxxii, Page 91.

चरितविज्ञापने, '१०००-मितवर्षाभ्यन्तर एव भोजराज्यकालः' इति जनश्रुतिमवलम्ब्य दण्डाचार्य्यस्य समयोऽवाधारि। ततश्च उद्दलसन्नाहेवनिर्णीतात् हर्षदेवस्य राज्याधिकार-समयात् ११९३ मिताब्दात् पूर्व्वमेव राज्यमधिकुर्व्वता भोज-देवेन धृततया रत्नावली (हर्षदेवात्) प्राचीनेति प्रतिभाति।

अपिच धनिकापरनामा धनञ्जयो दशरूपनिबन्धे बऊशो रत्नावलीमुदाजहार। धनञ्जयश्च मुञ्जनृपतेः सभ्य आसीत् (३२)। मुञ्जश्च भोजदेवस्य पूर्व्वं मालवराजसिंहा-सनमलञ्चकार (३३)। अतएव इतिहासवेत्तारः ख्रः १०३०-मिताब्दाभ्यन्तर एव मुञ्जस्य राज्यकाल इति निर्णय-चक्रुः (३४)। ततश्च मुञ्जराजराज्यकाले हर्षदेवस्य जन्मापि नासीत् किन्तु तत्कृतीरत्नावली आसीदित्यतीव कौतुकम्।

यदिच 'श्रीहर्षादेर्धावकादीनामिव धनम्' इत्येव काव्य-

---

(३२) 'विष्णोः श्रुतेनापि धनञ्जयेन विद्वन्मनोरागनिबन्धहेतुः।
आविष्कृतं मुञ्जमहीशगोष्ठीवैदग्ध्यभाजा दशरूपमेतत्' इति दश-रूपकेपद्यम्।

(३३) भोजप्रबन्धभोजचरितादिषु एवमेव लिखितमस्ति; इतिहासविदा-मप्येतत् सम्मतम्। उद्दलसन्नाहेवस्यापि नात्र विप्रतिपत्तिः। सरस्वती-कण्ठाभरणधृतात् 'सौजन्याम्बुनिधे बुधप्रिय गुणग्राकारधर्म्मद्रुम ..... श्रीमन्मुञ्ज किमित्यमुं जनमुपस्थातुं वृथा नार्हसि' इति श्लोकादपि अवधार्य्यते, यत् भोजदेवात् पूर्व्वं मुञ्ज आसीदिति।

(३४) एतच्च हिन्दुनाटकाभिधानपरे सन्दर्भे अवश्रुतिसमयावधारणवेलायाम् उद्दलसन्नाहेवोऽप्यपि संवदति।

प्रकाशपाठः(३५) स्यात्, तस्य च 'श्रीहर्षाख्यस्य राज्ञो नाम्ना रत्नावलीं कृत्वा धावकाख्यः कविर्बन्धनं लेभे' इत्येवार्थः स्यात्, एवं मालविकाग्निमित्रप्रस्तावनायां, 'प्रथितयशसां धावक-सौमिल्लकविपुत्रादीनां प्रबन्धानतिक्रम्य वर्त्तमानकवेः कालिदासस्य कृतौ किंकृतो बहुमानः' इत्येव पाठः (३६) स्यात्, तदुक्त एव च धावकः रत्नावलीकारः स्यात्। तदा हर्षदेवो दूरे आस्तां, कालिदासविक्रमादित्यादेरपि पूर्वं (समकालं वा) रत्नावली निरमायीत्यसंशयं वक्तुमुत्सहामहे।

कथञ्च अध्यापकवरेण उद्भूतोत्साहेवेन कश्मीरेति-

---

(३५) 'काव्यप्रकाशनिदर्शने श्रीहर्षादेर्बाणादीनामिव धनम्' इति पाठः। वासवदत्ताविज्ञापने श्रीमता कृष्णसाहेवेन एनमेव पाठं मूलीकृत्य युक्त्यनुप्रदर्शनेन 'रत्नावली बाणकृता' इति निरधारि। वस्तुतस्तत्प्रदर्शिता युक्तयः संशयमेवोत्थापयितुं क्षमन्ते, न तु निर्णयमिति। एषा हि तस्य बलवती युक्तिः, यत् रत्नावलीस्थः 'द्वीपात् .....' इति श्लोकः बाणकृते हर्षचरितेऽप्यस्तीति उभयोरेक एव कवयितेति। अत्रेदं मूमः, अविशेषेण स्ववक्तव्यमर्थं प्रतिपादयन्त्या अन्यकृतेरपि स्वकृतावन्तर्भावनम् संस्कृतकाव्यकृतामप्युपगतम्। दृष्टो हि विभिन्नकविविरचितयोरपि शिवपुराणकुमारसम्भवयो. 'तदिच्छामि विभो.....' इत्यादिश्लोकः एकरूप एवेति एवमन्यत्रापि। कथञ्च कृष्णसाहेवेन स्वोक्तिं समर्थयितुं 'अहो प्रभावो वाग्देव्या यन्मातङ्गदिवाकर। श्रीहर्षस्याभवत् सभ्यः समो बाणमयूरयोः' इति साईश्वरपद्धतिस्थश्लोकात् 'बाणः श्रीहर्षस्याप्यतम. सभ्य आसीत्' इति निर्णीतम् तदपि न जानीम., वयन्तु उक्तश्लोकात् बाणमयूरयोस्तुल्य. (नत् सहित.) मातङ्गदिवाकरः श्रीहर्षस्य सभ्योऽभवदित्येवावगच्छाम.।

(३६) 'अत्यल्पसंख्यकविद्वाशयस्यैकलिखितपुस्तकद्वये 'धावकः' इत्यत्र 'भासक.' इति पाठोऽस्ति।

इासदर्शनात्, '१११३-मिताब्दे हर्षदेवो काश्मीरराजसिंहासनमारुरोह' इति निरधारि, तदपि वयं न जानीमः। वयन्तु कल्हणकृत-काश्मीरेतिहास-राजतरङ्गिण्यनुसारेण 'हर्षदेवो खृ० १०८१-मिताब्दादुत्तरं १०९७ मिताब्दाच्च पूर्व्वं काश्मीरराज्यमधिचकार' इत्येव निरूपयामः। तथाहि कल्हणनामा कविः १०७० मितशकाब्दे ११४८ मिते खृष्टाब्दे २४-चतुर्विंशे लौकिकेऽब्दे (३७), राजतरङ्गिणीमारभमाणः २५ पञ्चविंशलौकिकाब्दीयमपि (३८) जयसिंहराजवृत्तान्तं वर्णयन् जयसिंहनृपतिराज्यकाले (३९) एव ता समापयामास। अतत्य २४ चतुर्विंशलौकिकाब्दशब्देन, यस्याः १०० शताब्द्याः ६५ पञ्चषष्टितमाब्दादुत्तरं ७१ एकसप्ततितमाब्दमध्ये हर्षदेवो काश्मीराधिपत्यमासासाद, तदनन्तर-१०० शताब्द्याः २४ चतुर्विंशाब्दो ग्राह्यः (४०)। ततश्च हर्षदेवराज्यारम्भकाल-

---

(३७) 'लौकिकेऽब्दे चतुर्विंशे शकस्यास्य समागतम्।
सप्तत्यात्यधिकं जातं सहस्रं १०७० परिवत्सरा' इति रा० त० १म० ५२ श्लोक०।

(३८) 'सावत्ये शासति राज्यस्य पञ्चविंशतिवत्सरे' इति रा० त० ८म त० ३५०५ श्लोक०।

(३९) 'सुत सुस्थलभूभर्त्तुः सम्प्राप्यप्रतिमक्षम।
नन्दयन् मेदिनीमाले जयसिंहमहीपतिः' इति रा० त० ८म त० ३५५० योपश्लोक।

(४०) एतच्च राजतरङ्गिणीदर्शनात् किंवा तस्या सप्तमतरङ्गस्य १२७। २२१। २६१। ४५७। ५८८। ६७७। ७२४। १०४१। १२२१। १२६६-श्लोकानाम् एवं अष्टमतरङ्गस्य ३४४। ६३६। ६६८। ८२१। ८४६। १०५५। ११५६। १३८०।

राजतरङ्गिणीनिर्म्मितिकालयोरन्तरा ५२ द्विपञ्चाशत् वर्षाणि गतानीति सिध्यति, ततश्च इदं राजतरङ्गिणीनिर्म्मिति-समयं ५२ द्विपञ्चाशता हीनीकृत्य यः समय आयाति, तस्मात् पूर्व्वं, यश्च तं समयं ५८ अष्टापञ्चाशता हीनीकृत्य समय आयाति, तस्मादनन्तरं हर्षदेवराज्यारम्भकाल इति निर्णीयते, तथैव च यथोक्तसङ्ख्या सम्पनीपद्यते इत्यलमतिधिक्षावेशेन।

'मम्मटेन कदा काव्यप्रकाशो निरमायि ?' इति प्रश्नस्य उत्तरतया खृ० १३३५-मिताब्दात् पूर्व्वमेव निरमायीत्येतावन्मात्रमवधृत्य उच्यते, यतः १३३५-मिताब्दकालीनेन माधवाचार्य्येण सर्व्वदर्शनसङ्ग्रहे पातञ्जलदर्शनप्रस्तावे 'तदुक्तं काव्यप्रकाशे' इत्यादिना काव्यप्रकाशोऽधारि (४१) इति।

एवं यदि काव्यप्रकाश-(२८५ पृष्ठ-)-धृत—'.....भोजनृपतेस्त्यागशीलायितम्' इति श्लोकोक्तभोज एव पूर्व्वोक्त-मालवाधिपतिरासीदिति स्यात्, तदा पूर्व्वोक्तात् भोजराज्य-कालात् १०६५-मिताब्दात् परमेव काव्यप्रकाशो निरमायीत्यपि वक्तुं शक्यते। भोजराजसम्बन्धिनामेषां पद्यानां भोजदेवात् पूर्व्वमसम्भवादिति।

आस्तामेतत् प्रकृतमनुसरामः। काव्यप्रकाशस्यास्य गूढ़ाभिप्रायमाकलय्य अतत्यभूतपूर्व्वसंस्कृतविद्यालयाध्यक्षेण

१८४८। २१८६। २३१०। २७३२। ३२८०। ३५०५-श्लोकानाञ्च दर्शनादपि स्फुटं प्रतीयते।

(४१) ११३५-मिताब्दे काव्यप्रकाशो दिवत्व सर्व्वेषामेवैकमतमस्ति।

महता श्रीयुता दू० वि० काउएल्साहेवेन कठिनतरेषु केषुचित् केषुचित् स्थानेषु प्रदीपानुसारेण संक्षेपतस्तात्पर्य्यमात्रप्रकाशनपुरःसरं काव्यप्रकाशमुद्रणायाहमन्वरुध्ये। तदनुरोधवशंवदेन च मया तथैवाष्टतीयं, पुस्तकचतुष्टयम् (एकं कलिकातापूर्व्वमुद्रितम्, द्वितीयं हस्तलिखितं संस्कृतविद्यालयस्थम्, तृतीयं श्रीयुतां पूज्यपादानां तारानाथतर्कवाचस्पतीना हस्तलिखितम्, चतुर्थं क्रीतं काशीप्रदेशीयम्) अवलोक्यास्य मुद्रणमकारि। तथापि सर्व्वतः काठिन्यानपगममालोच्य विज्ञाप्य च श्रीयुतम् दू० वि० काउएल्साहेवं, सर्व्वत्रैव विवरणसहे स्थाने शब्दार्थविवरणसहिताभिप्रायप्रकाशनायाऽहमयते। न जाने किं फलमजनि।

अस्मिंश्च तात्पर्य्यविवरणाभिधे व्याख्याने क्वचित् पूर्व्वेषां व्याख्याकृतां सन्दर्भा अविकला एवोद्धृताः, क्वचिच्च शब्दान्तरेण तेषामभिप्रायाः अनूदिताः। यत्र च तेषां व्याख्यानं नात्यभमरोचत, तत्रैव स्वाभिप्रायेण व्याख्याऽकारि। प्रायः पूर्व्वेषां व्याख्यानं तर्कशास्त्रानुसारिण्यैव रीत्या लिखितमिति बालानां दुर्बोधम्; अत्र तु बालानाम् बोधोपयोगिनीं कोमलामेव रीतिमवलम्बितुं विशेषो यत्नोऽकारि।

अस्य तु सदसद्विवेचने संशोधने च अध्येषितैर्मद्गुरूणामन्यतमैरदेवगुरुभिरप्यनेकभूदेवगुरुभिः श्रीमद्भिस्तारानाथतर्कवाचस्पतिभिराद्योपान्तमलोकि समशोधि च, ततश्च तैः सविशेषमनुगृहीतोऽस्मीति।

एतच्चातीव दुःखाकरोति, यद् यस्य महात्मनः प्रयत्नात् इदं सम्पन्नम्, सोऽयं श्रीमान् इ० वि० काउएल्साहेबोऽधुना यत्र नास्तीति ।

उत्पाट्यवारि परितोऽर्पयतः प्रयत्नात्
यस्याङ्कुरित एष तरुः फलाय ।
सोऽयं चिराय निजदेशनिवासमिच्छन्
हा हन्त ! सम्प्रति जहाविममेव देशम् ॥

श्रीमहेशचन्द्रशर्मा ।

कलिकाता संस्कृतविद्यालयः ।
संवत् १९२३ । कृष्टाब्दः १८६६ ।

PREFACE.

—oo—

Of all the Hindu treatises on Rhetoric there is none which can be compared for originality and vigour with the Kávya Prakás'a. Unfortunately its style is so terse that it is not unfrequently very obscure, and hence it is one of those books which lose half their value, if they are printed without a commentary. But in order that a commentary should be useful, it must be easier than the text which it is to explain;—this is by no means the case with the one which I have seen, the Kávya Prakás'ádars'a of Mahes'wara.

My friend and teacher, Pandit Mahes'a Chandra Nyáyaratna, undertook, at my request, to prepare a commentary suitable for the students of the Sanskrit College; and I had hoped to have read the sheets with him as they were printed. Before the work, however, was half done, I was obliged from ill-health to leave India; but he has carried on the printing during my absence; and I feel confident that his commentary will contain all that can be required to understand the original text.

London,
The 28th June, 1866.

Edw. B. COWELL.

द्वितीयसंस्करणस्य

विज्ञापनम् ।

अस्मदध्यापकानामन्यतमैर्महामहोपाध्यायैः श्रीयुक्तमहेश-चन्द्रन्यायरत्नमहाशयैः सहैव तात्पर्य्यविवरणेन मुद्रितस्य काव्यप्रकाशग्रन्थस्य निःशेषतामवलोक्य विद्यार्थिभिर्विशेषतो बोम्बे-माद्राज्-प्रदेशवासिभिः पुनःसंस्करणाय बहुशोऽनुरुद्धाः न्यायरत्नमहाशयाः स्वपुत्रं श्रीमन्मथनाथविद्यारत्नभट्टाचार्य्य-मस्य पुनःसंस्कारकर्म्मणि न्ययुङ्क्त । स च संशोध्य कियत-एव उल्लासानङ्कापयित्वा राजकर्म्मणि नियुक्तः समर्थं नालभत । ततश्चात्राधिकृतेन मया यथामति संशोधन-पुरःसरं पुनः संस्कृत्यायं ग्रन्थः प्राचारि ।

अस्मिंश्च संस्करणे कुत्रापि किमपि परिवर्त्तनं नाङ्गीकारि, नवमदशमयोस्तु पुनरुल्लासयोस्तात्पर्य्यविवरणे क्वचित् क्वचित् क्वचित् क्वचित् पाठव्यतयो गुरुभिरेव व्यधायि । आ तृतीयादुल्लासात्, तात्पर्य्यविवरणं संच्छिन्नमिति छात्राणां महतीवोपकाराय वर्त्तते इत्याकलय्य प्राथमिकस्यापि उल्लास-त्रयस्य विशदविवरणचिकीर्षामचिरादेव गुरवः सफलता-मानेष्यन्तीत्यलम् ।

कलिकाता ।

निउइण्डियान् स्कुल । श्रीश्यामाचरणदेवशर्म्मा ।

संवत् १८४४ । खृष्टाब्दः १८८७ ।

निर्देशानुसारि सूचीपत्रम् ।



विषयः
प्रथमस्य उल्लासस्य
काव्यप्रयोजनकारण-
स्वरूपविशेषनिर्णयः ।

विषयः	पृष्ठस्य	पङ्क्तौ
तत्र प्रथमोल्लासारम्भः	१	१
मङ्गलाचरणम्	१	३
काव्यस्य प्रयोजनम्	१	१३
,, कारणम्	२	१५
,, स्वरूपम्	३	१२
उत्तम (ध्वनि)-काव्यम्	४	७
मध्यम-(गुणीभूतव्यङ्ग्य)-काव्यम्	५	५
अधम-(चित्र)काव्यम्	५	११
प्रथमोल्लाससमाप्तिः	५	२०

विषयः
द्वितीयस्य उल्लासस्य
शब्दार्थनिर्णयः ।

विषयः	पृष्ठस्य	पङ्क्तौ
तत्र द्वितीयोल्लासारम्भः	६	१
शब्दभेदाः	६	२
अर्थभेदाः	६	४
तात्पर्यार्थः	६	६
अर्थव्यञ्जकता	७	१
वाचकशब्दः	८	१
वाच्यार्थनिर्णयः	८	६
अभिधाविचारः	१०	२
लक्षणा	१०	६
उपादानलक्षणा	११	५
लक्षणलक्षणा	११	६
आक्षेपार्थागम्यत्वे न लक्षणा	११	१२
लक्षणाया प्रयोजनप्रतीतिः	१२	७

विषय	पृष्ठस्य	पङ्क्तौ
सारोपा लक्षणा	१३	४
साध्यवसाना ,,	१३	८
गौणी ,,	१४	२
शुद्धा ,,	१४	२
गौणीशुद्धयोः फलतः लक्ष्यार्थ-निर्णय	१४	४
लक्षणाया षड्विधत्वम्	१६	४
गूढव्यङ्ग्यम्	१६	८
लक्षणाया त्रैविध्यम्	१६	१८
लाक्षणिकशब्दः	१७	२
लक्षणामूलव्यञ्जनाव्यव-स्थापनम्	१७	६
अभिधामूला व्यञ्जना	१७	१२
संयोगादिनैकार्थनियमनम्	२०	६
व्यञ्जकशब्द	२१	११
शब्दस्य व्यञ्जकतायाम्प्रयोजकत्वम्	२१	१२
द्वितीयोल्लासस्समाप्तिः	२१	१६

विषयः
तृतीयस्य उल्लासस्य आर्थव्यञ्जकतानिर्णयः ।

विषय	पृष्ठस्य	पङ्क्तौ
अथ तृतीयोल्लासारम्भः	२२	१
आर्थी व्यञ्जना	२२	१
शब्दादीनां वैशिष्ट्ये व्यञ्जनोदा-हरणम्	२२	१
अर्थव्यञ्जकतायां शब्दस्य साहाय्यम्	२६	७
तृतीयोल्लासस्समाप्तिः	२६	१२

विषयः
चतुर्थस्य उल्लासस्य रसादिनिरूपण-सहितध्वनिकाव्यप्रभेद-निरूपणम् ।

विषय	पृष्ठस्य	पङ्क्तौ
अथ चतुर्थोल्लासारम्भः	२७	१
अविवक्षितवाच्यध्वनिः	२७	४
अर्थान्तरसंक्रमितवाच्य-ध्वनिः	२७	५
अत्यन्ततिरस्कृतसंक्रमितवाच्य ध्वनिः	२७	५
विवक्षितान्यपरवाच्यध्वनिः	२८	१
असंलक्ष्यक्रमव्यङ्ग्यध्वनिः	२८	४
विभावानुभावव्यभिचारिणः	३०	७
रसस्वरूपम्	३०	११
रसनिष्पत्तिः भट्टलो-ल्लटादिसम्मता	३१	२
,, शौद्धोदनिसम्मता	३१	८
,, भट्टनायकसम्मता	३१	७
,, अभिनवगुप्तसम्मता	३५	१
रसविभागः	४०	१८
रसभोगः	४१	२

विषय	पृष्ठस्य	पङ्क्तौ
रसानामुदाहरणानि	४१	५
विप्रलम्भ	४१	१४
स्थायिभावा	४४	१४
व्यभिचारिभावा	४५	१
शान्तरस	४५	११
भाव	४६	१
रसाभासभावाभासौ	४७	४
भावस्य शान्तिरुदय. सन्धि शबलता च	४८	२
भावशान्त्यादीनां क्वचित् प्राधान्यम्	४९	१०
संलक्ष्यक्रमव्यङ्ग्यध्वनि	५०	१
यद्यत्यादिध्वनि	५०	५
यद्यत्यादालङ्कारध्वने-रुदाहरणम्	५०	८
यद्यत्यादिवस्तुध्वने रुदाहरणम्	५२	१
अर्थयत्यादिध्वनिविभाग	५२	६
अर्थयत्यादिध्वनिप्रभेदानाम् उदाहरणानि	५३	८
यद्वार्थोभययत्यादि ध्वनि	५९	१
यद्यत्यादार्थयत्यादिध्वनीना पदगतत्वम्	५९	६
अर्थयत्यादिध्वनीना प्रबन्ध-गतत्वम्	६५	१४
रसादे पदैकदेशरचनावर्ण-गतत्वम्	६६	१२
रसादे प्रबन्धगतत्वम्	७३	४
ध्वने गुणभेदस्खलनम्	७३	७
ध्वने सङ्घटिसङ्करौ	७३	९
ध्वने सङ्घटिसङ्कराधीना सख्या	७४	५
ध्वनेर्भेदसघटि	७५	२
चतुर्थोल्लासस्समाप्ति.	७६	१२

विषय:

पञ्चमस्य उल्लासस्य गुणीभूतव्यङ्ग्यकाव्यभेद-प्रदर्शनव्यञ्जनावृत्ति-संख्यापनसहितध्वनि गुणीभूतव्यङ्ग्यकाव्य-सङ्कीर्णभेदनिर्णय: ।

विषय	पृष्ठस्य	पङ्क्तौ
तत्र पञ्चमोल्लासारम्भ	७७	१
गुणीभूतव्यङ्ग्यकाव्य-प्रभेदा	७७	२
अगूढव्यङ्ग्यम्	७७	६
अपराङ्गव्यङ्ग्यम्	७८	१०

विषयः	पृष्ठस्य	पङ्क्तौ
वाच्यसिद्ध्यङ्गव्यङ्गम्	८२	२
अस्फुटव्यङ्गम्	८३	४
सन्दिग्धप्राधान्यव्यङ्गम्	८३	६
तुल्यप्राधान्यव्यङ्गम्	८३	१४
काक्वाक्षिप्तव्यङ्गम्	८३	१६
असुन्दरव्यङ्गम्	८४	५
गुणीभूतव्यङ्गस्य ध्वनिवत् प्रभेदः	८४	१०
वस्तुव्यङ्गालङ्कारस्य न गुणीभूतव्यङ्गता	८४	१२
ध्वनिगुणीभूतव्यङ्ग्ययोः सङ्करः	८५	२
अलंकारान्तरेण ध्वनेर्भेदः	८६	५
व्यञ्जनावृत्तिसंस्थापनम्	८६	१०
पञ्चमोल्लासस्समाप्तिः	१०१	४

विषयः
षष्ठस्य उल्लासस्य अधम-(चित्र) काव्य-निर्णयः ।

विषयः	पृष्ठस्य	पङ्क्तौ
अथ षष्ठोल्लासारम्भः	१०१	७
शब्दचित्रार्थचित्रयोः लक्षणम्	१०१	७
शब्दार्थचित्रयोः क्रमेण उदाहरणे	१०२	११
शब्दार्थचित्रयोः षड्भेदता	१०४	१२
षष्ठोल्लासस्समापनम्	१०४	१६

विषयः
सप्तमस्य उल्लासस्य काव्यदोषनिर्णयः ।

विषयः	पृष्ठस्य	पङ्क्तौ
अथ सप्तमोल्लासारम्भः	१०५	१
दोषलक्षणम्	१०५	२
पददोषविभागः	१०६	२
श्रुतिकटुता	१०६	१०
च्युतसंस्कारः	१०६	१४
अप्रयुक्तत्वम्	१०७	७
असमर्थत्वम्	१०७	१२
निहतार्थत्वम्	१०८	१
अनुचितार्थता	१०८	५
निरर्थकता	१०८	११
अवाचकता	१०८	१४
अश्लीलता	११०	५
सन्दिग्धता	११०	१०

विषयः	पृष्ठस्य	पङ्क्तौ
अप्रतीतत्वम्	११०	१४
ग्राम्यत्वम्	११०	१८
नेयार्थत्वम्	१११	२
क्लिष्टत्वम्	१११	६
विधेयाविमर्षः	११२	१
विरुद्धमतिकारिता	११३	१७
पददोषाणां केषाञ्चित् वाक्य		
पदांशगतत्वम्	११४	१५
वाक्यगतपददोषाणामुदाहरणानि	११५	१
वक्तृश्रोत्रोः साकाङ्क्षनिराकाङ्क्षताविचारः	११६	१४
पदांशगतदोषाणामुदाहरणानि	१२२	८
अप्रयुक्तत्वादीनामसामर्थ्यरूपत्वेऽपि दुष्यत्किञ्चिज्जम्	१२५	१५
वाक्यदोषाः	१२६	१
प्रतिकूलवर्णता	१२६	११
उपहतविसर्गता	१२७	०
विसन्धिः	१२७	१०
सन्धावस्त्रीखता	१२८	१२
हतवृत्तता	१२८	१६
न्यूनपदत्वम्	१३०	६
अधिकपदत्वम्	१३१	१
कथितपदत्वम्	१३१	१३
पतत्प्रकर्षः	१३२	१
समाप्तपुनरात्तता	१३२	८
अर्थान्तरैकवाचकता	१३२	१३
अभवन्मतयोगः	१३३	५
अनभिहितवाच्यता	१३४	१
अस्थानस्थपदता	१३७	६
अस्थानस्थसमासता	१३७	२०
सङ्कीर्णता	१३८	६
गर्भितता	१३८	१३
विरुद्धमतिकारिता	१३८	१८
प्रसिद्धिच्युतता	१३९	५
भग्नप्रक्रमता	१३९	११
उद्देश्यप्रतिनिर्देश्यभावस्थले कथितपदस्य गुणता	१४०	१
अक्रमता	१४२	१९
अमतपरार्थता	१४३	१२
अर्थदोषाः	१४४	२
अपुष्टार्थता	१७३	१५
कष्टार्थता	१४५	१
व्याहतार्थत्वम्	१४५	१०
पुनरुक्तत्वम्	१४६	१
दुष्क्रमत्वम्	१४६	११
ग्राम्यार्थता	१४६	१४
सन्दिग्धार्थता	१४७	१
निर्हेतुता	१४७	७
प्रसिद्धिविरोध-	१४७	८

विषय	पृष्ठस्य	पङ्क्तौ
प्रसिद्धिविरोधस्य कविसमया-सिद्धत्वे न दोष	१४७	१६
विद्याविरोध	१४८	३
अनवीक्षितता	१४६	१
सनियमेऽनियम	१४६	८
अनियमे सनियम	१५०	१
विशेषेऽविशेष	१५०	६
अविशेषे विशेष	१५०	११
साकाङ्क्षता	१५१	३
अपदयुक्तता	१५१	६
सङ्कचरभिन्नता	१५२	१
प्रकाशितविरुद्धता	१५२	७
विधेयाप्रधानता	१५२	६
अनुवादायुक्तता	१५३	४
न्यक्तापुनः क्षीक्षतत्वम्	१५३	६
अश्लीलार्थता	१५४	१
कर्णाकर्कशादिपदे न यौन-रूक्ष्यदोष	१५४	६
कर्णाकर्कशसाधान्यस्थले यौन रूक्ष्यदोष	१५५	६
विशेषणदानार्थं क्वचित् यौनरूक्ष्यम् न दोष	१५५	१५
प्रसिद्धिविरुद्धे निर्देशोरदुष्टता	१५६	१
अनुकरणे सर्वेषामदोषता	१५६	७
दोषाणाम् क्वचिददोषता गुणता वा	१५६	११
कष्टार्थतायां गुणता	१५६	१४
कष्टता न दोषो न गुण	१५८	७
अप्रयुक्तनिहतार्थयोर-दुष्टता	१५८	१२
अश्लीलत्वं गुण	१५६	२
सन्दिग्धत्वस्य गुणता	१६०	२
अप्रतीतता गुण	१६०	६
ग्राम्यत्वं गुण	१६१	१
न्यूनपदत्वं गुण	१६१	७
न्यूनपदत्वं न गुणो न दोष	१६१	१२
अधिकपदत्वं गुण	१६२	१
कथितपदत्वं गुण	१६२	११
पतत्प्रकर्ष गुण	१६३	६
समाप्तपुनरात्तत्वं न दोषो न गुण	१६३	१२
अस्थानस्थसमास गुण	१६३	१३
गर्भितत्वं गुण	१६४	१
रसदोषाः	१६४	८
व्यभिचारिणः स्वशब्दवाच्य स्वम्	१६५	१
रसस्य स्वशब्दवाच्यत्वम्	१६५	११
स्थायिन स्वशब्दवाच्य स्वम्	१६६	१
अनुभावस्य कष्टकल्पना	१६६	६
विभावस्य कष्टकल्पना	१६६	१५

विषयः	पृष्ठस्य	पङ्क्तौ
प्रतिकूलविभावादि-परिच्छेदः	१६७	५
पुनःपुनर्दीप्तिः	१६७	११
अकाण्डे प्रथनम्	१६७	१२
अकाण्डे च्छेदः	१६८	२
अङ्गस्यातिविस्तृतिः	१६८	४
अङ्गिनोऽननुसन्धानम्	१६८	५
प्रकृतिविपर्य्ययः	१६८	७
अनङ्गस्याभिधानम्	१७०	१
व्यभिचारिणः स्वपदवाच्यत्व-दोषः	१७०	११
विरुद्धरससञ्चारिभावादीनां बाधनयोक्तिर्गुणः	१७१	४
विरुद्धयोरपि रसयोरेकत्र निवेशप्रकारः	१७३	४
विरुद्धयोरपि रसयोः अविरोधः	१७४	१०
सप्तमोल्लासस्समापनम्	१७७	१०

विषयः
अष्टमस्य उल्लासस्य
गुणालङ्कारभेद-सहितगुणनिर्णयः ।

विषयः	पृष्ठस्य	पङ्क्तौ
तत्र अष्टमोल्लासारम्भः	१७८	१
गुणलक्षणम्	१७८	२
गुणानां रसधर्मत्वम्	१७८	४
अलङ्कारलक्षणम्	१७९	४
गुणालङ्कारयोः प्रभेदः	१८१	७
वामनाद्युक्तगुणालङ्कारलक्षण-खण्डनम्	१८२	१
गुणविभागः	१८३	१
माधुर्यगुणलक्षणम्	१८३	१
ओजोगुणलक्षणम्	१८३	८
प्रसादगुणलक्षणम्	१८४	४
वामनाद्युक्तदशशब्द-गुणास्वीकारः	१८५	२
वामनाद्युक्तदशविधशब्द-गुणानां लक्षणानि यस्मिंश्च यस्यान्वयभावः यस्य चादोषसरूपता	१८५	२
वामनाद्युक्तदशविधार्थ-गुणानां यस्मिंश्च यस्या-न्वयभावः यस्य च अदोषता	१८६	१
माधुर्यगुणस्य व्यञ्जकाः	१८८	६
ओजोगुणस्य व्यञ्जकाः	१८९	७
प्रसादगुणस्य व्यञ्जकाः	१९०	१
रचनायाः क्वचित् वैपरीत्यम्	१९०	६

विषयः	पृष्ठस्य	पङ्क्तौ
अष्टमोल्लासस्समाप्तिः	१९१	११

विषयः
नवमस्य उल्लासस्य रीतिसहितशब्दालङ्कारनिर्णयः ।

विषयः	पृष्ठस्य	पङ्क्तौ
अथ नवमोल्लासप्रारम्भः	१९२	१
वक्रोक्तिः	१९२	१
अनुप्रासः	१९३	७
वृत्तिः	१९४	२
छेकानुप्रासः	१९४	५
वृत्त्यनुप्रासः	१९४	१०
उपनागरिका रीतिः	१९५	१
परुषा रीतिः	१९५	२
कोमला रीतिः	१९५	४
उपनागरिकाप्रभृतीनां यथाक्रमं वैदर्भीगौड़ी-पाञ्चालीति नाम	१९५	८
लाटानुप्रासः	१९५	११
यमकम्	१९७	५
श्लेषः यद्गतः	२०१	१०
श्लेषस्य नवमो भेदः	२०५	१
श्लेषविचारः	२०६	२
दोषगुणालङ्काराणां यद्गतत्वे नियामकम्	२०७	४
चित्रालङ्कारः	२१२	१२
खड्गबन्धः	२१४	४
शरबन्धः	२१५	१०
पद्मबन्धः	२१७	१
सर्वतोभद्रम्	२१८	१
पुनरुक्तवदाभासः	२१९	२
नवमोल्लासस्समाप्तिः	२२१	७

विषयः
दशमस्य उल्लासस्य अलङ्कारदोषनिर्णय-सहितार्थालङ्कार-निर्णयः ।

विषयः	पृष्ठस्य	पङ्क्तौ
अथ दशमोल्लासारम्भः	२२२	१
उपमा	२२२	२
पूर्णोपमा लुप्तोपमा च	२२४	१
श्रौती उपमा	२२५	१
आर्थी उपमा	२२६	१
उपमाविचारः	२२७	१८
धर्मलोपे उपमा	२३०	४
उपमानलोपे उपमा	२३१	११

विषयः	पृष्ठस्य	पङ्क्तौ
वाचादिलोपे उपमा	२३२	५
धर्म्मैवाद्युभयलोपे उपमा	२३४	१
धर्म्मोपमानलोपे उपमा	२३५	३
उपमेयेवादिलोपे उपमा	२३५	७
धर्म्मोपमानेवादिलोपे उपमा	२३६	१
उपमायाः पञ्चविंशति-विधत्वम्	२३७	१
मालोपमा	२३७	२
रसनोपमा	२३७	८
अनन्वयः	२३८	५
उपमेयोपमा	२३८	१२
उत्प्रेक्षा	२३९	६
ससन्देहः	२४१	१
रूपकम्	२४२	१
असत्यवस्तुविषयरूपकम्	२४२	३
एकदेशविवर्त्तिरूपकम्	२४५	१
साङ्गरूपकम्	२४५	१०
निरङ्गरूपकम्	२४६	१
मालारूपकम्	२४६	८
परम्परितरूपकम्	२४६	१४
रसनारूपकम्	२५०	१
अपह्नुतिः	२५०	४
श्लेषः अर्थगतः	२५१	१४
सभाक्षोक्तिः	२५२	७
निदर्शना	२५३	१
मालानिदर्शना	२५४	७
निदर्शना अन्यरूपा	२५७	८
अप्रस्तुतप्रशंसा	२५५	१
अप्रस्तुतप्रशंसाभेदाः	२५५	३
अतिशयोक्तिः	२६०	१
प्रतिवस्तूपमा	२६१	१२
दृष्टान्तः	२६३	१
दीपकम्	२६४	३
मालादीपकम्	२६५	६
तुल्ययोगिता	२६५	१३
व्यतिरेकः	२६६	७
उपमानस्याधिकत्वेन व्यतिरेकः	२६६	६
व्यतिरेकस्य भेदाः	२६७	१
मालाव्यतिरेकः	२६८	१५
आक्षेपः	२७०	१
विभावना	२७१	५
विशेषोक्तिः	२७१	६
यथासङ्ख्यम्	२७२	६
अर्थान्तरन्यासः	२७३	१
विरोधः	२७४	५
विरोधविभागः	२७५	१
स्वभावोक्तिः	२७७	१२
व्याजस्तुतिः	२७८	७
सहोक्तिः	२७९	५
विनोक्तिः	२८०	१

विषयः	पृष्ठम्	पङ्क्तौ
परिवृत्तिः	२८०	१०
भाविकम्	२८१	६
काव्यलिङ्गम्	२८१	१३
पर्यायोक्तम्	२८३	२
उदात्तम्	२८५	१
उदात्तम् अन्यविधम्	२८५	७
समुच्चयः	२८५	१२
समुच्चय. अन्यविधः	२८७	२
पर्यायः	२८९	१
पर्यायः अन्यविधः	२९०	२
अनुमानम्	२९०	१४
परिकरः	२९१	७
व्याजोक्तिः	२९२	८
परिसङ्ख्या	२९३	८
कारणमाला	२९४	९
अन्योन्यम्	२९५	५
उत्तरम्	२९६	१
उत्तरस्यान्यविसदृशालङ्कारे नानाभावसम्भवः	२९६	१०
सूक्ष्मम्	२९७	८
सार.	२९८	१०
असङ्गतिः	२९८	१५
विरोधादसङ्गतेर्भेदः	२९९	७
समाधि.	३००	४
समम्	३००	९
विषमः	३०१	११
अधिकम्	३०२	४
प्रत्यनीकम्	३०४	१
मीलितम्	३०५	१
एकावली	३०६	४
स्मरणम्	३०७	६
भ्रान्तिमान्	३०८	९
प्रतीपम्	३०९	७
सामान्यम्	३११	८
विशेष.	३१३	१
तद्गुणः	३१४	५
अतद्गुणः	३१५	१
व्याघात.	३१६	४
संसृष्टिः	३१६	११
अङ्गाङ्गिभावसङ्करः	३१७	११
सन्देहसङ्करः	३२१	२
सन्देहसङ्करस्थल-निर्णयः	३२२	९
एकाश्रयानुप्रवेशसङ्करः	३२४	१०
अलङ्काराणां यद्यर्थगतत्व-नियमः	३२६	१
अलङ्कारदोषाः पृथक् न सन्ति	३२७	१
अनुप्रासदोषाः, तेषामुल्लेखान्तर्भावश्च	३२७	१
यमकदोषः, तस्य उल्लेखान्तर्भावश्च	३२८	६

विषयः	पृष्ठस्य	पङ्क्तौ
उपमादोषाः तेषामुक्तेऽन्तर्भावश्च	३२८	८
उपमायां क्वचित् लिङ्गवचनादिभेदस्यादुष्टता	३३०	६
कालादिभेदे उपमाया दुष्टताव्यवस्थापनम्	३३१	५
उपमायामपरो दोषो तयोरुक्तेऽन्तर्भावश्च	३३३	५
उत्प्रेक्षादोषः तस्य उक्तेऽन्तर्भावश्च	३३३	१६
अर्थान्तरन्यासदोषः	३३४	६
समासोक्तिदोषः तस्य उक्तेऽन्तर्भावश्च	३३५	१
अप्रस्तुतप्रशंसाया दोषः तस्य उक्तेऽन्तर्भावश्च	३३५	१७
दृष्टदोषसमाप्तनम्	३३६	१२
काव्यप्रकाशसमाप्तनम्	३३६	१४

काव्यप्रकाशस्य वर्णानुसारि.निर्घण्टपत्रम् ।

—00—

विषयः	पृष्ठस्य	पङ्क्तौ
अ		
अकाण्डे च्छेदः दो०	१६८	२
अकाण्डे प्रथनम् दो०	१६७	१२
अक्रमता दो०	१४२	१८
अगूढव्यङ्ग्यम्	१६	१४
,,	७७	६
अङ्गस्यातिविस्तृतिः दो०	१६८	४
अङ्गाङ्गिभावः सङ्करः अ०	३०८	६
अङ्गिनोऽननुसन्धानम् दो०	१६८	५
अतद्गुणः	३१५	३
अतिशयोक्तिः	२६०	१
अत्यन्ततिरस्कृतवाच्य-ध्वनिः	२७	५
अधमकाव्यम्	५	११
अधिकम् अ०	३०१	४
अधिकपदता दो०	१२१	१
अधिकपदता क्वचित् गुणः	१६२	१

विषयः	पृष्ठस्य	पङ्क्तौ
अनङ्गस्याभिधानम्	१७०	३
अनन्वयः अ०	२३८	५
अनभिहितवाच्यता दो०	१३४	१
अनवीकृतत्वम् दो०	१४६	१
अनियमे सनियम. दो०	१५०	१
अनुकरणे सर्वेषा-मदोषता	१५६	७
अनुचितार्थता दो०	१०८	५
अनुप्रासः अ०	१६३	७
अनुप्रासदोषाः	३२८	६
अनुभावः	३०	७
अनुभावस्य कष्टकल्पना दो०	१६६	६
अनुमानम् अ०	२६०	१४
अनुरादायुक्तता दो०	१५३	४
अन्योन्यम् अ०	२६५	५
अपदयुक्तता दो०	१५१	६
अपराङ्गव्यङ्ग्यम्	७८	१०
अपह्नुतिः अ०	२५०	४
अपुष्टार्थता दो०	१४३	१५
अप्रतीतत्वम् दो०	११०	१४

विषय.	पृष्ठम्	पङ्क्तौ
अप्रतीतत्वं क्वचित् गुण	१६०	६
अप्रयुक्तता दो०	१०७	७
अप्रयुक्तता क्वचित् न दोष	२५८	१२
अप्रयुक्ततादीनां दृष्ट-युक्तिबीजम्	१२५	१५
अप्रस्तुतप्रशंसा अ०	२५५	१
अप्रस्तुतप्रशंसाभेदा	२५५	३
अभवन्मतयोग दो०	१३३	५
अभिधामूला व्यञ्जना	१७	१३
अभिधाविचार	८	७
अमतपरार्थता दो०	१४३	१२
अर्थगुणास्वीकार	१८५	१२
अर्थचित्रम्	१०३	१२
अर्थचित्रस्य षड्भेदता	१०४	१३
अर्थचित्रोदाहरणम्	१०३	११
अर्थदोषा	१४४	२
अर्थभेदा	६	४
अर्थव्यक्ति अर्थगुण	१८७	३
अर्थव्यक्ति शब्दगुण	१८५	८
अर्थव्यञ्जकता	७	१
अर्थव्यञ्जकतार्थां शब्दस्य साङ्गत्यम्	२६	७
अर्थशक्त्युद्भवध्वनिविभाग	५२	६
अर्थशक्त्युद्भवध्वनिभेदाना मुदाहरणानि	५३	८
अर्थशक्त्युद्भवध्वनिभेदाना प्रबन्धगतत्वम्	६५	१८
अर्थान्तरन्यास अ०	२७३	१
अर्थान्तरन्यासदोष	३३३	१५
अर्थान्तरसंक्रमित-वाच्यम्	२७	५
अर्थान्तरैकपदता दो०	१३२	१३
अलक्ष्यक्रमव्यङ्ग्यम्	२६	४
अलङ्कारदोषाणामुक्ते-ष्वन्तर्भाव	१२७	२
अलङ्कारस्वरूपम्	१७६	४
अलङ्काराणा शब्दार्थ गतत्वे नियामकम्	२०७	४
”	३२६	५
अवाचकता दो०	१०८	४
अविमृष्टविधेयांश दो०	१५०	११
अश्लीलता दो०	११०	५
अश्लीलता क्वचित् गुण	१५६	२
अश्लीलार्थता दो०	१५४	१
असङ्गति दो०	२६८	१५
असमर्थता दो०	१०७	१२
असुन्दरव्यङ्ग्यम्	८३	५
अस्थानस्थपदता दो०	१३७	६
अस्थानस्थसमासता दो०	१३७	२०

विषयः	पृष्ठस्य	पङ्क्तौ
अस्थानस्थसमासता कचित् गुणः	१६१	१२
अस्फुटव्यङ्ग्यम्	८३	४

आ

आक्षेपः अ०	२७०	१
आक्षेपार्थापत्तिस्थले न लक्षणा	११	१२
आर्थी उपमा	२२६	१
आर्थी व्यञ्जना	२२	३

उ

उत्तमकाव्यम्	४	७
उत्तरम् अ०	२६६	३
उत्तरस्य नाम्न्यन्तर्भावः	२६६	१०
उत्प्रेक्षा अ०	२३८	६
उत्प्रेक्षादोषः	३३४	६
उदात्तम् अ०	२८५	१
" अन्यविधम्	२८५	७
उदारता अर्थगुण.	२८७	२
" षड्गुणः	२८४	४
उद्देश्यप्रतिनिर्देश्य-स्थले कथितपदस्या-दुष्टता	१४०	१
उपनागरिका रीति.	१८५	१
उपमा अ०	२२२	२
" आर्थी	२२६	१०
उपमादोषाः	३२८	१५
उपमादोषो अपरो	३३३	५
उपमानस्य आधिक्ये न व्यतिरेकः	२२७	३
उपमायां कालादि-भेददोषः	३३१	५
उपमाया कालादि-भेदस्य कचित् अदोषता	३३२	६
उपमायां लिङ्गवचन-भेददोषः	३२८	१७
उपमायां लिङ्गवचन-भेदस्य अदोषता	३३०	८
उपमायाः षड्विंशति-विधत्वम्	२३७	१
उपमा द्वौतौ	२८५	१
उपमेयोपमा अ०	२३८	१२
उपसृष्टविसर्गता दो०	१२७	७
उपादानलक्षणा	११	५

ए

एकदेशविवर्त्ति रूपकम् अ०	२४१	१
एकावली अ०	३०६	४

विषयः	पृष्ठस्य	पङ्क्तौ
एकान्वयानुप्रवेशः सङ्करः अ०	१२४	१०
ओ		
ओजोगुणः अर्थगतः	१८६	१
" रसगतः	१८३	८
ओजोगुणस्य व्यञ्जकाः	१८६	७
ओजोगुणस्य लक्षणम्	१८१	८
क		
कथितपदत्वम् दो०	१३१	१३
कथितपदत्वस्य गुणता	१४०	१
"	२५६	१८
कर्णावतंसादिपदे न पौनरुक्त्यम्	१५४	६
कर्णावतंसादन्यस्थले पौनरुक्त्यदोषः	१५५	६
कष्टार्थता दो०	१४५	१
कष्टार्थतायाः गुणता	१५६	१४
कष्टार्थता क्वचित् न गुणो न दोषः	१५८	७
काकाक्षिप्तव्यङ्ग्यम्	८३	१६
कान्तिः अर्थगुणः	१८७	४
" शब्दगुणः	१८५	१०
कारणमाला अ०	२६४	६
काव्यलिङ्गम् अ०	२८१	१३
काव्यस्य कारणम्	२	१५
" प्रयोजनम्	१	१३
" स्वरूपम्	३	१२
कोमला रीतिः	१६५	४
क्लिष्टता दो०	१११	६
ख		
खड्गबन्धः अ०	२१४	४
ग		
गर्भितत्वम् दो०	१३८	१३
गर्भितत्वम् क्वचित् गुणः	१६४	१
गुणलक्षणम्	१७८	२
गुणविभागः	१८३	१
गुणानां रसधर्मत्वम्	१७८	४
गुणालङ्कारयोर्भेदः	१८१	७
गुणीभूतव्यङ्ग्यकाव्यम्	५	५
गुणीभूतव्यङ्ग्यकाव्य-प्रभेदाः	७७	२
गुणीभूतव्यङ्ग्यस्य ध्वनिवत् प्रभेदः	८४	१०
गूढव्यङ्ग्यम्	१६	८
गौडी रीतिः	१६५	६
गौणी लक्षणा	१४	२

विषय	पृष्ठस	पङ्क्तौ
गौणाङ्गीक इत्यत्र लक्ष्यार्थनिर्णय	१४	४
ग्राम्यत्वम् दो०	११०	१८
ग्राम्यत्व क्वचित् गुण	१६१	१
ग्राम्या रीति	‹१६५	५
ग्राम्यार्थता दो०	१४६	१४

च

चित्रम् अ०	२१२	१२
चित्रकाव्यम्	५	११
चित्रकाव्यस्य षड्-भेदता	१२६	१३
च्युतसंस्कार दो०	१०६	१४

छ

छेकानुप्रास	१६४	५

त

तद्गुण अ०	२१४	५
तात्पर्यार्थं	६	६
तुल्यप्राधान्यव्यङ्ग्यम्	८२	१४
तुल्ययोगिता अ०	२६५	१२
त्यक्त पुन स्वीकृतता दो०	१५२	६

द

दीपकम् अ०	२६४	२
दुष्क्रमत्वम् दो०	१४६	११
दृष्टान्त अ०	२६२	३
दोषगुणालङ्काराणा गब्दार्थगतत्वे नियामकम्	२०७	४
दोषलक्षणम्	१०५	२
दोषाणा क्वचित् अदोषता गुणता वा	१५६	११

ध

ध्वनिकाव्यम्	४	७
ध्वनिगुणीभूतव्यङ्ग्ययो सङ्कर	८५	३
ध्वने भेदसमष्टि	७५	२
,, गुणभेदसङ्कलनम्	७३	७
,, सङ्घटिसङ्करौ	७३	६
,, सङ्ख्यादर्शना सङ्ख्या	७४	१
ध्वनेस्त्रैविध्यम्	८६	५

न

निदर्शना अ०	२५३	१
,, अन्यविधा अ०	२५४	८
निरङ्गरूपकम् अ०	२४६	१
निरर्थकत्वम् दो०	१०८	११
निर्हेतुता दो०	१४०	७

विषय	पृष्ठस्य	पङ्क्तौ
निर्हेतुता क्वचित् न दोष	१५६	१
निष्टतार्थता दो०	१०८	१
निष्टतार्थता क्वचित् न दोष	१५८	१२
नेयार्थता दो०	१११	२
न्यूनपदत्वम् दो०	१७०	६
न्यूनपदत्वं क्वचित् गुण	१६१	७
न्यूनपदत्वं क्वचित् न गुणो नापि च दोष	१६१	१२

प

पतत्प्रकर्ष	११२	१
पतत्प्रकर्षं क्वचित् गुण	१६१	६
पददोषविभाग	१०६	२
पददोषाणां क्वचित् वाक्य पदांशगता	११३	१६
पदांशगतदोषाणामुदाहरणानि	१२२	८
पद्धत्या च०	२१०	१
परम्परितरूपकम् च०	२१६	१३
परिकर च०	२८१	७
परिकरांकुर च०	२८७	१०
परिवृत्ति च०	२८१	८
पाञ्चाली रीति	१८२	२
पाञ्चाली रीतिः च०	२८७	१
पुनः पुनर्दीप्ति दो०	१६७	११
पुनरुक्तवदाभास च०	२१८	१
पूर्णोपमा च०	२२४	१
पौनरुक्त्यम्	१४६	१
पौनरुक्त्यम् क्वचित् न दोषः	१५५	१२
प्रकाशितविरुद्धता दो०	११२	७
प्रकृतिविपर्ययत्व दो०	१६८	७
प्रतिकूलवर्णता दो०	१२६	११
प्रतिकूलविभक्त्यादिपदत्व दो०	१६७	५
प्रतिवस्तूपमा च०	२६१	१२
प्रतीपम् च०	१०८	७
प्रत्यनीकम् च०	१०४	१
प्रसादगुण अर्थगत	१८६	६
,, रसगत	१८४	४
,, शब्दगत	१८५	६
प्रसादगुणस्य व्यञ्जना	१८०	१
प्रसिद्धिविरोध दो०	१४७	८
प्रसिद्धिविरोधस्य क्वचिद्दोषता	१४७	१८
प्रसिद्धिविरुद्धत्वम् दो०	११८	६

विषय	पृष्ठस्य	पङ्क्तौ
भ		
भग्नप्रक्रमता दो०	१३९	११
भाव	४६	१
भावस्य उदय	४८	२
,,पवलता	४८	२
,,शान्ति	४८	२
,,शान्त्यादीना कचित्		
प्राधान्यम्	४९	१०
,,सन्धि	४८	२
भावाभास	४७	४
भाविकम् अ०	२८१	६
भ्रान्तिमान् अ०	२०८	९
म		
मङ्गलाचरणम्	१	१
मध्यमकाव्यम्	५	५
माधुर्यगुण अर्थगत	१८७	१
,,रसगत	१८३	३
,,शब्दगत	१८५	८
माधुर्यगुणस्य व्यञ्जका	१८८	९
मालादीपकम् अ०	२६५	६
मालानिदर्शना अ०	२५४	८
मालारूपकम् अ०	२४६	८
मालाव्यतिरेक अ०	२६८	१५
मालोपमा अ०	२१७	७
मीलितम् अ०	२०५	१
सरलसन्धि अ०	२१५	१
य		
यत्तत्पदयो साकाङ्क्ष-निराकाङ्क्षताविचार	११९	१४
यथासङ्ख्यम् अ०	२७२	१०
यमकम् अ०	१९७	५
यमकदोष	१२८	६
र		
रचनाया कचित् वैपरीत्यम्	१९०	९
रसदोषविभाग	१६४	८
रसनोपमा अ०	२२७	८
रसविभाग	४०	१९
रसस्य स्वशब्दवाच्यता दो०	१६५	११
रसानामुदाहरणानि	४१	५
रसादे पदैकदेशरचना वर्णगतत्वम्	६६	१२
रसाद प्रबन्धगतत्वम्	७१	५
रसाभास	४७	४
रूपकम् अ०	२४१	१

विषयः	पृष्ठस्य	पङ्क्तौ
ल		
लक्षणलक्षणा	११	५
लक्षणा	१०	६
लक्षणामूलव्यङ्गनाव्यवस्थापनम्	१७	६
लक्षणायां प्रयोजनप्रतीतिः	१२	७
लक्षणाया षड्विधत्वम्	१६	४
लक्षणायास्त्रैविध्यम्	१६	१८
लाक्षणिकशब्दः	१७	२
लाटानुप्रासः अ०	१८५	११
लुप्तोपमा अ०	२२४	१
„एवादिलोपे	२१२	५
"उपमानलोपे	२११	११
"उपमेयेवादिलोपे	२१५	७
"धर्मलोपे	२१०	४
"धर्मेवादिलोपे	२१४	१
"धर्मोपमानलोपे	२१८	१
"धर्मोपमानेवादिलोपे	२१६	१
व		
वक्त्रादीनां वैचित्र्ये व्यङ्गयोदाहरणानि	२२	६
वक्रोक्तिः अ०	१८२	१
वस्तुव्यङ्ग्यालङ्कारस्य न गुणीभूतव्यङ्ग्यता	८४	१२
वाक्यदोषाः	१२६	१
वाक्यनिष्ठपददोषाणामुदाहरणानि	११५	१
वाचकशब्दः	८	१
वाच्यसिद्ध्यङ्गव्यङ्गयम्	८२	१
वाच्यार्थनिर्णयः	८	६
वामनाद्युक्तगुणालङ्कारलक्षणखण्डनम्	१८२	१
वामनाद्युक्तदशविधशब्दगुणास्वीकारः	१८५	२
वामनाद्युक्तदशविधार्थगुणास्वीकारः	१८६	१
विद्याविरोधः दो०	१४८	१
विधेयाविमर्शः दो०	११२	१
विधेयोक्तता दो०	१५२	८
विनोक्तिः अ०	२८०	१
विप्रलम्भविभागः	४१	१४
विभावः	१०	०
विभावना अ०	२७१	६
विभावस्य कष्टकल्पना दो०	१६६	१५
विरुद्धमतिकारिता दो०	१११	१०
„	१४८	१८
विरुद्धयोरपि रसयोः कविदविरोधः	१०४	१०

विषयः	पृष्ठस्य	पङ्क्तौ
विरुद्धयोरपि रसयोरेकत्र समावेशप्रकारः	१७१	४
विरुद्धरसव्यभिचार्यादीनां वाच्यत्वेनोक्तिर्गुण.	१७१	४
✗ विरोधः अ०	२७४	५
✗ विरोधविभागः	२७५	१
✗ विरोधादव्याप्तेर्भेदः	२६६	७
विवक्षितान्यपरवाच्य-ध्वनिः	२८	२
✗ विशेषः अ०	३१२	१४
विशेषेऽविशेषः दो०	१५०	६
✓ विशेषोक्तिः अ०	२७१	८
✗ विषमः अ०	३०१	११
विसन्धिः दो०	१२७	१०
वृत्तिः	१६४	२
वृत्त्यनुप्रासः अ०	१६४	१०
वैदर्भी रीतिः	१६५	८
✗ व्यञ्जकशब्दः	२१	११
व्यञ्जनावृत्तिसंस्थापनम्	८६	१०
✗ व्यतिरेक अ०	२६६	७
✗ व्यतिरेकविभाग.	२६८	१५
व्यभिचारिणः स्वशब्द-वाच्यत्वम् दो०	१६५	१
व्यभिचारिणः स्वशब्द-वाच्यत्वं क्वचित् न दोषः	१७०	११
व्यभिचारिभावा.	११	११
व्यभिचारिभावविभाग.	४५	१
व्यासातः अ०	३१६	४ ✗
व्याजस्तुतिः अ०	२७८	७ ✗
व्यालोक्तिः अ०	२६२	८ ✗
व्याकृतार्थता दो०	१४५	१०

श

शब्दचित्रस्य बहवो भेदा.	१०४	१२
शब्दचित्रस्वरूपम्	१०१	७
शब्दचित्रोदाहरणम्	१०४	१
शब्दभेदा.	६	२ ✓
शब्दशक्त्युत्थध्वनिः	५०	५
शब्दशक्त्युत्थस्तुध्वने-रुदाहरणम्	५२	१
शब्दशक्त्यर्थशक्त्युत्थ-ध्वनीनां पदगतत्वम्	५६	६
शब्दशक्त्युत्थालङ्कारध्वने-रुदाहरणम्	५०	८
शब्दस्य व्यञ्जकतायामर्थस्य साहाय्यम्	२१	११ ✓
शब्दार्थोभयशक्त्युत्थध्वनिः	५८	१
शान्तरस.	४५	११
शुद्धा लक्षणा	१४	२ ✗
श्रुतिकटुत्वम् दो०	१०६	१०

विषय	पृष्ठस्य	पङ्क्तौ
श्रौती उपमा अ०	२२५	१
श्लेष अर्थगत अ०	२०१	१०
" शब्दगत अ०	२५१	१४
श्लेषगुण अर्थगत	१८७	५
" शब्दगत	१८५	४
श्लेषविचार	२०६	२
श्लेषस्य नवमो भेद	२०५	३

स

सयोगादिनैकार्थनियमनम्	२०	६
सलक्ष्यक्रमव्यङ्ग्यध्वनि	५०	१
संसृष्टि अ०	३१६	११
सङ्कर अ०	३१७	११
सङ्कीर्णता दो०	११८	६
सनियमेऽनियम दो०	१४८	८
सन्दिग्धत्वम् दो०	११०	१०
सन्दिग्धत्वं क्वचित् गुण	१६०	१
सन्दिग्धप्राधान्यव्यङ्ग्यम्	८३	६
सन्दिग्धार्थता दो०	१४७	१
सन्देहसङ्कर	१२१	१
सन्धावश्लीलता	१२८	११
समता अर्थगुण	१८७	६
" शब्दगुण	१८५	८
समम् अ०	१००	६
समभावस्तुविषयरूपकम् अ०	२११	१
समाधि अ०	३००	४
समाधि अर्थगुण	१८८	१
" शब्दगुण	१८५	४
समाप्तपुनरात्तता दो०	१३२	८
समाप्तपुनरात्तता क्वचित् न दोषो न गुण	१६१	१०
समासोक्ति अ०	२५२	७
समासोक्तिदोष	१३५	१
समुच्चय अ०	२८५	१२
" अन्यविध अ०	२८७	१
सम्भोग	४१	२
सर्वतोभद्रम् अ०	२१८	१
सशयेह अ०	२४१	१
सहचरभिन्नता दो०	१५२	१
सहोक्ति अ०	२७६	५
साकाङ्क्षता दो०	१५१	१
साङ्गरूपकम् अ०	२४६	१०
साध्यवसाना लक्षणा	११	८
सामान्यम् अ०	१११	८
सार अ०	२८८	१०
सारोपा लक्षणा	११	४
सूक्ष्मम् अ०	२८०	८
सौकुमार्यम् अर्थगुण	१८७	१
" शब्दगुण	१८५	११
स्याद्यन्त सुबन्तमाख्यातम् दो०	१६६	१

विषय	पृष्ठ	पङ्क्ति
स्थायिभावा	४४	१४
* स्मरणम्	१०७	६
* स्वभावोक्ति अ०	२७७	१२

विषय	पृष्ठ	पङ्क्ति
ह		
हतहन्तता दो०	१२८	१६

BHARATIYA VIDYA BHAVAN LIBRARY. S N. ...

काव्यप्रकाशः।

ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत् नमस्करोति,—

नियतिकृतनियमरहितां
ह्लादैकमयीमनन्यपरतन्त्राम्।
नवरसरुचिरां निर्म्मिति-
मादधती भारती कवेर्ज्जयति ॥ १ ॥

नियतिशक्त्या नियतरूपा, सुखदुःखमोहस्वभावा, परमाण्वा-दुपादान-कर्म्मादिसहकारिकारणपरतन्त्रा, षड्रसा, न च हृद्यैव तैः, तादृशी ब्रह्मणो निर्म्मितिर्निर्म्माणम्, एतद्विलक्षणा तु कविवाङ्निर्म्मितिः, अतएव जयति, जयत्यर्थेन च नमस्कार आक्षिप्यत इति तात्पर्य्यमस्मिन् प्रणत इति लभ्यते॥

इदमभिधेयं सप्रयोजनमित्याह

काव्यं यशसेऽर्थकृते (१)

---

(१) भावकिप्रत्ययनिष्पन्नं चतुर्थ्यन्तमिदं। एवं परत्र।

व्यवहारविदे शिवेतरक्षतये ।
सद्यःपरनिर्वृतये
कान्तासम्मिततयोपदेशयुजे ॥ २ ॥

कालिदासादीनामिव यशः, (२) श्रीहर्षादेर्धावकादीनामिव धनं, राजादिगतोचिताचारपरिज्ञानम्, आदित्यादेर्मयूरादीनामिवानर्थनिवारणं, सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं (३) विगलितवेद्यान्तरमानन्दं, प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्सम्मितार्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया (४) विलक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुणकविकर्म्म, तत् कान्तेव सरसतापादनेनाभिमुखीकृत्य, रामादिवत् वर्त्तितव्यं न रावणादिवदित्युपदेशश्च, यथायोगं कवेः सहृदयस्य च करोतीति सर्व्वया तत्र यतनीयम् ॥

अस्य कारणमाह,—

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।

---

(२) यशःप्रभृत्यादिकर्म्मणा करोतीत्यनेनान्वयः । धावक किल श्रीहर्षस्वपमात्रा रत्नावलीं कृत्वा बहुधनं लब्धवानिति प्रसिद्धिः । प्रसिद्धिश्च मयूरादि सूर्य्यशतकेन कुष्ठाद्विमोचनादिरूपा ।

(३) रसशब्देनात्र स्थायिभावउच्यते तथाच काव्यार्थभावनोत्तरमेव सर्व्वप्रयोजनेषु उत्तम स्थायिभावस्य विभावादि-सम्बलनरूपेणास्वादेन निष्पन्न स्वभिन्नत्रेयभानशून्यं रसास्वादरूपमानन्दमिति यदुक्तार्थं ।

(४) रसस्य यद्भूतउपायस्वरूपो व्यापारो विभावादिसयोजन लक्षणो वा तस्य प्राबल्येन तस्मिन्नादरस्यैव प्राधान्यात् ।

कारयत्र शक्तिर्व्युत्पत्तिरभ्यास इति हेतुस्तदुद्भवे ॥३॥

शक्तिः कवित्वबीजरूपः संस्कारविशेषः, यां विना काव्यं न प्रसरेत् प्रसृतं वा उपहसनीयं स्यात्, लोकस्य स्थावरजङ्गमात्मकस्य लोकवृत्तस्य, शास्त्राणां छन्दोव्याकरणाभिधानकोषकलाचतुर्वर्गगजतुरगखड्गादिलक्षणग्रन्थानां, काव्यानाञ्च महाकविसम्बन्धिनाम्, आदिग्रहणादितिहासादीनाञ्च विमर्शनाद्व्युत्पत्तिः, काव्यं कर्त्तुं विचारयितुञ्च ये जानन्ति तदुपदेशेन करणे योजने च पौनःपुन्येन प्रवृत्तिरिति त्रयः समुदिताः न तु व्यस्तास्य काव्यस्योद्भवे निर्म्माणे समुल्लासे च हेतुर्न तु हेतयः ।

एवमस्य कारणमुक्त्वा स्वरूपमाह,—

तद्दोषौ (५) शब्दार्थौ
सगुणावनलङ्कृती पुनः क्वापि ।

दोषगुणालङ्कारा वक्ष्यन्ते, क्वापीत्यनेनैतदाह यत् सर्व्वत्र सालङ्कारौ क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः । यथा,

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा

---

(५) काव्यत्वविघटकच्युतसंस्कारादिप्रबलदोषरहितौ, अनलङ्कृतौ रसादि न लक्षणघटक किन्तु सालङ्काराविति विशेषण माहृयति, एतच्च (अनलङ्कृतौ) इति नञोऽस्फुटतादर्शनायेति लभ्यमिति, रसात्मकमिति वाक्यं रसाभावाद्यात्मककाव्ये अव्याप्तमिति सर्व्वसंग्राहकमिद लक्षणम् ।

ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः ।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ॥

अत्र स्फुटो न कश्चिदलङ्कारः (६) रसस्य च प्राधान्यान्नालङ्कारता ।

तद्भेदान् क्रमेणाह,—

इदमुत्तममतिशयिनि
व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः ॥ ४॥

इदमिति काव्यं, बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः, (७) तत्तुल्यतागुणकारिभिरन्यैरपि न्यग्भावितवाच्यव्यङ्ग्यव्यञ्जनत्वमस्य शब्दार्थयुगलस्य । यथा,—

निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।

---

(६) अत्र हि हरोपरक्त्याद्यनुग्राहकस्फुटत्वेऽपि प्रकृतरसप्रतिकूलवर्णघटितत्वेन नालङ्कारता । विभावनाविशेषोक्ती सत्यामपि न स्फुटे कारणकार्ययोरेकपदस्थे चार्थेऽपि सहाधिकरणजातिमाश्रित्यानुप्रासत्वात् । अतएव चयोरस्फुटत्वेन एतन्मूलकमन्देहसङ्करोऽप्यस्फुट इति निर्विवादम् । नतु रसवदलङ्कारोऽस्तु इत्यतआह रसस्येति ।

(७) पटादिभिः वर्णसमुदायरूपैः स्वधिकैः पदैः स्फोटरूपो नित्यः शब्दो व्यज्यते, तेन च व्यभिव्यक्तेन अर्थः प्रतीयते इति तादृशस्य प्राधान्यीभूतस्फोटव्यञ्जकस्य वर्णसमुदायरूपस्य पटादिशब्दस्य ध्वनिरिति

मिथ्यावादिनि ! दूति ! वान्यवचनस्याप्यातपीड़ागमे वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥

अत्र तदन्तिकमेव स्तुं गतासीति प्राधान्येनाधमपदेन व्यज्यते ॥

अताडगि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम् ।

अताडगि वाच्यादतिशायिनि । यथा,—

श्यामतरुणां तरुण्या नववञ्जुलमञ्जरीसनाथकरम् ।
यञ्जुल्या भवति सुजन्निंतरां मलिना सुखच्छाया ॥

अत्र वञ्जुललतागृहे दत्तसङ्केता नागतेति व्यङ्ग्यं गुणीभूतं तदपेक्षया वाच्यस्यैव चमत्कारित्वात् ।

शब्दचित्रं वाच्यचित्रमव्यङ्ग्यन्त्ववरं स्मृतम् ॥ ५ ॥

चित्रमिति गुणालङ्कारयुक्तम्, अव्यङ्ग्यमिति स्फुटप्रतीयमानार्थरहितम्, अवरमधमं । यथा,—

स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा
मूर्च्छन्मोदमधुव्रतिव्रतविधिस्नानाकिकाऽऽकाय वः ।
भिन्द्यादुद्यदुदारदर्दुरदरीदैर्घ्यादरिद्रद्रुम-
द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम् ॥

विनिर्गतं मानदमात्मनन्दिराद्रवल्गुयशुल्य यदृच्छयाऽपि यम् (८)।
ससम्भ्रमेन्द्रद्रुतपातितार्गला निमीलिताचीव भियाऽमरावती ॥

इति काव्यप्रकाशे काव्यस्य प्रयोजनकारणस्वरूपविशेषनिर्णयो नाम प्रथम उल्लासः ॥ * ॥

---

(८) यं स्वपोऽपि यम् ।

॥ द्वितीय उल्लासः ॥

क्रमेण शब्दार्थयोः स्वरूपमाह,—

स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा ।

यत्रेति काव्ये । एषां स्वरूपं वक्ष्यते ।

वाच्यादयस्तदर्थाः स्युः

वाच्यलक्ष्यव्यङ्ग्याः ।

तात्पर्य्यार्थोऽपि केषुचित् ॥ ६ ॥

आकाङ्क्षा सन्निधि-योग्यता वशाद्वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये (१) तात्पर्य्यार्थोविशेषवपुरपदार्थोऽपि वाक्यार्थः समुल्लसतीत्यभिहितान्वयवादिनां मतम् (२)। वाच्यएव वाक्यार्थइत्यन्विताभिधानवादिनः (३) ॥

---

(१) समन्वये परस्परसम्बन्धबोधे ।

(२) अभिहितानां पदार्थानां अन्वयवादिनो नैयायिकाः । तेषामयमाशय, घट करोतीत्यादौ घटवृत्तिकर्म्मत्वानुकूलजातिमान् द्रव्यो बोध्यते, तत्र च घटपदस्य घटोऽर्थः अस्त्यर्थस्य च कर्म्मता वृत्तिता तु न कस्यापि द्रव्यपदार्थोऽपि वृत्तिता तात्पर्य्यवशात् पदयो उपसर्गविषया भवति इति ।

(३) अन्विताभिधानं यद्बोध्यत्वं तद्वादिनो मीमांसकाः, तेषां मते अन्वितघटादावेव घटादिपदानां शक्तिः तात्पर्य्यबोधे तु आकाङ्क्षादिवशात् वृत्तितादितिभेदरूपमेव भवति इति तात्पर्य्यार्थो वाक्यार्थः ।

सर्वेषां प्रायशोऽर्थानां वाच्यव्यञ्जकत्वमपीष्यते।

तत्र वाच्यस्य यथा,—

माए घरोवअरणं अज्ज ऊ ण त्थित्ति साहिअं तुमए।
ता भण किं करणिज्जं एअमेअ ण वासरो ठाइ (४)॥

अत्र स्वैरविहारार्थिनीति व्यज्यते। लक्ष्यस्य यथा,—

साहेल्ली सहि! सुइअं खणे-खणे दूणिआसि मज्झ कए।
सभावणेहकरणिज्जसरिसअं दाव विरइअं तुमए (५)॥

अत्र मत्प्रियं रमयन्त्या त्वया शत्रुत्वमाचरितमिति लक्ष्यं, तेन च कामुकविषयं सापराधत्वप्रकाशनं व्यङ्ग्यम्।

व्यङ्ग्यस्य यथा,—

उअ णिच्चल! णिप्पन्दा भिसिणीपत्तम्मि रेहइ बलाआ।
णिम्मलमरगअभाअणपरिट्ठिआ सइसुत्ति व (६)॥

अत्र निष्पन्दत्वेनाश्वस्तत्वं, तेन च जनरहितत्वम्, अतः सङ्केतस्थानमेतदिति कयाचित् कश्चित्प्रत्युच्यते। अथवा, मिथ्या वदसि न त्वमत्रागतोऽभूरिति व्यज्यते॥

वाचकादीनां क्रमेण स्वरूपमाह,—

---

(४) मातर्गृहोपकरणं अद्य खलु नास्तीति साधितं त्वया। सङ्गत किं करणीयमेतदेव न वासरः स्थास्यति। व०।

(५) साधवली सखि! सुभगं क्षणे क्षणे दूनासि मत्कृते। सद्भावस्नेहकरणीयसदृशं तावद्विरचितं त्वयेति। व०।

(६) पश्य निश्चल! निष्पन्दा बिसिनीपत्रे राजते बलाका। निर्मलमरकतभाजनपरिस्थिता सहजसुप्तिरिव इति। व०।

साक्षात्सङ्केतितं (७) योऽर्थ-
मभिधत्ते स वाचकः ॥ ७ ॥

दृष्टगृहीतसङ्केतस्य शब्दस्यार्थप्रतीतेरभावात्, सङ्केत-ग्रहाय एव शब्दोऽर्थविशेषं प्रतिपादयतीति यस्य यत्राव्यवधानेन सङ्केतो गृह्यते स वाचकः ।

सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा ।

यद्यप्यर्थक्रियाकारितया (८) प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव, तथाप्यानन्त्याद्व्यभिचाराच्च (९) तत्र सङ्केतः कर्तुं न युज्यत इति, 'गौः शुक्लः चलो डित्थः' इत्यादीनां विषयविभागो न प्राप्नोतीति च तदुपाधावेव सङ्केतः। उपाधिश्च द्विविधः वस्तुधर्मो वक्तृयदृच्छया सन्निवेशितश्च । वस्तुधर्मोऽपि द्विविधः सिद्धः साध्यश्च, सिद्धोऽपि द्विविधः पदार्थस्य प्राणप्रदो विशेषाधान-हेतुश्च, तत्राद्यो जातिः, उक्तं हि वाक्यपदीये "नहि गौः स्व-रूपेण गौर्नाप्यगौः गोत्वाभिसम्बन्धात्तु गौः" इति । द्वितीयो

---

(७) साक्षात्सङ्केतितं व्यवधानेन, गृहीतसङ्केतम् ।

(८) अर्थः दुग्धादिरूपप्रयोजनं तच्च क्रिया गोरानयनादिरूपा, तत्कारितेन, प्रवृत्तिनिवृत्त्योर्योग्या विषयीभूता इत्यर्थः । इति तत्र सङ्केतो युज्य इति शेषः ।

(९) कथं च व्यक्तिषु सङ्केतग्रहः उत कथञ्चित् एकव्यक्तौ ? आद्ये आनन्त्यदोषः, द्वितीये यस्यां सङ्केतग्रहः स्यात्ततः तदतिरिक्तायाः गोव्यक्तेर्गोशब्दात् भानं न स्यादिति व्यभिचारः । उभयपक्षे च विषयविभागाप्राप्तिदोषः, तथाहि यदि गोशब्दशुक्लशब्दचलशब्दडित्थशब्दानां सर्वेषां गोव्यक्तिरर्थः स्यात् तदैतेषां शब्दानां एकार्थतया पर्य्यायता स्यादिति भावः ।

गुणः, शुक्लादिना हि लब्धसत्ताकं वस्तु विशिष्यते। साध्यः पूर्वापरीभूतावयवः क्रियारूपः। डित्यादिशब्दानाम् (१०) अन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं वक्ता यदृच्छया डित्यादिष्वर्थेषूपाधित्वेन सन्निवेश्यत इति सोऽयं संज्ञारूपो यदृच्छात्मक इति। 'गौः शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिः' इति महाभाष्यकारः। परमाण्वादीनान्तु (११) गुणमध्यपाठात् पारिभाषिकं गुणत्वं। गुणक्रियायदृच्छानां वस्तुत एकरूपाणामप्याश्रयभेदाद्भेद इव लक्ष्यते यथैकस्य मुखस्य खड्गमुकुरतैलादिवालम्बनभेदात्।

हिमपयःप्रवाहादित्रयेषु परमार्थतो भिन्नेषु शुक्लादिषु यदृच्छया शुक्लः शुक्ल इत्याद्यभिन्नाभिधानप्रत्ययोत्पत्तिस्तत् शुक्लत्वादि सामान्यं, गुडतण्डुलादिपाकादिष्वेवमेव पाकत्वादि, बालवृद्धशुक्लादीदोरितेषु डित्थादिशब्देषु च, प्रतिक्षणं भिद्यमानेषु डित्थाद्यर्थेषु वा डित्थत्वाद्यस्तीति सर्वेषां शब्दानां जातिरेव प्रवृत्तिनिमित्तमित्यन्ये।

---

(१०) डित्थादिशब्दानां प्रथमादिवर्णबुद्धौ क्रमशः किञ्चित् किञ्चिदभिव्यक्तं चरमवर्णबुद्धौ तु निःशेषतो ग्राह्यं स्फुटतरमभिव्यक्तं नानावर्णात्मकध्वनिशब्दवत् वर्णक्रमसून्यं स्फोटाख्यं स्वरूपं शब्दानामिति शेषः, डित्थादिषु अर्थेषु उपाधित्वेन नामतया वक्ता पाचकादिना यदृच्छया स्वेच्छया सन्निवेश्यते कल्प्यते इति सन्दर्भार्थः।

(११) ननु उक्तरीत्या परमाणुत्वस्य प्रागप्रसिद्धेन जातितया परमाण्वादिशब्दानामपि जातिशब्दतया कथं गुणशब्दत्वेन व्यवहार इत्यतः आह परमाण्वादीनामिति। जातिशब्द एवायं, वैशेषिकनयानुसारेणैव तथा व्यवहारः, वस्तु भाट्ट इति भावः।

तद्वान् (१२) अपोहो वा शब्दार्थः कैश्चिदुक्त इति गन्थ-गौरवभयात् प्रकृतानुपयोगाच्च न दर्शितम् ।

स मुख्योऽर्थस्तत्र मुख्यो
व्यापारोऽस्याभिधोच्यते ॥ ८ ॥

स इति साक्षात्सङ्केतितः, अस्येति शब्दस्य ।

मुख्यार्थबाधे (१३) तद्योगे
रूढितोऽथ प्रयोजनात् ।
अन्योऽर्थो लक्ष्यते यत् सा
लक्षणाऽऽरोपिता क्रिया ॥ ९ ॥

कर्मणि कुशल इत्यादौ (१४) दर्भग्रहणाद्ययोगात् गङ्गायां घोष इत्यादौ च गङ्गादीनां घोषाद्याधारत्वासम्भवात् मुख्यार्थस्य बाधे, विवेचकत्वादौ सामीप्ये च सम्बन्धे, रूढितः

---

(१२) व्यक्तिविशेषमनुपादाय तद्वान् सामान्यतो जातिमान् शब्दार्थ इति न्यायमतम् । गोशब्दश्रवणात् सर्वेषां गोव्यक्तीनामनुपस्थितेरतस्मात् व्यावृत्तिः व्यावृत्तिदर्शनाच्च यतद्व्यावृत्तिरूपोऽपोहो वाच्य इत्यपरो बौद्धानां गतिः ।

(१३) मुख्यार्थस्य बाधे तद्योगेन तात्पर्यानुपपत्तौ, अथ किंवा, लक्ष्यते प्रतिपाद्यते, यदिति लुप्तकरणद्वितीयान्तमव्ययं क्रियाविशेषणं वा, तथाच मुख्यार्थबाधादिहेतुत्वयुक्तकारेण मुख्यार्थातिरिक्तार्थप्रतिपादनानुकूला या व्यापारोपिता नियतविषयविधुराऽपि तद्विषयकतया कल्पिता, शब्दस्य क्रिया वृत्तिः सा लक्षणा इत्यर्थः । सा च शक्यसम्बन्धरूपा शक्यतात्पर्यरूपा पदार्थान्तरं वा इत्यन्यदेतत् ।

(१४) कुशं लाति गृह्णातीति कुशलः ।

प्रसिद्धेः, तथा गङ्गातटे घोष इत्यादेः प्रयोगात् येषां न तथा (१५) प्रतिपत्तिः तेषां पावनत्वादीनां धर्म्माणां तथा प्रतिपादनात्मनः प्रयोजनाच्च मुख्येनानुपयोऽर्थो लक्ष्यते यत् स आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठो (१६) लक्षणा।

स्वसिद्धये (१७) परक्षेपः,
परार्थं स्वसमर्पणम्।
उपादानं लक्षणञ्चे-
त्युक्ता शुद्धैव सा द्विधा ॥ १० ॥

कुन्ताः प्रविशन्ति, यष्टयः प्रविशन्ति इत्यादौ कुन्तादिभिरात्मनः प्रवेशसिद्ध्यर्थं स्वसंयोगिनः पुरुषा आक्षिप्यन्ते, तदुपादानेनेयं लक्षणा।

'गौरनुबन्ध्यः' इत्यादौ स्मृतिस्रञ्चोदितमनुबन्धनं कथं मे स्यादिति (१८) ज्ञात्वा व्यक्तिराक्षिप्यते न तु शब्देनोच्यते 'विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे' इति न्यायात्

(१५) तथा विशेषतश्चीरगतत्वेन।

(१६) सान्तर मुख्यार्थबाधादुपस्थित्या व्यवहित योऽर्थ तत्स्वरूपस्तस्मिन् तद्विषयकः व्यापारो वृत्तिः।

(१७) मुख्यार्थसम्बन्धबोधाय परस्यापि आक्षेपात् उपादानात् उपादानेति नाम, परार्थमात्मसम्बन्धबोधाय स्वसमर्पणात् आत्मपरित्यागेनापरार्थकत्वसम्पादनात् लक्षणेति नाम च इति, इत्युभाभ्यां द्विविधा लक्षणा शुद्धैव उक्ता न तु यस्यमाणा गौण्यपि लक्षणावादिति शेषः।

(१८) गोसदृश्य गोसजातियत्वेनतस्या अनुबन्ध्यसम्बन्धत्वादिति शेषः, आक्षिप्यते ज्ञाप्यते, लक्षणयेति शेषः, उच्यते अभिधया बोध्यते, विशेष्यं व्यक्तिं, विशेषणे जातौ।

-इत्युपादानलक्षणा तु नोदाहर्तव्या, नह्यत्र प्रयोजनमस्ति, न वा रूढ़िरियं, व्यक्त्यविनाभावित्वात् तु (१६) ज्ञात्वा व्यक्तिराक्षिप्यते, यथा क्रियतामित्यत्र कर्त्ता, कुर्व्वित्यत्र कर्म्म, प्रविश्य पिण्डमित्यादौ गृहं भक्षयेत्यादि च । पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र च रात्रिभोजनं न लक्ष्यते श्रुतार्थापत्तेरर्थापत्तेर्वा (२०) तस्य विषयत्वात् ।

गङ्गायां घोष इत्यत्र तटस्य घोषाधिकरणत्वसिद्धये गङ्गा-शब्दः स्वार्थमर्पयति इत्येवमादौ, लक्षणैनैषा लक्षणा । उभयरूपा चेयं शुद्धा उपचारेण (२१) अमिश्रितत्वात् । अनयो-(२२) लक्ष्यस्य लक्षकस्य च न भेदरूपं तात्स्यं,

---

(१६) यत्यमाक्षिप्यते ज्ञात्वा, किन्तु न लक्षणया अपि तु अविनाभावसम्बन्धेनेत्याह व्यक्तेति । 'अविनाभावित्वात् व्यक्तिप्रतीति' विना तस्याः प्रतीत्यसम्भवात् ।

(२०) यत्र अनुपपद्यमानः शब्दः शब्दान्तरं कल्पयति सा श्रुतार्थापत्तिः, यथा हारमिति शब्दः निधेहीति क्रियापदं, इदमेव पदाध्याहारः । यत्र च शब्दः श्रुतो वाऽर्थोऽनुपपन्नोऽर्थान्तरं कल्पयति सा अर्थापत्तिः यथा तत्रैव हारमित्यर्थोऽनुपपन्नः निधेहीति क्रियां कल्पयति, इदमेव अर्थाध्याहार इति, मतभेदेन उभयम् ।

(२१) उपचारेण तात्स्यसम्बन्धमूलकारोपेण ।

(२२) उपचारान्तिरस्यं न शुद्धेत्यत्र प्रयोजकं, किन्तु लक्ष्यार्थ-लक्षणार्थयोः भेदप्रतीतिपर्य्यवसन्नं चौदासीन्यापरपर्य्यायं तात्स्यमेव तथेति परमतं निराकरोति, अनयोरिति । उक्तविषयलक्षणास्वेऽपि लक्षक-स्वरूपलक्ष्यार्थलक्ष्यार्थयोर्भेदप्रतीतिरेव न तु भेदप्रतीतिरूपं तात्स्यं व्यक्तीति शेषः ।

तटादीनां गङ्गादिशब्दैः प्रतिपादने तत्त्वप्रतिपत्तौ (२३) हि प्रतिपिपादयिषितप्रयोजनसंप्रत्ययः, गङ्गासम्बन्धमात्रप्रतीतौ गङ्गातटे घोष इति मुख्यशब्दाभिधानाल्लक्षणायाः को भेदः॥

सारोपाऽन्या तु यत्रोक्तौ
विषयी विषयस्तथा (२४)।

आरोप्यमाणः (२५) आरोपविषयश्च यत्रानपह्नुतभेदौ सामानाधिकरण्येन निर्दिश्येते सा लक्षणा सारोपा।

विषय्यन्तःक्षतेऽन्यस्मिन्
सा स्यात्साध्यवसानिका॥ ११॥

विषयिणाऽऽरोप्यमाणेनान्तःक्षते निगीर्णे (२६) अन्यस्मिन्

---

(२३) तत्त्वप्रतिपत्तौ यत्रालक्ष्ययोर्गङ्गातीरयोरभेदप्रतीतौ सत्यामेव प्रतिपादयितुमिष्टस्य प्रयोजनस्य गङ्गागतपावनत्वादे प्रतीतिः, तीरादौ इति शेषः। सा हि अनयोर्भेदप्रतीतौ सत्यां, असत्यां त्वभेदप्रतीतौ नेति भावः। पावनत्वादीनां प्रयोजनज्ञानविषयत्वेन प्रयोजनत्वव्यपदेश प्रत्यक्षविषयतया विषयस्य प्रत्यक्षत्वव्यपदेश इव।

(२४) तथा समानविभक्तिकेन शब्देन स्वस्वधर्मप्रकारेण या उक्तावित्यन्वयः।

(२५) आरोप्यमाणो गवादि, आरोपस्य विषय आश्रयो वाह्लीकादिः। अनपह्नुतभेदौ भेदो वैधर्म्यं तच्च गोत्ववाह्लीकत्वादि, प्रकाशितवैधर्म्यावित्यर्थः। सामानाधिकरण्येन समानविभक्तिकपदेन निर्दिश्येते उक्तौ सप्रयोजनमिति शेषः।

(२६) निगीर्णे स्वशब्दादिनाऽनुक्ते, विषयिणेतिकरणत्वं चानुक्तौ निगरणस्यारोपप्रयुक्तमौपचारिकम्।

आरोपविषये सति सा साध्यवसाना स्यात् (२७)॥

भेदाविमौ च सादृश्यात्सम्बन्धान्तरतस्तथा ।
गौणौ शुद्धौ च विज्ञेयौ

इमौ आरोपाध्यवसानरूपौ (२८) सादृश्यहेतू भेदौ गौर्वाहीकः इत्यत्र गौरयमित्यत्र च ।

अत्र हि स्वार्थसहचारिणो गुणा जाड्यमान्द्यादयो लक्ष्यमाणा अपि गोशब्दस्य परार्थाभिधाने प्रवृत्तिनिमित्तत्वमुपयान्ति इति केचित् (२९) । स्वार्थसहचारिगुणाभेदेन परार्थगता गुणा एव लक्ष्यन्ते नतु परार्थोऽभिधीयते (३०) इत्यन्ये। साधारणगुणाश्रयत्वेन परार्थ एव लक्ष्यत इत्यपरे (३१) । उक्तञ्चान्यत्र "अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते ।

---

(२७) आरोपाध्यवसानयोर्विषये यदा लक्षणा नाभिप्रेता स्यात् तदा यथाक्रमं रूपकातिशयोक्ती सम्भवतः ।

(२८) विरुद्धधर्मारूपेण प्रतीतयोरपि सामानाधिकरण्येन सम्बन्धोऽभेद एव आरोपः, तदन्यथोक्तिरभेदोऽध्यवसानम् । एताद्दशारोपाध्यवसानस्वरूपभेदयो शुद्धत्वगौणत्वाभ्यां एताद्दशभेदविशिष्टे अपि लक्षणे एते गौण्यौ चेति भावः ।

(२९) स्वार्थस्य गोत्वादिजातेः सहचारिणः समानाधिकरणाः, परार्थो वाहीकादिः, प्रवृत्तिनिमित्तं यद्विनिमित्तत्वम् । लक्षणया प्रथमं जाड्यादयुपस्थितिः ततः अभिधया वाहीकस्य बोधनमिति भावः ।

(३०) गोत्वसम्बन्धादपि बोधनात् यथा गोर्बोधः तथा जाड्यसम्बन्धादपि तस्मात् जाड्यादिरूपेण वाहीकस्य बोधनमिति भेदः ।

(३१) साधारणः गोवाहीकोभयगतः गुणो जाड्यादिः, तदाश्रयत्वेन तद्रूपेण जाड्यादिगुणविशिष्टे लक्षणेति मतनिष्कर्षः ।

लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता" (३२) इति ॥

अविनाभावोऽत्र सम्बन्धमात्रं नतु नान्तरीयकत्वं, तथात्वे हि मञ्चाः क्रोशन्तीत्यादौ न लक्षणा स्यात्, अविनाभावे चाक्षेपेणैव सिद्धेर्लक्षणाया नोपयोग इत्युक्तम् (३३)।

आयुर्घृतम्, आयुरेवेदम् (३४) इत्यादौ च सादृश्यात् अन्यत् कार्य्यकारणभावादि सम्बन्धान्तरम्। एवमादौ च कार्य्यकारणभावादिलक्षणपूर्व्वमारोपाध्यवसाने। अत्र गौणभेदयोर्भेदेऽपि तादृप्यप्रतीतिः, सर्व्वथैवाभेदावगमस्य प्रयोजनम् (३५)। शुद्धभेदयोस्त्वन्यवैलक्षण्येनाव्यभिचारेण (३६) च कार्य्यकारित्वादि। क्वचित् तादर्थ्यादुपचारः यथा इन्द्रार्थाः स्थूणा इन्द्रः, क्वचित् स्वस्वामिभावात् यथा राजकीयः

---

(३२) अत्र 'मानान्तरविरोधे तु मुख्यार्थस्यापरित्यागे' इत्यादि। अभिधेयाविनाभूतस्य यस्यसम्बन्धस्य प्रतीतिर्यत्र सा, लक्ष्यमाणा उक्तरीत्या लक्ष्यार्थविशेषणतया लाक्षणिकबोधविषया ये गुणा जाड्यादय तैर्योगात् सम्बन्धात्।

(३३) अत्र अभिधेयाविनाभूतेत्यत्र, नान्तरीयकत्वं व्याप्तिः, अविनाभावे च व्याप्तौ सत्यां तु, आक्षेपेण अनुमानेन। उक्तं 'गौरनुबन्ध्य.' इत्यत्र।

(३४) अत्र इदंमन्त्रेण पुरोवर्त्तित्वरूपेणैव घृतादेरुपस्थितिः, यत्र तु इदमो घृतत्वेन उपस्थितिः तत्र सारोपैव।

(३५) अत्रेति स्थाने इति शेषः, भेदेऽपि तादृप्यप्रतीतिः पूर्व्वोक्तरीत्या गोत्वबाहीकत्वादिवैधर्म्म्यप्रतीतावपि गोबाहीकयोरभेदप्रतीतिः। सर्व्वथैव एताद्दशभेदप्रतीतिं विनैव, उत्कटाभेदप्रतीतिरिति यावत्।

(३६) अत्राभिचारेण नियमेन।

पुरुषो राजा, क्वचिद्वयवावयविभावात् यथा अग्रहस्तः इत्यवाग्भागावयवे हस्तः, क्वचित् तात्कर्म्यात् यथा अतल्या तल्या ।

लक्षणा तेन षड्विधा ॥ १२ ॥

आद्यभेदाभ्यां (३७) सह । सा च

व्यञ्जनेन रहिता रूढौ सहिता तु प्रयोजने ।

प्रयोजनं हि व्यञ्जनव्यापारगम्यमेव ।

तच्च गूढमगूढं वा,

तच्चेति व्यङ्ग्यम् । गूढं यथा,

मुखं विकस्वितस्मितं, वशितवक्रिम प्रेक्षितं,
समुच्छलितविभ्रमा गतिरपास्तसंस्था मतिः ।
उरो मुकुलितस्तनं, जघनमंसबन्धोद्धुरं,
वतेन्दुवदनातनौ तरुणिमोद्गमो मोदते ॥

अगूढं यथा,

श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम् ।
उपदिशति कामिनीनां यौवनमद एव ललितानि ॥

अत्रोपदिशतीति (३८) ।

तदेषा कथिता त्रिधा ॥ १३ ॥

---

(३७) उपादानलक्षणरूपोपाधिभ्याम् । तथाहि लक्षणा प्रथमतो द्विविधा शुद्धा गौणी च, एतावपि पुनरपि त्रिधा उपादान-लक्षण-रोपाध्यवसानभेदात्, गौण्यपि सारोपा साध्यवसानेति द्विधेति षड्विधा ।

(३८) अत्र 'अनायासेन विषयादानम् अभिधेयवत् स्फुटं प्रतीयते' इति क्वचित् पाठः ।

अव्यङ्ग्या गूढव्यङ्ग्या अगूढव्यङ्ग्या च।

तद्भू-र्लाक्षणिकः,

शब्द इति सम्बध्यते, तद्भूस्तदाश्रयः।

तत्र व्यापारो व्यञ्जनात्मकः।

कुत इत्याह

यस्य प्रतीतिमाधातुं
लक्षणा समुपास्यते ॥१४॥
फले शब्दैकगम्येऽन्य
व्यञ्जनान्नापरा क्रिया।

प्रयोजनप्रतिपिपादयिषया यत्र लक्षणया शब्दप्रयोगस्तत्र नान्यतस्तत्प्रतिपत्तिरपि तु तस्मादेव शब्दात्, न चात्र व्यञ्जनादृते अन्यो व्यापारः। तथाहि,

नाभिधा समयाभावात्,

गङ्गायां घोष इत्यादौ ये पावनत्वादयो धर्मास्तटादौ प्रतीयन्ते, न तत्र गङ्गादिशब्दा सङ्केतिताः।

हेत्वभावान्न लक्षणा ॥ १५ ॥

मुख्यार्थबाधादित्रयं हेतुः। तथा च,

लक्ष्यं न मुख्यं नाप्यत्र
बाधो योगः फलेन नो।
न प्रयोजनमेतस्मिन्
न च शब्दः स्खलद्गतिः (३९) ॥१६॥

---

(३९) स्खलनो गति सामर्थ्य यस्य स, प्रत्युतशक्तिसामर्थ्यं प्रयोजने इति भावः।

यथा गङ्गाशब्दः स्रोतसि सवाधे इति तटं लक्षयति, तद्वत् यदि तटेऽपि सवाधः स्यात् तत् प्रयोजनं लक्षयेत्, न च, तटं मुख्योऽर्थः, नाप्यत्र बाधः, न च, गङ्गाशब्दार्थस्य तटस्य पावनत्वाद्यैर्लक्षणीयैः सम्बन्धः, नापि प्रयोजने लक्ष्ये किञ्चित् प्रयोजनम्, नापि (४०) गङ्गाशब्दस्तटमिव प्रयोजनं प्रतिपादयितुमस्तमर्थः ।

एवमप्यनवस्था स्याद् या मूलक्षतिकारिणी ।

एवमपि प्रयोजनं चेल्लक्ष्यते तत् प्रयोजनान्तरेण तदपि प्रयोजनान्तरेणेति प्रकृताप्रतीतिकृत् (४१) अनवस्था भवेत् ।

ननु पावनत्वादिधर्मयुक्तमेव तटं लक्ष्यते गङ्गायास्तटे घोषद्रत्यतोऽधिकस्यार्थस्य प्रतिपत्तिश्च प्रयोजनमिति विशिष्टे लक्षणा तत्किं व्यञ्जनेनेत्याह,—

प्रयोजनेन (४२) सहितं लक्षणीयं न युज्यते ॥१७॥

कुत इत्याह,—

ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम् (४३) ।

---

(४०) वस्तुतः प्रयोजनबोधे बाधाद्यपेक्षैव नास्तीत्याह नापीति, मुख्यार्थबाधादिकं विनेति शेषः । तदुक्तं, न च शब्दः स्वलक्षणमित्यस्य व्याख्यानम् । क्वचिच्च 'क्षमर्थ' इति पाठ, तदा मुख्यार्थबाधादिक्षमत्वेनेति शेषः ।

(४१) मूलक्षतिकारिणीत्यस्य व्याख्या प्रकृतेति, प्रयोजनमात्रेक्षणस्य व्यर्थत्वेनाक्षेपेण प्रस्तुतस्य पावनत्वादेः शीतादेश्च बोधानुदयप्रसङ्ग इतिभावः ।

(४२) प्रयोजनेन प्रयोजनीभूतस्वानविषयेण पावनत्वादिना ।

(४३) अन्य इति पदं स्वाश्रयत्वसम्बन्धेन व्यवस्थितत्वापि ।

प्रत्यक्षादेर्नीलादिर्विषयः, फलन्तु प्रकटता संवित्तिर्वा (४४) ।

विशिष्टे लक्षणा नैवं,

व्याख्यातम् ।

विशेषाः स्युस्तु लक्षिते ॥ १८ ॥

तटादौ ये विशेषाः पावनत्वाद्यः (४५), ते चाभिधा-तात्पर्य-लक्षणाभ्यो व्यापारान्तरेण गम्याः । तच्च व्यञ्जन-ध्वननादिशब्दवाच्यमवश्यमेषितव्यम् ।

एवं लक्षणामूलं व्यञ्जकत्वमुक्तम् । अभिधामूलत्वाह,—

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।

ज्ञानस्य विषय इति दृष्टान्तविधया उक्तं, यथा ज्ञानात् तद्विषयोऽन्य तथा फलमपि, फलफलिनोः समसमयसमुत्पादात्तन्मात्रादिति भावः ।

(४४) एतयोः प्रत्यक्षविषयफलयोः प्रत्यक्षाद्विलक्षणं यथा सूच्यते, तथा लक्षणाजन्यबोधात् तत्फलस्य पावनत्वादिप्रतीतेरन्यत्वमवश्यमेषितव्यम् । घटज्ञानानन्तरं ज्ञातो घट इति प्रत्ययात् तज्ज्ञानेन तस्मिन् ज्ञाततापरनाम्नी प्रकटता जायते इति व्यञ्जनमीमांसकमीमांसा । अत्र ज्ञातता न पदार्थान्तरं किन्तु ज्ञानविषयता सापि च ज्ञानात् न जायते, सति च घटज्ञाने घटमहं जानामीति प्रत्ययरूपा अनुव्यवसायापरपर्याया संवित्तिर्ज्ञानात् जायते इति तार्किकतर्कः । ज्ञानं तावत् द्विविधम् अन्तःकरणवृत्तिरूपं फलरूपञ्चेति, तत्र वृत्तिज्ञानेन विषयस्य अज्ञाने निवर्तिते विषयप्रकाशात्मके संवित्तिनामके फलज्ञाने जायते इति वेदान्तिसिद्धान्तः । विषयप्रकाशात्मिका एव संवित्तिरिति साङ्ख्यानामपि सम्मतम् ।

(४५) प्रतीयन्ते इति शेषः ।

संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम् ॥१८॥

"संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे (४६) विशेषस्मृतिहेतवः" ॥

-इत्युक्तदिशा, सयङ्चक्रो हरिः, यशङ्चक्रो हरिरित्यच्युते । रामलक्ष्मणौ इति दाशरथौ । रामार्जुनगतिस्तयोरिति भार्गवकार्त्तवीर्य्ययोः । स्थाणुभिन्न भवच्छिदे इति हरे । सर्वं जानाति देव इति युष्मदर्थे । कुपितो मकरध्वज इति कामे (४७) । देवस्य पुरारातेरिति शम्भौ । मधुना मत्तः कोकिल इति वसन्ते । पातु वो दयितामुखमिति सांमुख्ये । भात्यत्र परमेश्वर इति राजधानीरूपात् देशाद्राजनि । चित्रभानुर्विभातीति दिने रवौ, रात्रौ वह्नौ । मित्रम्भातीति यज्ञदि, (४८) मित्रो भातीति रवौ । इन्द्रगतुरित्यादौ (४९) वेदे इव काव्ये न स्वरो विशेषप्रतीतिकृत् । आदिग्रहणात्

---

(४६) अनवच्छेदे अविशेषे एव यतश्चाक्यस्य तात्पर्यमिति अनिर्णये, विशेषस्मृतिहेतवः तादृशतात्पर्यनिर्णायकाः ।

(४७) न तु मकरे, तस्य केतनत्वात् ।

(४८) मर्यंवकलिङ्गकपञ्चम्यन्ता इति भेदः ।

(४९) इन्द्रः मत्तुः मातयिता यस्य इति बहुव्रीहौ आद्यपदोदात्तं, तेन च इन्द्रस्य मातृकर्तृत्वं बोध्यते, इन्द्रस्य मत्तुरिति षष्ठीसमासपक्षे अन्त्यपदोदात्तं, तेन च इन्द्रस्य मातृकर्मत्वमवगम्यते ।

एद्दहमेत्तत्थणिआ एद्दहमेत्तेहिं अच्छिवत्तेहिं ।
एद्दहमेत्तावत्था एद्दहमेत्तेहिं दिअएहिं (५०) ॥

इत्यादावभिनयादयः (५१) । इत्थं संयोगादिभिरर्थान्तराभिधायकत्वे निवारितेऽप्यनेकार्थस्य शब्दस्य यत् क्वचिदर्थान्तरप्रतिपादनं, तत्र नाभिधा,नियमनात्तस्या', न च, लक्षणा, मुख्यार्थबाधाद्यभावात्, अपितव्यञ्जनं व्यञ्जनमेव व्यापारः । यथा

भद्रात्मनो दुरधिरोहतनोर्विशाल-
वंशोन्नतेः क्षतबिलीमुखसंग्रहस्य ।
यस्यानुपप्लुतगतेः परवारणस्य
दानाम्बुसेकसुभगः सततं करोऽभूत् (५२) ॥

तद्युक्तो व्यञ्जकः शब्दः,

तद्युक्तो व्यञ्जनाव्यापारयुक्तः ।

यत्सोऽर्थान्तरयुक् तथा ।
अर्थोऽपि व्यञ्जकत्वेन सहकारितया मतः ॥ २० ॥

तद्येति व्यञ्जकः ।

इति श्रीकाव्यप्रकाशे शब्दनिर्णयो नाम
द्वितीय उल्लासः ॥ * ॥

---

(५०) एतावन्मात्रव्याख्यानिका एतावन्मात्रैरधिपतं ।
एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैरिति च० ।

(५१) अभिनयादय इत्यादिशब्दाधिपः ।

(५२) राजपक्षे भद्र-बिलीमुख-वारण दान-करशब्दाः यथाक्रमं शोभन-बाण-निवारक-वितरण हस्त-बोधकाः, कविपक्षे तु भद्रजाति-भ्रमर-कवि-मदजल-शुण्डादण्डबोधकाः ।

तृतीय उल्लासः ॥



अर्थाः प्रोक्ताः पुरा तेषाम्,

अर्था वाच्यलक्ष्यव्यङ्ग्याः। तेषां वाचक-लाक्षणिक-व्यञ्जकानाम्।

अर्थव्यञ्जकतोच्यते।

कीदृशीत्याह

वक्तृबोद्धव्यकाकूनां
वाक्यवाच्यान्यसन्निधेः (१) ॥ २१ ॥
प्रस्तावदेशकालादे-
र्वैशिष्ट्यात् प्रतिभाजुषाम् (२)।
योऽर्थस्यान्यार्थधीहेतु-
र्व्यापारो व्यक्तिरेव (३) सा ॥ २२ ॥

बोद्धव्यः प्रतिपाद्यः (४)। काकुर्ध्वनेर्विकारः। प्रस्तावः प्रकरणम्। अर्थस्यवाच्यलक्ष्यव्यङ्ग्यात्मनः। क्रमेणोदाहरणानि,—

---

(१) वाक्यवाच्याभ्यां सहित अन्यसन्निधिः वाक्यवाच्यान्य सन्निधि, तत इति न बहुव्रचनम्।

(२) नवनवोन्मेषशालिनी प्रज्ञा प्रतिभा सैव भावनेत्युच्यते।

(३) व्यज्यतेऽनयेति करणव्युत्पत्त्या व्यक्तिर्व्यञ्जना।

(४) यं बोधयितुं यद् उद्दिश्यते स प्रतिपाद्य।

अइविउलं जलकुम्भं घेत्तूण समागदम्हि सहि ! तुरिअं।
समसेअसलिलणीसासणीसहा वीसमामि खणं (५)॥

अत्र चौर्यरतगोपनं गम्यते।

ओणिद्दं दोव्वल्लं चिन्ता अलसत्तणं सणीससिअं।
मह मन्दभाइणीए केरं सहि तुहवि अहह ! परिहवइ (६)॥

अत्र दूत्यासत्कामुकोपभोगो व्यज्यते।

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्द्धं सुचिरमुषितं वल्कलधरैः।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं
गुरुः खेदं खिन्ने मयि भजति, नाद्याऽपि कुरुषु ! ॥

अत्र मयि न योग्यः खेदः कुरुषु तु योग्य इति काका प्रकाश्यते (७)। न च वाच्यसिद्ध्यङ्गमत्र काकुरिति गुणीभूत-व्यङ्ग्यत्वं युक्तम्, प्रश्नमात्रेणापि काकोर्विश्रान्तेः (८)॥

---

(५) अतिविपुलं जलकुम्भं गृहीत्वा समागताऽस्मि सखि ! त्वरितम्। श्रमखेदसलिलनिःश्वासनिःसहा विश्राम्यामि क्षणम् इति सं०।

(६) औनिद्रां दौर्बल्यं चिन्ताऽलसत्वं सनिःश्वसितम्। मम मन्दभागिन्या कृते सखि ! त्वामपि अहह ! परिभवति इति सं०। तुहवीति पदं तवापीति छत्वा केचिद् व्याकुर्वन्ति। अहह ! इति कचिन्नास्ति।

(७) अप्रियत्वेन ज्ञानं खेदः, प्रकाश्यते व्यज्यते।

(८) पूर्वपक्षयितुरयमभिप्रायः पात्रापात्रवैपरीत्येन खेदस्य करणाकरणरूपवाक्यार्थस्य वयुक्ततयाऽपर्यवसन्नस्य पर्यवसानरूपसिद्ध्यै व्यङ्ग्योपस्थापनद्वारा काकुरेव प्रभवतीति काकोर्वाच्यसिद्ध्यङ्गत्वे तद्द्वारीभूतस्य व्यङ्ग्यस्यापि तथात्वेन गुणीभूततया गुणीभूतव्यङ्ग्यत्वं दुष्परमिति।

तद्दा मह गण्डत्थलमिलिअं दिट्ठिं ण णेसि अण्णत्तो ।
एहिं सच्चेअ अहं ते अ कवोला ण सा दिट्ठी (९) ॥

अत्र मत्सखीं कपोलप्रतिबिम्बितां पश्यतस्ते दृष्टिरन्यैवाभूत्, चलितायान्तु तस्यामन्यैव जातेत्यहो प्रच्छन्नकामुकत्वं ते ! -इति व्यज्यते ।

अहेओऽयं सरसकदलीस्तम्भगौराभिरामो
वृक्षोत्कर्षाङ्कुरितरमणीविभ्रमो नर्मदायाः ।
किञ्चैतस्मिन् सुरतसुहृदस्तन्वि ! ते वान्ति वाताः
येषामग्रे सरति कलिताकाण्डकोपो मनोभूः ॥

अत्र रतार्थं प्रविशेति व्यङ्ग्यम् ।

णोल्लेइ अण्हमणा पंथा मं घरभरम्मि सअलम्मि ।
खणमेत्तं जइ सञ्झाइ होइ णव होइ वा वीसामो (१०) ॥

अत्र सन्ध्यासङ्केतकाल इति तटस्थं (११) प्रति कयाचित् द्योत्यते ।

विद्वान्निनस्त्वयमभिधत्ते: अत्र काकोर्वाच्यसिद्ध्यङ्गत्वं न व्यङ्ग्यार्थाक्षेपद्वारा अपि तु न भजति ? इति प्रश्नमात्रोपस्थापनद्वारैव, तेन हि वाच्यार्थे पर्यवसन्ने सति व्यङ्ग्यप्रतीतिरिति कुतो गुणीभूतव्यङ्ग्यत्वयत्ना । काकोरिति हेतुपञ्चमी, विद्वान्ने. पर्यवसानात् वाच्यार्थस्येति शेषः ।

(९) तदा मम गण्डस्थलमिलितां दृष्टिं नान्येोरन्यत्र ।
इदानीं सैवाहं तौ च कपोलौ न सा दृष्टिः इति घ० ।

(१०) सुदखनाईमना स्वभूर्मा सद्दभारे पतसे ।
क्षणमात्रं यदि सन्ध्यायां भवति न सा भवति विश्राम इति घ० ।
अण्हमणा इति पाठे अनन्यमना इति घ० ।

(११) तटस्थ सन्ध्योद्दीपनादीनामुपलायकम् ।

सुव्वइ समागमिस्सदि तुज्झ पिओ अज्ज पहरमेत्तेण।
एमेव किंपि चिट्ठसि ता सहि सज्जेसु करणिज्जं (१२)॥

अथोपपतिं प्रत्यभिसर्त्तुं प्रस्तुता न युक्तमिति कयाचित् निवार्य्यते॥

अन्यत्र यूयं कुसुमावचायं कुरुध्वमत्राहमि करोमि सख्यः।
नाहं हि दूरं भ्रमितुं समर्था प्रसीदताऽयं रचितोऽञ्जलिर्मे॥

अत्र विविक्तोऽयं देश इति प्रच्छन्नकामुकत्वयाऽभिसार्य्यताम् इति आख्यातां प्रति कयाचिन्निवेद्यते।

गुरुअणपरवस पिअ! किं
मणामि तुह मन्दभाइणी अहअं।
अज्ज पवासं वच्चसि वच्च
सअं च्चेअ मुणसि करणिज्जं (१३)॥

अत्राद्य मधुसमये यदि व्रजसि तदाऽहं तावत् न भवामि (१४) तव तु न जानामि गतिमिति व्यज्यते। आदिग्रहणाच्चेटादेः। तत्र चेटाया. यथा;—

हारोपान्तनिरन्तरे मयि तया सौन्दर्य्यसारश्रिया
प्रोल्लास्योरुयुगं परस्परसमासक्तं समासादितम्।

---

(१२) श्रूयते समागमिष्यति तव प्रियोऽद्य प्रहरमात्रेण।
एवमेव किमिति तिष्ठसि तत् सखि! सज्जय करणीयमिति स०॥

(१३) गुरुजनपरवश प्रिय! किं भणामि तव मन्दभागिनी अहकं।
अद्य प्रवासं व्रजसि व्रज स्वयमेव जानासि करणीयमिति स०॥

(१४) भवामि जीवामि।

आनीतं पुरतः शिरोंऽशुकमधःच्छिन्ने चले लोचने,
वाचस्तत्र निवारितं प्रसरणं सङ्कोचिते दोर्लते ॥

अत्र चेष्टया प्रच्छन्नकामुकविषय आकूतविशेषो (१५) व्यज्यते । निराकाङ्क्षप्रतिपत्तये (१६) प्राप्तावसरतया च पुनः पुनः उदाह्रियते । वक्त्रादीनां मिथःसंयोगे द्विकादिभेदेन (१७), अनेन क्रमेण लक्ष्यव्यङ्ग्ययोश्च व्यञ्जकत्वमुदाहार्यम् (१८)॥

शब्दप्रमाणवेद्योऽर्थो
व्यनक्त्यर्थान्तरं यतः ।
अर्थस्य व्यञ्जकत्वे तत्
शब्दस्य सहकारिता ॥ २३ ॥

शब्देति, न हि प्रमाणान्तरवेद्योऽर्थो व्यञ्जकः ।

इति श्रीकाव्यप्रकाशेऽर्थनिर्णयस्तृतीय उल्लासः ॥ * ॥

---

(१५) आकूतविशेष स्वाभिप्रायविशेष, स चात्र आलिङ्गनादिविषयक एव ।

(१६) ननु एकस्मिन्नपि उभयवैशिष्ट्यसम्भवेन कथं प्रत्येकमुदाहृतमित्यत आह निराकाङ्क्षेति, प्रत्येकं किमुदाहरणम् ? इतिजिज्ञासानिवृत्तये इत्यर्थः ।

(१७) अस्य व्यञ्जकत्वमित्यनेनान्वयः । न केवलं एषां प्रत्येकमेव व्यञ्जकत्वमपि तु मिलितयोः द्वयोः मिलितानां वा बहूनामपीति भावः ।

(१८) अत्र "द्विकभेदे" बहूनां द्वयभेदे यथा,—

'अत्ता एत्थ णिमज्जइ एत्थ अहं दिअहए अवलोएहि ।
मा पहिअ रत्तिअन्धिअ ! सज्जारु महल्लो णिमज्जिहिइ ॥'

इति कश्चित् अधिकमस्ति ? सत्यं,

भट्टारक णिमज्जति अत्राहं दिवसके अवलोकय ।
मा पथिक रात्र्यन्ध ! मय्यायामावयोः निमंक्ष्यतीति छ० ।

चतुर्थः उल्लासः ॥

यद्यपि शब्दार्थयोर्निर्णये कृते दोषगुणालङ्काराणां स्वरूपमभिधानीयम्, तथापि धर्मिणि प्रदर्शिते, (१) धर्माणां हेयोपादेयता ज्ञायते इति (२) प्रथमं काव्यभेदान् (३) आह ।

अविवक्षितवाच्यो यस्तत्र वाच्यं भवेद्ध्वनौ ।
अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम् ॥ २४ ॥

लक्षणामूलगूढव्यङ्ग्यप्राधान्ये सत्येव (४) अविवक्षितं वाच्यं यत्र स, 'ध्वनौ'-इत्यनुवादात् (५), ध्वनिरिति ज्ञेयः ।

---

(१) प्रदर्शिते प्रकर्षेण साधारणप्रभेदं निर्दिष्टे ।

(२) ज्ञायते इति केषाञ्चिद्धर्माणां विधेयनिष्ठत्वात् इति शेषः, तथाहि शब्दालङ्कारध्वनौ श्रुतिकटुत्वं दोषः, माधुर्यं गुणः न तु रौद्रध्वनौ । चित्रभेदे तु यमकादिरलङ्कारः, न तु रसध्वन्यादौ ।

(३) काव्यभेदान् उक्तध्वन्यादिरूप-काव्य-त्रयप्रभेदान्, तत्रापि प्रथमं ध्वनेः प्रभेदः, ध्वनिर्हि प्रथमतो द्विविधः,—अविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्चेति, आद्यो लक्षणामूलोऽन्त्योऽभिधामूलः ।

(४) अन्यथाऽसम्भवात् इति शेषः ।

(५) ध्वन्यादित्यनुवादात् 'यः' इति-यच्छब्दसाकाङ्क्ष्यं 'तत्'-इति तच्छब्दस्य विधेयतया कथनात् ।

तत्र च वाच्यं क्वचिदनुपयुज्यमानत्वादर्थान्तरे परितमितम्(६)। यथा,—

त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति ।
आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत् ॥

अत्र वचनादि उपदेशादिरूपतया परिणमति (७)। क्वचिदनुपपद्यमानतया अत्यन्तं तिरस्कृतम् (८)। यथा,

उपकृतं बहु नाम, किमुच्यते,
सुजनता प्रथिता भवता परम् ।
विदधदीदृशमेव सदा सखे !
सुखितमास्व ततः शरदां शतम् ॥

---

(६) अनुपयुज्यमानत्वात् यद्रूपेण वाच्यं तद्रूपेण प्रकृतान्वयेऽभिप्रेतत्वात्, अर्थान्तरे अन्यप्रकारेण वाच्यसाधारण्येऽर्थे, परिणमितं परिणमितमिव, तादृगार्थ्यं लक्षकमिति यावत्, यत्र वाच्योऽपि प्रकारान्तरेण लक्ष्यते इति तु वस्तुदिगर्थं, यथा काकेभ्यो दधि रक्ष्यतामित्यादौ वाच्योऽपि काक दध्युपघातकत्वरूपेण लक्ष्यः । इदञ्च उपादानलक्षणास्वरूपमेव संभवति ।

(७) उद्बोध्यतद्विषय वक्तव्यविषयकथनेनैव सिद्धे पुनः 'त्वामस्मि वच्मि' इति कथनमनुपयुक्तमिति 'त्वाम्' उपदेश्यं त्वाम्, 'अस्मि' आप्नोऽहम्, 'वच्मि' उपदिशामि इति लक्षणम्, तेन च हितसाधनत्वं व्यङ्ग्यम् । एवं विदुषामत्यत्रेऽपि 'विदुषाम्' इति, आत्ममतेः पार्श्वकालिकत्वेऽपि 'आत्मीयाम्' इति च यथाक्रमं सर्वशास्त्रविशारदरूपेण प्रमाणपरतन्त्रपरतया च परिणतं, तेन च अन्यथाचरणे उपदेशनीयत्वं व्यङ्ग्यम् ।

(८) तिरस्कृतं पूर्वोत्तरीत्यापि प्रकृतान्वयानुपयोगितया इतरार्थमात्रलक्षकम्, वाच्यमिति भेदः, यथा गङ्गायां घोषः । अयञ्च उपादानलक्षणातिरिक्तलक्षणास्वरूप एव संभवति ।

एतत् अपकारिणं प्रति विपरीतलक्षणया कश्चिदुक्तिः ।

विवक्षितञ्चान्यपरं वाच्यं यत्रापरस्तु (९) सः ।

अन्यपरं व्यङ्ग्यनिष्ठम् (१०) । एष च (११)

कोऽप्यलक्ष्यक्रमव्यङ्ग्यो (१२)

लक्ष्यव्यङ्ग्यक्रमः परः ॥ २५ ॥

अलक्ष्येति न खलु विभावानुभावव्यभिचारिण एव रस, अपितु रसैः, इत्यस्ति क्रमः, स तु लाघवान्न लक्ष्यते (१३) । तत्र,-

रस-भाव-तदाभास-

भावशान्त्यादिरक्रमः ।

भिन्नो रसादलङ्कारात्

अलङ्कार्यतया स्थितः (१४) ॥ २६ ॥

---

(९) अपरः विवक्षितान्यपरत्वाद्ध्वनिः । एष च अभिधामूलगूढव्यङ्ग्यप्राधान्ये सति भवति ।

(१०) व्यङ्ग्यनिष्ठं व्यङ्ग्यतात्पर्यकम् ।

(११) एष च विवक्षितान्यपरत्वाद्ध्वनिश्च ।

(१२) न खल्वेतदनुभूयमानः क्रमो निष्पत्तिक्रमो यस्य तादृशं व्यङ्ग्यं यत्र सः ।

(१३) रसस्यैरिति निष्पद्यते इति शेषः, लाघवात् झटिति चमत्कारित्वात् ।

(१४) तयोः रसभावयोराभासः तदाभासः । अक्रमः अलक्ष्याक्रमः, रसादलङ्कारात् रसवदादलङ्कारात्, स्थित इति, यत्र स्थित स अलक्ष्याक्रमव्यङ्ग्यो ध्वनिरिति शेषः ।

आदिग्रहणाद्भावोदय-भावसन्धि-भावशबलत्वानि । प्रधानतया यत्र स्थितो रसादिस्तत्रालङ्कार्यः, यथोदाहरिष्यते । अन्यत्र तु प्रधाने वाक्यार्थे यत्राङ्गभूतो रसादिस्तत्र गुणीभूतव्यङ्ग्ये रसवत्-प्रेय-ऊर्जस्वि-समाहितादयोऽलङ्काराः । ते च गुणीभूतव्यङ्ग्याभिधाने (५७०) उदाहरिष्यन्ते । तत्र रसस्वरूपमाह,—

कारणान्यथ कार्याणि
सहकारीणि यानि च ।
रत्यादेः स्थायिनो लोके
तानि चेन्नाट्यकाव्ययोः (१५) ॥ २७ ॥

विभावा अनुभावाश्च
कथ्यन्ते व्यभिचारिणः ।
व्यक्तः स तैर्विभावाद्यैः
स्थायी भावो रसः स्मृतः (१६) ॥ २८ ॥

---

(१५) नाट्यकाव्ययोरिति निबध्यन्ते इति शेषः ।

(१६) कारणमिह द्विविधं जनकं परिपोषकञ्चेति, यस्मादत्र रत्यादिराविर्भवति स एव नायकनायिकादिरूप आलम्बनपदाभिधेयो जनकः, प्रादुर्भूते च तस्मिन् वस्तुन उद्दीपनरूपोद्दीपनकारी चन्द्रोदयादिः स उद्दीपनपदव्यपदेश्यः परिपोषक इति । कार्यं तु रत्यादिजन्यं कटाक्षादिरूपकायिकत्रायिकमानसिकभेदेन भानैर्वक्ष्यते । सहकारीणि रत्यादेरुल्लिखितकार्यस्य जनने झटिति प्रतीतौ वा सहायभूतानि वक्ष्यमाणानि निर्वेदादीनि, स्थायिनः स्थायिभावापरनाम्नः, व्यक्तः आस्वादयोग्यः विभक्तश्चमत्कृतिविषय इति यावत्, तत्प्रत्यायी च जनभेदेन सहृदयमेव स्फुटीभविष्यति ।

उक्तं हि भरतेन 'विभावानुभावव्यभिचारिसंयोगात् (१७) रसनिष्पत्तिः' इति। एतद्विवृण्वते (१८), विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणैः स्थायी रत्यादिको भावो जनितः अनुभावैः कटाक्षभुजाक्षेपप्रभृतिभिः कार्यैः प्रतीतियोग्यः कृतः व्यभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचितो मुख्यया वृत्त्या रामादावनुकार्ये तद्रूपतानुसन्धानात् नर्त्तकेऽपि प्रतीयमानो रस इति भट्टलोल्लटप्रभृतयः (१९)।

'राम एवायम्, अयमेव रामः' इति, (२०) 'न रामोऽयम्'-

---

(१७) संयोगात् संबन्धात्, स च मतभेदेन नानाविधो वक्ष्यते।

(१८) विवृण्वतेऽत्यस्य 'भट्टलोल्लटप्रभृतय' इत्यनेनान्वयः।

(१९) उपचितः परिपुष्टीकृतः, मुख्यया वृत्त्या वाक्यविकेन सम्बन्धेन, अनुकार्ये नाट्येनाभिनेयनायके, स्थितोऽपीति शेषः, एतच्च नाट्याभिप्रायेण। तद्रूपतानुसन्धानात् रामस्यैव वेषविशेषवाग्विधायिनि नर्त्तके तत्कालं रामत्वाभिमानात्, प्रतीयमान व्यञ्जनयाऽभिव्यक्त। तदयं निर्गलितार्थः, यथा व्यालत्यपि सर्पे सर्पतयाऽवलोकितात् दाम्नोऽपि भीतिरुदेति, तथा सीताविषयिणी अनुरागरूपा रामरतिरविद्यमानाऽपि नर्त्तके नाट्यनैपुण्येन तस्मिन् स्थितेव प्रतीयमाना सहृदयहृदये चमत्कारमर्पयन्त्येव रसपदवीमधिरोहतीति रतेर्व्यञ्जनयाऽभिव्यक्तिरेव रसनिष्पत्तिरिति।

(२०) अत्र विषयनियमविषयापरनाम्नी सम्यक्प्रतीतिः, तथाहि एवकारस्यार्थत्रयं, यदुक्तम्,—

'अयोगमन्ययोगञ्च अत्यन्तायोगमेव च।

व्यवच्छेदाय मन्यन्ते एवकारं विधा बुधाः' इति

अयमर्थः, यत्र विशेषणान्वित एवकारस्तत्र विशेषणस्य असम्बन्धरूपमयोगं निषेधति, यथा 'राम एवायम्' इत्यत्र रामस्य विशेषणत्वेन

दृत्यौत्तरकालिके बाधे 'रामोऽयम्' इति, (२१) 'रामः स्याद्वा न वाऽयम्' इति, 'रामसदृशोऽयम्' इति च सम्यङ्-मिथ्या-संशय-सादृश्यप्रतीतिभ्यो विलक्षणया चित्रतुरगादिन्यायेन (२२) 'रामोऽयम्'-इतिप्रतिभत्या ग्राह्ये नटे (२३)

सेयं ममाङ्गेषु सुधारसच्छटा सुपूरकर्पूरशलाकिका दृशोः ।
मनोरथश्रीर्मनसः शरीरिणी प्राणेश्वरी लोचनगोचरङ्गता ॥

दैवादहमत्र तया चपलायतनेत्रया वियुक्तश्च ।
अविरलविलोलजलदः कालः समुपागतश्चायम् ॥—

इत्यादिकाव्यानुसन्धानबलाच्छिक्षाभ्यासनिर्वर्त्तितस्वकार्य्य-प्रकटनेन च (२४) नटेनैव प्रकाशितैः कारण-कार्य्य-

---

तद्व्यतिरेकारेण इदमर्थं विशेष्ये रामत्वायोग व्यवच्छिन्दत् अस्य रामत्वं नियमयति, यत्र पुनर्विशेष्यगत एवकारस्तत्र विशेष्येतरस्मिन् विशेषणीभूतधर्म्मसम्बन्धं बारयति, यथा 'अयमेव रामः' इत्यत्र इदम्भिधे रामत्वसम्बन्धं बारयन् अस्मिन् रामत्वं नियमयति, उभयरूपेयं प्रतीति-रवधारणपरतया सम्यक्प्रतीतिः । यत्र तु क्रियान्वित एवकारस्तत्र अयमत्र सर्व्वदा योऽयोगस्यैव निषेधकः, तत्क्रियान्वये कुत्रचिदपि सम्बन्धबोधकइति तु फलितार्थः । तथा 'नीलं कमलं भवत्येव' इति, अत्र हि न सकले कमले नीलत्वं नियम्यते, भाव्यकमलेऽनीलत्वम्, अपि तु यस्मिन्-कस्मिन्नपि कमले नीलत्वसम्बन्ध इति प्रसङ्गाद्दृश्यम् ।

(२१) एषा तु अयमत्रारोपोऽविपरीतप्रतीतिकतया मिथ्याप्रतीतिः ।

(२२) व्यक्तिविशेषे नयनपथवर्त्तिन्येव 'अयोऽयम्' इत्येवं प्रतीतिरहेति ।

(२३) प्रतिपक्षया प्रतीत्या, 'नटे' इत्यस्यधिमेण 'अनुभीयमानोऽपि' इत्यनेनान्वयः ।

(२४) शिक्षया अभ्यासेन (पुनः पुनरनुसन्धानेन) च निर्वर्त्तितं सम्पादितं यत् स्वकार्य्यञ्च अभिनयस्य प्रकटनं प्रकाशनं तेन कारणभूतेन ।

सहकारिभिः क्षत्रियैरपि तयाऽनभिमन्यमानै.(२५)विभावादि-शब्दव्यपदेश्यै. 'संयोगात्' गम्यगमकभावरूपात् (२६) अनुमीयमानोऽपि वस्तुसौन्दर्यबलाद्रसनीयत्वेनान्यानुमीय-मानविलक्षणः (२७) स्थायित्वेन सम्भाव्यमानो रत्यादिर्भाव, तत्रासन्नपि (२८) सामाजिकानां वासनया चर्व्यमाणो (२९) रस इति श्रीमङ्कुक.।

न तावत्स्थेन नायकगतत्वेन रस, प्रतीयते नोत्पद्यते नाभि-व्यज्यते (३०), अपि तु काव्ये नाट्ये चाभिधातो द्वितीयेन

---

(२५) क्षत्रियत्वेनानुपलब्धै ।

(२६) विभावादिसत्त्वे रतेरवश्यभाव इत्येवंरूपव्याप्तिनामकसम्बन्धात ।

(२७) वस्तुनोऽनुमीयमानाया रते सौन्दर्य चमत्कारिता, रस-नीयत्वेन आस्वाद्यमानत्वेन, अन्यो वह्न्यादिरूपो लौकिकोऽनुमीयमानो विषय तस्मात् विलक्षण विभिन्न ।

(२८) तत्र नटे, असन्नपि वस्तुतोऽविद्यमानोऽपि, स्थायित्वेन (नटगतत्वेन) सम्भाव्यमान (ज्ञेयमान) इतिपूर्वेणान्वय ।

(२९) वासनया भावनया, चर्व्यमाण आस्वाद्यमान । एतन्मत-स्याय निष्कर्ष, यथा कुज्झटिकाकुक्षिते देशेऽसतोऽपि धूमस्याभिमानाद् धूमनियतस्य वह्नेरनुमानम, तथा नटेनैव सुनिपुण 'अमुनैते विभावादय' इति प्रकाशितैस्तत्तत्सङ्गिरपि विभावादिभिरुद्बुद्धियमाणा रतिरनुमीयमानाऽपि निजसौन्दर्यबलात् सामाजिकानामास्वाद्यतया च चमत्कारमादधती रसतामे-तीति. रतेरनुमितिरेव रसनिष्पत्तिरिति. ।

(३०) नाटस्थेन नटस्य सदाचेन न च प्रकृते नट, नायको रामादिरिति द्विविध, तत्सम्बन्धितेन । आत्मगतत्वेन सामाजिकसम्बन्धितेन,

(२१) विभावादिसाधारणीकरणात्मना भावकत्वव्यापारेण भाव्यमानः (२२) स्थायी सत्त्वोद्रेकप्रकाशानन्दमय-संविद्-विश्रान्तिसतत्त्वेन (२३) भोगेन भुज्यते इति भट्टनायकः (२४)।

न प्रतीयते नानुमीयते, तदानीं रामादीनामभावेन तद्रत्यादेरप्यभावात् अतः सत्त्वेनानुमानप्रमाणाविषयत्वात्, वस्तुतो-रामगतया भटगतत्वेनानुमितयाऽपि रत्या सामाजिकेऽसत्या तच्चमत्कारजननासम्भवाच्च । नोत्पद्यते न जन्यते, विभावादीनां वास्तविकत्वाभावात् । नाभिव्यज्यते न व्यञ्जनया उपस्थाप्यते, विद्वष्वेव तत्समभ्यासादिति भाव ।

(२१) द्वितीयेन व्यक्तेन ।

(२२) भाव्यमान साधारणीक्रियमाण ।

(२३) सत्त्वगुणस्य उद्रेकेण रजस्तमसी अभिभूयाविर्भावेण यः प्रकाश स एवानन्दात्मिका संवित् ज्ञानं, तस्य विश्रान्तिर्नैयान्तरसम्पर्क-राहित्येनास्वादनम्, अस्य च हृदभिहितभावतया व्यवस्थितताहमसंविदिति फलितार्थः, तच्चतत्त्वेन तत्स्वरूपेण ।

(२४) भट्टनायकमतस्यैव सारः, यस्य अभिधाव्यापारवत् काव्य-नाट्ययोरहृद्यत्वं भावकत्वभोजकत्वनामकं व्यापारद्वयमतिरिक्तमस्ति, तत्राद्येन व्यापारेण व्यक्तिविशेषसम्बन्धित्वेनासाधारणस्य विभावादेः स्थायिनश्च व्यक्तिविशेषांशपरिहारेण उपस्थापनरूपं साधारणीकरणम्, अनेन च विभावादिसङ्कलनेन रतिरास्वाद्यते (अथवा अपि रतेरास्वादः अलौकिकत्वादुपपद्यते) । तथाहि काव्यार्थबोधोत्तरमेव भावकत्वव्यापारेण विभावादिरूपसीतादेवो रामपत्न्यादिनो रतिश्च सीतात्वरामपत्न्यादि-रूपाय सामान्यतः कामिनीत्वरतित्वादिनैवोपस्थाप्यते, भोजकत्वव्यापारेण च सङ्कलनेन साधारणीकृतविभावादिसङ्कलनेन वा रतिः सङ्कलनेनास्वाद्यते इति रतेरास्वाद एव रसनिष्पत्तिरिति ।

लोके प्रमदादिभिः स्याय्यनुमानेऽभ्यासपाटवयुक्तानाम् (३५) काव्ये नाट्ये च तैरेव (३६) कारणत्वादिपरिहारेण (३७) विभावनादिव्यापारवत्त्वात् (३८) अलौकिकविभावादिशब्द व्यवहार्यौ. (३९) ममैवैते, शत्रोरेवैते, तटस्थस्यैवैते, (४०) न ममैवैते, न शत्रोरेवैते, न तटस्थस्यैवैते-इतिसम्बन्धविशेष स्वीकारपरिहारनियमानध्यवसायात् साधारण्येन प्रतीतेः (४१)

---

(३५) स्यायिनो रते अनुमाने अनुमानविषये अभ्यास पुन पुनरनुशीलनं तेन पाटव पटुता नैपुण्यम, तद्वताम्।

(३६) तैरेव प्रमदादिभिरेव, अस्य च 'अभिव्यक्त' इत्यविशेषान्वय।

(३७) कारणत्वादिपरिहार कारणत्वादिना व्यपदेशपरित्याग।

(३८) आदिपदेन अनुभावव्यभिचारणव्यापारयोर्ग्रहणम्। वासनात्मतयाऽतिसूक्ष्मरूपेणावस्थितानां रत्यादीनां आस्वादयोग्यतानयनरूपाविर्भावन विभावन, तेषा तु अनुभवविषयीकरणमनुभावन, कार्यविशेषेण अभितो रत्यादीना सञ्चारण स्फुटमभिव्यक्तीकरणं व्यभिचारण त एव व्यापारा।

(३९) लोके हर्षशोककारणेभ्यो हर्षशोकावेव हि जायेते अत्र पुन सर्वेभ्य एव तेभ्य सत्त्वमित्यलौकिकत्वम्।

(४०) एते विभावादय, एतद्रूपेण सम्बन्धविशेषस्य 'अमुकस्यैवैते'-इत्येवंरूपस्य स्वीकारनियम। उत्तरार्द्धेन तु तस्य परिहारनियम।

(४१) अनध्यवसायात् अनिर्णयात्, साधारण्येन सीतात्वादिविशेषायरहितेन कामिनीत्वादिना प्रतीतेः हेतोः। अस्यायमाशय, लोके हि तिस्रो विधा, कानिचिद् वस्तूनि स्वस्यैव, कानि च शत्रोरेव, कानि पुन शत्रुमित्रविलक्षणस्य उदासीनापरनाम्न तटस्थस्यैव (मित्रवस्तुनोऽपि आत्मीयसम्बन्धित्वेन स्वकीयत्वमिति न विभागन्यूनता)। तत्र यदि स्वकीयत्वेन विभावादयः प्रतीयेरन्, तर्हि इतरसामाजिकविषयौ

अभिव्यक्तः सामाजिकानां वासनात्मतया स्थितः (४२) स्थायी रत्यादिको नियतप्रमात्रगतत्वेन (४३) स्थितोऽपि साधारणीभावबलात् (४४) तत्कालविगलितपरिमितप्रमात्रभाववशोन्मिषितवेद्यान्तरसम्पर्कशून्यापरिमितभावेन प्रमात्रा (४५)

स्वरतिप्रकाशोऽनुचित इति क्षीरस्वोदीयात्, रसास्वादस्तु दूर एवास्ताम् । यत्तुसम्बन्धित्वेन प्रतीतौ च विद्वेषाविर्भावस्यैवावश्यम्भावितया रसास्वादस्यार्थस्य कथम् ? । उदासीनसम्बन्धप्रतीतावपि स्वस्मिन् तदनुद्भावाभिसन्धानप्रवृत्तेन नितरामेव तदास्वादोऽनुपपन्न इति सम्बन्धविशेषस्वीकारस्यानिष्ट स्वीकर्तव्य । एव तत्परिहारनियमनिर्णयोऽपि नास्तीत्यङ्गीकार्यम्, अन्यथा 'नैते कथ्यापि' इति सम्बन्धपरिहारनियमनिश्चये 'यत्सम्बन्धिनोऽनुत्वम्' इतिनियमेन अस्वीकृतयङ्कया गगनकुसुमगन्धोपलब्धये प्रवृत्तिवत् रसास्वादप्रवृत्तिरेव न स्यात्, तस्मात् तदुभयावधारणवैलक्षण्येन सामान्यत 'कामिनीयम्' इति ज्ञात्वा कामिनीत्वादिना प्रतीतेरिति ।

(४२) सामाजिकानां संस्कारशेषेण सूक्ष्मतया पूर्वमेवावस्थितः, अधुना तु साधारणीकृतविभावादिभिस्तस्यैवाविर्भावमात्रम् । अत एव येषां वेदाभ्यासजडानां वैयाकरणादीनाञ्च तादृशसंस्काराभाव, तेषां रसास्वादोऽपि न भवति ।

(४३) नियत रसास्वादयितृतया निश्चितो य प्रमाता सामाजिक, तद्गतत्वेन तत्सम्बन्धित्वेन ।

(४४) साधारण व्यक्तिविशेषसम्बन्धित्वेनाप्रतीयमानो य उपायो विभावादिः ।

(४५) तत्कालं रसास्वादकालं, विगलितोऽप्रतीतो य. परिमितप्रमात्रभाव 'अहमेतेऽहमेव रसास्वादयिता' इत्येवंरीत्या अननुभूयमानो यो व्यक्तिविशेषसम्बन्ध, तद्वशेन उन्मिषित प्रादुर्भूत, एवं वेद्यान्तरस्य लौकिकघटादिविषयस्य सम्पर्केण भानरूपसम्बन्धेन शून्योऽपरिमितो भावितस्तदभिविशेषो यस्य तेन प्रमात्रा रसास्वादयिता कथ्यते ।

सकलसहृदयसंवादभाजा साधारण्येन (४६) स्वाकारे इवाभिन्नोऽपि (४७), गोचरीकृतः (४८) चर्व्यमाणतैकप्राणो (४९) विभावादिजीवितावधिः (५०) पानकरस-न्यायेन चर्व्यमाणः (५१) पुर इव परिस्फुरन् हृदयमिव प्रविशन् सर्व्वाङ्गीणमिव आलिङ्गन् अन्यत् सर्व्वमिव तिरोदधत् ब्रह्मास्वादमिवानुभावयन् अलौकिकचमत्कारकारी शृङ्गारादिको रसः (५२)।

---

(४६) सकलानां सहृदयानां संवादभाजा 'एकत्र दृष्टस्यान्यत्र तथा दर्शन संवाद' -इत्युक्तेः सम्मतिशालिना साधारण्येन कामिनीत्वादि-साधारणधर्म्मप्रकारेणोपस्थित्या, अस्य 'गोचरीकृत' इत्यनेनान्वयः।

(४७) ननु विवक्षितविवेचने रत्यादास्वादस्यैव रसरूपतया, कथं रसस्य आस्वाद आस्वादास्वादयोर्लोके वैलक्षण्यदर्शनादित्यत आह स्वाकार इति, 'स्वस्य ज्ञानस्य आकारविशेष एव विषय न तु ज्ञानादन्य' इति हि योगाचारमते यथा वस्तुतो ज्ञानस्वरूपस्य विषयस्य ज्ञेयत्वं, तथा आनन्दात्मकास्वादस्वरूपस्यापि रसस्य आस्वाद्यत्वमविरुद्धमिति भावः।

(४८) गोचरीकृत विषयीकृत।

(४९) चर्व्यमाणता आस्वाद, एक अद्वितीय प्राण इव स्वरूपनिष्पत्तिहेतुर्यस्य स।

(५०) उक्तरूपविभावादिरेव जीवितस्य जीवनस्य, अवधि (पूर्वापरसीमा यस्य स। विभावादिकालमात्रस्थायीति परमार्थः।

(५१) पानकरसो हि यामिलामरीचयर्करामूर्रादिविलक्षण-वस्तुसमुदायसंवलनसम्भादितेन अनिर्व्वचनीयेन आस्वादेनास्वाद्यते यथा, तथा, विभावादिवैलक्षण्येन चोत्पादितेन लौकिक आस्वादेन चर्व्यमाण आस्वाद्यमान इत्यर्थः।

(५२) एतन्मतस्य स्थूलत इदं मर्म्म, रतिकारणादीनामनुभवात् सुखदुःखमिश्रिता रति संस्कारहेतुना सहृदयहृदयमधिरोहति, अत्र क्रियता

स च न कार्यः विभावादिविनाशेऽपि तस्य सम्भवप्रसङ्गात् (५३), नापि ज्ञाप्यः सिद्धस्य तस्याज्ञप्यत्वात् (५४) अपि तु विभावादिभिर्व्यञ्जितश्चर्वणीयः। कारकज्ञापकाभ्यामन्यत् क्व दृष्टमिति चेत्, न क्वचिद्दृष्टमिति अलौकिकसिद्धेर्भूयणनेतच्च दूषणम्। चर्वणानिष्पत्त्या तस्य निष्पत्तिरूपचरितेति कार्योऽप्युच्यताम् (५५), लौकिकप्रत्यक्षादिप्रमाणताटस्थ्यावबोधशालिमितयोगिज्ञानवेद्यान्तरसंस्पर्शरहितस्वात्ममात्रपर्य्यवसितपरिमितेतरयोगिसंवेदन-विलक्षण-लोकोत्तरस्वसंवेदनगोचर-रूति प्रत्येयोऽप्यभिधीयताम् (५६)।

तद्ग्राहकश्च न निर्विकल्पकं विभावादिपरामर्शप्रधान-

कालेन सुनिपुणमनुस्मृतयो रामादिव्यक्तिविशेषसम्बन्धिरतिकारणविभावादिप्रतिपादकयोरपि काव्यनाट्ययोः पूर्वोत्तरभावकत्वव्यापारेण रामसीतादिविषयांशपरिहारेण रतिकारणसाधारण्यकामिनीत्वादिना प्रतीतैः विभावादिभिः सहृदयहृदयवस्थिता या रतिर्व्यञ्जनया अभिव्यक्ता सामाजिकानाम् आस्वाद्यतामायातीति एतावच्छास्त्राद एव रसनिष्पत्तिरिति। पूर्वमते अपरथा अपि रतेरास्वाद्यत्वात्, अत्र तु वासनया स्थिताया एवेत्यनयोर्भेदः।

(५३) आश्रयादिरूपोपादानकारणाद्यतिरिक्तकारणान्तरेऽपि कार्यस्यायश्शावयवसम्भवादनियमात्, दण्डनाशेऽपि घटस्थितेरिति भावः।

(५४) ज्ञातो हि घटादिर्भवति न तु जायमान एव ज्ञायते।

(५५) तथाच चर्वणोत्पत्तिमादाय रसस्य उत्पत्तिव्यपदेशः।

(५६) लौकिकं यत् प्रत्यक्षादि ज्ञानं, यच्च प्रमाणतात्स्थ्येन प्रमाणोदासीन्येन (चक्षुरादिलौकिकप्रमाणजन्यमेवेदमिति भावः), अवबोधः ज्ञानं, महतां सिद्धयोगिनां अपरयोगिनां (ध्यानजन्यं) ज्ञानं, यदपि च वेद्यान्तरस्य देवान्तरस्य लौकिकविषयस्य सम्बन्धेन रहितं स्वस्वरूपात्र-

त्वात् (५७)। नापि सविकल्पकं चर्व्यमाणस्यालौकिकानन्दमयस्य स्वसंवेदनसिद्धत्वात् (५८)। उभयाभावस्वरूपस्य चोभयात्मकत्वमपि (५९) पूर्ववल्लोकोत्तरतामेव गमयति न तु विरोधमिति श्रीमदाचार्याभिनवगुप्तपादाः॥

व्याघ्रादयो विभावा भयानकस्येव वीराद्भुतरौद्राणाम्, अश्रुपातादयोऽनुभावाः शृङ्गारस्येव करुणभयानकयोः, चिन्तादयो व्यभिचारिणः शृङ्गारस्येव वीरकरुणभयानकानाम्,—इति पृथगनैकान्तिकत्वात् सूत्रे (६०) मिलिता निर्दिष्टाः॥

वियदलिमलिनाम्बुगर्भमेघं,
मधुकरकोकिलकूजितैर्दिशां श्रीः।

मात्रविषयकं परिमितेतरयोगिनां पञ्चयोगिनां संवेदनं ज्ञानं, एतच्चित्तयविलक्षणम्, अतएव च लोकातीतं यत् स्वात्मकं संवेदनं तस्य विषयः। प्रत्येयो ज्ञेय।

(५७) ज्ञानमिह द्विविधं सविकल्पकं निर्विकल्पकञ्चेति नामरूपजात्यादिविशेषशून्यं ज्ञानं निर्विकल्पकं, तद्विपरीतं सविकल्पकम्। विभावादिपरामर्शेति विभावादिपरामर्शस्य सविकल्पकतया निर्विकल्पकाजनकत्वात्।

(५८) स्वात्मकप्रतीतिमात्रसिद्धत्वात्। अयंभावः, तदानीं ज्ञानान्तराऽसम्भवात्, स्वमात्रविषयिण्यां चर्वणाया नामरूपाद्युल्लेखासम्भवाच्च कुतः सविकल्पकत्वमिति।

(५९) उभयाभावस्वरूपस्य उभयभिन्नस्य। 'विरुद्धयोरेकतरनिषेधे अपरसिद्धिः पर्यवस्यति' इतिनियमेन सविकल्पकत्वनिषेधे निर्विकल्पकत्वं, निर्विकल्पकत्वनिषेधे च सविकल्पकत्वमायातीति उभयात्मकत्वम्।

(६०) सूत्रे पूर्वोक्तभरतसूत्रे (२१ पृ० १ प०)।

घरणिरभिनवाङ्कुरोद्भेदभङ्गः, (६१)
प्रणतिपरे दयिते प्रसीद मुग्धे । ॥—

इत्यादौ,

परिच्छदितरुणाक्षीग्लानभङ्गं, प्रवृत्तिः
कथमपि परिवारप्रार्थनाभिः क्रियासु ।
कलयति च हिमाद्रेर्निष्कलङ्कस्य लक्ष्मी-
मभिनवकरिदन्तच्छेदकान्तः कपोलः ॥—

इत्यादौ,

दूरादुत्सुकमागते विवलितं, सम्भाषिणि स्फारितं,
संश्लिष्यत्यरुणं, गृहीतवसने किञ्चाञ्चितभ्रूलतम् ।
मानिन्याश्चरणानतिव्यतिकरे वाष्पाम्बुपूर्णेक्षणं
चक्षुर्जातमहो ! प्रपञ्चचतुरं जातागसि प्रेयसि ॥—

इत्यादौ च

यद्यपि विभावानामनुभावानामौत्सुक्य-व्रीडा-हर्ष कोपासूया-प्रसादानाञ्च व्यभिचारिणा केवलानामेव स्थितिः (६२), तथापि एतेषामसाधारणत्वमिति अन्यतमद्वयाक्षेपकत्वे सति न अनैकान्तिकत्वमिति (६३) ।

तद्विशेषानाह,—

शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानकाः ।

---

(६१) अभिनवः नूतन अङ्कुर एव अहो क्रोड़े दृढ़ा दुर्भेद्यत्वात् पाषाणमे दकान्त, यस्या सा ।

(६२) अत्र यथाक्रमसहोदाहरणत्रये । स्थिति व्यापादनञ्च ।

(६३) असाधारणत्वं प्राकरणिकरतिनियतावस्थितित्वम् । अन्यतमेन विभावानुभावव्यभिचारिषु द्वयस्य व्यक्तिस्थितिभिन्नस्य आक्षेपकत्वे प्रत्यायकत्वे ।

बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये(६४)रसाः स्मृताः॥२९॥

तत्र शृङ्गारस्य द्वौ भेदौ,-सम्भोगो विप्रलम्भश्च । तत्रादयः परस्परावलोकनालिङ्गनाधरपानपरिचुम्बनाद्यनन्तभेदत्वात् अपरिच्छेद्य एक एव गण्यते । यथा,-

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥

तथा,-

त्वं मुग्धाक्षि ! विनैव कञ्चुलिकया धत्से मनोहारिणीं
लक्ष्मीमित्यभिधायिनि प्रियतमे तद्दीटिकासंसृजि (६५) ।
व्यग्रीभान्तनिविष्टसस्मितमुखो नेत्रोत्सवानन्दितो
निर्यातः शनकैरलीकवचनोपन्यासमालीजनः ॥

अपरस्तु अभिलाष-विरहेर्ष्या प्रवास-शाप-हेतुक इति पञ्च-विधः (६६) । क्रमेणोदाहरणम्,—

न अनैकान्तिकत्वं न मिलितानां तेषां रसनिष्पत्तिहेतुत्वव्यभिचारः । तदयं विद्वान्,— मिलितानामेव रसनिष्पत्तिहेतुत्वं, यत्र तु एक एव निर्दिष्टः, तत्रापि तेनैवान्ययोर्द्वयोरासेपेण रसनिष्पत्तिरिति ।

(६४) यान्तस्य रोमाञ्चादिविरहेणानभिनेयत्वात् श्रव्यकाव्यमात्र-विषयत्वमिति नाट्येऽदाविद्युक्तम् इति प्रदीपः । वस्तुतस्तूपलक्षणम् ।

(६५) तस्याः नायिकायाः दीटिका वसनग्रन्थिः ।

(६६) अपरः विप्रलम्भः । तत्र अभिलाषः पूर्वरागमात्रम् ; विरहस्तु एकतरस्यानन्तरागात्, अन्तरागे सत्यपि वा दैवप्रतिबन्धात्, गुरु-

प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदयाः
ताला मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि ।
यासन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणात्
आशंसापरिकल्पितास्मपि भवत्यानन्दसान्द्रो लयः ॥
अन्यत्र व्रजतीति का खलु कथा, नाथस्य तादृक् सुहृद्
यो मां नेच्छति, नागतश्च हह हा ! कोऽयं विधेः प्रक्रमः ।
इत्यल्पेतरकल्पनाकवलितस्वान्ता निशान्तान्तरे
बाला दत्तविवर्त्तनव्यतिकरा नाप्नोति निद्रां निशि ॥

एषा विरहोत्कण्ठिता (६७) ।

सा पत्युः प्रथमापराधसमये सख्योपदेशं विना,
नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम् ।
स्वच्छैरश्रुकपोलमूलगलितैः पर्य्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति लुठल्लोलालकैरम्बुभिः ॥
प्रस्थानं वलयैः कृतं, प्रियसखैरस्वैरजल्पं गतं,
शय्रा न क्षणमासितं, व्यवसितं चित्तेन गन्तुं पुरः ।
यातुं निश्चितचेतसि प्रियतमे सर्व्वे समं प्रस्थिताः,
गन्तव्ये सति जीवितं । प्रियसुहृत्सार्थः किमु त्यज्यते ॥
त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायाम्
आत्मानन्ते चरणपतितं यावदिच्छामि कर्त्तुम् ।

चक्षादिरपाङ्गसंयोग', ईर्षा मानहेतुमात्रम् ; प्रवास' अनुरक्तयोरपि कार्य्यान्तरवशात् विभिन्नदेशस्थिति', स च भूतभविष्यद्वर्त्तमानसाधारण , आप यतावत्कालं कान्तेन नायिकासंयोगो भाविन्यादिरूपः विद्वद्भिरवधिः स्वीकार्य्यः ।

(६७) न त्वाद्यापराधवती प्रोषितपतिका चेति शेषः ।

अद्यैवास्तावन्मुञ्जरुपचितैर्हृष्टिरालुप्यतां मे
क्रूरस्त्विन्नपि न सहते सङ्गमं नौ कृतान्तः (६८) ।
हास्यादीनां क्रमेणोदाहरणम्,—
आकुञ्च्य पाणिमशुचिं मम मूर्ध्नि वेश्या
मन्त्राम्भसा प्रतिपदं दृषतैः पवित्रैः ।
तारस्वरं प्रथितथूत्कमदात्प्रहारं
हा हा हतोऽहमिति रोदिति विष्णुशर्मा ॥
हा मातस्त्वरितासि कुत्र ? किमिदं ! हा देवताः ! काश्रियः !
धिक् प्राणान्, पतितोऽग्निः, क्षतवहस्तेऽङ्गेषु ! दग्धे हृयौ ! ।
-इत्यं घर्घरमध्यरुद्धकरुणाः पौराङ्गनानां गिरः
चित्रस्थानपि रोदयन्ति, शतधा कुर्वन्ति भित्तीरपि (६९) ॥
कृतमनुमतं दृष्टं वा यैरिदं गुरु पातकं
मनुजपशुभिर्निर्मर्य्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्द्धं तेषा समीमकिरीटिनाम्
अयमहमरक्षोदोमांसैः करोमि दिशां बलिम् ॥
क्षुद्राः संत्रासमेते विजहित हृदयः ! क्षुण्णयक्षेभकुम्भा
युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः ।
सौमित्रे ! तिष्ठ, पातं त्वमसि नहि रुषां, मन्यहं मेघनादः,
किञ्चिद्भूभङ्गलीलानियमितजलधिं राममन्वेषयामि (७०) ॥

---

(६८) कृतान्तो दैवम् । कुबेरशापेन वियुक्तभार्यस्य यक्षराजस्य प्रियासन्दिश्य मेघरूपदूतं प्रत्युक्तिरियम् ।

(६९) राजपत्न्या स्वर्यातायां तत्परिजनोक्तिरियम् ।

(७०) कार्यारम्भेषु स्थिरतर मंरम्भ उत्साहः, तत्प्रकृतिको वीर ।

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम् ।
शष्पैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥
उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेधमभ्यांसि मांसा-
न्यंसक्षिप्तष्ठमिण्डाद्व्रवयवसुलभान्युग्रधूतीनि जग्ध्वा ।
आर्त्तः पर्य्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्कात्
पङ्कस्यादस्थिसंस्थं स्वपुटगतमपि क्रव्यमव्यग्रमत्ति(७१) ॥

चित्रं ! महानेष वतावतारः,
क्व कान्तिरेषाऽभिनवैव भङ्गिः ।
लोकोत्तरं धैर्य्यमहो प्रभावः !
काऽप्याकृतिर्नूतन एष सर्गः(७२) ॥

एषां स्थायिभावानाह,—

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयन्तथा ।
जुगुप्साविस्मयश्चैव स्थायिभावाःप्रकीर्त्तिताः(७३)॥३०॥

स्पष्टम् । व्यभिचारिणो ब्रूते,—

स च त्रिविध ,—युद्धवीर दानवीरः दयावीरश्चेति । दर्शनकारमते धर्मवीरोऽपि अधिकोऽस्ति । तस्मादत्रैवोदाहरणम् ।

(७१) अत्र उद्देश अंश स्निग्ध-पिण्डो-रुद्र-करङ्क-स्पुट-गता यथाक्रमं उच्छ्वास-स्तम्भ-नितम्ब-जान्वधोभाग-दरिद्र-शवशिरोऽस्थिसन्धि-स्थानार्थका ।

(७२) एष विद्ध वामनबुद्ध्या वदेदिति ।

(७३) रसोद्बुद्धत्वादेव नियताश्रयत्वं स्थायिन , व्यभिचारिणस्तु नैवमुद्बुद्धत्वादेवानियताश्रयत्वमित्यनयोर्भेद ।

निर्वेद-ग्लानि-शङ्काख्यास्तथाऽसूया-मद-श्रमाः ।
आलस्यञ्चैव दैन्यञ्च चिन्ता मोहः स्मृतिर्धृतिः ॥३१॥
व्रीडा चपलता हर्ष आवेगो जड़ता तथा ।
गर्व्वो विषाद औत्सुक्यं निद्राऽपस्मार एव च ॥३२॥
सुप्तं प्रबोधोऽमर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥ ३३ ॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिंशदमी भावाःसमाख्यातास्तु नामतः(७४)॥३४॥

निर्वेदस्यामङ्गलप्रायस्य प्रथममनुपादेयत्वेऽप्युपादानं व्यभिचारित्वेऽपि स्थायिताऽभिधानार्थम् । तेन,—

निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः(७५)।

यथा

अहौ वा हारे वा, कुसुमशयने वा दृषदि वा,
मणौ वा लोष्ट्रे वा, बलवति रिपौ वा सुहृदि वा ।
तृणे वा स्त्रैणे(७६) वा, मम समदृशो यान्तु दिवसाः
क्वचित् पुण्येऽरण्ये शिव शिव शिवेति प्रलपतः ॥

---

(७४) नामत उद्देशमात्रेण, न तु लक्षणोदाहरणप्रदर्शनादिना, तत्तु दशरूपक साहित्यदर्पणतोयपरिच्छेदादितोऽवगन्तव्यम् ।

(७५) शान्तस्य स्थायित्वम् अनित्यत्वादिदोषदुष्टस्य विषयस्य नित्यतादि, उद्दीपनं पुण्याश्रमसत्पुरुषसङ्गादि, अनुभावो रोमाञ्चादि, हर्षादयस्तु व्यभिचारिणः । काव्यप्रदीपकारादिमते तु शान्तस्य शमः स्थायी भावः ।

(७६) स्त्रैणं स्त्रीसमूहः ।

रतिर्देवादिविषया व्यभिचारी तथाऽञ्चितः(७७)॥३५

भावः प्रोक्तः,

आदिशब्दाद्गुनिगुरुनृपपुत्रादिविषया । कान्ताविषया तु व्यक्ता शृङ्गारः । उदाहरणम्,—

कण्ठक्षोणिविनिविष्टमीश ! ते कालकूटमपि मे महाधृतम् ।
अप्युपात्तममृतं भवद्वपुर्भेददक्षमिति यदि, मे न रोचते (७८)॥

हरन्त्यघं संस्मृति, हेतुरैश्वतः
शुभस्य, पूर्वाचरितैः कृतं शुभैः ।
शरीरभाजां भवदीयदर्शनं
व्यनक्ति कालत्रितयेऽपि योग्यताम् ॥

एवमन्यदप्युदाहार्यम् (७८ । व्यभिचारी यथा,—

जाने कोपपराङ्मुखी प्रियतमा स्वप्नेऽद्य दृष्टा मया
मा मां संस्पृश्य पाणिनेति रुदती गन्तुं प्रवृत्ता पुरः ।

---

(७७) रतिपदं सकलस्थायिभावोपलक्षणम्, देवादिविषयापदं अप्राप्तप्रधानस्योपलक्षणं, तेन देवादिविषया सर्वत्रप्रकारा, कान्तादिविषया तु व्यक्ता रतिः, कान्तादयश्च अप्राप्तप्रधानस्थाः, प्राधान्येन अङ्गिनो व्यञ्जिनो च 'भावः' इत्यसम्प्रत्यभिज्ञेति, एतदेव काव्यप्रदीपे ।

(७८) भवद्वपुर्भेदेन यद्व इत्तिरवस्थितिर्वक्ष्यमाणा, तद्दक्षमिति यावत् । अयं भावः,—अतद्दक्षतामिलनेन कालकूटस्य प्रियत्वं, अतद्दक्षतामिलनेनामृतस्य अप्रियत्वमिति ।

(७८) अत्र 'इत्यादिविषया रतिर्देवा'—इत्यादिकोऽधिकः पाठः कश्चिदस्ति, स च टीकाकृद्भिरदृष्टतया उपेक्षितः ।

नो यावत्परिरब्ध चाटुशतकैराश्वासयामि प्रियां
भ्रातस्तावदहं यतेन विधिना निद्रादरिद्रीकृतः ॥

अत्र विधिं प्रत्यसूया (८०)।

तदाभासा अनौचित्यप्रवर्त्तिताः (८१)।

तदाभासा रसाभासा भावाभासाश्च। तत्र रसाभासो यथा,

स्तुमः कं वामाक्षि! क्षणमपि विना यं न रमसे ?
विलेभे कः प्राणान् रणमखमुखे यं न जगयसे ?।
सुलग्ने को जातः, प्रथिमुषि! यमालिङ्गसि बलात् ?
तपःश्रीः कस्यैषा, मदननगरि! ध्यायसि तु यम् ? (८२) ॥

अत्रानेककामुकविषयमभिलाषं तस्याः, 'स्तुमः'-इत्यादयनुगतं बहुव्यापारोपादानं व्यनक्ति (८३)। भावाभासो यथा,-

राकासुधाकरमुखी तरलायताक्षी
स्वस्रेरयौवनतरङ्गितविभ्रमास्या।
तत् किं करोमि, कथमत्र तनोमि मैत्री,
तत्स्त्रीलतिव्यतिकरे क इहाभ्युपायः ॥

---

(८०) प्राधान्येन प्रतीयते इति शेषः।

(८१) अनौचित्यं हि प्रतिषिद्धविषयकत्वादिरूपं सामाजिकसंवेद्यम्; तच्च शृङ्गारे रते बहुविषयत्वेन उपनायकादिगतत्वेन गुरुजनगतत्वेन तिर्यगादिगतत्वादिना च भासते, एवं वीरादावपि ज्ञेयम्।

(८२) पूर्वव्याख्येदार्थकेन तच्छब्देन नानाव्यक्तिविषयकत्वप्रतीतिः।

(८३) अभिलाषं कर्तृ-, 'स्तुमः' इत्यादिषु अनुगतं सच्च बहुषु व्यापारोपादानं कर्तृ, व्यनक्ति व्यञ्जयति, अभिलाषेण च अभिव्यक्तेन बहुविषया रतिरभिव्यज्यते इत्यर्थः विवक्षितः।

अत्र चिन्ता अनौचित्यप्रवर्त्तिता(८४)। एवमन्येऽप्युदाहार्य्याः।

भावस्य शान्तिरुदयः सन्धिः (८५) शबलता तथा ॥३५॥

क्रमेणोदाहरणम्,—

तस्याः सान्द्रविलेपनस्तनयुगप्रश्नेयमुद्राङ्कितं
किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते ?।
-इत्युक्ते क्व तदित्युदीर्य्य सहसा तत् सम्भ्रमाष्टुं मया
संश्लिष्टा रभसेन, तत्सुखवशात् तत्रापि तत् विस्मृतम् ॥

अत्र कोपस्य (८६)।

एकस्मिन् शयने विपक्षरमणीनामग्रहे मुग्धया
सद्यः कोपपरिग्रहग्लपितया चाटूनि कुर्व्वन्नपि ।
आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणं
मा भूत् सुप्त इवेत्यमन्दवलितग्रीवं पुनर्वीक्षितः ॥

अत्र औत्सुक्यस्य (८७)।

उत्सिक्तस्य तपःपराक्रमनिधेरभ्यागमादेकतः
सम्भ्रान्तप्रियता च वीररभसोत्फालश्च मा कर्षतः ।

---

(८४) 'आदौ वाच्यस्त्रियो रागः पश्चात् पुंसस्तदिङ्गितैः' । इति विरुद्धमौचित्यम्, तद्विपरीतेन अनुत्तरप्रायायामुत्तरागोऽयुक्त इति । व्यभिचारिभावस्य चिन्तायाः प्राधान्येनाभिव्यक्तत्वात् भावत्वम् ।

(८५) समकालमेव विरुद्धयोरपि तयोरुदयादुदयः सन्धिः ।

(८६) शान्तादेव चमत्कारस्य विश्रान्तिरिति शान्तिरितिभेदः ।

(८७) उदय इति भेदः ।

वैदेहीपरिरम्भ एष च मुहुश्चैतन्यमामीलयन्
आनन्दी हरिचन्दनेन्दुशिशिरः स्निग्धो रणद्बान्धवः (८८)॥
अत्रावेगहर्षयोः (८९)।

क्वाकार्य्यं, यशलक्ष्मणः क्व च कुलं! भूयोऽपि दृश्येत सा!
दोषाणां प्रशमाय नः श्रुतमहो! कोपेऽपि कान्तं मुखम्।
किं वक्ष्यन्त्यपकल्पया: कृतधियः? स्वप्नेऽपि सा दुर्लभा!
चेतः स्वास्थ्यमुपेहि, कः खलु युवा धन्योऽधरं धास्यति! (९०)॥

अत्र वितर्कौत्सुक्य-मति-स्मरण-शङ्का-दैन्य-धृति-चिन्तानां शबलता (९१)। भावस्थितिस्तु उक्ता च उदाहृता च (९२)॥

मुख्ये रसेऽपि तेऽङ्गित्वं प्राप्नुवन्ति कदाचन (९३)।

ते भावशान्त्यादयः। अङ्गित्वं राजानुगतविवाहप्रकृत्तभृत्यवत्।

---

(८८) अत्र उत्क्षिप्त-रभसोत्फालयन्द्राः यथाक्रमम् विख्यात-हर्षोद्रेकपराः।

(८९) पूर्वार्द्धे संरम्भात्मकस्यावेगस्य, उत्तरार्द्धे तु हर्षस्य तुल्यकाल-भेदात्-इति एतयोर्मिलनरूपः सन्धिः।

(९०) धास्यति पास्यति।

(९१) अत्र हि पूर्वपूर्वोपमर्देन उत्तरोत्तरं प्रतीयमान चमत्कार-मावहतीति तत्स्वरूपा शबलता।

(९२) ननु भावस्य शान्त्यादिवत् स्थितिरपि पृथक् कथं नोक्ता इत्यत आह भावेति। अयं भावः,—भावस्थितेर्वस्तुतो भावाभिन्नतया पूर्वोप-दर्शितेन तेनैव तस्य गतार्थत्वमिति।

(९३) यदा तु एषाङ्गित्वेन विवक्ष्यते।

अनुरणानाभसंलक्ष्यक्रमव्यङ्ग्यस्थितिस्तु यः ॥ ३७ ॥
शब्दार्थोभयशक्त्युत्थस्त्रिधा स कथितो ध्वनिः(८४)।

शब्दशक्तिमूलानुरणनरूपव्यङ्ग्यः, अर्थशक्तिमूलानुरणनरूपव्यङ्ग्यः, उभयशक्तिमूलानुरणनरूपव्यङ्ग्यश्चेति त्रिविधः। तत्र,

अलङ्कारोऽथ वस्त्वेव शब्दात् यत्रावभासते ॥३८॥
प्रधानत्वेन स ज्ञेयः, शब्दशक्त्युद्भवो द्विधा ।

यत्रेवेति अनलङ्कारवस्तुभावम्। आद्यो यथा,

उल्लास्य कालकरवालमहाम्बुवाहं
देवेन येन जरठोर्जितगर्जितेन ।
निर्व्यापित सकल एव रणे रिपूणां
धाराजलैस्त्रिजगति ज्वलितः प्रतापः (८५) ॥

अत्र वाक्यस्यासम्बद्धार्थाभिधायकत्वं मा प्रसाङ्क्षीदिति (८६)

---

(८४) षष्ठ्यां कारिकायां प्रधानशब्दप्रतीत्यनन्तर य द्योदीयानपरोऽनुरणनानुज्ञानादिपदाभिधेय शब्दविशेष प्रतीयते, तस्येव संलक्ष्य क्रमो यस्य, तादृशस्य व्यङ्ग्यस्य स्थितिर्यस्मिन्निति विग्रहः । शब्दपरिवृत्त्यसहत्वसहत्वाभ्यां यथाक्रम शब्दशक्तिमूलत्वार्थशक्तिमूलत्वे इति प्रदीपमतम् । शाब्दव्यङ्ग्यार्थव्यङ्ग्याभ्यामनयोर्भेद इति महेश्वरः ।

(८५) प्राकरणिकेन्द्रपरत्वे काव्योऽरिकुलमहत्त्वं लक्षणयार्थो वा य करवाल स एव, महदम्बु धारारूप जल यस्येति तम । जठर कठोरम जर्जितं बलवत् गर्जित सिंहनादो यस्य तेन । धाराजलै खड्गधाराकान्तिभि । अप्राकरणिकेन्द्रपरत्वे तु कालकर एवार्थस्तुकालस्तुचक । वाक्यो नवीन । गर्जितेनोपलक्षितमित्यर्थः ।

(८६) करवालस्येत्येतावन्मात्रे वक्तव्ये अम्बुवाहेत्यादिकथनं प्रकृतानुपयोगि-इति असम्बद्धार्थकत्वप्रसक्ति । अत्रेद बोध्य, यत्र एकस्य

प्राकरणिकाप्राकरणिकयोरुपमानोपमेयभावः कल्पनीय इति अतोपमालङ्कारो व्यङ्ग्यः।

तिग्मरुचिरप्रतापो विधुरनिशाक्षद्विभो मधुरलीलः।
मतिमानतत्त्ववृत्तिः प्रतिपदपक्षाग्रणीर्विभाति भवान् (९७)॥

अत्रैकैकस्य पदस्य द्विपदत्वे विरोधाभासः।

अमितः समितः प्राग्रैरुत्कर्षैर्हर्षद! प्रभो!
अक्षितः सक्षितः साधुयशोभिरसतामसि (९८)॥

अत्रापि विरोधाभासः।

निरुपादानसम्भारमभिनावेव तन्वते।
जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने (९९)॥

प्राकरणिकत्वं तत्रैवास्य विषयः, यत्र तु उभयोरपि प्राकरणिकत्वम् अप्राकरणिकत्वं वा तत्र श्लेषः।

(९७) प्रस्तुतपक्षे विधुराणां शत्रूणां निशेव निशा मरणं, तत्कर्ता; मतिः वस्तुतत्त्वावधारणक्षमा बुद्धिः, भानं प्रभाणं, ताभ्यां तत्त्वे याथार्थ्ये वृत्तिरनुसरणं यस्य सः। प्रतिपदं प्रतिस्थानं पक्षाणां आत्मीयानामपक्षीणामग्रणीः। अत्र पदभङ्गेन विरोधः, तथा हि तिग्मरुचिः सूर्यः अथ च अप्रतापः प्रतापरहितः, विधुचन्द्रः अथ च अनिशाक्षत्, विभः दीप्तिरहितः अथ च विभाति दीप्यते, मधुर्वसन्त अथ च अलीक श्रीकारहितः, मतिमान् अथ च अतत्त्वे अवस्तुभूते विषये वर्त्तते, प्रतिपत् प्रथमा तिथिः अथ च अपक्षायणीः पक्षस्यादीभूता न।

(९८) प्रस्तुतपक्षे समितो युद्धात् प्राग्रैरुत्कर्षैरमितोऽपरिच्छिन्नः, असतामक्षितः दण्डविधायकत्वेन अक्षतः। अत्र पदभङ्गेन विरोधः, तथाहि अमितः परिमाणशून्यः अथच समितः परिमाणसहितः। एवम् अक्षित इत्यादावपि बोध्यम्।

(९९) उपादानम् उपकरणं तूलिकादिकं, तस्य सम्भारः सम्पत्तिः

अत्र व्यतिरेकः। अलङ्कार्यस्यापि ब्राह्मणश्रमणन्यायेन अलङ्कारता (१००)। वस्तुमात्रं यथा,

पंथिअ ! ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे ।
उत्तत्तपओहरं पेक्खिअ उण जइ वससि ता वससु (१०१)॥

अत्र यद्यपभोगक्षमोऽसि तदाऽऽस्स्वेति व्यज्यते ।

अनिरअनिअ तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र! यस्मै त्वम्।
यत्र प्रसीदसि पुनः, स भात्युदारोऽनुदारश्च(१०२)॥

अत्र विरुद्धावपि त्वदनुवर्त्तनार्थमेकं कार्यं कुरुतः-इति ध्वन्यते

अर्थशक्त्युद्भवोऽप्यर्थो(१०३)व्यङ्ग्यः सम्भवी यतः॥३८॥
प्रौढोक्तिमात्रात् सिद्धो वा कवेः, तेनोन्मितस्य वा ।

मूढो वा, तद्रहितं यथा स्यात्तथा ; चित्रं नानाकारं, कला चन्द्रकला। पक्षे चित्रमालेख्य, कला चालेख्य-क्रियाकौशलम । यत्र हि चित्रकरेण्य स्खलिन उत्कर्षो व्यज्यते, तत्र चित्रकलादिशब्दसामर्थ्यादेव चित्रकारोपस्थित्यैव भवतीति प्रकृतोदाहरणत्वम । शिष्यबुद्धिवैशद्याय बहूदाहृतम् ।

(१००) श्रमण बौद्धसन्यासी, तस्य तदानीं ब्राह्मणत्वाभावेऽपि पौर्व्वकालिकब्राह्मणत्वादाय ब्राह्मणव्यवहार ।

(१०१) पथिक ! नात्र खलु सन्तरमस्ति मनाक् प्रस्तरस्थले ग्रामे । उत्तप्तपयोधरं प्रेक्ष्य पुनर्यदि वससि तदस्तु इति सं० । खलु वयनार्थालङ्कारादि, पयोधरो मेघ अथ च स्तन । अत्र पयोधरशब्दमूलो व्यङ्ग्यार्थ बोध ।

(१०२) अनि अनिषद्य, अयनिर्वज्रम, उदारो महान्, अनुगता दारा वनिता यस्य इति व्युत्पत्त्या अनुदार वयीकृतवनित ।

(१०३) अर्थशक्ति भिवक्रमेणाऽऽह, अर्थोऽपि व्यङ्ग्य इत्यर्थ ।

वस्तु वाऽलङ्कृतिर्वेति षड्भेदोऽसौ व्यनक्ति(१०४)यत्॥४०॥
वस्त्वलङ्कारमथवा तेनायं द्वादशात्मकः।

स्वतःसम्भवी न केवलं भणितिमात्रनिष्पन्नो यावद्बहिरप्यौचित्येन सम्भाव्यमानः। कविना प्रतिभामात्रेण बहिरसन्नपि निर्मितः, कविनिबद्धेन वा वक्त्रेति द्विविधोऽपरइति त्रिविधः (१०५)। वस्तु वा अलङ्कारो वाऽसाविति षोढ़ा व्यङ्ग्यकः। तस्य वस्तु वा अलङ्कारो वा व्यङ्ग्य इति द्वादशभेदोऽर्थशक्त्युद्भवो ध्वनिः। क्रमेणोदाहरणम्,

चलसखिरोमणी धुत्ताणं अग्गिमो पुत्ति ! धणसमिद्धिमओ।
इअ भणिएण णअङ्गी मुप्फुल्लविलोअणा जाआ (१०६)॥(१)

अत्र ममैवोपभोग्य इति वस्तुना वस्तु व्यज्यते।

धन्यासि, या कथयसि प्रियसङ्गमेऽपि
विस्रब्धचाटुकयतानि रतान्तरेषु।
नीवीं प्रति प्रणिहिते तु करे प्रियेण,
सख्यः शपामि यदि किञ्चिदपि स्मरामि॥ (२)

अत्र त्वमधन्या अहन्तु धन्येति व्यतिरेकालङ्कारः।

---

(१०४) व्यनक्ति व्यञ्जयति।

(१०५) अर्थोहि प्रथमतो द्विधा, स्वत-सम्भवी, भौदोक्तिमात्रनिष्पन्न, तत्रापि चरम' कवे', कविना निबद्धश्च नायकादिरूपवक्तृवा प्रतिभामात्रनिष्पन्नत्वेन द्विधा इति मिलित्वा अर्थस्य त्रैविध्यम्।

(१०६) चलसखिरोमणिर्धूर्त्तानामग्रिम पुत्रि! धनसमृद्धिमयः। इति भणितेन नताङ्गी प्रोत्फुल्लविलोचना जातेति सं०।
पूर्वार्द्धन्तु स्वयंपतिंवरां प्रति धात्रया प्ररोचनायोक्ति, उत्तरार्द्धन्तु कवे.।

दर्पान्ध-गन्धगज-कुम्भकपाटभूट-
संक्रान्तिनिम्पनयोणितयोणयोचिः ।
यीरैर्यलोकि युधि कोपकषायकान्तिः
कालीकटाक्ष इव यस्य करे कृपाणः (१०७) ॥ (३)

अत्रोपमालङ्कारेण सकलरिपुबलक्षयः क्षणात् करिष्यते इति वस्तु ।

गाढ़कान्तदशनक्षतव्यया-सङ्कटादरिवधूजनस्य यः ।
ओष्ठविद्रुमदलान्यमोचयन्निर्दशन् युधि कृपा निजाधरम् ॥(४)

अत्र विरोधालङ्कारेणाधरनिर्दशनसमकालमेव शत्रवो व्यापादिता इति तुल्ययोगिता (१०८), मम क्षत्यापि अन्यस्य क्षतिः

---

(१०७) यस्य राज्ञः करे कृपाणः खड्गः, युधि युद्धे, वीरैः, कोपेन कषाया अतिशयरक्ता कान्तिर्यस्य तादृशः कालिका देव्याः कटाक्ष इव व्यलोकि दृष्टः, कीदृशः?-दर्पेण मदेन अन्धस्य उद्दीप्तस्य गन्धगजस्य ("यस्य गन्धं समाघ्राय पलायन्तेऽपरे गजाः ।") कुम्भयोर्गण्डस्थयोः कपाटं संयोजकत्वात् कपाटमिव मध्यभागः सन्धिस्थानं, तत्र भूटस्य अग्रभागस्य संक्रान्त्या प्रवेशेन निम्नं दृढ़वद्धं यत् गोणितं तेन गोणयोचिः रक्तकान्तिर्यस्य सः ।

(१०८) ओष्ठदंशनेन ओष्ठदंशनव्यथामोचनं विरुद्धम्, विरुद्धत्वं ओष्ठदंशनव्यथामोचनक्रिययोः कार्यकारणयोरपि समकालत्वमिति, तेन च अधरदंशनशत्रुव्यापादनयोः ऐककालिकत्वरूपैकधर्मसम्बन्धात्तुल्ययोगिता, "एकधर्मसम्बन्ध एव तुल्ययोगिता" इति प्राचीनमतेनेदम् ; नवमेव नागेशभट्टादय । प्रदीपकारादयस्तु विरोधपदस्य कार्यकारणयोः पौर्वापर्यविपर्ययरूपातिशयोक्तिपरत्वं, 'तुल्यमेककालमेव युनक्ति' इति-व्युत्पत्त्या तुल्ययोगितापदस्य समुच्चयपरमिति व्याचक्षिरे, अस्माभिरेषामप्येवमेवाभिप्रेतम् ।

निवर्त्तंतामिति तद्वुद्धिरुत्प्रेक्ष्यते-इत्युत्प्रेक्षा वा। एषूदाहरणेषु स्वतः-सम्भवी व्यङ्गकः।

कैलासस्य प्रथममधिपरे वेणुसंमूर्च्छनाभिः
श्रुत्वा कीर्त्तिं विबुधरमणीगीयमानां यदीयाम्।
स्रस्तापाङ्गाः सरसविसिनीकाण्डसच्छातभङ्गा
दिङ्मातङ्गाः श्रवणपुलिने हस्तमावर्त्तयन्ति॥ (५)

अत्र वस्तुना(१०९)येषामप्यर्थाभिगमो नास्ति, तेषामप्येवमादि-बुद्धिजननेन चमत्कारं करोति त्वत्कीर्त्तिरिति वस्तु ध्वन्यते।

केसेसु बलामोड़िअ तेण समरम्मि जअसिरी गहिआ।
जह कन्दराहिं विहुरा तस्स दिढं कंठम्मि संठविआ(११०)॥(६)

अत्र केशग्रहणावलोकनोद्दीपितमदना इव कन्दरासहिधुरान् कण्ठे गृह्णन्ति इत्युत्प्रेक्षा, एकत्र संग्रामे विजयदर्शनात् तस्यारयः पलाय्य गुहासु तिष्ठन्तीति काव्यहेतुरलङ्कारः, न पलाय्य गतासद्दैरिणोऽपि तु ततः पराभवं सम्भाव्य तान् कन्दरा न त्यजन्तीत्यपङ्क्तिश्च (१११)।

---

(१०९) कविप्रतिभामात्रनिष्पन्नात् यशसः श्रवणप्रवेशात् विसिनी-सम्भावनया कर्णे हस्तावर्त्तनरूपेण कविप्रतिभामात्रनिष्पन्नेन वस्तुना। अत्र संशयभ्रान्तिमदन्यतरालङ्कारस्य सद्भावेऽपि तन्निरपेक्षेणैव व्यङ्गकत-मिति यत्नोदाहरणत्वम्।

(११०) केशेषु बलात्कारेण तेन समरे जयश्रीर्गृहीता। यथा कन्दराभिर्विधुराः तस्य दृढं कण्ठे संस्थापिता इति स०। बलामोड़िय-शब्दो बलात्कारे देशीति उदाहरणचन्द्रोदयः। 'बला मोडिय' बलात् गृहीत्वा (आनीय) इत्यपि कश्चित्। विधुराः शत्रवः।

(१११) कन्दराणां कण्ठस्थापनरूपकविप्रतिभामात्रनिष्पन्नेन वस्तुना व्यज्यते इति भेदः।

गाढालिङ्गणरहसुज्जअम्मि दइए लज्ज समोसरइ ।
माणंसिणीणं माणो पीलणभीअ व्व हिअआहि (११२) ॥(७)
अत्रोत्प्रेक्षया प्रत्यालिङ्गनादि तत्र विजृम्भते इति वस्तु ।
जा ठेरं व हसन्ती कइवअणंबुरुहबद्धविणिवेसा ।
दावेदि भुअणमण्डलमण्णं विअ जअइ सा वाणी (११३)॥(८)
अत्रोत्प्रेक्षया चमत्कारैककारणम् नवं नवं जगत् अजडासनस्था (११४) निर्मिमीते इति व्यतिरेकः । एषु कविप्रौढ़ोक्तिमात्रनिष्पन्नो वस्त्वलङ्कः ।
जे लङ्कागिरिमेहलासु खलिया सम्भोअखिण्णोरई-
फारुप्फुल्लफणावलीकवलणे पत्ता दरिद्दत्तणं ।
ते एण्हिं मलआनिला विरहिणीणीसाससम्पक्किणो
जाआ झत्ति सिसुत्तणे वि बहला तारुण्णपुण्णा विअ (११५)॥(९)
अत्र निःश्वासैः प्राप्तैश्वर्या वायवः किंकिं न कुर्वन्तीति वस्तुना (११६) वस्तु व्यज्यते ।

---

(११२) गाढालिङ्गनरभसोद्यते दयिते खलु समुपसरति । मनस्विनीना मान. मीडनभीत इव हृदयादिति छ० ।

(११३) या स्थविरमिव हसन्ती कविवदनाम्बुरुहबद्धविनिवेशा ।
दर्शयति भुवनमण्डलमन्यदिव जयति, सा वाणीति छ० ।

(११४) जड़ं जलञ्च अपरञ्च जड़पदार्थरूपं यदुन्मज्जासनं, तदध्यधिष्ठाय तिष्ठति या सा ।

(११५) ये लङ्कागिरिमेखलासु स्खलिता सम्भोगखिन्नोरगी-स्फारोत्फुल्लफणावलीकवलने प्राप्ता दरिद्रत्वम् । ते इदानीं मलयानिला विरहिणीनि श्वाससम्पर्किणो जाता झटिति शिशुत्वेऽपि बहला तारुण्यपूर्णा इव इति छ० ।

(११६) वस्तुना कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन ।

उहि ! विरइऊण माणस्स मज्झ धीरत्तणेण आसासं ।
पियदंसणविसंघलखणम्मि सहस त्ति तेण ओसरियं(११७)॥(१०)
अत्र वस्तुनाऽकृतेऽपि प्रार्थने प्रसन्नेति विभावना, प्रियदर्शनस्य सौभाग्यबलं धैर्येण सोढुं न शक्यते-इत्युत्प्रेक्षा वेति ।
उल्लोलकरग्गरग्गणकलुएहिं तुह लोअणेसु नह दिन्नं ।
रत्तंसुअं पसाओ कोवेण पुणो इमे ण अक्कमिअे (११८)॥(११)
अत्र किमिति लोचने कुपिते वहसि ? इति (११९) उत्तरालङ्कारेण (१२०) न केवलमार्द्रनखक्षतानि गोपयसि यावत् तेषामहं प्रसादपात्रं जातेति यत्नः ।
महिलासहस्सभरिए तुह हिअए सुहअ ! सा अमाअन्ती ।
अणुदिअहणवणअम्मा अङ्गं तणुं अवि तणुएइ (१२१)॥(१२)
अत्र हेत्वलङ्कारेण तनोस्तनूकरणेऽपि तव हृदये न वर्त्तते-इति विशेषोक्तिः। एषु कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरो व्यङ्ग्यः। एवं द्वादश भेदाः ।

---

(११७) यदि विरचय्य मानस्य मम धीरत्वेनाश्वासम् ।
प्रियदर्शनविसंष्ठुलक्षणे सहसेति तेनापसृतम् इति सं० ।
(११८) आकृष्टकरजरदनक्षतैस्तव नयनयोर्मम दत्तम् ।
रक्तांशुकं प्रसादः कोपेन पुनरिमे नाक्रान्ते इति सं० । प्रतिनायिकासंसर्गलक्षितस्खलनादिविशिष्टयुक्तं नायकं प्रति कुपितनायिकाया उक्तिः ।
(११९) इतिप्रश्नोत्तरनादित्यर्थः ।
(१२०) कोपेन पुनरिमे नाक्रान्ते-इत्यपह्नुत्यलङ्कारसहितेन ।
(१२१) महिलासहस्रभरिते तव हृदये सुभग ! सा अमान्ती ।
अनुदिवसनवसङ्गा अङ्गं तनुमपि तनयति इति सं० ।

शब्दार्थोभयभूरेकः(१२२) ।

यथा,—

अतन्द्रचन्द्राभरणा समुद्दीपितमन्मथा ।
तारकातरला श्यामा सानन्दं न करोति कम्(१२३)॥(१२)

अत्रोपमा व्यङ्ग्या ।

भेदा अष्टादशाऽस्य (१२४) तत् ॥ ४१ ॥

अस्येति ध्वनेः । ननु रसादीना बहुभेदत्वेन कथमष्टादश ?- इत्यत आह,-

रसादीनामनन्तत्वात् भेद एको हि गण्यते ।

अनन्तत्वादिति, तथाहि, नव रसा· ; तत्र शृङ्गारस्य द्वौ भेदौ, सम्भोगो विप्रलम्भश्च , सम्भोगस्यापि परस्परावलोकनालिङ्गनपरिचुम्बनादि-कुसुमोच्चयजलकेलिसूर्यास्तमयचन्द्रोदयषड्ऋतुवर्णनादयो बहवो भेदा । विप्रलम्भस्याभिलाषादय उक्ताः , तयोरपि विभावानुभावव्यभिचारिवैचित्र्यं, तत्रापि नायकयोः (१२५) उत्तममध्यमाधमप्रकृतित्वम् ; तत्रापि

---

(१२२) प्राधान्येन व्यङ्ग्यार्थोपस्थापकपदानाम् अर्थविषये परिवृत्तिसहत्वासहत्वाभ्यां शब्दार्थोभयशक्तिमूलत्वं ध्वनेरयम् ।

(१२३) अत्र अतन्द्रचन्द्राभरणेत्यादिशब्दस्य परिवृत्त्यसहत्वात् समुद्दीपितेत्यादेश्च तत्सहत्वात् यथोत्तरोदाहरणत्वम् ।

(१२४) अर्थान्तरसंक्रमितवाच्यात्यन्ततिरस्कृतवाच्यासंलक्ष्यक्रमव्यङ्ग्याख्य , शब्दशक्तिमूलो द्वौ, अर्थशक्तिमूला द्वादश, उभयशक्त्युद्भवश्चैकइति संलक्ष्यक्रमव्यङ्ग्या· अष्टादश इति मिलित्वा अष्टादश ।

(१२५) नायिका च नायकश्च तयो· ।

देशकालावस्थादिभेदाः, इत्येकस्यैव रसस्यानन्त्यं,का गणना तु अन्येषाम्। असंलक्ष्यक्रमत्वन्तु सामान्यमाश्रित्य रसादि-ध्वनिभेद एक एव गण्यते।

वाक्ये द्युत्यः

द्युत्यः-द्यूति शब्दार्थोभयशक्तिमूलः।

पदेऽप्यन्ये (१२६)

अपिशब्दाद्वाक्येऽपि। एकावयवस्थितेन भूषणेन कामिनीव पदद्योत्येन व्यङ्ग्येन वाक्यव्यङ्ग्या भारती भासते (१२७)। तत्र पदप्रकाश्यत्वे क्रमेणोदाहरणानि,-

यस्य मित्राणि मित्राणि, शत्रवः शत्रवस्तथा।
अनुकम्प्योऽनुकम्पश्च, स जातः स च जीवति॥ (१)

अत्र द्वितीयमित्रादिशब्दा आश्वस्तत्वनियन्त्रणत्वस्नेहपात्रत्वादि-संक्रमितवाच्याः (१२८)।

---

(१२६) अन्ये सप्तदश भेदा, एकस्यैव पदस्य परिष्कृतिसहत्वासहत्वयोरसंभवाद्भोभयशक्तिमूलभेदस्य पदे संभव इति भावः। अत्रेदं बोध्यं, यत्र एकस्यैव पदस्य प्राधान्येन व्यङ्ग्यार्थोपस्थितावाहुगुण्यं अन्येषान्तु सहकारितामात्रं, तत्रैव पदनिष्ठत्वं, नानापदानां तथारूपत्वे तु वाक्यगतत्वमिति।

(१२७) ननु पदस्य व्यङ्ग्यार्थद्योतकत्वे पदार्थस्यैव चारुतया पदस्यैव वरं ध्वनित्वमास्तां ननु काव्यस्य, काव्यात्मकयोर्वाक्यतदर्थयो चारुत्वाभावकत्वचारुत्वयोरभावात्, अत आह एकेति। भारती काव्यार्थस्वरूपव्यङ्ग्यात्मिका वाणी। तेनायं फलितोऽर्थः, यदन्तर्गतेन पदेन द्योत्योऽतिशयितोऽर्थः चारुतया व्यज्यते तस्यैव ध्वनित्वमिति।

(१२८) नियन्त्रणत्वं कर्मप्रत्ययेन निःशेषम् आसनीयत्वम्। अनु-

खलवचोभारा दीपन्ति दारुणा जगति तद्वदि धीराणाम्।
हृदयमवज्रसारघटितं ननु वयसाद्या विमुञ्चन्ति (१२८)॥(२)
अत्र विमुञ्चन्तीति।

लावण्यं तदसौ कान्तिस्तद्रूपं स वचःक्रमः।
तदा सुधास्पदमभूदधुना तु ज्वरो महान्॥

अत्र तदादिपदैरनुभवैकगोचरा अर्थाः प्रकाश्यन्ते। यथा वा,

मुग्धे! मुग्धतयव नेतुमखिलः कालः किमारभ्यते?
मानं धत्स्व! धृतिं वधान। ऋजुतां दूरे कुरु! प्रेयसि।
सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीताननां
नीचैः शंस, हृदि स्थितो हि ननु मे प्राणेश्वरः श्रोष्यति!॥(३)

अत्र भीताननेति, एतेन हि नीचैःशंसनविधानस्य युक्तता गम्यते। भावादीनां पदप्रकाश्यत्वेऽधिकं न वैचित्र्यमिति न तदुदाक्रियते।

रुधिरविसर-प्रसाधितकरवाल करालरुचिर-भुजपरिघः।
झटिति भ्रुकुटिविटङ्कित ललाटपट्टो विभाति नृपभीमः॥ (४)

अत्र भीषणीयस्य भीमसेन उपमानम्।

मुक्तिमुक्तिकदेकान्त-समादेशनतत्परः।
कस्य नानन्दनिस्यन्दं विदधाति सदागमः?॥ (५)

कस्याप्यापकारे हेयोऽनुकम्पा, सदैवोपकार्योऽयमिति प्रायस्तु स्नेह इति महेश्वरः। अत्र हि मित्रादिपदं प्रत्येकमेव सप्तकं सत् नायकस्य उचितव्यवहारित्वादिकं प्रकाशयतीति यथोक्तोदाहरणत्वम्। स्वामसौम्यादौ तु व्यङ्ग्यार्थोपस्थितिः सर्वैरेव पदैरिति तत्र वाक्यप्रकाश्यत्वम्।

(१२८) खलवचोभारा इव दारुणा यद्यपि, तथापि धीराणाम्।

काचित्सङ्केतदायिनमेवं मुख्यया वृत्त्या शंसति ।

सायं स्नानमुपासितं, मलयजेनाङ्गं समालेपितम्
यातोऽस्ताचलमौलिमम्बरमणिर्विश्रब्धमन्दा गतिः ।
आश्चर्यं तव सौकुमार्यमभितः क्लान्ताऽसि येनाधुना
नेत्रद्वन्द्वममीलनव्यतिकरं यत्कोति तेनासितुम् ॥ (६)

अत्र वस्तुना कृतपरपुरुषपरिचया ज्ञाताऽसीति वस्तु अधुना पदद्योत्यं व्यज्यते ।

तदप्राप्तिमहादुःखविलीनाशेषपातका,
तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया तया ।
चिन्तयन्ती जगद्भूतिं परब्रह्मस्वरूपिणम्,
निरुच्छ्वासतया (१३०) मुक्तिं गताऽन्या गोपकन्यका ॥ (७)

अत्र जन्मसहस्रैरुपभोक्तव्यानि दुष्कृतसुकृतफलानि वियोगदुःखचिन्तनाह्लादाभ्यामनुभूतानीत्युक्तम् । एवञ्च अशेषपचयपदद्योत्ये अतिशयोक्ती (१३१) ।

क्षणदाऽसावक्षणदा, वनमयनं, व्यसनमव्यसनम् ।
यत वीर ! तव द्विषतां पराङ्मुखे त्वयि पराङ्मुखं सर्वम ॥ (८)

हृदयवयसवडभता न खलु व्यवसाया विघटन्तीति सं । अत्र विभोरेव विरामो वर्ण्यते, तेन च हृदयार्थकारित्व व्यङ्ग्यम ।

(१३०) निरुच्छ्वासतया निरुद्धप्राणवायुतया 'श्वास प्राणो वायुरुच्छ्वासनि, अमर' इत्यमरोक्तेर्नोच्छ्वासे निरुच्छ्वासतम् ।

(१३१) दुष्कृतसुकृतफलजनकत्वेन दुष्कृतसुकृतताद्रूप्याध्यवसिते वियोगविलये प्रतीयेते इति अतिशयोक्ती व्यङ्ग्येते ।

अत्र शब्दशक्तिमूलविरोधाङ्गेनार्थान्तरन्यासेन (१२) विधिरपि त्वामनुवर्त्तते इति सर्वंपदद्योत्यं वस्तु ।

तुह वल्लहस्स गोसम्मि आसी अहरो मिलाणकमलदलो ।
दूअ णववहू सोऊण कुणइ वअणं महीसंमुहम् (१३)॥(९)

अत्र रूपकेण त्वयाऽस्य मुखर्मुम्बः परिचुम्बनं तथा कृतं, येन म्लानत्वमिति मिलाणादिपदद्योत्यं काव्यलिङ्गम् । एषु स्वतःसम्भवी व्यङ्गकः ।

राहुसु चन्दधवलासु ललिअमाप्फालिऊण जो चावं ।
एक्कच्चत्तं विअ कुणइ भुअणरज्जं विअंभन्तो (१४)॥(१०)

अत्र वस्तुना येषां कामिनामसौ राजा स्मरस्तेभ्यो न कथिदपि तदादेशपराङ्मुख इति जाग्रद्भिरुपभोगपरैरेव तैर्निशा अतिवाह्यते इति भुंअणरज्जपदद्योत्यं वस्तु प्रकाश्यते ।

निश्चितपरधियार्मयत्यनङ्गो
हृयि सुहृदयः स्खलं वयस्यराजे ।
दिशि निपतति यत्र सा च, तत्र
व्यतिकरमेत्य समुन्मिषन्त्यपस्याः ॥ (११)

---

(१२) शब्दशक्तिमूलस्य चण्डदा अवश्यदेत्यादिविरोधस्य अङ्गेन उपपादकेन, परार्थान्तरन्यासेनेत्यर्थः ।

(१३) तव वल्लभस्य प्रातरासीदधरो म्लानकमलदलम् ।
इति नववधूः श्रुत्वा करोति वदनं महीसम्मुखम् इति छ० ।
गोसशब्दो प्रभाते देवीति भाषेयग्रन्थाः । अन्येषान्तु गोसशब्दोत्तिपदं गोसे इत्यस्य गोः सेते अस्मिन्निति योगेन प्रभातपरं वर्णयाञ्चकार, प्राकृते विभक्तिविपर्यात् 'दओ' इत्यस्य 'दअस्स' इत्यादिवत् ।

(१४) रात्रिषु चन्द्रधवलासु ललितमास्फाल्य यथाम् ।
एकच्छत्रमिव करोति त्रिभुवनराज्यं विजृम्भमाणश्चेति छ० ।

अत्र वस्तुना युगपदवस्थाः परस्परविरुद्धा अपि प्रभवन्तीति व्यतिकरपदद्योत्यो विरोधः।

वारिज्जन्तो वि उणो संदावकअत्थिएण हिअएण।
त्थणहरवअस्सत्तणेण विसुद्धजाइ ण चलइ से हारो(१२५)॥(१२)

अत्र विशुद्धजातित्वलक्षणहेत्वलङ्कारेण हारोऽनवरतं कम्पमान एवास्ते इति चलद्रूपपदद्योत्यं वस्तु।

सो सुद्धसामलाङ्गो धम्मिल्लो कलिअललिअणिअदेहो।
तीए खंधाहि वलं गहिअ सरो सुरअसंगरे जअइ (१२६)॥(१३)

अत्र रूपकेण मुहुर्मुहुराकर्षणेन तथा केशपाशः स्कन्धयोः प्राप्तः, यथा रतिविरतावप्यनिवृत्ताभिलाषः कामुकोऽभूदिति स्कंधपदद्योत्या विभावना(१२७)। एसु कविमोढ़ोक्तिमात्रनिष्पन्नशरीरः।

णवपुण्णिमामिअंकस्स सुहअ! को तं सि? भणसु सच्चं।
का सोहग्गसमग्गा मच्चोसरअणि व्व तुह अज्ज? (१२८)॥(१४)

---

(१२५) वार्यमाणोऽपि पुनः बलात्पकदर्थितेन हृदयेन।
कामभरवशत्वेन विशुद्धजातिर्न चलत्यसौ हारइति व०।

(१२६) स शुद्धश्यामलाङ्गो धम्मिल्लः कलितललितनिजदेहः।
तस्या स्कन्धाद्बलं गृहीत्वा स्मरः सुरतसङ्गरे जयतीति व०।

(१२७) विभावनेति प्रख्याप्यते इति शेषः, अत्रैव रूपकेणेत्यस्यान्वयः। अयं भावः, स्कन्धनिष्पत्तिरूपाभिलाषहेत्वभावेऽपि अभिलाषोदयात् विभावना, रतिनिष्पत्तिश्च स्कंधपदेनैव द्योतिता, आकर्षणेन हि धम्मिल्लस्य स्कन्धप्राप्तेः प्रायशो रतिनिष्पत्तिं विनाऽवसानादिति।

(१२८) नवपूर्णिमामृगाङ्कस्य सुभग! कस्त्वमसि? भण सत्यम्,
का सौभाग्यसमग्रा मदोत्सवरजनीव तवाद्येति व०।

अत्र वस्तुना मयीव अन्यस्यामपि प्रथममनुरक्तत्वं,न तत इति णवेत्यादि-पद्योक्तेत्यादिपदद्योत्यं (१३९) वस्तु व्यज्यते ।

सहि ! णवणिहुवणसमरम्मि अङ्कवालीसहीए निविडाए ।
हारो णिवारिओ विअ उच्छेरन्तो तदो कहं रमिअं(१४०)॥(१५)

अत्र वस्तुना हारच्छेदादनन्तरम् अन्यदेव रतमवश्यमभूत्, तत्कथय कीदृगिति व्यतिरेकः कहंपदगम्यः (१४१) ।

पविसन्ती घरवारं विवलिअवअणा विलद्धजण पहं ।
खम्भे घेत्तूण घडं हाहा णट्ठो त्ति रुअसि सहि ! किंत्ति?(१४२)॥

अत्र हेत्वलङ्कारेण सङ्केतनिकेतनं गच्छन्तं दृष्ट्वा यदि तत्र गन्तुमिच्छसि, तदा अपरं घटं गृहीत्वा गच्छेति वस्तु किंत्ति-पदद्योत्यम् (१४३) । यथा वा,

विसंघलं तुमं सहि ! दिट्ठिजुएण कुडेण तरलतरदिट्ठं ।
वारम्फंसमिसेण अ या रुअओ त्ति पाडिअ विभिण्णो(१४४)॥(१६)

---

(१३९) अत्रायं विभागः, णवणिहुवणसमरम्मीत्यनेन प्रथममनुरक्तत्वमिति, पद्योक्तेत्यादिनेन तु न तत इति व्यज्यते ।

(१४०) सखि नवनिधुवनसमरे अङ्कपालीसख्या निविडया ।
हारो निवारित एव उच्छ्रियमाणस्तत कथ रमितमिति सं० । निधुवनं सुरतं, अङ्कपाली आलिङ्गनम् । उच्छ्रियमाण इयोर्तृतीयतयाऽन्विको भवतीति नागेशभट्टादयः ।

(१४१) कहपदेन जिज्ञासाऽवगम्यते, जिज्ञासा च प्रश्नेच्छा नोदेतीति तद्विशेषवेयं रतिर्जातेति जिज्ञासया व्यज्यत इति भावः ।

(१४२) प्रविशन्ती गृहद्वारं विवलितवदना विलोक्य पथानम् । स्तम्भे गृहीत्वा घटं हाहा नष्ट इति रोदिषि सखि ! किमिति इति सं० ।

(१४३) व्यज्यते इतिशेषः, अत्रैव हेत्वलङ्कारेणेत्यन्वयः ।

(१४४) विघट्टयन्ती त्वां सखि ! दृष्ट्वा कुड्येन तरलतरदृष्टिम् । द्वारस्पर्शमिषेण चाक्षा रुदतीति पातयित्वा विभिन्न इति सं० । कुड्येन भित्तेन ।

अत्र नदीकूले लतागहने कृतसङ्केतमप्राप्तं गृहप्रवेशावसरे पश्चादागतं दृष्ट्वा पुनर्नदीगमनाय द्वारोपघातव्याजेन बुद्धिपूर्वं व्याकुलया त्वया घटः स्फोटित इति मया चिन्तितम्, तत्किमिति नाख्यसि ? तत् समीहितसिद्धये व्रज, अहं ते श्वश्रूनिकटे सर्वं समर्थयिष्ये इति द्वारस्पर्शनव्याजेनेत्यपङ्क्त्या वस्तु (१४५)।

जोण्हाइ मऊरेण अ विद्दिण्णतारुण्णउत्सुअमणा सा।
वुड्ढा वि णवोढ़ेव्व परवहू अहह हरइ तुह हिअयं(१४६)॥(१७)

अत्र काव्यलिङ्गेन वृद्धां परवधूं, त्वम् अस्मान् उज्झित्वा अभिलषसीति त्वदीयमाचरितं वक्तुं न शक्यमित्याक्षेपः परवहूपदप्रकाश्यः (१४७)। एषु कविनिबद्धवक्तृप्रौढ़ोक्तिमात्रनिष्पन्नशरीरः। वाक्यप्रकाश्ये तु पूर्वमुदाहृतम्। शब्दार्थोभयशक्त्युद्भवस्तु पदप्रकाश्यो न भवतीति पञ्चविंशद्भेदाः।

प्रबन्धेऽप्यर्थशक्तिभूः ॥ ४२ ॥

यथा गृध्रगोमायुसंवादादौ,—

अलं स्थित्वा श्मशानेऽस्मिन् गृध्रगोमायुसङ्कुले।
कङ्कालबहुले घोरे सर्वप्राणिभयङ्करे॥

---

(१४५) वारएणंसमिसेनेतिपदद्योत्यमिति प्रदीपप्रभा। सखीतिपदद्योत्यमिति माणेश्वरमतम्।

(१४६) ज्योत्स्नया मधुरेण च विदीर्णतारुण्योत्सुकमनाः सा। वृद्धाऽपि नवोढेव परवधूरहह हरति तव हृदयमिति सं॰॥

(१४७) परवधूसेवैव ते चित्तहरणमिति हेत्वलङ्कारेण प्राचीनमतसिद्ध आक्षेपालङ्कारो व्यज्यते इत्यर्थः।

न चेद्द जीवितः कश्चित् कालधर्ममुपागतः ।
प्रियो वा यदि वा द्वेष्यः, प्राणिनां गतिरीदृशी ॥

इति दिवाप्रभवतो गृध्रस्य पुरुषविसर्जनपरमिदं वचनम् (१४८)।

आदित्योऽयं स्थितो मूढाः ! स्नेहं कुरुत साम्प्रतम् ।
बज्रविघ्नो मुहूर्त्तोऽयं जीवेदपि कदाचन ॥
अमुं वानकवर्णाभं बालमप्राप्तयौवनम् ।
गृध्रवाक्यात्कथं मूढास्त्यजध्वमविशङ्किताः ? ॥

इति निशि विलुम्पमाणस्य गोमायोर्जनव्यावर्त्तननिष्ठस्य (१४९) वचनमिति प्रबन्धएव प्रथते। अन्ये तु एकादश भेदा ग्रन्थविस्तरभयान्नोदाहृताः, स्वयन्तु लक्षणतोऽनुसर्त्तव्याः। अपिशब्दात् पदवाक्ययोः।

पदैकदेशरचनावर्णेष्वपि रसादयः (१५०)।

तत्र प्रकृत्या यथा,—

रइकेलिकिलिञ्चिअणिअसणकरकिसलअरुद्धणअणजुअलस्स ।
सहस तईअणअणं पव्वईपरिचुंबिअं जअइ (१५१) ॥

---

(१४८) पुरुषस्य मृतसम्बन्धिजनस्य, विसर्जनं श्मशानतोऽपसारणम्, गृध्रं प्रति निवर्त्तनमिति फलितोऽर्थः ।

(१४९) जनस्य मृतात्मीयजनस्य, व्यावर्त्तनं श्मशानपरित्यागाद् निवर्त्तनं, तदिदं तत्तात्पर्यकम् ।

(१५०) पदानां तिङ्न्तसुबन्तानां एकदेशेषु प्रकृतिप्रत्ययोपसर्गसमासतद्धितेषु, रचनायां दीर्घसमासादिरूपविन्यासविशेषेषु, वर्णेषु अक्षरविशेषेषु च, रसादयः अर्थसङ्घटनया. सम्भवन्त्यर्थाः ।

(१५१) रतिकेलिकिलिञ्चितनिजवसनाञ्चलरुद्धनयनयुगलस्य ।
सहसा तृतीयनयनं पार्वत्याः परिचुम्बितं जयति स. ।
महादेवस्य विसर्जनेऽत्र हेतुः ।

अत्र जयतीति नतु शोभत इत्यादि (१५२), समानेऽपि हि स्वगनव्यापारे लोकोत्तरेणैव व्यापाररूपेणास्य पिधानमिति तदेवोत्कृष्टम्। यथा वा,—

प्रेयान् सोऽयमपाकृतः सगपथं पादानतः कान्तया,
हित्वाण्येव पदानि वासभवनाद्यावन्न यात्युन्मनाः।
तावत्प्रत्युत पाणिसंपुटजसन्नीवीनिबन्धं धृतो
धावित्वैव कृतप्रणामकमहो प्रेम्नो विचित्रा गतिः॥

अत्र पदानीति नतु द्वाराणीति(१५३)। तिङ्सुपोर्यथा,—

मयि मयि मुकुचचूचारुराभाङ्कुराणां,
दिशि दिशि पवमानो वीरुधां लासकश्च।
नरि नरि किरति द्राक् सायकान् पुष्पधन्वा,
पुरि पुरि विनिवृत्ता मानिनी मानचर्चा॥

अत्र किरतीति किरणस्य साध्यमानत्वं, निवृत्तेति निवर्त्तनस्य

---

(१५२) उक्तमिति शेषः, समाने करकृतनयनपिधानतुल्ये, स्वगनव्यापारे तृतीयनयनपिधानक्रियायां, लोकोत्तरेण अलौकिकेन चुम्बनात्मकेन, अस्य तृतीयनयनस्य। अयमाशयः, जयत्यर्थेन उत्कर्षोऽवगम्यते, तृतीयनयनस्य उत्कर्षश्च उत्तमपिधानवत्तया, पिधानस्योत्कर्षश्च चुम्बनरूपालौकिककरणकतया, चुम्बनेन पिधानन्तु रसोत्कर्षादेव भवतीति जिधातुरेव रसोत्कर्षप्रतीतेः प्रयोजक इति, 'शोभते' इत्युक्तौ तु उत्कर्षकारणविलानुदयेन वाच्यार्थस्यैव विश्रान्तिः, इह तु यद्धृदयहृदयमेव प्रमाणम्।

(१५३) उक्तानीति शेषः, एवमग्रेऽपि, द्वारादिपदमपहाय पदपदग्रहणात् द्वारपर्यन्तागमनासहिष्णुताप्रतीत्या उत्कण्ठातिशयो व्यज्यते। अत्र नामग्रहतिरस्कृतम्।

सिद्धत्वं तिङा सुपा च, तत्रापि क्तप्रत्ययेनातीतत्वं द्योत्यते । यथा वा,

लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितः,
निराहारः सख्यः सततरुदितोच्छूननयनाः ।
परित्यक्तं सर्वं हसितपठितं पञ्जरशुकैः,
तवावस्था चेयं, विरुज कठिने ! मानमधुना ॥

अत्र लिखन्निति न तु लिखतीति ; तथा आस्ते- इति न तु आसीदिति, अपितु प्रसादपर्य्यन्तमास्ते-इति ; भूमिमिति न तु भूमाविति ; न हि बुद्धिपूर्व्वकमपरं किञ्चिल्लिखतीति तिङ्-सुब्विभक्तीनां व्यङ्ग्यम् (१५४) ।

गामरुहाहम्हि गामे वसामि णअरट्ठिइं ण जाणामि ।
णाअरिआणं पइणो हरेमि जा होमि सा होमि(१५५)॥

अत्र नागरिकाणामिति षष्ठ्याः(१५६) ।

---

(१५४) अयमाशयः, लिखन्निति-यतो लिखनक्रियाया अप्राधान्यादनवगमात् अतात्पर्यविषयत्वेन अबुद्धिपूर्व्वकत्वम् ध्वनितम्, आस्ते-इति प्रारम्भपरिसमाप्तिपर्य्यन्तताबोधकवर्त्तमानतिङाऽवस्थानस्य प्रसादपर्य्यन्तताया, एवं भूमिमिति द्वितीयाविभक्त्याऽधिकरणस्य कर्म्मत्वप्रतीतेः लेखनीदमपरं कर्म्मान्तरं नास्तीति प्रतीयते, एतेनापि च मे ऽतिशयो व्यज्यते इति । अत्र तिङ्सुपो' प्रस्तावे लिखन्निति शतृप्रत्ययनिष्पन्नप्रदर्शनं प्रासङ्गिकम् ।

(१५५) ग्रामरुहा अहं ग्रामे वसामि नगरस्थितिं न जानामि ।
नागरिकाणां पतीनू हरामि या भवामि सा भवामीति च० ॥

कश्चिद् ग्रामीणस्तदीयहृदये स्थितिमत्यां नागरिकां प्रति ग्रामीणावा वदतीति ।

(१५६) नागरिकानित्यपक्षाय नागरिकाणामतीति कृतम् ; तेन च

रमणीयः क्षत्रियकुमार आसीत्।

-इति कालस्य। एषा हि भग्नमाहेश्वरकार्मुकं दाशरथिं प्रति कुपितस्य भार्गवस्योक्तिः (१५७)। वचनस्य यथा,—

ताणं गुणग्गहणाणं, ताणं उक्कंठाणं, तस्स पेम्मस्स।
ताणं भणिआणं, सुन्दर! एरिसिअं जाअमवसाणं? (१५८)॥

अत्र गुणग्रहणादीनां बहुत्वं, प्रेम्नश्चैकत्वं द्योत्यते (१५९)। पुरुषव्यत्ययस्य यथा,

रे रे चञ्चललोचनाञ्चितरुचे, चेतः! प्रमुच्य स्थिर-
प्रेमाणं महिमानमेणनयनामालोक्य किं वृत्यसि?
किं मन्ये विहरिष्यसे? वत हतां मुग्धान्तराधामिमाम्,
एषा कण्ठतटे हता खलु शिला संसारवारां-निधौ (१६०)॥

सम्बन्धषष्ठ्या सच्चम्बन्धेन पतिषु चातुर्यातिशयो द्योत्यते, तेन च तानू-हतः स्वस्यातिचातुर्यं व्यङ्ग्यम्। अत्र 'नागरिकाणामित्यनादरे षष्ठी ता अनादृत्य इत्यर्थः' इति वर्णयन्ति बहव।

(१५७) आशीर्दित्यतीतकालबोधकखड्गा, भत्कोधकवलितस्यास्य रम-णीयत्वमतीतं न तु वर्त्तमानं भविष्यदुवेति व्यज्यते, तेन त्वयेदं संहरामीति-प्रतीत्या भार्गवस्य क्रोधातिशयो व्यङ्ग्यः।

(१५८) तेषां गुणग्रहणानां तासामुत्कण्ठानां तस्य प्रेम्न।
तासां भणितीनां सुन्दर! ईदृशं जातमवसानमिति स॰॥

(१५९) बहुत्वं बहुविधत्वम्, एकत्वम् एकविधत्वम्। तथाच गुण-ग्रहणादीना प्रेमहेतूनां बहुविधत्वेऽपि कार्यं प्रेम एकजातीयमेव न कदा-चिदन्यथाभावं प्राप्नमिति बहुवचनैकवचनाभ्यां व्यज्यते इति प्रदीपः।

(१६०) स्थिरम् प्रेम यत्र, तादृशम् महिमानम् विषयानासाद

अत्र प्रहासः(१६१)। पूर्वनिपातस्य यथा,

येषां दोर्बलमेव, दुर्बलतया ते सम्मताः ; तैरपि
प्रायः केवलनीतिरीतिशरणैः कार्यं किमुर्वीश्वरः ?।
ये त्वाश्रयक ! पुनः पराक्रमनयस्वीकारकान्तक्रमाः,
ते स्युर्नैव भवादृशाखिजगति द्वित्राः पवित्राः परम् ॥

अत्र पराक्रमस्य प्राधान्यमवगम्यते (१६२)। विभक्तिविशेषस्य यथा,

प्रथनाध्वनि धीरधनुर्ध्वनिभृति विधुरैरयोधि तव दिवसम्।
दिवसेन तु नरप ! भवानयुद्ध विधिसिद्धसाधुवादपदम्॥

अत्र दिवसेनेत्यपवर्गे तृतीया फलप्राप्तिं द्योतयति(१६३)।

भूयोभूयः सविधनगरीरथ्यया पर्यटन्तं
दृष्ट्वा दृष्ट्वा भवनबलभीतुङ्गवातायनस्था ।

जनितमुत्कर्षं, अनराग्यां अनर्घ्यमानामार्यां मनोगतमभिलाषं, एषा स्त्री, आशा वा ।

(१६१) अयं भावः, 'त्वं मन्ये विहरिष्यसे' इत्यस्य अहं विहरिष्ये इति किं त्वं मन्यसे ? इत्यर्थः, अत्र "प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च" इति (१।४।१०६) सूत्रेण युष्मदस्मदोर्योगे उत्तममध्यमयोर्विपर्ययेण विधानं, तेन च प्रहासोऽभिव्यक्त इति ।

(१६२) पराक्रमनयेत्यत्र यद्यप्यर्थोऽपि नयपदात् पराक्रमपदस्य "अभ्यर्हितञ्च" इति (२।२।३४) सूत्रवार्त्तिकेन कृतः पूर्वनिपातः पराक्रमस्य प्राधान्यरूपमभ्यर्हितत्वं द्योतयति ।

(१६३) 'अपवर्गे तृतीया' (२।३।६ सू०) इति सूत्रेण 'फलप्राप्तौ द्योत्यायामेव तृतीयाविधानात् । अत्र दिवसमिति द्वितीयाविभक्तिरपि रिपूणां फलाप्राप्तिं सूचयति ।

साक्षात्कामं नवमिव रतिर्मालती माधवं यत्
गाढोत्कण्ठालुलितललितैरङ्गकैस्ताम्यतीति (१६४)॥
अत्र अनुकम्याद्योत्तेः करूपतद्धितस्य (१६५)।

परिच्छेदातीतः सकलयचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान्।
विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर्जडयति च तापञ्च कुरुते॥

अत्र प्रसज्यप्रतिषेधस्य।

कृतश्च गर्वाभिमुखं मनस्वया,
किमन्यदेवं निहताश्च नो द्विषः।
तमांसि तिष्ठन्ति हि तावदंशुमान्
न यावदायात्युदयाद्रिमौलिताम्।

अत्र तुल्ययोगिताद्योतकस्य 'च' इति निपातस्य(१६६)।

---

(१६४) इतीति, इति यत्, तत् स्वरूपिकया कथितमिति चूर्णकेनान्वयः। भवनवलभी भवनोपरिनिर्ज्जनमण्डप., सौधचूड़ा वा इति यदुः, प्रासादाद्यनेकदारु इति तु नागेशभट्टः। सुलितं खिन्नं कम्पितं वा।

(१६५) अनुकम्याद्योत्तेः अनुकम्यादोतकस्य, अनुकम्यैरित्यत्र "अनुकम्यायां" (५।३।७६) इति सप्तम्यर्थे विहितात् कृत्यप्रत्ययादनुकम्यातिशयो व्यज्यते।

(१६६) चकारेण अनोगर्वाभिमुखीकरणादिक्रमयोः प्राकरणिकयोरेकालम्बनत्वरूपैकधर्म्मसम्बन्धात् तुल्ययोगितेति प्राचीनमतेनेदम्। वेतिनिपातरूपप्रतिपादिकमात्रस्यैव व्यञ्जकत्वं, न तु प्रत्ययघटकस्य इतीति पदैकदेशेनेति निदर्शनलक्षिदर्शनम्। प्रदीपकारादयस्तु तस्य-

रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं पराम्
यस्याङ्गाग्यविपर्ययादयदिपरं(१६७)देवो न जानाति तम्।
वन्दीवैष यशांसि गायति मरुद्व्यस्यैकवाणाहति-
श्रेणीभूतविशालतालविवरोत्तीर्णैः स्वरैः सप्तभिः ॥

अत्रासाविति भुवनेष्विति गुणैरिति सर्वनाम-प्रातिपदिक-वचनानां (१६८) ; न त्वदिति न मदिति अपि तु अस्मदिति अस्य सर्वाच्चेपिणः (१६९) ; भाग्यविपर्य्ययादित्यन्यथा-सम्पत्तिमुखेन (१७०), नत्वभावमुखेनाभिधानस्य ।

तरुणिमनि कलयति कलामनुमदनधनुर्भुवोः पठत्यग्रे ।
अधिवसति सकललालनामौलिमियं चकितहरिणचलनयना ॥

अत्र द्रुमनिजव्ययीभावकर्मभूताधराणां स्वरूपस्य ; तरुणत्वे-

योगितापदं सप्तम्यन्तपरमिति, चकारस्य पदैकदेशत्वाभावेऽपि केवलस्य तस्याप्रयोगात् पदैकदेशत्वोपचार इति च व्याचक्षु ।

(१६७) यदिपरंशब्दोऽवधारणार्थे निपातः ।

(१६८) व्यङ्गकत्वमिति शेषः, एवं सर्वत्र । भुवनेषु न तु देवेषु भुवने वा ; गुणै न तु दोषैः गुणेन वेति उभयत्रैव प्रातिपदिक-वचनयोर्व्यङ्गकत्वम् ।

(१६९) अस्मदिति शेषः । 'अस्य' षष्ठ्यन्तवचनान्नाम्नश्चशब्दघटित-समासांशस्य अनन्तमाद्यादेशस्यास्मदित्यस्य, सर्वाच्चेपिणः सप्तम्यन्तस्य-ङसो-ऽस्यापकस्य ।

(१७०) अस्य च 'अभिधानस्य' इत्यन्तिमेनान्वयः, अन्यथा-सम्पत्तिः दुर्भाग्यरूपेण परिणमनम्, अभावमुखेन अभाग्यादितिरीत्या ; तथाच अस्माकं भाग्यं नास्तीति न, परन्तु चैत्रेण भवद्भाग्यस्याद्यानुभविना भाग्येन आजन्मसङ्गिनो वयं, नरेव अधुना दुःखफलदमस्माकमिति ध्वनितम् ।

इति, धनुषः समीपे-इति, मौलौ वसतीति त्वादिभिस्तुल्ये एषां वाचकत्वे अस्ति कश्चित् स्वरूपस्य विशेषो यद्चमत्कारकारी, स एव व्यञ्जकत्वं प्राप्नोति (१७१)। एवमन्येषामपि बोद्धव्यम्। वर्णरचनानां व्यञ्जकत्वं गुणस्वरूपनिरूपणे (८म उ०) उदाहरिष्यते। अपिशब्दात् (१७२) प्रबन्धेषु नाटकादिषु। एवं रसादीनां पूर्वगणितभेदाभ्यां (१७३) सह षड्भेदाः।

भेदास्तदेकपञ्चाशत्,
व्याख्याताः (१७४)।

तेषां चान्योन्ययोजनम् ॥ ४३ ॥

सङ्करेण त्रिरूपेण संसृष्ट्या चैकरूपया।

---

(१७१) इमनिजा तद्धितेन सुकुमाराक्षरेण नाटयमेव वयः प्रतीयते, 'तरुणत्वे' इत्युक्तौ तु त्वप्रत्ययस्य प्रौढाक्षरतया वयसोऽपि प्रौढत्वं प्रतीयेत। अतुमदनधनुरिति पूर्वपदार्थप्रधानाव्ययीभावेन उत्तरपदार्थीभूतधनुषोऽप्राधान्यं प्रकाशयता तच्चिरमेवस्वीकरणसामर्थ्यं भूलतायस्य प्रत्याय्यते; तथा मौलिनिमितिकर्मप्रत्ययेन कर्मीभूतसकलजनामौलिव्याप्तिद्वारा सौन्दर्यातिशयो व्यज्यते इति।

(१७२) 'वर्णेष्वपि'-इत्यपिशब्दात्।

(१७३) पदवाक्यप्रकाश्याभ्यामित्यर्थः। पद-वाक्य-पदैकदेश-रचना-वर्ण-प्रबन्ध-प्रकाश्यतया षड्भेदो रसादिरित्यर्थः।

(१७४) व्याख्याताः व्याख्यातप्रायाः, तथाहि अविवक्षितवाच्यस्य अर्थान्तरसंक्रमितवाच्यात्यन्ततिरस्कृतवाच्यतया द्वौ भेदौ, तौ च पदवाक्ययोरिति चत्वारः; विवक्षितान्यपरवाच्येषु असंलक्ष्यक्रमव्यङ्ग्यस्य उक्तरीत्या षट्; संलक्ष्यक्रमव्यङ्ग्यस्य तु एकचत्वारिंशत् भेदाः, (यद्यप्यभिभूतस्य द्वौ भेदौ, तौ च पदवाक्ययोरिति चत्वारः; अर्थशक्त्युद्भवस्य द्वादश भेदाः प्रत्येकं पदवाक्यप्रबन्धगताः-इति षट्त्रिंशत्; उभयशक्त्युद्भवस्येव इति एकचत्वारिंशत्) इति मिलित्वा एतस्य त्रयस्यैकपञ्चाशत् भेदाः।

न केवलं प्रयुक्ता एवैकपञ्चाशद्भेदा भवन्ति, यावतेषां स्वप्रभेदैरेकपञ्चाशत्ता (संख्यास्पदत्वेन, अनुग्राह्यानुग्राहकतया, एकव्यङ्ग्यानुप्रवेशेन चेति) त्रिविधेन सङ्करेण, परस्परनिरपेक्षरूपया एकप्रकारया संसृष्ट्या चेति चतुर्भिर्गुणने (१७५),—

वेदखाब्धिवियच्चन्द्राः [१०४०४] (१७६),

---

(१७५) तेषां एकपञ्चाशतो भेदानां, स्वप्रभेदैरेकपञ्चाशत्ता चतुर्भिर्गुणने इत्यन्वयः । साक्षात् परम्परया वा यथाकथञ्चित् परस्परसामेव संयोग संकरः, तद्भिन्नः स संसृष्टिः । संकरस्थले हि क्वचित् बाधकबाधकभावाभावादेकतरावधारणेन अयं अयं वा इति भवति संशयः, क्वचिच्च स्वत एवोपादेयतया प्रधानयोरपि एकस्य कथञ्चिदपरावृत्तप्राधान्येन अङ्गाङ्गिभावापरनामकानुग्राह्यानुग्राहकभावः, क्वचित्तु एव व्यङ्ग्यव्यङ्गतया एकाश्रयानुप्रवेश इति संकरस्य त्रैविध्यम् । इदमत्रावधेयं, प्रधानव्यङ्ग्ययो संसृष्टिसंकराभ्यामेव ध्वनेरुपपत्तावपि तयोरव्यपदेश इति एतत् सर्वं उदाहरणेन स्फुटीभविष्यति ।

(१७६) 'अङ्कस्य वामतो गतिः' इति नियमेन चतुरुत्तरचतुःशताधिकायुतपरिमिता (१०४०४) भेदा सम्पद्यन्ते इत्यर्थः, तथाहि एकपञ्चाशतो भेदानां एकपञ्चाशता गुणने एकाधिकषट्शतीत्तरषट्सहस्र (२६०१) भवति, योजनस्य षडादिषु प्रकारैरिति तावतां चतुर्भिर्गुणने यथोक्तसङ्ख्या (१०४०४) सम्पद्यते । एकस्मिन्नपि श्लोके एकविधध्वनिद्वयसम्भवेन स्वस्य स्वेन योजनं सम्भवति ।

यत्र "अलङ्कारौचिती, [गणनेयमयुक्ता, अपिमाविभेदस्य योजने एकैकभेदस्यैवात्, तथाहि अर्थालङ्कारसंकलितवाच्यस्य अर्थालङ्कारसंकलितवाच्येन योजने यो भेद स एव अर्थालङ्कारसंकलितवाच्यस्यार्थालङ्कारसंकलितवाच्येन योजनायाम्, एवमन्यत्रापि, तस्मात्

'एको द्वावित्रिर्बहवः स्याद्य एकमेकाधिकं गुण्यते ।
सप्तार्केनावधयो गुण्यते, एतत् संकलितं स्यात्' ॥

-इत्युक्तदिशा द्विपञ्चाशद्भेदैः बहिरङ्गा एकपञ्चाशतं गुण्येत्, तदाच एकपञ्चाशन्भेदेभ्यः इति लब्धेषु एतानि बहिरङ्गाधिकानि (१२२९) लाभस्ये, योग चतुःप्रकार,-इति तेषु चतुर्भिर्गुणितेषु भेदाग्रदर्शने

शुद्धभेदैः सह,—

शरेषुयुगखेन्दवः [१०४५५] ॥ ४४ ॥

तत्र दिङ्मात्रमुदाक्रियते,—

खणपाहुणिया देअर! जाआए सुहअ। किं पि दे भणिआ।
रुअइ पडोहरवलहीघरम्मि अणुणिज्जउ वराई (१७७) ॥

यवदति पञ्च सहस्राणि चतुरधिकं शतत्रयं च (५३०४) सङ्कीर्णभेदाः इत्येव न्यायः] इति वदन्ति। अत्र ब्रूमः, अनुभवसिद्धौ तावत् पुण्ड्रेक्षुरसेक्षित्र ध्वनिष्वपि हृद्यत्वातिशयानतिशयौ, तथा चार्थान्तरसंक्रमितवाच्यस्य यत्रातिशयस्तत्रात्यन्ततिरस्कृतवाच्येन तदुयोजना, यत्र तु तद्वैपरीत्यं, तत्रात्यन्ततिरस्कृतवाच्यस्येतरेण योजनमिति व्यपदेशः, एवमन्यत्रापूह्यम्। एतदेव प्राधान्यमादाय गणना सौष्ठवं। नन्वेवं यत्रोभयोस्तुल्यमेव चारुत्वं, तत्र भेदान्तरत्वं स्यादिति, मैवं, अपकर्षाभावस्यातिशयपदेन स्वीकारात्, तत्रोभयभेदसंकरस्वीकाराच्च। एतादृशे चास्थाने पदालम्बनमेव महत् पौरुषमिति सहृदयभावमास्थायालोचनीयमिति" इति प्रदीपप्रभया सुतरामेव दर्पणमालिन्यमजनि। अत्र "पदैकदेशपदवाक्यमहावाक्यानामेकव्यङ्ग्यान्यतरेणाव्यञ्जनात् कथं तेषामेकव्यञ्जकानुप्रवेश इत्येतावतापि बहुतरहास" इतिमहेश्वराक्षेपस्तु न केनापि समाहितः; अत्रेदं बोध्यम्, 'एकव्यञ्जकानुप्रवेशः' इत्यत्र व्यञ्जकत्वं यथाकथञ्चित् सहकारितामात्रेणापीति अवश्यमङ्गीकार्यम्, अतएव रामोऽस्मीत्यादौ लक्ष्यार्थस्य व्यञ्जकतायां सहकारितामात्रेणैव रामपदं व्यञ्जकमिति वक्ष्यति, एवञ्च वाक्यव्यङ्ग्येऽपि तदेकदेशपदादेः सहकारितारूपेण व्यञ्जकतया यत्र वाक्यतदेकदेशपदयोर्द्वयोरेव व्यङ्ग्यद्वयमस्ति, तत्रैव तत्पदरूपैकव्यञ्जकानुप्रवेशः सम्भवतीति, अत्र "एतादृशे चास्थाने पदालम्बनमेव महत् पौरुषमिति" इति प्रदीपोक्तं मा विस्मारि इत्यलम्॥

(१७७) क्षणप्राघुणिका देवर! जायया सुभग! किमपि ते भणिता।
रोदिति गृहपश्चाद्भागवलभीगृहेऽनुनीयतां वराकीति संस्कृतम्॥

क्षणे उत्सवे, प्राघुणिका निमन्त्रणेन समागता। पडोहरशब्दो गृहपश्चाद्भागे देशीति बहवः।

अत्रानुनयः किमुपभोगलक्षणेऽर्थान्तरे संक्रमितः, किम् अनुरणनन्यायेनोपभोगे एव व्यङ्ग्ये व्यञ्जकः ? इति संदेहः(१७८)।

स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घनाः,
याताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः ।
कामं सन्तु, दृढं कठोरहृदयो रामोऽस्मि, सर्वं सहे,
वैदेही तु कथं भविष्यति, हहा हा देवि ! धीरा भव ॥

अत्र लिप्तेति पयोदसुहृदामिति च अत्यन्ततिरस्कृतवाच्ययोः संसृष्टिः (१७९) । ताभ्यां सह रामोऽस्मीत्यर्थान्तरसंक्रमितवाच्यस्यानुग्राह्यानुग्राहकभावेन(१८०),रामपदलक्षणैकव्यञ्जकानुप्रवेशेन च अर्थान्तरसंक्रमितवाच्यरसध्वन्योः (१८१) सङ्करः। एवमन्यदप्युदाहार्यम् ॥

इति काव्यप्रकाशे ध्वनिनिर्णयो नाम चतुर्थ उल्लासः ॥

---

(१७८) तथाचात्र व्यङ्ग्यसंदेहेनैतन्मूलक एवाविवक्षितवाच्यध्वनिविवक्षितान्यपरवाच्यध्वन्योः संदेहसंकरः ।

(१७९) अत्र लिप्ते वियति कान्त्या द्रव्यद्रव्यसंयोगविशेषस्य लेपनस्य व्यञ्जकत्वात्, अचेतने तु मेघे चित्रवृत्तिविशेषस्य लेपनस्य सौहृदस्याध्यासाच्च लेपनं व्यापने, सौहृदञ्च केकाद्यनुबन्धितेऽत्यन्ततिरस्कृतम् । अत्र च लक्ष्यार्थयोरातिशय्ये व्यङ्ग्ये, तयोश्च परस्परं निरपेक्षतयाऽवस्थानात् संसृष्टिः, तन्मूलकश्च ध्वन्योरपि संसृष्टिः ।

(१८०) ताभ्यां अत्यन्ततिरस्कृतवाच्यध्वनिभ्यां सह अर्थान्तरसंक्रमितवाच्यध्वनेरनुग्राह्यानुग्राहकभावेन सङ्कर इत्यन्वयः, तथाहि रामपदस्य सकलङ्कशशाङ्कतया प्रसिद्धदोषार्थो लक्ष्यः, तेन च रामस्य खारधीरणं व्यङ्ग्यं, तदानीं तस्य खारधीरणं तु विप्रपदसहकृतपदव्यङ्ग्ययोः मेघसाकाङ्क्षव्यापनकेकाद्यनुबन्धिनोरतिशययोरङ्गीभूतयोः प्रयोज्यमेवेति तयोरनुग्राहकत्वं, खारधीरणस्य तु अनुग्राह्यत्वमिति व्यङ्ग्याभ्यां व्यङ्ग्यस्य उद्भटरूपसङ्करमूलक एव ध्वनिभ्यां ध्वनेस्सङ्करोपदेशः ।

(१८१) उक्तरूपेण खारधीरणस्येव विप्रलम्भस्यापि कथञ्चित् रामपदव्यङ्ग्यत्वात्, वाक्यव्यङ्ग्यस्य विप्रलम्भस्य तदेकदेशरामपदव्यङ्ग्यत्वान्नयायाद्वा व्यङ्ग्ययोः खारधीरणविप्रलम्भरसयोः रामपदरूपैकव्यञ्जकानुप्रवेशरूपसङ्करोऽस्तीति तन्मूलको ध्वन्योरपि तथा व्यपदेशः ।

॥ पञ्चम उल्लासः ॥

एव ध्वनौ निर्णीते गुणीभूतव्यङ्ग्यप्रभेदानाह,—

अगूढमपरस्याङ्गं वाच्यसिद्ध्यङ्गमस्फुटम् ।
सन्दिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुन्दरम् ॥ १ ॥
व्यङ्ग्यमेवं (१) गुणीभूतव्यङ्ग्यस्याष्टौ भिदाः स्मृताः।

कामिनीकुचकलशवत् गूढं चमत्करोति, अगूढन्तु स्फुटतया वाच्यायमानमिति गुणीभूतमेव । अगूढं यथा;—

यस्यासुहृत्कृततिरस्कृतिरेत्य तप्त-
सूचिव्यधव्यतिकरेण युनक्ति कर्णौ ।
काञ्चीगुणग्रथनभाजनमेष सोऽस्मि,
जीवन्न संप्रति भवामि किमाचरामि । (२) ॥

अत्र जीवन्नित्यर्थान्तरसंक्रमितवाच्यस्य (३) ।

उन्निद्रकोकनदरेणुपिशङ्गिताङ्गाः
गायन्ति मञ्जु मधुपा नवहृद्दीर्घिकासु ।

---

(१) एव एतेन कारणेन ।

(२) वृहन्नलाहस्तेनावस्थितस्यार्जुनस्योक्तिरियम् । मया हृता तिरस्कृति पराभवो यस्य स । मत्सकाशात्तस्य रिपो तप्तलौहशलाकया कर्णवेधो देशाचारसिद्ध इत्युत्तरत्रोन्निद्रेत्यादि. सर्वं ।

(३) व्यङ्ग्य अगूढमित्यन्वयः । एव परत्र । अत्र जीवन अभिमत-कार्यानुपयोगात्प्रकृतजीवन लक्षयति, तेन च मरणमेव श्रेय इति व्यङ्ग्य-मपि हृदयैरपि गम्यमिति ।

एतच्चकास्ति च, रवेर्नवबन्धुजीव-
पुष्पच्छदाभमुदयाचलचुम्बि बिम्बम् ॥

अत्र चुम्बनस्यात्यन्ततिरस्कृतवाच्यस्य (४) ।

अत्रासीत् फणिपाशबन्धनविधिः, शक्त्या भवद्देवरे
गाढं वक्षसि ताडिते हनुमता द्रोणाद्रिरत्नाहृतः ।
दिव्यैरिन्द्रजिदस्त्र लक्ष्मणशरैर्लोकान्तरं प्रापितः,
केनाप्यत्र मृगाक्षि ! राक्षसपतेः क्षुण्णा च कण्ठाटवी ॥

अत्र 'केनाप्यत्र'-इत्यर्थशक्तिमूलानुरणनरूपस्य। 'तस्याप्यत्र'-इति युक्तः पाठः (५)। [१]

'अपरस्य' रसादेर्वाचस्य वा, (वाक्यार्थीभूतस्य) अङ्गं रसादि अनुरणनरूपं वा (६) । यथा,

अयं स रसनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥

---

(४) अत्र चुम्बतिर्बन्धसंयोगरूपे सख्यार्थे सबाधः सन् संयोगसेन सामान्येन उदयाचलसूर्यबिम्बसंयोगं लक्षयन् प्रधानं वाच्यत्वं प्रकाशयति । संयोगत्वसामान्यरूपेणापि बन्धस्य योगरूपसख्यार्थस्यान्वयाप्रवेशात् अत्यन्ततिरस्कृतवाच्यत्वम् ।

(५) अत्रानुमानकोपमानकप्रतिमानकेषु निर्दिष्टेषु, अत्रर्थवाक्ये मानको राम एवार्थशक्त्या प्रतीयते, स च 'केनापि' इत्युपादानेन वाच्यायमानतया ऽगूढ एव, तस्याप्यत्रेति पाठे गूढतया ध्वनित्वमव्याहतमेवेति प्रदीप ।

(६) वाक्यार्थीभूतस्य वाक्यतात्पर्यविषयतया प्रधानस्य, निरन्तरस्थायिनस्य अङ्गत्वाभावात् रसपदं स्थायिभावपरम् । अत्र यद्यपि संख्यान्वयस्य प्रमाणशून्यतया उपेक्ष्य', उदात्तालङ्कारोदाहरणे "अत्र बीजे रसः, तस्येहाङ्गत्वात्" इति वदता मम्मटेनैव रसादेर्वाक्यार्थस्यापि स्थायितया स्थायिनमभावे पृथक्प्रभेदत्वापत्तिः ।

अत्र शृङ्गारः करुणस्य।

कैलासालयभाललोचनरुचा निर्वर्तितालक्तक-
व्यक्तिः पादनखद्युतिर्गिरिभुवः सा वः सदा लायताम्।
स्पर्द्धाबन्धसहङ्ग्येव सुदृढं रूढा यया नेत्रयोः
कान्तिः कोकनदानुकारसरसा सद्यः समुल्लास्यते (७)॥

अत्र भावस्य रसः।

अत्युच्चाः परितः स्फुरन्ति गिरयः, स्फारास्तथाऽम्भोधयः,
तानेतानपि बिभ्रती किमपि न क्लान्तासि! तुभ्यं नमः।
आश्चर्येण मुहुर्मुहुः स्तुतिमिति प्रस्तौमि यावद्भुवः,
तावद्बिभ्रदिमां क्षतस्तव भुजो, वाचस्ततो मुद्रिताः॥
अत्र भूविषयो रत्याख्यो भावो राजविषयस्य रतिभावस्य।
वन्दीकृत्य नृप! द्विषां मृगदृशस्ताः पश्यतां प्रेयसाम्,
क्षिप्यन्ति प्रणमन्ति लान्ति परितश्चुम्बन्ति ते सैनिकाः।
अस्माकं सुकृतैर्दिशो निपतितोऽस्यौचित्यवारां-निधे!
विध्वस्ता विपदोऽखिलास्तदिति तैः प्रत्यर्थिभिः स्तूयसे(८)॥

अत्र भावस्य रसाभासभावाभासौ (९) प्रथमद्वितीयार्द्ध-द्योत्यौ।

अविरलकरवालकम्पनैर्भ्रुकुटीतर्जनगर्जनैर्मुहुः।
दृष्टये तव वैरिणा मदः, स गतः क्वापि तवेक्षणे क्षणात्॥

अत्र भावस्य भावप्रशमः (१०)।

---

(७) प्रणतिपरे भगवति भवे भक्त्या भावभङ्ग्येव नेत्रारुण्यनामवर्णनमिदम्।
(८) प्रेयसामिति अनादरे षष्ठी। क्षिप्यन्ति स्पृशन्ति।
(९) प्रथमार्द्धे स्फुरादेरनुरक्तविषयकतया, द्वितीयार्द्धे तु रतिरूपो भाव एवानुविषयकतया आभासः।
(१०) वैरिणो गर्वरूपो भावस्य प्रथम राजविषयकरतिभावेऽङ्गम्।

साकं कुरङ्गकदृशा मधुपानलीलां
कर्त्तुं सुहृद्भिरपि वैरिणि ते प्रवृत्ते ।
अन्याभिधायि तव नाम विभो ! गृहीतम्
केनापि तत्र विषमामकरोदवस्थाम् ॥

अत्र त्रासोदयः ।

असोढा तत्कालोल्लसदसदभावस्य तपसः,
कथानां विस्रम्भेष्वथ च रसिकः शैलदुहितुः ।
प्रमोदं वो दिश्यात्कपटवटुवेशापनयने
त्वराधैर्यिल्याभ्यां युगपदभियुक्तः स्मरहरः ॥

अत्रावेगधैर्य्ययोः सन्धिः ।

पश्येत्कश्चित्, चल चपल रे ! का त्वराऽहं कुमारी,
हस्तालम्बं वितर, हरहा, व्युत्क्रमः, क्वासि यासि ।
इत्थं पृथ्वीपरिवृढ ! भवद्विद्विषोऽरण्यवृत्तेः
कन्या कश्चित् फलकिसलयान्याददानाऽभिधत्ते ॥

अत्र शङ्कासूयाधृतिस्मृतिश्रमदैन्यविबोधौत्सुक्यानां सबलता ।

एते च रसवदाद्यलङ्काराः (११)। यद्यपि भावोदय-भावसन्धि-भावशबलत्वानि नालङ्कारतयोक्तानि (१२), तथापि कश्चित् (१३) ब्रूयादित्येवमुक्तम्। यद्यपि स नास्ति कश्चिद्विषयः, यत्र ध्वनिगुणीभूतव्यङ्ग्ययोः स्वप्रभेदादिभिः सह सङ्करः संसृष्टिर्वा

---

(११) एते गुणीभूता रसादय, गुणीभूतो रसो रसवत्, भावस्तु प्रेय, रसाभासभावाभासौ ऊर्जस्वि, भावशान्त्यादि समाहित इति ।

(१२) व्यक्तिविवेकलक्ष्मि ।

(१३) ध्वनिकार ।

नास्ति, तथापि प्राधान्येन व्यपदेशा भवन्तीति क्वचित् केनचिद्व्यवहारः (१४)।

जनस्थाने भ्रान्तं कनकहरिणतृष्णान्वितधिया,
वचो वै देहीति प्रतिपदमुदस्रु प्रलपितम्।
लतालङ्का भर्तुर्वह न परिपाटीषु घटना
मयाप्तं रामत्वं, कुशलवसुता न त्वधिगता (१५)॥

अत्र यद्यत्किंमूलानुरणनरूपो रामेण सहोपमानोपमेयभावो वाच्यतां नीतः (१६)।

आगत्य संप्रति वियोगविसंष्ठुलाङ्गीम्
अभ्योजिनीं क्वचिदपि क्षपितत्रियामः।
एतां प्रसादयति पश्य शनैः प्रभाते
तन्वङ्गि! पादपतनेन सहस्ररश्मिः॥

---

(१४) प्राधान्यञ्च व्यतिषयितचमत्कृतिमत्तया; तथाच यद्गीभूतरमादीनां चमत्कृत्यातिशये गुणीभूतव्यङ्ग्यत्वं, यद्विनक्षयात्वे ध्वनित्वमिति।

(१५) कनकविषये मृगतृष्णा, देहीतिवचः, भर्तुः पालकस्य परिपाटीषु सेवारचनासु का घटना आयासः खलं व्यर्थं न लता, तद्वद, कुशलं वसु धनं यस्य तस्य भावः कुशलता, अथवा कुशलौ सुतौ यस्या सा सीता।

(१६) यद्यत्किंमूलिका पादपतयद्योत्या उपमा वाच्यायां रामत्वप्राप्तेः उपकारकतयैव कविरभिप्रेतेत्यङ्गत्वम्। 'रामत्वम् आप्तम्' इत्यनेनैव वाच्यार्थसिद्धिरिति नाक्षा वाच्यसिद्ध्याङ्गत्वम्, उपमाया वाच्यत्वाभावाद्वालोपमा व्यलङ्कारः। 'वाच्यतां नीतः' इति पाठे तु 'पादपतयद्योत्यापि रामेण सहोपमा 'मयाप्तं रामत्वम्' इत्यनेन वाच्यतां नीता, तदङ्गत्वञ्च, यद्यत्किंमूलानुरणनरूपो द्वितीयोऽर्थः'-इति प्रदीपानुसरणमेव साधीयः।

अत्र नायकदृत्तान्तोऽयंशक्तिमूलो वस्तुरूपो निरपेक्षरवि-कमलिनीदृत्तान्ताध्यारोपणेनैव स्थितः (१७) ॥ [२]

वाच्यसिद्ध्यङ्गं यथा,—

भ्रमिमरतिमलसहृदयतां प्रलयं मूर्छां तमः शरीरसादम् ।
मरणञ्च जलदभुजगजं प्रसह्य कुरुते विषं वियोगिनीनाम् ॥

अत्र हालाहलं व्यङ्ग्यं भुजगरूपस्य वाच्यस्य सिद्धिकृत् (१८) ।

यथा वा,—

गच्छास्यच्युत । दर्शनेन भवतः किं तन्निरुत्सद्यते ?
किं त्वेवं विजनस्ययोर्हतजनः सम्भावयत्यन्यथा ।
इत्यामन्त्रणभङ्गिसूचिततथावस्थानखेदालसाम्
आश्लिष्यन् पुलकोत्करांचिततनुर्गोपीं हरिः पातु वः ॥

---

(१७) दर्शितोदाहरणे विनैवानुनयं अपगतमाना नायिका सख्या उपालभ्यते, तथाहि सहस्वरश्लिरिति बहुनायिकात्वं ध्वन्यते, क्वचिदपीति उपनायिकात्वं एवेति नियमाभावः, तत्रापि यामलयमेव नाधिकमिति, तथापि यत्र पादपतनेनानुनयति, ईदृशो हि कामिनोर्व्यवहारः, न पुनर्बहुकालं यत्नायिकायां विनैवानुनयं प्रसन्नाऽसीत्युपालभ्य । एवञ्च नायकनायिकावृत्तान्तकथनमेवाभिप्रेतम्, स च वृत्तान्तो व्यज्यमान वाच्ये रविकमलिनीवृत्तान्तेऽभिन्नतया च आरोप्यमाण तस्य प्रकृतार्थतां सम्पादयन् तदुत्कर्षमाधत्ते इत्यङ्गतयैवास्ते । यत्र स्वत एव सिद्धरूपस्य वाच्यस्य व्यङ्ग्योत्कर्षाधानमात्रं तत्रायं प्रभेदः, यत्र पुनर्व्यङ्ग्य विना वाच्यमेवात्मानं न लभते, तत्र वाच्यसिद्ध्यङ्गत्वमिति व्यङ्ग्यापेक्षनिरपेक्षसिद्धिभ्यामनयोर्भेदः । अयमेव समासोक्तिरलङ्कारः ।

(१८) जलद एव भुजग इतिरूपणं वाच्यं तावत् न सिध्यति, यावत् विषमित्यनेन अलङ्कारकेन हालाहलं न व्यज्यते इति । सिद्धार्थत्वं चैवादौ न दोषः ।

अत्र अच्युतादिपदव्यङ्ग्यम् आमन्त्रणेत्यादिवाचस्य (१८)। एतच्चैकत्र एकवक्तृगतत्वेन, अपरत्र भिन्नवक्तृगतत्वेनेत्यनयोर्भेदः। [३]

अस्फुटं यथा,—

अदृष्टे दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता।
नादृष्टेन न दृष्टेन भवता लभ्यते सुखम्॥

अत्रादृष्टो यया न भवसि, वियोगभयञ्च यया नोत्पद्यते, तया कुर्या इति क्लिष्टम्। [४]

सन्दिग्धप्राधान्यं यथा,—

हरस्तु किञ्चित्परिवृत्तधैर्य्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि॥

अत्र परिचुम्बितुमैच्छदिति किं प्रतीयमानं, किंवा विलोचनव्यापारणं वाच्यं प्रधानमिति सन्देहः। [५]

तुल्यप्राधान्यं यथा,—

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये।
जामदग्न्यस्तथा मित्रम्, अन्यथा दुर्मनायते॥

अत्र जामदग्न्यः सर्व्वेषां क्षत्रियाणामिव रक्षसां क्षणात् क्षयं करिष्यतीति व्यङ्ग्यस्य वाच्यस्य च समं प्राधान्यम्। [६]

काकाक्षिप्तं यथा,—

मथ्नामि कौरवशतं समरे न कोपात्,
दुःशासनस्य रुधिरं न पिबाम्युरस्तः।

---

(१८) अच्युत! महिषनायिकास्त्रिधापि अस्खलितधैर्य्य, यतो नोपभोगाय यतसे, दर्शनेन न दृष्टि. किन्तु उपभोगेन, उपभोगे सति दुर्जनतया अन्यथासम्भावनापि न दुःखायेति व्यङ्ग्यम्, विच्छिदिति शेष।

संचूर्णयामि गदया न सुयोधनोरू,
सन्धिं करोतु भवतां नृपतिः पणेन ॥

अत्र मघ्राम्येवेत्यादि व्यङ्ग्यं वाचनिषेधसहभावेन स्थितम्(२०)। [७]

असुन्दरं यथा,—

वाणीरकुडंगुड्डीणसउणिकोलाहलं सुणन्तीए ।
घरकम्मवावडाए वहूए सीअन्ति अङ्गाइं (२१) ॥

अत्र दत्तसङ्केतः कश्चिल्लतागहनं प्रविष्ट इति व्यङ्ग्यात् सीदन्त्यङ्गानीति वाच्यं सचमत्कारम् ॥ [८]

एषां भेदा यथायोगं वेदितव्याश्च पूर्ववत् ॥ २ ॥

यथायोगमिति

'व्यज्यन्ते वस्तुमात्रेण यदाऽलंकृतयस्तदा ।
ध्रुवं ध्वन्यङ्गता तासां काव्यदृत्तेस्तदाश्रयात् (२२) ॥'

---

(२०) कौरवकुलनिधननिश्चितप्रतिज्ञस्य भीमस्य न मघ्रामीत्यादयुक्तिरेव बाधिता, यतो न मघ्रामीति काकुः न मघ्रामीति नेत्येवं मघननिषेधनिषेधेन मघनावधारणात्मक व्यङ्ग्यं स्वरूपेणैव उपस्थापयत् मघननिषेधस्य वाक्यार्थीभूतस्य प्रतीतिसमकालमेव तं व्यङ्ग्यार्थं प्रत्याययति, काकुं विना वाक्यार्थस्य बाधितत्वेन अप्रतीतेः । काकालिप्तं व्यङ्ग्यं वाक्यार्थस्य सिद्धरूपस्य बाधमपाकरोति, वाच्यसिद्धाङ्गे तु पदार्थस्य सिद्धिरिति ।

(२१) वानीरकुञ्जोड्डीनशकुनिकोलाहलं शृण्वन्त्या ।
गृहकर्मव्यापृतायाः वध्वाः सीदन्त्यङ्गानीति स० ॥

(२२) ध्वन्यङ्गता वाच्यस्यापेक्षयाऽप्रधानतयातिशायितया ध्वनिस्वनिष्कर्षकता, काव्यशब्दः काव्यव्यवहारस्य, तदाश्रयात् अप्रधानभावेनस्थात् । अयं भावः, वाक्यात् वस्तुनोऽलंकारस्य वाक्यनिष्ठमेव अनुरू-

-इति ध्वनिकारोक्तदिशा वस्तुमात्रेण यत्रालङ्कारो व्यज्यते, न तत्र गुणीभूतव्यङ्ग्यत्वम् (२३)।

सालङ्कारैर्ध्वनेस्तैश्च योगः संसृष्टिसङ्करैः।

सालङ्कारैरिति तैरेवालङ्कारैः (२४), अलङ्कारयुतैश्च तैः। तदुक्तं ध्वनिकृता,—

'स गुणीभूतव्यङ्ग्यैः सालङ्कारैः सह प्रभेदैः स्वैः।
सङ्करसंसृष्टिभ्यां पुनरप्युद्योतते बहुधा इति॥'

स्वादिना व्यङ्ग्यत्वाधीनचारुत्वापनयेऽपि अलङ्कारतत्वता चारुताऽव्याहतैवेति सर्वत्रैव वस्तुव्यङ्ग्यालङ्कारस्थले ध्वनित्वम्।

(२३) स्वत.सम्भवि-कविप्रौढोक्तिसिद्ध-कविनिबद्धप्रौढोक्तिसिद्ध-वस्तु-व्यङ्ग्यालङ्काराणां पदवाक्यप्रबन्धगतत्वेन त्रिरूपतया वस्तुव्यङ्ग्यालङ्कारस्य नवविधत्वमिति ध्वनिभेदर्क्षैकपञ्चाशतो नवन्यूनेन अष्टानां भेदानां प्रत्येकं द्वाचत्वारिंशद्विधत्वमिति मिलित्वा गुणीभूतव्यङ्ग्यस्य षट्त्रिंशदधिकत्रिशत-भेदा (३३६) भवन्ति। (महेश्वरस्तु वस्तुव्यङ्ग्यालङ्कारस्य प्रभेदान् विस्तरतः 'सप्ताधिकषट्-शतरूपम् [३०७]' इति सभाम)। एवमस्य संसृष्टिसंकराभ्यां चतुरशीत्यधिकपञ्चशताधिकैकपञ्चाशत्सहस्रोत्तरषट्लक्षभेदाः (६५१५८४) संकीर्णा., शुद्धैः सह त्रिंशत्यधिकनवशतोत्तरैकपञ्चाशत्सहस्राधिकषट्लक्ष-भेदाः (६५१९२०), गुणनप्रकारस्तु ध्वनिस्थलीयोक्तदिशाऽवसेयः।

(२४) तैरेव गुणीभूतव्यङ्ग्यप्रभेदैरेव, अलङ्कारैः रसवदादिपदाभिधेयैः। अत्र च सालङ्कारैरिति भिन्नार्थकयोरेकरूपपदयोरेकशेषः, एकत्र (अलङ्कार-पदस्य भावप्राधान्येन निर्दिष्टस्यालङ्कारत्वार्थकतया) सालङ्कारपदस्य अल-ङ्कारोऽर्थः, अपरत्र तु अलङ्कारवन्तोऽर्थः। सर्वत्रैव काव्येऽलङ्कारसद्भाव-नियमेन अलङ्कारसंकीर्णो ध्वनिगुणीभूतव्यङ्ग्ययोरन्योन्ययोग एव दुर्लभ इत्यागन्तुकत्वे रसवदाद्यलंकारस्यैव एव स्वभिन्नालङ्कारान्तराभावघटकेन तत्सद्भाव इति प्रदर्शनार्थमिदमुक्तम्। वस्तुतः गुणीभूतव्यङ्ग्येन अलङ्कारेण

अन्योन्ययोगादेवं स्यात् भेदसङ्ख्याऽतिभूयसी ॥३॥

'एवम्' अनेन प्रकारेण, अवान्तरभेदगणनेन, अतिप्रभूततरा गणना; तथाहि शृङ्गारस्यैव भेदप्रभेदगणनायामानन्त्यं, का गणना तु सर्वेषाम् ।

सङ्कलनेन पुनरस्य ध्वनेस्त्रयो भेदाः, व्यङ्ग्यस्य त्रिरूपत्वात्, तथाहि किञ्चिद्वाच्यता सहते, किञ्चित्त्वन्यथा, तत्र वाच्यतासहमविचित्रं विचित्रं चेति, अविचित्रं वस्तुमात्रं, विचित्रं तु अलङ्काररूपं (यद्यपि प्राधान्येन तदलङ्कार्यं, तथापि ब्राह्मणश्रमणन्यायेन तथोच्यते) ; रसादिलक्षणस्त्वर्थः स्वप्नेऽपि न वाच्यः, स हि रसादिशब्देन शृङ्गारादिशब्देन वाऽभिधीयेत, न चाभिधीयते, तत्प्रयोगेऽपि विभावादिप्रयोगे तस्य अप्रतिपत्तेस्तदप्रयोगेऽपि विभावादिप्रयोगे तस्य प्रतिपत्तेश्चेत्यन्वयव्यतिरेकाभ्यां विभावादयभिधानद्वारेणैव प्रतीयते इति निश्चीयते, तेनासौ व्यङ्ग्य एव, मुख्यार्थबाधादभावान्न पुनर्लक्षणीयः ।

अर्थान्तरसंक्रमितवाच्यात्यन्ततिरस्कृतवाच्ययोर्वस्तुमात्ररूपं व्यङ्ग्यं विना लक्षणैव न भवतीति प्राक्[१७।६] प्रतिपादितम् । शब्दशक्तिमूले तु अभिधाया नियन्त्रणेनानभिधेयस्यार्थान्तरस्य, तेन सहोपमादेरलङ्कारस्य च निर्विवादं व्यङ्ग्यत्वम् । अर्थशक्तिमूलेऽपि, विशेषे (२५) सङ्केतः कर्तुं न युज्यते इति

च ध्वनेरन्योन्ययोग एवेह परमार्थः । एवं प्रभेदैरपरिसङ्ख्यानः पुरातनोऽप्यर्थो नवनवीभवतीति सप्रयोजनं ध्वनिभेदप्रदर्शनमिति प्रदीपः ।

(२५) विशेषे सविचित्रवाच्यादिव्यङ्ग्ये, व्यासज्यादिदोषात् न तत्र शक्तिः ।

सामान्यरूपाणां पदार्थानामाकाङ्क्षासन्निधियोग्यतावशात् परस्परसंसर्गो यत्रापदार्थोऽपि विशेषरूपो वाक्यार्थस्तत्राभिहितान्वयवादे का वार्त्ता व्यङ्ग्यस्याभिधेयतायाम् (२६)।

येऽप्याहुः (२७),—

'यद्दृष्टाभिधेयांश्च प्रत्यक्षेणात्र पश्यति।
श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया॥
अन्यथानुपपत्त्या तु बोधेच्छक्तिं द्वयात्मिकाम्।
अर्थापत्त्याऽवबुध्येत सम्बन्धन्तिप्रमाणकम्' (२८)॥

---

(२६) 'सामान्यरूपाणां' सामान्यतो गोत्वादिना सर्वेषां गवादिव्यक्तीनां, 'यत्र' यत्ते, 'विशेषरूपः' इत्तित्वात्कूलत्वादिविशेषात्मकः, 'अपदार्थः' अभिधयाऽनुपस्थितः, 'वाक्यार्थः' तात्पर्यवृत्त्या वाक्यप्रतिपाद्यः। अपदार्थोऽपीत्यविनिर्मुक्तमे, वाक्यार्थोऽपि अपदार्थः इत्यन्वयः। अयमाशयः,-यत्रते वाक्यार्थबोधविषयीकृतमपि संसर्गं प्रकाशोपस्थापनपरिस्फोषयन्निरभिधा नात्मानमयतीति तदर्थं तात्पर्यवृत्तिरवलम्बते, तत्रते वाक्यार्थबोधोत्तरकालीनायां व्यङ्ग्योपस्थितौ नैवाभिधायाः प्रसर इति किमु वक्तव्यम्।

(२७) येऽपि अन्विताभिधानवादिनः भाट्टास्तेऽन्वयः।

(२८) 'यद्दृष्टाभिधेयांश्च' देवदत्त, गामानयेत्यादि वाक्यं, 'दृष्टौ' उत्तममध्यमौ प्रयोज्यप्रयोजकौ, 'अभिधेय' गवानयनादिरूपः। 'श्रोतुः' मध्यमपुरुषस्य, 'प्रतिपन्नत्वं' वाक्यार्थाभिज्ञत्वं, 'चेष्टया' तस्य गवानयनानुकूलव्यापारेण (चेष्टया), 'अनुमानेन' 'सुतादेव गामानयेति वाक्यात् मध्यमपुरुषः, गवानयनं स्वकर्तव्यतया उत्तमपुरुषानुमतम्-इति आनाति'-इति रीत्यानुसारेण 'बोधेत्' इत्यभिमेयान्वयः। 'द्वयात्मिकां' वाच्यत्वं वाच्यत्वमेति द्विविधां,'अत्रि''दृष्टेतापरनामकं वाक्यवाक्यार्थयोःसम्बन्धं;'अन्यथानुपपत्त्या' 'गामानयेत्यादिवाक्यत्वात् गवानयनादर्थज्ञानं एतद्वाक्येनैतदर्थस्य वाच्यवाचकसम्बन्धं विना अनुपपन्नम्'-इत्यनुपपत्त्या (हेतुभूतया), 'अर्थापत्त्या' प्रमाणेन बोधेदित्यन्वयः। अयमत्रार्थः 'त्रिप्रमाणकं' उक्तरीत्या प्रत्यक्षाद

-इति प्रतिपादितदिशा 'देवदत्त! गामानय' इत्याद्युक्तमवृद्धवाक्यप्रयोगाद्देशात् देशान्तरं साक्षादिमन्तमर्थं मध्यमवृद्धे नयति सति, 'अनेनास्माद्वाक्यादेवंविधोऽर्थः प्रतिपन्नः'-इति तच्चेष्टयाऽनुमाय तयोरखण्डवाक्यवाक्यार्थयोरर्थापत्त्या वाचकवाचकभावलक्षणसम्बन्धमवधार्य बालस्तत व्युत्पद्यते, परतः 'चैत्र! गामानय, देवदत्त। अश्वमानय, देवदत्त। गां नय' इत्यादिवाक्यप्रयोगे तस्य तस्य शब्दस्य तं तमर्थमवधारयतीति (२९) अन्वयव्यतिरेकाभ्यां प्रवृत्तिनिवृत्तिकारि वाक्यमेव प्रयोगयोग्यमिति वाक्यस्थितानामेव पदानां अन्वितैः पदार्थैरन्वितानामेव संकेतो गृह्यते इति विशिष्टा एव पदार्था वाक्यार्थः, नतु पदार्थानां वैशिष्ट्यम् (३०)। यद्यपि वाक्यान्तर

मानार्थापत्तिरूपप्रमाणत्वयाधिगत, 'सम्बन्ध' सङ्केत 'अवबुध्येत' आवापोद्वापाभ्यां गोशब्दस्य गोरेवार्थ, अयमभिधत्ते कर्मत्वमिति रीत्या विशेषतो पदपदार्थनिष्ठतया निर्णीयेत, सर्वत्र वाचक कर्त्ता। एतत् सर्वं हृत्तौ स्पष्टम्।

(२९) आवापोद्वापाभ्यां विशेषे सङ्केत दर्शयति परत इति, 'चैत्र! गामानय' इति आवाप, देवदत्तेत्यादिकस्तु उद्वाप। अयमभिसन्धि, गोपदश्रुते एव तदर्थप्रतीति, तदश्रुते च तदप्रतीतिरिति गोपदस्यैव गौरर्थ, एवमन्यत्रापि।

(३०) 'अन्वितानामेव' अन्वितेषु पदार्थेषु। 'विशिष्टा' अन्विता। 'पदार्था' पदशक्या। 'वाक्यार्थ' वाक्यप्रतिपाद्य। 'वैशिष्ट्यं' सम्बन्ध, स च पदशक्योऽपि तात्पर्यवृत्त्या वाक्यप्रतिपाद्य इत्यर्थ। अत्रायं निष्कर्ष, सङ्केतग्रहो हि व्युत्पत्तीत्या व्यवहारादेव प्रथमतो भवति (व्याकरणादीनामन्येषां सङ्केतग्राहकाणां शाब्दबोधसापेक्षतया प्राधान्याभावात्), व्यवहारश्च मध्यमवृद्धस्य गवानयनप्रवृत्त्यादिरूप कर्मदेः सकाशाद्वृद्धोक्त-गामानयेति-वाक्यश्रवणादेव भवति, न कदापि गोपदमात्रश्रवणात्, वाक्यस्थितानामेव

प्रयुज्यमानान्यपि प्रत्यभिज्ञाप्रत्ययेन तान्येवैतानि पदानीति निश्चीयन्ते इति पदार्थान्तरमात्रेणान्वितः पदार्थः सङ्केतगोचरः, तथापि सामान्यावच्छादितो विशेषरूप एवासौ प्रतिपद्यते, व्यतिसक्तानां पदार्थानां तथाभूतत्वात्(३१)-इत्यन्विताभिधानवादिनः। तेषामपि मते सामान्यविशेषरूपः पदार्थः सङ्केतविषय इत्यतिविशेषभूतो वाक्यार्थान्तर्गतोऽसङ्केतितत्वाद् अवाच्य एव यत्र पदार्थः प्रतिपद्यते, तत्र दूरे अर्थान्तरभूतस्य

पदानामर्थां (गामानयेत्यादौ आनयनेन, गां रक्षेत्यादौ रक्षणेनेत्येवं रीत्या) नियतमेवापरपदार्थान्विताः, अतो व्यवहारमूलकः सङ्केतग्रहोऽन्वितगवादिष्वेव भवतीति तदुत्तरभाविनोऽपि व्याकरणादिभ्यः यस्मिन्पदे यदर्थेनान्वितपदार्थविषयका इति नान्वयबोधार्थं तात्पर्यवृत्तिः स्वीकार्येति।

(३१) अयं भावः, गामानयेत्यादौ यदेव आनयपदं, तदेव अश्वमानयेत्यादावपीति-(पूर्वज्ञातस्य ज्ञानं प्रत्यभिज्ञा)-प्रत्यभिज्ञावशेनोभयत्रैकमेव आनय-पदमिति निर्णीयते, एवञ्च आनय-पदस्य गवान्वितत्वं अश्वान्वितत्वं वा नार्थः, किन्तु उभयसाधारण्याय सामान्यतोऽपरपदार्थान्वितानयनत्वेन अपरपदार्थान्वितानयनमेवार्थः इत्येव वाच्यं, तथा च गामानयेत्यादौ गवान्वयरूपान्वयविशेषबोधनाय तात्पर्यवृत्तिः स्वीकार्येत्याशङ्क्य, यथा न्यायमते गोत्वेन सामान्यतः यस्मिन्पदेऽपि आकाङ्क्षादिवशात् गोविशेषस्य बोधः, तथा सामान्यतोऽपरपदार्थान्वितत्वेन यस्मिन्पदेऽपि आकाङ्क्षादिवशात्, समभिव्याहृत-गामितिपदार्थान्वयबलाच्च गवान्वितत्वरूपविशेषान्वयस्य बोधः, गामितिपदार्थेन अन्वितस्यानयपदार्थस्यैव गवान्वितानयनरूपत्वादिति परिहरति यद्यपीति। 'वाक्यान्तरप्रयुज्यमानानि' 'गामानय' इतिवाक्यभिन्ने 'अश्वमानय' इति वाक्ये यानि, 'सामान्यावच्छादितः' गोत्वेन सङ्कलित एव, अपरपदार्थान्वितानयनत्वादिसामान्यधर्मप्रकारेण गृहीतसङ्केतः सन्नेव आनयनार्थं, 'व्यतिसक्तानां' परस्परमिश्रितानां, 'तथा भूतत्वात्' विशेषरूपत्वात्।

निःशेषच्युतेत्यादौ विध्यादेश्चार्थौ (३२)। अनन्वितोऽ(३३)र्थोऽभिहितान्वये, पदार्थान्तरमात्रेणान्वितस्वन्विताभिधाने, अन्वितविशेषस्ववाच्य एव-इत्युभयनयेऽप्यपदार्थ एव वाक्यार्थः।

यदप्युच्यते, 'नैमित्तिकानुसारेण निमित्तानि कल्प्यन्ते'-इति (३४)। तत्र निमित्तत्वं कारकत्वं ज्ञापकत्वं वा ? शब्दस्य प्रकाश्यकत्वान्न कारकत्वम्, ज्ञापकत्वन्तु अज्ञातस्य कथं? ज्ञातत्वं च सङ्केतेनैव, स चान्वितमात्रे, एवञ्च निमित्तस्य नियतत्वं यावन्न निश्चितं, तावन्नैमित्तिकस्य प्रतीतिरेव

---

(३२) 'सामान्यविशेषरूप' 'सामान्येन' अपरपदार्थान्विताभिनयनत्वादिसाधारणधर्मेण, 'विशेषरूप' वस्तुगत्या गवानयनादिरूपोऽर्थः। 'यत्र' मते 'अतिविशेषभूत' गवानयनत्वादिना गवानयनादिरूप पदार्थं 'अपसङ्केतितत्वादवाच्यएव' 'वाक्यार्थान्तर्गतः' सामानयेत्यादिवाक्यार्थमध्यनिविष्ट प्रतिपद्यते इत्यन्वय। 'चर्वा' अनुसन्धाम, वाच्यत्वमेति शेष। अय भाव, वस्तुत्वेन वस्तुपदवाच्योऽपि घटो यथा घटत्वेन तदवाच्य, तथा अपरपदार्थान्विताभिनयनत्वेन (अभिहितान्वयवादे केवलेनाभिनयनत्वेन) अभिनय पदवाच्यमपि गवानयनं गवानयनत्वेन तदवाच्यमेवेत्यपसङ्केतिते तस्मिन् वाक्यजन्ये प्रातमिकबोधविषयीक्रियतेऽपि न अभिधा व्यापार इति निरतरमेव अनन्तरभाविनि व्यङ्ग्यबोधेऽभिधाविराम।

(३३) उभयमतसारमनूद्य दोषमुद्घाटयति अनन्वित इति अनन्तरोक्तभावार्थेन व्याख्यातप्रायमेतत्।

(३४) यस्मिन् सति ज्ञाते वा यावान् अर्थो जायते ज्ञायते वा तावत्येव तस्मिन् तस्य (यथाक्रमं कारकत्वरूपो ज्ञापकत्वरूपो वा) निमित्तभाव इतिन्यायेन शब्दश्रवणानन्तर यावानर्थ (वाच्यो वा व्यङ्ग्यो वा) प्रतीयते तत्र तस्यैव उपस्थितत्वात् शब्द एव निमित्तमिति किमनेन विचारारूढाग्रहेण इति पूर्वपक्ष।

कथम् ? इति 'नैमित्तिकानुसारेण निमित्तानि कल्पयन्ते' इति अविचारिताभिधानम् (२५)।

ये (२६) त्वभिदधति, 'सोऽयमिषोरिव दीर्घदीर्घतरो व्यापारः' इति, 'यत्परः शब्दः स शब्दार्थः' इति च विधिरेवात्र वाच्य इति। तेऽप्यतात्पर्यज्ञास्तात्पर्यवाचो युक्तेर्देवानांप्रियाः (२७)। तथाहि (२८) 'भूतभव्यसमुच्चारणे भूतं भव्याय

---

(२५) 'प्रकाशकत्वात्' अर्थबोधकत्वात्, 'न कारकत्वं' नार्थजनकत्वं, 'सङ्केतेन' यच्छिब्दपसङ्केतवत्तया, 'नियतनिमित्तत्वं' व्यभिचरितनिमित्तभावः, 'नैमित्तिकस्य प्रतीति' रदमेतन्निमित्तकमिति ज्ञानम्। अयं सिद्धान्तसारः, व्यङ्ग्योपस्थितौ यद्यस्य ज्ञापकत्वरूपं निमित्तत्वमस्माकमपि सम्मतं, तत्र साक्षाङ्कं विवादः, परन्तु व्यञ्जनाया अस्वीकारे तत्र सम्भवति, यद्यस्य अर्थनिमित्तत्वं हि व्यापारसापेक्षमेव नियतम्, यथा वाच्यार्थलक्ष्यार्थयोरभिधालक्षणे व्यापारो, तथा इहापि कोऽपि व्यापारोऽवश्यमङ्गीकार्यः, अन्यथा हि यद्यस्य निमित्तत्वानिश्चयेन नैमित्तिको व्यङ्ग्यार्थः-इत्येव भवदभिमतोऽपि न सिद्धयति, यदि तु व्यापारं विनाऽपि यद्यस्य निमित्तत्वं स्यात् तदा अभिधालक्षणेऽपि दत्तजलाञ्जलौ स्यातामित्यलमभिरुध्यते,-इत्यभिप्रायमबुद्धाभिधानं अविचारविजृम्भितमेव।

(२६) यथा सुनिपुणेन संहितेपुरेक एकेनैव वेगरूपव्यापारेण रिपोर्मर्माण्येदमर्मभेदप्राणप्रयाणानि विधत्ते, तथा कविप्रयुक्त एक एव शब्द एकेनैव अभिधाव्यापारेण पदार्थोपस्थित्यनन्तरबोधव्यङ्ग्यप्रतीतौ. जनयतीति वाच्य एव व्यङ्ग्यार्थः, अपिच यत्र यदर्थे यस्य यद्यस्य तात्पर्यं, तत्र स एव तच्छब्दार्थ इत्यर्थकेन 'यत्परः'-इतिनियमेन नि.येधेत्यादौ अनिष्टगमनविधितात्पर्यविषयतया वाच्य एवेति निर्णीयते,-इति मतमुत्थापयति ये त्विति।

(२७) 'तात्पर्यज्ञाश्च' यत्पर.-इति मीमांसकनियमज्ञाः। देवानांप्रिया. पदम्।

(२८) 'यत्परः' इति नियमस्तात्पर्यं मीमांसकैर्निरूप्यते, वाक्या-

उपदिश्यते' इति कारकपदार्थाः क्रियापदार्थेनान्वीयमानाः प्रधानक्रियानिर्वर्त्तकस्वक्रियाभिसम्बन्धात्साध्यायमानतां प्राप्नुवन्ति (३९), ततश्चादग्धदहनन्यायेन यावदप्राप्तं तावदुविधीयते (४०), यथा ऋत्विक्प्रचरणे प्रमाणान्तरात् सिद्धे, 'लोहितोष्णीषा ऋत्विजः प्रचरन्ति' इत्यत्र लोहितोष्णीषत्वमात्रं (४१)विधेयं, क्वचनस्यान्यतः(४२)सिद्धे, 'दध्ना जुहोति' इत्यादौ

न्वर्त्तिपदार्थेषूपस्थितेषु सिद्धरूपाणां प्राप्ततया विधानमनर्थकमिति साध्यरूपस्यैव विधेयत्वं, अत एव तदाख्यस्य तात्पर्य्यं, यत्किंञ्च तात्पर्य्यं स एव वाक्यार्थः, तदर्थबोधनायैव तदाख्यं प्रयुक्तं, तदंशस्य प्रमाणान्तराप्राप्ततया तदंशएव तदाख्यस्यानगतार्थबोधकत्वेन प्रामाण्यनिर्व्वाहः। एतदेव, प्रथमतः, 'तथा हि, इत्यादिना 'उपात्तस्यैव शब्दस्यार्थे तात्पर्य्यम् नतु प्रतीतमात्रे' इत्यन्तेन दर्शयति ।

(३९) 'भूतं' सिद्धं कारकादि, 'भव्यं' साध्य क्रियारूपं, 'सम्बन्धारथे' सम्बोधारथे, 'कारकपदार्थाः' गामानयेत्यादौ गामित्यादय, 'क्रियापदार्थेन' आनयादिपदार्थेन, 'अन्वीयमानाः' सम्बध्या., 'प्रधानक्रियायाः' आनयनादिरूपायाः, 'निर्व्वर्त्तिका,' सम्पादयित्री, या 'स्वा' गो 'क्रिया' चलनरूपा, तस्या 'अभिसम्बन्धात्' आश्रयत्वात् 'साध्यायमानता' 'प्राप्नुवन्ति' साध्या इव भवन्ति । यथा पूर्व्वसत्पक्वस्यापि घटस्य रक्ततापाकात् 'रक्तो घटो जातः' इति व्यवहारः, तथा सिद्धरूपाणामपि कारकाणां साध्यक्रियासम्बन्धात् साध्यरूपत्वं भाक्तमिति भावः ।

(४०) 'ततश्च' उपदेशस्य भव्यार्थकत्वादेव । यथा दग्धान्वितभस्मरागौ अग्निरदग्धमेव दग्धुं दहति न भस्म, तथा साध्यान्वितसिद्धेषु साध्यमेव विधीयते न सिद्धमिति ।

(४१) 'प्रमाणान्तरात्' 'लोष्णीषा विगीतवसना ऋत्विज प्रचरन्ति' इति वाक्यात् । 'लोहितोष्णीषत्वमात्रं' उष्णीषस्य लौहित्यमात्रम् ।

(४२) 'अन्यतः' 'अग्निहोत्रं जुहोति' इति वाक्यात् ।

दधग्रादेः करणत्वमात्रं विधेयं। क्वचिदुभयविधिः, क्वचित्त्वि-विधिरपि, यथा 'रक्तं पटं वय' इत्यादौ एकविधिर्द्विविधस्त्रि-विधिर्वा (४३)। ततश्च 'यदेव विधेयन्तत्रैव तात्पर्य्यम्, इति उपात्तस्यैव शब्दस्यार्थे तात्पर्य्यं न तु प्रतीतमात्रे, एवं हि 'पूर्व्वो धावति' इत्यादौ अपराद्यर्थेऽपि क्वचित्तात्पर्य्यं स्यात् (४४)।

यत्तु(४५) 'विषं भक्षय मा चास्य गृहे भुङ्क्थाः'-इत्यत्र 'एतद्गृहे न भोक्तव्यम्'-इत्यत्र तात्पर्य्यमिति स एव वाक्यार्थः-इत्युच्यते, तत्र चकार एकवाक्यतासूचनार्थः, न चाख्यात-वाक्ययोर्द्वयोः अङ्गाङ्गिभाव इति विषभक्षणवाक्यस्य गृहवाक्य-

---

(४३) रक्तगुण-पटभाव-वयमानां मध्ये एकस्य द्वयोस्त्रयाणां वा -अभिधानमिति शेषः।

(४४) उपात्तस्य उच्चरितस्य, अर्थे इत्युपस्थितेऽर्थे, प्रतीतमात्रे तत्कालं येन केनापि ज्ञायमाने, पूर्व्वतं हि नियतमेवापरस्मादेतदिति पूर्वशब्दज्ञानकालज्ञायमानः परिमार्थः कदाचित् तात्पर्य्यविषयः स्यात् पूर्वशब्दाच्छतां भजेत।

(४५) यदि हि उपात्तशब्दार्थ एव तात्पर्य्यं स्यात्, तदा 'विषं भक्षय' इति 'मा चास्य गृहे भुङ्क्थाः' इति च आख्यातानुक्रियाद्वयघटितत्वेन वाक्यद्वयस्य एकस्मिन् एतद्गृहे न भोक्तव्यमित्यर्थे तात्पर्य्यं न स्यात्। अस्य अर्थस्य 'विषं भक्षय' इति वाक्यार्थत्वाभावादिति पूर्वपक्षः। सिद्धान्तस्त्वयं, मा चास्येति चकारेणानन्वयेऽपि केनापि योरेकवाक्यत्वमेव लभ्यते, एक-वाक्यत्वञ्चाख्यातक्रियाद्वयान्वितयोर्यद्यनुज्ञार्थे निरपेक्षयोरनयोर्न सम्भवति, तादृश विषभक्षणं गृहत्यागोपदेश्योग्यमिति विषं भक्षयेति वाक्यं स्वार्थे सवाधं सत् विषभक्षणादपि इदमेतद्गृहे भोजनमित्यर्थं लक्षयत् 'मा चास्ये'इति वाक्यस्य हेतुत्वेनाङ्गतामापन्नञ्च सत् परस्परमेकवाक्यतां भजते इति एक-वाक्यान्वयसिद्धपदार्थे एव तात्पर्य्यमिति नियमस्य न व्यभिचारः।

त्वेन लक्षणता कल्पनीयेति 'विषभक्षणादपि दुष्टमेतद्गृहे भोजनमिति सर्व्वथा माऽस्य गृहे भुङ्क्थाः' इति उपात्तशब्दार्थे एव तात्पर्य्यम् ।

यदि च शब्दश्रुतेरनन्तरं यावानर्थो लभ्यते, तावति शब्दस्याभिधैव व्यापारः, ततः कथं 'ब्राह्मण ! पुत्रस्ते जातः', 'ब्राह्मण ! कन्यका ते गर्भिणी' इत्यादौ हर्षशोकादीनामपि न वाचकत्वम् ? कस्माच्च लक्षणा ? लक्षणीयेऽप्यर्थे दीर्घदीर्घतराभिधाव्यापारेणैव प्रतीतिसिद्धेः, किमिति च श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यानां पूर्व्वपूर्व्वबलीयस्त्वम् ? (४६)-इत्य-

---

(४६) भगवता जैमिनिना "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्ब्बल्यमर्थविप्रकर्षात्" (३।३।१४) इति सूत्रेण यथाक्रमसङ्ख्यानां द्वयोर्वेङ्गयोर्वा एकत्र उपनिपाते परपरस्य विलम्बेनार्थोपस्थापकतया दुर्ब्बलत्वमभिदधता पूर्व्वपूर्व्वस्य श्रुत्यादेः प्राबल्यं निरूपितम् ; यदि शब्दश्रुतेरनन्तरोपस्थितान् सर्व्वानेव प्रत्ययान् प्रति अभिधैव व्यापार स्यात्, तदा श्रुत्युपस्थितार्थस्यैव लिङ्गादानुगृहीतार्थानामप्यभिधेयतया सर्व्वेषां समकालमर्थोपस्थापकत्वप्रसक्त्या अर्थविप्रकर्षाभिधानं श्रुतेरनुचितं स्यात् । सूत्रार्थस्तु मीमांसाभाष्यादौ प्रदीपे च विशेषतः सोदाहरणं प्रदर्शितोऽपि-प्रकृतानुपयोगितयोपेक्षितः, श्रुत्यादयस्तु

"श्रुतिर्हितीया, चमसा च लिङ्गं
वाक्यं पदान्येव तु संहतानि ।
या प्रक्रिया या कथमित्यपेक्षा
स्थानं क्रमो, योगबलं समाख्या" ॥

इति सामान्यतो ज्ञेयाः । अत्रैकमुदाहरामि, "कदाचन स्तरीरसि-नेन्द्र याचसि" इत्यादिकाया क्वचि विनियोजनाय श्रुतिरियं प्रवर्त्तते,-"ऐन्द्रा गार्हपत्यमुपतिष्ठते" इति, तत्र सन्देहः, किं ऐन्द्री इन्द्रसम्बन्धिनी

न्वितामिधानवादेऽपि विधेरपि (४७) सिद्धं व्यङ्ग्यत्वम्।

किञ्च, 'कुरु रुचिम्' इति पदयोर्वैपरीत्ये काव्यान्तर्वर्त्तिनि कथं दुष्टत्वम्? न ह्यत्रासभ्योऽर्थः पदार्थान्तरैरन्वितः,—इत्यनभिधेय एवेति एवमादि अपरित्याज्यं स्यात् (४८)।

यदि च वाच्यवाचकत्वव्यतिरेकेण व्यङ्ग्यव्यञ्जकभावो नाभ्युपेयते, तदाऽसाधुत्वादीनां नित्यदोषत्वं कष्टत्वादीनामनित्यदोषत्वमितिविभागकरणमनुपपन्नं स्यात्! न चानुपपन्नं, सर्वस्यैव विभक्ततया प्रतिभासात्, वाच्यवाचकभावव्यतिरेकेण

इतीन्द्रप्रकाशनसामर्थ्यात् सिद्धात् गार्हपत्यपदस्येन्द्रपरत्वं प्रकल्प्य इन्द्रोपस्थापनएव विनियोगः, किंवा गार्हपत्यमिति द्वितीयारूपया श्रुत्या ऐन्द्रीपदस्य गौणार्थत्वेन गार्हपत्याग्न्युपस्थापनएव विनियोग? इति सन्देहे श्रुत्या सामर्थ्यं बाध्यते इति सिद्धान्तः, तथाहि द्वितीया हि कारकविभक्तिः कामपि क्रियामपेक्षन्ती 'उपस्थापय' इतिक्रिययाऽन्विता सती प्रथमत एवाभिधया अग्न्युपस्थापने इमामाकृतं विनियोजयति, नैवं सामर्थ्यम्, 'कदाचन शरीरमि' इति मन्त्रः इन्द्रप्रकाशकइति प्रथमं ज्ञानं, ततः इन्द्रप्रकाशकमन्त्रस्य नान्यत्र विनियोगः सम्भवतीत्यनुपपत्तिज्ञानं, ततश्च इन्द्रोपस्थापने एव विनियोग इति रीत्या सामर्थ्येन कल्पनीयमिति विलम्बः। तस्मात् श्रुतेः प्रबलतया तदानुगुण्येन सामर्थ्ये नीयमाने इन्द्रपदं ऐश्वर्यवत्परतया गार्हपत्यतात्पर्यकमिति कल्पनीयम्।

(४७) विधेस्तदन्विताभिधानस्य।

(४८) अयं निर्गलितार्थः, 'रुचिं कुरु' इत्यत्रौ स्त्रीगुह्याङ्गवाचक-चिह्न-पदसाम्येन 'चिह्न' इत्यनेन व्यञ्जनया स्त्रीगुह्याङ्गोपस्थित्याऽश्लीलत्वदोष इति नैवमुच्यते, तत्र 'अन्वित एवार्थोऽभिधेय' इत्यन्विताभिधानमते व्यञ्जनाया अस्वीकारे न सम्भवति, ताडयारूढेनाप्यन्वितत्वेनाभिधेयत्वादिति।

व्यङ्ग्यव्यञ्जकतायथेण तु व्यङ्ग्यस्य बहुविधत्वात् क्वचिदेव कस्यचिदेव औचित्येनोपपद्यत एव विभागव्यवस्था (४९)।

इयं, गतं सम्प्रति शोचनीयतां
समागमप्रार्थनया कपालिनः ।

-इत्यादौ पिनाक्यादिपदवैलक्षण्येन किमिति कपाल्यादिपदानां काव्यानुगुणत्वं (५०) ? ।

अपिच वाचयोर्थः सर्वान् प्रतिपत्तॄन् प्रति एकरूप एवेति नियतोऽसौ, न हि 'गतोऽस्तमर्कः' इत्यादौ वाचयोर्थः क्वचिदन्यथा भवति, प्रतीयमानस्तु तत्तत्प्रकरणवक्तृप्रतिपत्त्रादिविशेषसहायतया नानात्वं भजते; तथा च, 'गतोऽस्तमर्कः' — इत्यतः सपत्नं प्रत्यवस्कन्दनावसर-इति, अभिसरणमुपक्रमतामिति, प्रातप्रायस्ते प्रेयानिति, कर्म्मकरणान्निवर्त्तामहे इति, सान्ध्यो विधिरुपक्रम्यतामिति, दूरं मा गाः—इति, सुरभयो गृहं प्रवेक्ष्यन्तामिति, सन्तापोऽधुना न भवतीति, विक्रेयवस्तूनि संक्रियन्तामिति, नागतोऽद्य प्रेयानित्यादिरनवधिर्व्यङ्ग्योऽर्थः तत्र तत्र प्रतिभाति।

---

(४९) व्यक्तानुत्वादयोहि सर्वदैव हेया इति नित्यदोषाः, कष्टत्वादयस्तु रसाद्यभिव्यक्तिप्रतिकूलतया तत्रैव हेया अपि रौद्रादौ व्यङ्ग्यानुगुण्यतया उपादेया एवेत्यनित्यदोषा, इत्थञ्च व्यङ्ग्यव्यञ्जकभावे प्रातिकूल्यानुकूल्याभ्यामेव नित्यानित्यदोषविभागः, स च व्यञ्जनाया अस्वीकारे नोपपद्यते, वाच्यवाचकभावे हि कष्टत्वादीनामौदासीन्येन सर्वत्रैव दुष्टत्वमदुष्टत्वं वा अन्यतरत् नियतमेव स्यात् ।

(५०) व्यञ्जनास्वीकारे कपालिपदेन जुगुप्सा व्यज्यते इति तस्य उपयोगः ।

वाच्यव्यङ्ग्ययोः (५१) (निःशेषेत्यादौ निषेधविध्यात्मना,

"मात्सर्य्यमुत्सार्य्य विचार्य्य कार्य्यम्
आर्य्याः समर्य्यादमुदाहरन्तु ।
सेव्या नितम्बाः किमु भूधराणाम्
उत सरस्तीरविलासिनीनाम् ॥"

-इत्यादौ संशय-भ्रान्तिसङ्कार्य्यन्यतरगतनिश्चयरूपेण (५२),

"कथमवनिप, दर्पो यन्निशातासिधारा-
दलनगलितमूर्द्धां विद्विषां स्त्रीकृता श्रीः ।
ननु तव निहतारेरस्यसौ किं न नीता
त्रिदिवमपगताङ्गैर्वल्लभा कीर्त्तिरेभिः ॥"

-इत्यादौ निन्दास्तुतिवपुषा) स्वरूपस्य, (पूर्व्वपश्चाद्भावेन प्रतीतेः) कालस्य, (शब्दाश्रयत्वेन, शब्द-तदेकदेश-तदर्थ-वर्ण-संघटनाश्रयत्वेन च) आश्रयस्य, (शब्दानुशासनज्ञानेन, प्रकरणादिसहाय-प्रतिभानैर्मल्यसहितेन तेन च अवगम इति) निमित्तस्य, (बोद्धृमात्र-विदग्धव्यपदेश्ययोः प्रतीतिमात्र-चमत्-कृत्योश्च (५३) करणात्) कार्य्यस्य, ('गतोऽस्तमर्कः' इत्यादौ प्रदर्शितनयेन) संख्यायाः,

---

(५१) वाक्यव्यङ्ग्ययोः स्वरूपस्य 'भेदेऽपि' इत्यादिभिरेणान्वयः, एवं कालस्येत्यादावपि ।

(५२) संशयो वाच्यः, भ्रान्तौ भ्रङ्गारिणि वा वक्तरि तदुचित एव भूधराणामिति सरस्तीरविलासिनीनामिति वा निश्चयो व्यङ्ग्यः ।

(५३) वाच्येन सर्वबोद्धृसाधारणी प्रतीतिरेव केवला, व्यङ्ग्येन सहृदयसामान्येन प्रतीतिचमत्कृतिरेवेति ।

("कस्स व ण होइ रोसो दट्ठूण पिआए सव्वणं अहरं ।
सभमर-पउमामोआइणि, वारिअवामे, सहसु एण्हिं(५४)॥"
-इत्यादौ सखीतत्कान्तादिगतत्वेन) विषयस्य च भेदेऽपि यद्येकत्वं, तत्कुचिदपि (नीलानीलादौ) भेदो न स्यात्! उक्तं हि, 'अयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यासः कारण-भेदश्च' इति। वाचकानामर्थापेक्षा, व्यञ्जकानान्तु न तदपेक्षत्वमिति न वाचकत्वमेव व्यञ्जकत्वम् ।

किञ्च 'वाणीरकुडंगु' इत्यादौ प्रतीयमानमर्थमभिव्यज्य वाच्यं स्वरूप एव यत्र विश्राम्यति (५५), तत्र गुणीभूतव्यङ्ग्ये अतात्पर्यभूतोऽप्यर्थः स्वशब्दानभिधेयः प्रतीतिपथमवतरन् कस्य व्यापारस्य विषयताम् अवलम्बताम् ? इति ।

ननु 'रामोऽस्मि सर्वं सहे' इति, 'रामेण मियजीवितेन त कृतं प्रेम्ण मिये। नोचितम्' इति, 'रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं पराम्' इत्यादौ लक्षणीयोऽप्यर्थो नानात्वं भजते, विशेषव्यपदेशहेतुश्च भवति, तदवगमश्च शब्दायत्तः, प्रकरणादिसव्यपेक्षश्चेति कोऽयं नूतनः प्रतीयमानो नाम? (५६)।

---

(५४) कस्य वा न भवति रोषो दृष्ट्वा प्रियाया व्रणमधरम् ।
सभ्रमरपद्मामोदिनि, वारितवामे, सहस्वेदानीमिति छ० ।

(५५) विश्राम्यति चारुत्वेन तात्पर्यविषयीभवन् व्याप्तोऽयो भवति, अयमभिसन्धिः, यत्र गुणीभूतव्यङ्ग्ये वाच्यस्य प्राधान्येन तात्पर्यविषयत्वं, तत्र व्यङ्ग्यार्थेऽभिधातात्पर्यवृत्त्योरुभयोरप्यभावेन कथमस्योपस्थितिरिति तदर्थमस्य व्यञ्जना स्वीकार्या ।

(५६) अयं पूर्वपक्षः, व्यङ्ग्यस्यैव सहृदय व्यभिचरितत्वम् (असंलक्ष्यक्रम व्यादिनेवार्थान्तरसंक्रमितवाच्यत्वादिना) काव्यस्य विशेषव्यवहारहेतुत्व,

उच्यते, लक्षणीयस्यार्थस्य नानात्वेऽप्यनेकार्थशब्दाभिधेयवत् नियतत्वमेव, न खलु सुखेनार्थेनानियतसम्बन्धो (५७) लक्षयितुं शक्यते, प्रतीयमानस्तु प्रकरणादिविशेषवशेन नियतसम्बन्धः, अनियतसम्बन्धः, सम्बद्धसम्बन्धश्च दोत्यते। न च,

"अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसअं पलोएहि।
मा पहिअ, रत्तिअंधअ सेज्जाए मह णुमज्जहिसि(५८)॥"

-इत्यादौ विवक्षितान्यपरवाचेऽपि ध्वनौ सुखार्थबाधः, तत्कथमत्र लक्षणा? लक्षणायामपि व्यञ्जनमवश्यमाश्रयितव्यम् इति [१७] प्रतिपादितम्। यया च समयसव्यपेक्षा अभिधा, तया सुखार्थबाधादित्वयसमयविशेषसव्यपेक्षा लक्षणा; अत एव अभिधापुच्छभूता सेत्याहुः (५९)।

नच लक्षणात्मकमेव ध्वननं, तदनुगमेन(६०)तस्य दर्शनात्;

प्रकरणाद्यधीनशब्दजन्यप्रतीतिविषयत्वञ्चाक्षीति उभयत्रैव लक्षणैव व्यापारोऽस्तु। सुखार्थस्य अनियतत्वं उद्भटोदाहरणत्रये स्पष्टं, तथा हि यथाक्रमं दुःखसहिष्णुत्वेन प्रसिद्धे, निष्करुणे, खरादिष्वन्यत्रि चार्थे एकस्यैव रामपदस्य लक्षणा।।

(५७) अनियतः सामीप्यसाहचर्यादिप्रसिद्धसम्बन्धान्य कादाचित्को वा सम्बन्धो यस्य सः, -नहि यदाकदाचित् गङ्गामनुसरन्तो गौरनुसरणसम्बन्धेन गङ्गापदलक्ष्या भवति।

(५८) अत्रान्तरे निपीदति अत्राहं दिवसकं प्रलोकय।
मा पथिक, रात्रान्ध, मय्यायामाश्योर्निषत्स्वेति स०।
"निषदो णुमज्ज" इति क्रमदीश्वर।

(५९) समयः सङ्केत, समयविशेषः सुखार्थे संकेत., यतः संकेतापेक्षा, अतः अभिधानुविधायिनीत्यर्थः।

(६०) तदनुगमेन लक्षणामूलत्वे लक्षणापर्यालोचनेन।

नच, तदनुगतमेव, अभिधावलम्बनेनापि तस्य भावात्, न चोभयानुसार्य्येव, अवाचकवर्णानुसारेणापि तस्य दृष्टेः, नच, शब्दानुसार्य्येव, अशब्दात्मक-नेत्रविभागावलोकनादि-गतत्वेनापि तस्य प्रसिद्धेरिति अभिधातात्पर्य्यलक्षणात्मकव्यापार-त्वयातिवर्त्ती ध्वननादिपर्य्यायो व्यापारोऽनपह्नवनीय एव ।

तत्र 'अत्ता एत्थ' इत्यादौ नियतसम्बन्धः(६१), 'कस्स व ण होइ रोसो' इत्यादौ अनियतसम्बन्धः,

"विपरीअरए लच्छी बम्हं दट्ठूण णाहिकमलट्ठम् ।
हरिणो दाहिणणअणं रसाउला झत्ति ढक्केइ (६२) ॥"

-इत्यादौ सव्यङ्गसम्बन्धः । अत्र हि हरिपदेन दक्षिण-नयनस्य सूर्य्यात्मकता व्यज्यते, तन्निमीलनेन सूर्य्यास्तमयः, तेन पद्मस्य संकोचः, ततो ब्रह्मणः स्वगनं, तत्र सति गोप्याङ्गस्य अदर्शनेन अनिर्यन्त्रणं (६३) निधुवनविलसितमिति ।

'अखण्डबुद्धिनिर्ग्राह्यो वाक्यार्थ एव वाचयार्थः, वाक्यमेव च वाचकम्' इति येऽप्याहुः, तैरप्यविद्यापथपतितैः पदपदार्थ-

---

(६१) गथ्यानिषदनरूपे व्यङ्ग्ये तदनिषदनरूपस्य वाच्यस्य विरोधसम्बन्धो-ऽस्ति, स च प्रसिद्धतया सूत्र इति नियतत्वम् । उत्तरोदाहरणे तु नायकेन व्यवगते 'भमरेणासा आस्य' दृष्ट' मत्रपपतिना'इति व्यङ्ग्यार्थे वाच्यार्थस्य न कोऽपि प्रसिद्धसम्बन्धोऽस्तीति कोऽपि सम्बन्धः कल्पनीय इति अनियतत्वम् ।

(६२) विपरीतरते लक्ष्मीर्ब्रह्माणं दृष्ट्वा नाभिकमलस्थम् ।
हरेर्दक्षिणनयनं रसाकुला झटिति स्थगयतीति स० ॥

(६३) अनिर्यन्त्रणं अप्रतिबन्धम । यत्र,
'अन्तर्ध्यानगते विष्णौ वहुधा वालदर्शिनि'।
इति पौराणिकी गाथाऽनुसन्धेया ।

कल्पना कर्त्तव्यैवेति तत्सङ्केऽप्यवश्यमुक्तोदाहरणादौ विध्यादि-व्यङ्ग्य एव (६४)।

ननु वाचग्रादसम्बद्धं तावन्न प्रतीयते, यतः-कुतश्चित् यस्य-कस्यचिदर्थस्य प्रतीतेः प्रसङ्गात्, एवञ्च सम्बन्धात् व्यङ्ग्य-व्यञ्जकभावोऽप्रतिबन्धे अवश्यं न भवतीति व्याप्यत्वेन नियत-धर्म्मिनिष्ठत्वेन च त्रिरूपाल्लिङ्गाल्लिङ्गिज्ञानमनुमानं यत्, तद्रूपः पर्य्यवस्यति।(६५)। तथाहि

"भम धम्मिअ! वीसत्थो सो सुणओ अज्ज मारिओ देण।
गोलाणईकच्छकुडङ्गवासिणा दरिअसीहेण (६६)॥"

---

(६४) क्रियाकारकभावस्वरूपीकृत्य जायमाना धी. खण्डा, तदन्या अखण्डा। 'अविद्यापथपतितै.' संसारदशायामाविद्यिकव्यवहारावलम्बिभिः। अय भाव', क्रियाकारकभावोहि धर्म्मधर्म्मिभावमपुरस्कृत्य न सम्भवति, धर्म्मधर्म्मिभावश्च संसारस्य मिथ्यात्वेन न सम्भवति, नापि ब्रह्मण', निर्धर्म्मत्वात्, अत' पदपदार्थविभागमन्तरेणैव 'सत्यं ज्ञानम्' इत्यादिमहा-वाक्यमखण्डमेव अखण्डं ब्रह्म बोधयतीति वैदान्तिकमतानुसारेण व्यङ्ग्योऽपि वाक्यगम्ये वाक्यस्यैव शक्तिरिति पूर्व्व. पक्षः। सिद्धान्तस्तु, संसारदशायां वैदान्तिकैरपि क्रियाकारकभावस्वीकारेण नैवं सम्भवति।

(६५) सम्बन्धादिति व्यङ्ग्यव्यञ्जकभावान्वयि, 'अप्रतिबन्धे' अनियतसम्बन्धे व्याप्तिसम्बन्धरहितेऽतियावत्, 'व्याप्यत्वेन' (वाच्यार्थस्य) व्यङ्ग्यार्थव्याप्तिमत्तया, 'नियतधर्म्मिनिष्ठत्वेन' (व्याप्योऽपि वाक्यार्थो न स्वाश्रये व्यङ्ग्यं प्रतिपादयतीति) व्यङ्ग्यार्थाश्रयाश्रितत्वेन च हेतुना। 'तृतीयान्तहयस्य पर्य्यवस्यतीत्यविभेषान्वय.। 'त्रिरूपात्' पक्षसत्त्व-सपक्षसत्त्व-विपक्षासत्त्व-लक्षण-रूपत्रयवतः, 'तद्रूप' (तेन अनुमानेन रूप्यते इति व्युत्पत्त्या) अनु-मेयानुमापकभावो विधेय, अत्र 'व्यङ्ग्यव्यञ्जकभाव' इति उद्देश्यपदगूढम्।

(६६) भ्रम धार्म्मिक, विश्वस्त स त्वया अद्य मारितस्तेन।
गोदावरीकच्छकुञ्जवासिना दृप्तसिंहेनेति च.

यत्र गृहे ध्वनिरित्या भ्रमणं विहितं गोदावरीतीरे सिंहोपलब्धेरभ्रमणमनुमापयति,—यत् यत् भीरुभ्रमणं तत्तत् भयकारणनिवृत्त्युपलब्धिपूर्वकम्, गोदावरीतीरे च सिंहोपलब्धिरिति व्यापकविरुद्धोपलब्धिः (६७)। अत्रोच्यते भीरुरपि गुरोः प्रभोर्वा निदेशेन, प्रियानुरागेण, अन्येन चैवंभूतेन हेतुना सत्यपि भयकारणे भ्रमतीत्यनैकान्तिको हेतुः, शुनो बिभ्यदपि वीरत्वेन सिंहान्न बिभेतीति विरुद्धोऽपि (६८)। गोदावरीतीरे सिंहसद्भावः प्रत्यक्षादनुमानाद्वा न निश्चितः, अपि तु वचनात्, न च वचनस्य प्रामाण्यमस्ति अर्थेनाप्रतिबन्धात्(६९) इत्यसिद्धश्च। तत् कथमेवंविधात् हेतोः साध्यसिद्धिः? । तथा, 'निःशेषच्युत'-इत्यादौ गमकतया यानि चन्दनच्यवनादीनि उपात्तानि, तानि कारणान्तरतोऽपि भवन्ति, अतश्चात्रैव स्थानकार्य्यत्वेनोक्तानीति नोपभोग एव प्रतिबद्धानि इति अनैकान्तिकानि।

व्यक्तिवादिना (७०)च अधमपदसहायानामेषां व्यञ्जकत्वम्

---

(६७) भीरुभ्रमणव्यापकस्य भयकारणनिवृत्त्युपलब्धिरूपस्य विरुद्धा सिंहोपलब्धिः, तयाच विरुद्धया सिंहोपलब्ध्या भयकारणनिवृत्त्युपलब्धौ निवृत्तायां सद्भाव्यमपि भ्रमणं निवर्त्तितमेतीति।

(६८) अयं सिद्धान्तः, भीरोरवीरस्य वीरस्य वा अभ्रमणमनुमितं? आद्येऽनैकान्तः, अन्त्ये विरोधः, स्वभावादिरूपया अपोद्यमेयत्वरूपया वा शुनो बिभ्यतोऽपि वीरस्य मृगयादिप्रवृत्तिरूपतया वीरत्वोचितस्य सिंहस्यैव सम्भवात्।

(६९) 'अप्रतिबन्धात्' (पुंसवीरादिवत्वेन) अर्थेन सम्बन्धनियमाभावात्।

(७०) नतु अभिधामात्रस्य व्यञ्जनरूपा व्यक्तिरेव कथमिति अत आह व्यक्तीति, 'एषां' चन्दनच्यवनादीनाम्। अधमपदसहायानामेषां हेतूनामेवास्तु

उक्तं; नच, अत्राधमत्वं प्रमाणप्रतिपन्नमिति कथमनुमानम् ?। एवंविधादर्थादेवंविधोऽर्थः, उपपत्त्यनपेक्षत्वेऽपि प्रकाशते इति-व्यक्तिवादिनः पुनस्तत् अदूषणम् ॥

इति काव्यप्रकाशे ध्वनिगुणीभूतव्यङ्ग्यसङ्कीर्ण
भेदनिर्णयो नाम पञ्चम उल्लासः।

षष्ठ उल्लासः ॥

शब्दार्थचित्रं यत्पूर्वं काव्यद्वयमुदाहृतम्।
गुणप्राधान्यतस्तत्र स्थितिः शब्दार्थचित्रयोः ॥२॥

न तु शब्दचित्रेऽर्थस्याचित्रत्वम्; अर्थचित्रे वा शब्दस्य। तथा चोक्तम्,

"रूपकादिरलङ्कारस्तस्यान्यैर्बहुधोदितः।
न कान्तमपि निर्भूषं विभाति वनितामुखम् ॥
रूपकादिमलङ्कारं वाच्यमाचक्षते परे।
रूपां तिङाञ्च व्युत्पत्तिं वाचां वाच्यन्यलङ्कृतिम् ॥
तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी।
शब्दाभिधेयालङ्कारभेदादिष्टं द्वयन्तु नः ॥"(१) इति।

इति पूर्वपक्षं मनसि निधाय, नायकस्य व्यधमत्वानिश्चयेन सन्दिग्धाविधि-दोष इति परिहरति नचेति, व्यङ्ग्यरूपव्यक्तिपक्षे तु नैते दोषा समवन्ति, व्यङ्ग्यायां व्याघ्रादेरनभेत्तृत्वादित्याह एवंविधेति 'उपपत्ति, व्याघ्रादि, तत्तं अनैकान्तादि।

---

(१) 'वाच्य' काव्यार्थप्रतीत्युत्तरवर्त्तिनं, यन्त्रवत्तावनन्तरं शब्दालङ्कारेण

शब्दचित्रं यथा,—

प्रथमगणच्छायस्तावत्ततः कनकप्रभः,
तदनु विरच्योत्तास्यन्त्वीकपोलतलद्युतिः ।
उदयति ततो ध्वान्तध्वंसक्षमः क्षणदामुखे
सरसविसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः ॥

अर्थचित्रं यथा,—

ते दृष्टिमात्रपतिता अपि कस्य नात्र
क्षोभाय पक्ष्मलदृशामलकाः खलाश्च ।
नीचाः सदैव सविलासमलीकलग्ना
ये कालतां कुटिलतामिव न त्यजन्ति (२) ॥

यद्यपि सर्वत्र काव्येऽन्ततो विभावादिरूपतया पर्य्यवसानम्, तथापि स्फुटस्य रसस्यानुपलम्भादव्यङ्ग्यमेतत्काव्यद्वयमुक्तं ।

अत्र च शब्दार्थालङ्कारभेदाद्बहवो भेदाः, ते च अलङ्कार-निर्णये निर्णेष्यन्ते ॥

इति काव्यप्रकाशे षष्ठ उल्लासः ॥

चित्ते व्याख्येऽर्थप्रतीत्यनन्तरं हि रूपकाद्यनुसन्धानमिति । 'व्युत्पत्तिः' विशेषेण श्रुतग्रामादिरूपेण यत्रिबेधः । 'शोभनं' शोभनशब्दस्य काव्यस्य शोभनत्वम् । अभिधेयोऽर्थः । नः अस्मिकारादीनाम् ।

(२) 'अलीकं' ललाटं मिथ्या च । 'कालता' क्षणरूपता मयानकत्वेन यमसरूपता च । 'कुटिलता' वक्रता कापट्यं च । अत्र दीपकमलङ्कारः ।

सप्तम उल्लासः ।



काव्यस्वरूपं निरूप्य दोषाणां सामान्यलक्षणमाह,—

मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद्वाच्यः ।
उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि(१)सः॥२॥

हतिरपकर्षः (२)। 'शब्दाद्याः'-इत्याद्यग्रहणाद्वर्णरचने ।

---

(१) 'मुख्यार्थहतिः' मुख्यस्य प्राधान्येन उद्देश्यस्य, अर्थस्य प्रयोजनस्य हतिर्यत्स्यात्, सः । रसः (रसनीय) रसभावादिः, तदाश्रयात् (आश्रय आश्रयणमपेक्षणं, रसेनोपकारकतयाऽपेक्षणात्) वाच्यः (शब्दबोध्योऽर्थः) मुख्य इत्यन्वय । उभौ रसवाच्यौ । स दोषः ।

(२) अपकर्षं उद्देश्यप्रतीतिविघातः, उद्देश्या च प्रतीतिः रसवति अनपकृष्टरसविषया, नीरसे तु अर्थविषयाऽपि चमत्कारिण्युभयरूपा व्यवस्थिता प्रतीतिः, दुष्टेषु हि क्वचित् रसस्यार्थस्य वा प्रतीतिरेव न, क्वचित् विलम्बेन प्रतीतिः, क्वचित् रसस्य नोत्कर्षः, क्वचिदर्थप्रतीतिर्जातापि न चमत्कारिणी; तत्कारणञ्च तत्तत्स्थले स दोष एव, तत्र रसदोषाणां साक्षात् विघातकत्वम्, अर्थदोषाणां क्वचित् साक्षात्, क्वचिच्च परम्परया, शब्ददोषाणान्तु परम्परयैव। तत्रापि अक्षमार्थत्वादौ अर्थोपस्थितिरेव न, निहतार्थत्वादौ उपस्थितिविलम्बः, च्युतसंस्कृत्यादौ वाक्यार्थबोधाभावः, क्लिष्टत्वादौ तद्विलम्बः, निरर्थकत्वादौ सहृदयवेद्यत्वव्यपतापादनेन व्याघातः, विरुद्धमतिकृत्वादौ तु विपरीतार्थोपस्थापनेन व्याघातः । विघातकत्वञ्च क्वचित् ज्ञातस्य यथा व्याहतत्वादेः, क्वचित्स्वरूपसत एव, यथा निहतार्थत्वादेः । तेनेदं दोषसामान्यलक्षणं,-उद्देश्यप्रतीतिविघातको दोषः इति । स चायं द्विविधः,-नित्यश्चानित्यश्च, सर्वदैव ज्ञेयो नित्यः, यथा

विधेयपलक्षणमाह,—

दुष्टं पदं (३) श्रुतिकटु,
च्युतसंस्कृत्यप्रयुक्तमसमर्थम् ।
निहतार्थमनुचितार्थं,
निरर्थकमवाचकं विधाऽश्लीलम् ॥ २ ॥
सन्दिग्धमप्रतीतम्,
ग्राम्यं नेयार्थमथ भवेत् क्लिष्टम् ।
अविमृष्टविधेयांशं
विरुद्धमतिकृत्समासगतमेव ॥ ३ ॥

श्रुतिकटु परुषवर्णरूपं दुष्टं । यथा,—

अनङ्गमङ्गलग्नटचापाङ्गभङ्गितरङ्गितैः ।
आलिङ्गितः स तन्व्यङ्गा कार्तार्थ्यं लभते कदा ॥

अत्र कार्तार्थ्यमिति (४) ।

च्युतसंस्कृति व्याकरणलक्षणहीनं । यथा,—

एतन्नन्दविपक्वतिन्दुकफलश्यामोदरापाण्डर-
प्रान्तं चन्त पुलिन्दसुन्दरकरस्पर्धक्षमं लक्ष्यते ।

च्युतसंस्कारादि', तदन्यत्वनित्यः ; यथा महाराष्ट्रादौ तेनमपि श्रुतिकटु रौद्रादौ तथारेवमेवेति ।

(२) दुष्टपदमिति विधेयं सर्वत्रान्वेति, श्रुतिकटुपदाद्यनन्तरमपि पददोषसामान्यलक्षणमपि पददोषमात्रलक्षणतेन दोषविधेयकत्वमेवेति न प्रतिपादितम् ।

(३) निरर्थं प्रयुक्तो हि वचः पदः श्रोतर्बुद्धिविक्षेपमापादयति । तथा[illegible]

तत्पल्लीपतिपुत्रि, कुञ्जरकुलं कुम्भाभयाभ्यर्थना-
दीनं त्वामनुनायते कुचयुगं मत्ताटतं मा क्षयाः (५)॥

अत्र 'अनुनायते' इति, 'सर्पिषो नायते' इद्यादौ आप्तिष्येव नायतेरात्मनेपदं विहितम्, "आप्तिपि नायः" (१।३। २१ वृ० वा०) इति; अत्र तु याचनमर्थः। (तस्माद् अनुनायति स्तनयुगमिति पठनीयम्)।

अप्रयुक्तं तथा आम्नातमपि कविभिर्नादृतं। यथा,-

यथाऽयन्दारुणाचारः सर्व्वदैव विभाव्यते।
तथा मन्ये दैवतोऽस्य पिशाचो राक्षसोऽथवा॥

अत्र दैवतशब्दो "दैवतानि पुंसि वा" (अ० को० १ व०) इति पुंसि आम्नातोऽपि न केनचित्प्रयुज्यते (६)।

असमर्थं यत्तदर्थं पठ्यते न च तत्राऽस्य शक्तिः (७)। यथा,-

तीर्थान्तरेषु स्नानेन समुपार्जितसत्कृतिः।
सरस्वतस्विनीमेष हन्ति सम्प्रति सादरम्॥

अत्र हन्तीति गमनार्थम्।

---

(५) स्तनयोरत्यादृतत्वे तदाकृष्टमनसः पुंसोऽन्यस्य प्रहारपाटवं न भवतीति, अनयोः कतरः कुम्भ इति संशयेन, तत्सादृश्येन कुम्भस्य प्रहारायोग्यत्वबुद्धया वा न प्रहरिष्यतीति कुम्भाभयं स्यादिति भावः। याचनस्य च 'मा क्षयाः' इत्यस्यो वाक्यार्थः कर्म्म।

(६) अत्र तादृशकविसमयस्याद्यत्वे प्रयोजनाभावस्यव्यपतया प्रतीतिविघातः। यमकादिप्रयोजनकत्वे तु नायं दोषः।

(७) तदर्थेऽभिधाद्यपशक्तिविधुरस्यापि तदर्थतया पाठोऽन्यसंस्कारेण तदर्थबोधनाय, अतएव गतौ शक्तिशून्योऽपि हन्तेः पदादिपदसंस्कारेण पठतीत्यादौ निरूढलक्षणया गतिं वक्ति, (निरूढलक्षणाश्चात्रादरश्च पदादि-

निहतार्थं यदुभयार्थम् अप्रसिद्ध्यर्थं प्रयुक्तं । यथा,-

यावकरसार्द्रपादप्रहारगोणितकर्चेन दयितेन ।
मुग्धा साध्वसतरला विलोक्य परिचुम्बिता सहसा ॥

अत्र गोणितशब्दस्य रुधिरलक्षणेनार्थेनोज्ज्वलीकृतत्वरूपोऽर्थो (८) व्यवधीयते । अनुचितार्थं यथा,-

तपस्विभिर्या सुचिरेण लभ्यते,
प्रयत्नतः सत्त्वभिरिष्यते च या ।
प्रयान्ति तामाशु गतिं यशस्विनः ।
रणाङ्गमेधे पशुतामुपागताः ॥

अत्र पशुपदं कातरतामभिव्यनक्तीत्यनुचितार्थम् (९) ।

निरर्थकं पादपूरणमात्रप्रयोजनं चादिपदं । यथा,-

उत्फुल्लकमलकेसरपरागगौरद्युते, मम हि गौरि ।
अभिवाञ्छितं प्रसिध्यतु भगवति, युष्मत्प्रसादेन ॥

अत्र हिशब्दः । अवाचकं यथा,-

अबन्ध्यकोपस्य विहन्तुरापदां
भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना,
न जातहार्देन न विद्विषादरः ॥

पदमङ्गकार एव, तेन न दोषत्वात् फुल्लेर्गतिबोध.) अतएव च अवाचकात् अस्य भेद, अवाचकं हि विवक्षितार्थं कुत्रापि न वक्ति। नित्यदोषोऽयमिति ।

(८) उज्ज्वलीकृतत्वरूप इदमर्थकीकृतत्वस्वरूप. ।

(९) विवक्षितार्थापकर्षव्यञ्जकत्वमनुचितार्थत्वमिति विरुद्धमतिसंस्थाग्रहः ।

अत्र जन्तुपदमदातर्य्यर्थे (१०) विवक्षितं, तत्र च नाभिधायकं। यथा वा,

हा धिक् सा किल तामसी। यदि मुखी दृष्टा मया यत्र सा!
तद्विच्छेदरुजान्धकारितमिदं दग्धं दिनं कल्पितम्।
किं कुर्म्मः, कुयजे सदैव विधुरो धाता, न चेत् तत्कथं
तादृग्यामवतीमयो भवति मे नो जीवलोकोऽधुना॥

अत्र दिनमिति प्रकाशमयमित्यर्थे (११) अवाचकं। यच्च उपसर्गसंसर्गादर्थान्तरगतं, यथा,-

जङ्घाकाण्डोरुनालो नखकिरणलसत्केसरालीकरालः
प्रत्यग्रालक्तकाभाप्रसरकिसलयो मञ्जुमञ्जीरभृङ्गः।
भर्त्तुर्नृत्तानुकारे जयति निजतनुस्वच्छलावण्यवापी-
सम्भूताम्भोजशोभां विदधदभिनवो दण्डपादो भवान्याः (१२)॥

अत्र दधदित्यर्थे विदधदिति (१३)।

त्रिषेति व्रीडाजुगुप्सामङ्गलव्यञ्जकत्वात्। यथा,—

साधनं सुमहत् यस्य यन्नान्यस्य विलोक्यते।
तस्य धोग्यालिनः कोऽन्यः सङ्केतस्थलितां व्रुवम्॥[१]

---

(१०) पूर्व्वार्द्धे क्रियाविघातकतया दातृत्वसङ्कोचमिति द्वितीये तद्वैपरीत्य-प्रदर्शकं जन्तुपदमदातरि प्रयुक्तमिति प्रदीप।

(११) 'तामसी'-इत्यनेन लक्ष्यस्य तमोमयत्वस्य वैपरीत्येन, दिनपदेन प्रकाशमयत्वम् अवश्यमेव बोधनीयम्।

(१२) "दृष्ट्य पदार्थाभिनयो दृष्टं तालत्रयान्वितम्।" इति, "प्रसृतोर्द्ध्वोन्नत' पादो दण्डपादोऽभिधीयते" इति च चन्द्रिकाधृतम्।

(१३) दधातेर्धारणे शक्तिरूपसामर्थ्यसत्त्वेऽपि उपसर्गेण करणेऽव शक्ते-र्नियमितत्वेन विदधातिर्धारणेऽर्थेऽवाचक. न तत्समर्थ इति।

लीलातामरसाहतोऽन्यवनितानिःशङ्कदष्टाधरः
कश्चित्केसरदूषितेक्षण इव व्यामील्य नेत्रे स्थितः ।
मुग्धा कुड्मलिताननेन दधती वायुं स्थिता तत्र सा
भ्रान्त्या धूर्त्ततयाऽथ वा नतिष्ठते तेनानिशं चुम्बिता ॥ [२]

हृदुपवनविभिन्नो मत्प्रियाया विनाशात्
घनरुचिरकलापो निःसपत्नोऽद्य जातः ।
रतिविगलितबन्धे केशपाशे सुकेश्याः
सति कुसुमसनाथे कं हरेदेष बर्हः ॥ [३]

एषु साधन-वायु-विनाशशब्दा व्रीड़ादिव्यञ्जकाः (१४) ।
सन्दिग्धं यथा,-

आलिङ्गितस्तत्प्रभवान् संपराये जयश्रिया ।
आशीःपरम्परां वन्द्यां कर्णे कृत्वा कृपां कुरु ॥

अत्र 'वन्द्यां' किं हठहृतमल्लिकायां, किं वा नमस्यामिति सन्देहः । अप्रतीतं यत्केवले शास्त्रे प्रसिद्धं । यथा,—

सम्यक्ज्ञानमहाज्योतिर्दलिताशयतामुषः ।
विधीयमानमप्येतन्न भवेत्कर्म्मबन्धनम् ॥

अत्राशयशब्दो वासनापर्यायो योगशास्त्रादावेव प्रयुक्तः (१५) ।
ग्राम्यं यत्केवले लोके स्थितं । यथा,—

राकाविभावरीकान्त-संक्रान्तद्युति ते मुखम् ।
तपनीयशिलाशोभा कटिश्च हरते मनः ॥

---

(१४) अश्लीलार्थोपस्थिता श्रोतुर्वैमुख्यं दूषणबीजं । येषां पुनः शिक्षितभणितीवक्षाणादिशब्दाना विवक्षितार्थस्य प्रसिद्धतयाऽश्लीलार्थो नोपतिष्ठते, न तेषु दुष्टत्वम् ।

(१५) वासना चात्र संसारनिदानभूतो मिथ्याज्ञानजन्यः संस्कारविशेषः ।

अत्र कटिरिति (१६)।

नेयार्थं ("निरूढा लक्षणाः काश्चित्सामर्थ्यादभिधानवत्।
क्रियन्ते साम्प्रतं (१७) काश्चित्काश्चिन्नैव त्वशक्तितः॥"-इति)
यन्निषिद्धं लाक्षणिकं,। यथा,-

प्ररत्नालसमुल्लासिपूर्णिमागूर्वरीप्रियम्।
करोति ते मुखं तन्वि, चपेटापातनातिथिम्॥

अत्र चपेटापातनेन निर्जितत्वं लक्ष्यते।

'अथ' (१८) 'समासगतमेव' 'दुष्टम्' इति सम्बन्धः। अन्यत् केवलं, समासगतञ्च। क्लिष्टं यत्रार्थप्रतिपत्तिर्व्यवहिता। यथा,-

अक्षिलोचनसंभूतज्योतिरुन्नमभासिभिः।
सदृशं शोभतेऽत्यर्थं भूपाल, तव चेष्टितम्॥

अत्र अक्षिलोचनसंभूतस्य चन्द्रस्य ज्योतिरुन्नमेन भासिभिः कुमुदैरित्यर्थः।

---

(१६) सामाजिकैर्नितम्बादिकमेव प्रयुज्यते न तु कटिरिति साम्यत्वं। साम्यमद्भ्रवणादङ्कुरोद्गमोच्चयनात् श्रोतुर्नैसुख्यं दूषणबीजम्।

(१७) प्रयोजनेनेति शेषः। रूढिप्रयोजनविशेषयोरभावेऽपि अपरविधरचनाया असामर्थ्यनिबन्धनं लक्षणाश्रयणमिति समुदायार्थः, तथाहि असोदाहरणे न रूढिः, नापि च कविसमयविज्ञनिर्ज्ञितत्वलक्षकपदसमुदायपरित्यागेन चपेटापातनपदोक्तौ प्रयोजनविशेषः।

(१८) 'अथ भवेत् क्लिष्टम्' इति कारिकांशं व्याचष्टे,-अथेति। क्लिष्टादिलक्षणा विवक्षितविधिदार्थप्रतिपत्तिव्याघातो दूषकतावीजम्, केवलपदस्य विधिदार्थ एव न सम्भवतीति नासमासे एतेषां सम्भवः।

अविवक्षितः प्राधान्येन अनिर्दिष्टो(१६)विधेयांशो यत्र तत्। यथा,-

मूर्ध्नामुद्वृत्तरक्तास्रविरलगलगलद्रक्तसंसक्तधारा-
धौतेशाङ्घ्रिप्रसादोपनतजयजगज्जातमिथ्यामहिम्नाम् ।
कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणाम्
दोष्णां चैषां किमेतत् फलमिह नगरीरक्षणे यत्प्रयासः ?॥

अत्र मिथ्यामहिमत्वं (२०) नानुवाद्यं, अपि तु विधेयम् । यथा वा,—

स्वस्रा नितम्बादवरोधयन्ती पुनःपुनः केशरपुष्पकाञ्चीम् ।
न्यासीकृतां स्थानविदा स्मरेण द्वितीयमौर्वीमिव कार्मुकस्य ॥

अत्र द्वितीयत्वमात्रमुत्प्रेक्षितं । (मौर्वीद्वितीयामिति युक्तः पाठः) । यथा वा,-

वपुर्विरूपाक्षमलक्ष्यजन्मता
दिगम्बरत्वेन निवेदितं वसु ।

---

(१६) प्राधान्यञ्च विधिप्रतीतियोग्यता, सा च कृत्वादि कृत्व वा नेत्यस्य विद्वदनुभवएव प्रमाणं, केवलमुदाहरणैरेतत्प्रदर्शितं,-विधेयस्य, समासान्तर्गतत्वेन, इतरविशेषणतयोपस्थितौ, (एकस्मिन् वाक्ये) 'अनुवाद्यमनूद्यैव न विधेयमुदीरयेत्' इति नियमविपरीतनिर्देशे, उद्देश्यगत-विशेषणान्तरमहिम्ना विधानात् पूर्वमेव सिद्धौ, यच्छब्दसान्निध्येन प्रसिद्धार्थ एव नियमितयत्किंचिन्न तदादिपदेन निर्देशे च विधेयतानवगम इति । एतच्च वाक्यदोषोदाहरणेषु स्फुटम् ।

(२०) मिथ्यामहिमत्वं 'महिमा मिथ्या' इतिरीत्या महिम्नो मिथ्यात्वम्, अनुवाद्यम् उद्देश्यं, प्राप्तस्य धर्म्मान्तरप्राप्तये कथनमनूद्यः ; विधेयं साध्यम्, अप्राप्तस्य प्राप्तये कथनं विधानम् । उद्देश्यविधेययोः पृथक्निर्देशे एषोद्देश्यविधेयभावप्रतीति ।

यरेषु यद्वालक्ष्यगात्ति, स्यते
तदस्ति किं व्यक्तमपि त्रिलोचने ? ॥

अत्रालक्षिता जनिरिति वाच्यम् । यथा वा,

आनन्दस्निग्धरतिचापलशालिचित्त-
संदाननैकसदनं क्षणमप्यमुक्ता ।
या सर्व्वदैव भवता, तदुदन्तचिन्ता
तान्तिं तनोति तव सम्प्रति, धिग्धिमस्मान् ॥

अत्र न मुक्तेति निषेधो विधेयः ; (यथा,

नवजलधरः सन्नद्धोऽयं, न दृप्तनिशाचरः ;
सुरधनुरिदं दूरालक्ष्यं, न तस्य शरासनम् ।
अयमपि पटुर्धारासारः, न बाणपरम्परा ;
कनकनिकषस्निग्धा विद्युत्, प्रिया न ममोर्व्वशी ॥

इत्यत्र) नत्वमुक्तानुवादेनान्यत् अत्र किञ्चिदुद्दिष्टं। (यथा,

जुगोपात्मानमत्रस्तो भेजे धर्म्ममनातुरः ।
अगद्भुरादद्दे सोऽर्थानसक्तः सुखमन्वभूत् ॥

इत्यत्र अत्रस्त्वादनुवादेनात्मनो गोपनादि) ।

विरुद्धमतिकृत् यथा,--

सुधाकरकराकारविशारदविचेष्टितः ।
अकार्य्यमित्रमेकोऽसौ तस्य किं वर्णयामहे ॥

अत्र कार्य्यं विना मित्रमिति विवक्षितम्, अकार्य्येषु मित्रमिति प्रतीतिः । यथा वा,

चिरकालपरिप्राप्तिलोचनानन्ददायिनः ।
कान्ता कान्तस्य सहसा विदधाति गलग्रहम् ॥

अत्र कण्ठग्रहमिति वाच्यम् (२१)। यथा वा,

न त्वं यदि नाम भूतकरुणासन्तानयान्तात्मनः
तेन व्याहृजता धनुर्भगवतो देवाङ्गवानीपतेः ।
तत्पुत्तस्तु मदान्धतारकवधाद्विश्वस्य दत्तोत्सवः
स्कन्दः, स्कन्द इव प्रियोऽहमथवा शिष्यः कथं विस्मृतः ? ॥

अत्र भवानीपतिशब्दो भवान्याः पत्यन्तरे प्रतीतिं करोति। यथा वा,-

गोरपि यद्वाहनता प्राप्तवतः सोऽपि गिरिसुतासिंहः ।
सविधे निरहङ्कारः पायादुवः सोऽम्बिकारमणः ॥

अत्राम्बिकारमण इति विरुद्धां धियमुत्पादयति (२२)।

श्रुतिकटु समासगतं (२३) यथा,

सा दूरे च सुधासान्द्रतरङ्गितविलोचना ।
वर्हिनिर्भर्त्सनार्होऽयं कालश्च समुपागतः ॥

एवमन्यदपि ज्ञेयम् ॥

अपास्त च्युतसंस्कारमसमर्थं निरर्थकम् ।
वाक्येऽपि दोषाः(२४)सन्त्येते, पदस्यांशेऽपि केचन॥४॥

---

(२१) रोगविशेषोऽर्द्धचन्द्रदानं वा प्रतीयते ।

(२२) अम्बिकापदस्य गौरीव मातार्थः, एवं रमणपदस्य प्रीतिकरद्रव्यसम्भोग्यार्थोऽस्तीति ।

(२३) क्लिष्टत्वादीनां समासगतत्वनियमनादन्येषामनियम उक्तप्राय इति ज्ञापयन् व्यस्तसमासगतमुक्त्वा समासगतमाह श्रुतीति ।

(२४) विशिष्टैकार्थतात्पर्यकपदसमूहो वाक्यम्, तदपेक्षदोषवत्त्वमेव वाक्यदोषत्वं, तदपेक्षत्वञ्च केषाञ्चित्र आक्षेपाय केषाञ्चित्र द्योतकत्वाय,

केचन, न पुनः सर्वे । क्रमेणोदाहरणम्,—

सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट पितॄनतार्षीत्सममंस्त बन्धून् ।
व्यजेष्ट षड्वर्गमरंस्त नीतौ समूलघातं न्यवधीदरींश्च ॥ (श्रुति०)

स रातु यो दुश्रवनो भावुकानां परम्पराम् ।
अनेडमूकताद्यैश्च दातु दोषैरसंमतान् ॥ (अप्र०)

अत्र दुश्रवन घून्द्रः, अनेड्मूको मूकबधिरः (२५) ।

सायकसहायवाचो, मकरध्वजनियमितत्वमाधिपते ।
अजरुचिभास्वरस्ते भातितरामवनिप, श्लोकः ॥ (निह०)

अत्र सायकादयः शब्दाः खड्गाब्धि-भू-चन्द्र-यज्ञः-पर्य्यायाः शरादर्थतया प्रसिद्धाः ।

कुविन्द्रखं तावत्पटयसि गुणग्राममभितः
यशो गायन्त्येते दिशि-दिशि च नग्नास्तव विभो ।
शरज्ज्योत्स्नागौरस्फुटविकटसर्वाङ्गसुभगा
तथापि त्वत्कीर्त्तिर्भ्रमति विगताच्छादनमिह ॥

तथाहि ये केवला वाक्यदोषाः, येऽपि च विधेयाविमर्षादयो वाक्यगतास्ते वाक्य एव सम्भवन्तीत्यात्मलाभाय वाक्यमपेक्षन्ते ; ये पुनः श्रुतिकष्टादयः पददोषा अपि वाक्यघटकपददुष्टत्वादिगतत्वेन अतिशयदोषतामापद्यन्ते, ते स्वोत्कर्षलाभायैव वाक्यमपेक्षा इति । च्युतसंस्कारासमर्थत्वयोः स्वत एवातिशयदोषयोर्न वाक्यघटकपददुष्टत्वादिगतत्वेन कोऽपि विशेषः, निरर्थकपदत्वस्य वाक्यघटकत्वमेव नास्तीति नैषां वाक्यदोषत्वम् । एकस्य विवक्षितार्थावाचकपदस्य प्रसिद्ध्यर्थमादायापि कथञ्चित् वाक्यार्थबोधोपपत्तिः सम्भवतीति नावाचकत्वदोषस्य स्वतएवातिशय इति पददुष्टादिगतत्वेनातिशयितो वाक्यदोषोऽयम् इति यथाकथञ्चित् विभजनीयम् ।

(२५) "अनेडमूक उद्दिष्टः षष्ठे वाक्श्रुतिवर्जिते" इति मेदिनी ।

अत्र कुविन्दादिशब्दोऽर्थान्तरं प्रतिपादयन् उपस्थीयमानस्य तिरस्कारं व्यनक्तीत्यनुचितार्थः (२६) ।

प्राभ्रम्भ्राड्विष्णुधामाप्य विषमाश्वः करोत्ययम् ।
निद्रां सहस्रपर्णानां पलायनपरायणाम् ॥

अत्र प्राभ्रम्भ्राड्विष्णुधामविषमाश्वनिद्रापर्णशब्दाः प्रकटजलद-गगन-सप्ताश्व-सङ्कोच-दलानामवाचकाः (२७) ।

नृपतेरुपसर्पन्ती कम्पना वामलोचना ।
तत्तत्प्रहरणोत्साहवती मोहनमादधौ ॥

अत्रोपसर्पणप्रहरणमोहनशब्दा क्रीड़ादायित्वादश्लीलाः ।

तेऽन्यैर्वान्तं समश्नन्ति परोत्सर्गञ्च भुञ्जते ।
इतरार्थग्रहे येषां कवीनां स्यात्प्रवर्त्तनम् ॥

अत्र वान्तोत्सर्गप्रवर्त्तनशब्दा जुगुप्सादायिनः ।

पिटवसतिमहं व्रजामि तां, सह परिवारजनेन, यत्र मे ।
भवति सपदि पावकान्वये (२८) हृदयमथेपितशोकशल्यकम् ॥

अत्र पिटगटहमित्यादौ विवक्षिते श्मशानादिप्रतीतौ अमङ्गलार्थत्वम् ।

---

(२६) अत्र कुविन्द शब्दस्तिलिक, पटयति पटूकरोति (प्रक्षालयति)। मग्नाः स्तुतिपाठकाः इति विवक्षितार्थं । अन्यार्थस्तु कुविन्दः तन्तुवायः। पटयति पटं (वस्त्रं) करोति, गुणयति तन्तुसमूहम् । अभितः सञ्चारयन्त्र तरीवासनेन ।

(२७) अभ्रमाड्शब्दस्य संग्रामशब्दत्वेन तेन सह प्रयुज्यमानत्वायोगः, विष्णुपदपदस्य गगनवाचकत्वं न तु हरिपदविष्णुधामादीनाम्, एकस्मिन्नश्वानामपि विषमाश्वतया न सप्ताश्व एव विषमाश्वपदवाच्य इति ।

(२८) पावकान्वये पवित्रवंशे, अत्र वह्निसम्बन्धे इति व्यज्यते ।

सुरालयोल्लासपरः प्राप्तपर्याप्तकल्पनः ।
मार्गणप्रवणो भास्वद्भूतिरेष विलोक्यते ॥

अत्र किं सुरादिशब्दा देव-सेना-शर-विभूत्यर्थाः, किं वा मदिरादयर्थाः ? इति सन्देहः ।

तस्याधिमात्रोपायस्य तीव्रसंवेगताजुषः ।
दृढभूमिः प्रियप्राप्तौ यत्नः स फलितः प्रभो । (२९) ॥

अत्राधिमात्रोपायादयः शब्दाः योगशास्त्रमात्रप्रयुक्तत्वात् अप्रतीताः ।

ताम्बूलभृतगल्लोऽयं भल्लं जल्पति मानुषः ।
करोति खादनं पानं सदैव तु यथा तथा ॥

अत्र गल्लादयः शब्दा ग्राम्याः ।

वस्त्रवैदूर्यचरणैः क्षतसत्वरजःपरा ।
निष्कम्पा रचिता, नेत्रयुद्वं वेदय साम्प्रतम् ॥

अत्राम्बररत्नपादैः क्षततमाः अचला (भूः) कृता, नेत्रद्वन्द्वं बोधयेति नेयार्थता (३०) ।

---

(२९) अधिमात्रस्तद्ग्राहकः (उत्कटः) उपायः श्रद्धादिर्यस्य, तथाभूतस्य ; दृढा व्युत्थानसंस्काराद्यैरनभिभूता भूमिः चित्तैकाग्यताख्यविषयो यस्य सः । अत्र "उपायाः श्रद्धादयः मृदुमध्याधिमात्राः, संवेगो वैराग्यं, तस्य मृदुमध्यतीव्रता" इति पातञ्जलभाष्यव्याख्यायां वाचस्पत्युक्तं "तीव्रसंवेगानामासन्नः" इति सूत्रव्याख्यातव्यमेयम् ।

(३०) अत्र वस्त्र-वैदूर्य-चरण-सत्वरजःपर-निष्कम्पा-युद्व-वेदयेति-पदैः सत्वाद्यस्त्रादिगाथकसम्बन्धेन यथाक्रमं अम्बर-रत्न-पाद-तमोऽचला-द्वन्द्व-बोधयेति पदानि सङ्गच्छन्ते । तेन क्रमेण आकाश-मणि-(सूर्य)-किरण-अन्धकार-पृथिवी-युगल-उन्मीलयेत्यर्था उपस्थाप्यन्ते इति केचित् । अपरे तु

अत्र कुविन्दादिशब्दोऽर्थान्तरं प्रतिपादयन् उपस्थाप्यमानस्य तिरस्कारं व्यनक्तीत्यनुचितार्थः (२६) ।

प्राग्भ्राड्विष्णुधामाग्र्य विषमाग्र्यः करोत्ययम् ।
निद्रा सहस्रपर्णाना पलायनपरायणाम् ॥

अत्र प्राग्भ्राड्विष्णुधामविषमाग्र्यनिद्रापर्णशब्दाः प्रकटजलद-गगन-सप्ताग्र्य-सङ्कोच-दलानामवाचकाः (२७) ।

दृप्तेरुपसर्पन्ती कम्पना वामलोचना ।
तत्तत्प्रहरणोत्साहवती मोहनमादधौ ॥

अत्रोपसर्पणप्रहरणमोहनशब्दा व्रीडादायित्वादश्लीलाः ।

तेऽन्यैर्वान्तं समश्नन्ति परोत्सर्गञ्च भुञ्जते ।
दूतरार्यग्रहे येषा कवीना स्यात्प्रवर्त्तनम् ॥

अत्र वान्तोत्सर्गप्रवर्त्तनशब्दा जुगुप्सादायिनः ।

पितृवसतिमहं व्रजामि ता, सह परिवारजनेन, यत्र मे ।
भवति सपदि पावकान्वये (२८) हृदयमग्नेपितशोकशल्यकम् ॥

अत्र पितृगृहमित्यादौ विवक्षिते श्मशानादिप्रतीतौ अमङ्गलार्थत्वम् ।

---

(२६) अत्र कुविन्द अप्रसिद्धिक, पटयति पटूकरोति (प्रख्यापयति)। नग्ना स्तुतिपाठकाः इति विवक्षितार्थं । अन्यार्थस्तु कुविन्दः तन्तुवाय । पटयति पट (वस्त्र) करोति, गुणयोग तन्तुसमूहम् । अभित सख्यापनस्य तिरोधानेन ।

(२७) अत्राभ्राड्शब्दस्य सप्ताग्रशब्दस्येव तेन सह प्रसङ्गाभावयोग, विष्णुपदपदस्यैव गगनवाचकत्वं न तु हरिपदविष्णुधामादीनाम्, एकस्मि-न्नर्थानामपि विषमाग्रतया न सप्ताग्र एव विषमाग्रपदार्थ इति ।

(२८) पावकान्वये पवित्रवंशे, अत्र वह्निसम्बन्धे इति व्यज्यते ।

अत्र योऽसाविति पदद्वयमनुवादमात्रप्रतीतिकृत् ।
[तथाहि, (२२) प्रकान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यच्छब्दोपादानं नापेक्षते ; क्रमेणोदाहरणम्,—

कार्तस्यं केवला नीतिः, शौर्यं श्वापदचेष्टितम् ।
अतः सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः ॥ (प्रका०)

द्वयं गतं सम्प्रति शोचनीयताम्
समागमप्रार्थनया कपालिनः ।
कला च सा कान्तिमती कलावत-
स्त्वमस्य लोकस्य च नेत्रकौमुदी ॥ (प्रसि०)

उत्कम्पिनी भयपरिस्खलितांशुकान्ता
ते लोचने प्रतिदिशं विधुरे क्षिपन्ती ।
क्रूरेण दारुणतया सहसैव दग्धा
धूमान्वितेन दहनेन, न वीक्षिताऽसि ! ॥ (अनु०)

यच्छब्दस्तु उत्तरवाक्यानुगतत्वेनोपात्तः सामर्थ्यात् पूर्ववाक्यानुगतस्य यच्छब्दस्योपादानं नापेक्षते, यथा,

साधु चन्द्रमसि पुष्करैः कृतं मीलितं यदभिरामताधिके ।
उद्यता जयिनि कामिनीमुखे तेन साहसमनुष्ठितं पुनः ॥

---

(२२) 'यत्तदर्थयोर्नित्योऽभिसम्बन्ध.'इति नियमेन पूर्वनिर्दिष्टोद्देश्यवाक्यगतो यच्छब्दो नियतमेव विधेयवाक्यगतं तच्छब्दं तच्छब्दसमानार्थं वा यद्'यद्यादिकमपेक्षते । अत्र च विधेयवाक्ये तच्छब्दो नोपात्त', यच 'यत्नो' इति उक्त , सोऽपि यच्छब्दसान्निध्यात् यदर्थविशेषणतया प्रसिद्धार्थमभिदधत् उद्देश्यवाक्यएवान्तर्भवति न तु विधेयवाक्ये,-इति विधेयवाक्यस्यापूर्णतया उद्देश्यविधेयभावानगम इति । इममेवार्थं यत्तदर्थयोः साकाङ्क्षत्वप्रतिपादनपूर्वकं प्रदर्शयति तथाहीत्यादिना । 'तथाभूतमेव तच्छब्देन परामृश्यते' इत्यन्तेन ।

धम्मिल्लस्य न कस्य प्रेक्ष्य निकामं कुरङ्गशावाक्ष्याः ।
रज्यत्यपूर्वबन्धव्युत्पत्तेर्मानसं शोभाम् ॥

अत्र धम्मिल्लस्य शोभा प्रेक्ष्य कस्य मानसं न रज्यतीति सम्बन्धे क्लिष्टत्वम् ।

न्यक्कारो ह्ययमेव मे, यदरयस्तत्राप्यसौ तापसः,
सोऽप्यत्रैव निहन्ति राक्षसकुलं ! जीवत्यहो रावणः ।
धिक् धिक् शक्रजितं, प्रबोधितवता किं कुम्भकर्णेन वा,
स्वर्गग्रामटिकाविलुण्ठनदृयोच्छूनैः किमेभिर्भुजैः ॥

अत्रायमेव न्यक्कार इति वाच्यम्, उच्छूनत्वमात्रश्च अनुवादः, न दृयात्वविशेषितम् (२१)। अत्र च शब्दरचना विपरीता कृतेति वाक्यस्यैव दोषो न वाक्यार्थस्य । यथा वा,

श्रमाङ्गसंसर्गि तरङ्गितं दृशो-
र्भ्रुवोररालान्तविलासि वेल्लनम् ।
विसारि रोमाञ्चितकञ्चुकं तनो-
स्तनोति योऽसौ सुभगे, तवागतः ॥

यस्तादिपदैरेव स्वाश्रयस्तादिबोधकाम्बरादिपदाश्रयत्वसम्बन्धेन श्राक्षाद्यादय एव लक्ष्यन्ते इति वदन्ति । उभयमतेऽपि दैर्घ्यलक्षणाङ्गीकारे वृद्धिप्रयोजनविशेषयोरभावाच्चेयार्थता ।

(२१) अयं भावः, 'विमेभि' इत्यनेन दृयात्वविधाने नीलपटस्य नीलत्वविधिवत् दृयोच्छूनस्य दृयात्वविधानमसङ्गतं स्यात्; वैफल्यविधाने च दृयोच्छूनस्य वैफल्यम् औचित्येन विद्वन्मनोहरमिति दृयात्वविशेषणसम्बन्धे विधेयत्वप्रतीतिव्याघात एतीत्यत्रापि विधेयाविमर्षदोषः ।

यथा,-

यत्तद्दूर्जितमत्युग्रं ज्ञात्रं तेजोऽस्य भूपतेः ।
दीव्यताऽत्तैस्सदानेन नूनं तदपि हारितम् ॥

इत्यत्र तच्छब्दः । ननु कथं,

कल्याणानां त्वमसि महसां भाजनं विश्वमूर्त्ते,
धुर्य्यां लक्ष्मीमथ मयि भरं धेहि, देव, प्रसीद ।
यद्यद्दुरापं प्रतिजहि जगन्नाथ, नस्तस्य तन्मे
भद्रं भद्रं वितर भगवन्, भूयसे मङ्गलाय ॥

अत्र 'यद्यद्' इत्युक्त्वा 'तन्मे' इत्युक्तम् (३४)। उच्यते,-'यद्यद्'-इति येनकेनचिद्रूपेण स्थितं सर्व्वात्मकं वस्तु आक्षिप्तं, तथाभूतमेव तच्छब्देन परामृश्यते (३५)। यथा वा,-

किं लोभेन विलङ्घितः स भरतो येनैतदेवं कृतं
माता ? स्त्रीलघुतां गता किमथवा मातैव मे मध्यमा ।
मिथ्यैतन्मम चिन्तितं हितमपार्य्यानुजोऽसौ, गुरु-
र्माता तातकलत्रमित्यनुचितं मन्ये विधात्रा कृतम् ॥

---

(३४) यदि यच्छब्दस्य नियतमेव तच्छब्दमाकाङ्क्षता, तदा कथमत्र श्लोके निराकाङ्क्षतानिर्व्वाहः, अत्र हि एकेन तत्पदेन एकस्य यत्पदस्य निराकाङ्क्षत्वेऽपि द्वितीयस्य साकाङ्क्षत्वमस्त्येवेति पूर्व्वपक्षः ।

(३५) पूर्व्वोपस्थितार्थपरामर्शकेन तत्पदेन पूर्व्वोक्तानां सर्व्वेषामेवाविशेषेण परामर्शसम्भवादत्रत्येन तत्पदेन एकेनापि यत्पदद्वयोक्तं ज्ञाताज्ञातरूपं सर्व्वप्रकारमेव यादृशं वस्तु परामृशता यद्यत्पदद्वयमेव निराकाङ्क्षीक्रियते-इति भावः । यदीयतत्तु यद्यदिति न पदद्वयं किन्तु "नित्यवीप्सयोः"(८।१।४) इति सूत्रेण वीप्सायां यदो द्वित्वापन्नोऽयमादेशः, तथाचादेशिना यत्पदेन तत्पदेन च द्वाभ्यामप्येकेनैव रूपेण यादृपरामर्शः, चादेशस्तु साकल्येन सम्बन्धपरतापाटवात्, एकत्वेन तेन तदुपपत्तौ न तच्छब्देऽपि तदपेक्षा-इत्याहुः ।

प्रागुपात्तस्तु यच्छब्दस्तच्छब्दोपादानं विना साकाङ्क्षः, यथा, अत्रैव श्लोके आदत्तपादयोर्व्यत्यासे । द्वयोरुपादाने तु निराकाङ्क्षत्वं प्रसिद्धम् । अनुपादानेऽपि सामर्थ्यात्कचित् द्वयमपि गम्यते । यथा,-

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां,
जानन्ति ते किमपि, तान् प्रति नैष यत्नः ।
उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्म्मा
कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥

अत्र य उत्पत्स्यते तं प्रतीति । एवञ्च] तच्छब्दानुपादानेऽत्र (३३) साकाङ्क्षत्वम् । नच,असाविति तच्छब्दार्थमाह,
असौ मरुच्चुम्बितचारुकेसरः प्रसन्नतारापिपमण्डलाग्रणीः ।
वियुक्तरामातुरदृष्टिवीक्षितो वसन्तकालो हनुमानिवागतः ॥

अत्र हि न तच्छब्दार्थप्रतीतिः, प्रतीतौ वा,

करवालकरालदोःसहायो युधि योऽसौ विजयार्जुनैकमल्लः ।
यदि भूपतिना स तत्र कार्ये विनियुज्येत ततः कृतं कृतं स्यात् ॥

अत्र स इत्यस्यानर्थक्यं स्यात् । अथ,

योऽविकल्पमिदमर्थमण्डलं पश्यतीव, निखिलं भवद्वपुः ।
आत्ममत्तपरिपूरिते जगत्यस्य नित्यसुखिनः कुतो भयम् ॥

-इतीदंशब्दवदः शब्दस्तच्छब्दार्थमभिधत्ते इति । उच्यते, तच्छब्दस्तत्रैव वाक्यान्तरे उपादानमर्हति न तत्रैव, यच्छब्दस्य हि निकटे स्थितः प्रसिद्धिं पराक्षिपति ।

---

(३३) अत्र अपाङ्गसंवर्तीति श्लोके ।

अत्र मत्ताशब्दः स्त्रीवाचि निरूढार्थः ।

आदावञ्जनपुञ्जलिप्तवपुषा श्वासानिलोल्लासित-
प्रोत्सर्पद्विरहानलेन च ततः सन्तापितानां दृशाम् ।
सम्प्रत्येव निषेकमश्रुपयसा देवस्य चेतोभुवो
भल्लीनामिव पानकर्म्म (३९) कुरुते कामं कुरङ्गेक्षणा ॥

अत्र 'दृशाम्' इति बहुवचनं निरर्थकं, कुरङ्गेक्षणाया एकस्या एवोपादानात् । नच, 'अलसवलित'-इत्यादिवत् (४०) व्यापारभेदाद्बहुत्वं, व्यापाराणामनुपात्तत्वात्, न च, व्यापारेऽत्र दृक्शब्दो वर्त्तते । अतैव, 'कुरुते'-इत्यात्मनेपदमप्यनर्थकम्, प्रधानक्रियाफलस्य कर्तृसम्बन्धे कर्त्राभिप्राय-क्रियाफलाभावात् (४१)।

---

(३९) धारायां सेचनार्थं शस्त्रं पट्टेन लिप्ताऽग्नौ सन्ताप्य पयसि निक्षिप्यते इति, एतदेव पानकर्म्मोच्यते इति नागेशभट्टा ।

(४०) "अलसवलितैः प्रेमार्द्रार्द्रैर्मुहुर्मुकुलीकृतैः
क्षणमतिसुखैर्लज्जालोलैर्निमेषपराङ्मुखैः ।
हृदयनिहितं भावाकूतं वसद्भिरिवेक्षणैः
कथय सुतनु कोऽयं सख्ये, त्वयाद्य विलोक्यते" इत्यत्रेवत्यर्थः ।

(४१) 'प्रधानस्य'मुख्यस्य 'क्रियाफलस्य'(प्रकृते)सकल'विलासिलनविजय-रूपस्य, 'कर्त्तरि' कुरङ्गेक्षणालक्षणे 'असम्बन्धे'अविद्यमानत्वे । नतु 'दीन त्वामनुनाथते' इत्यत्रेव च्युतसंस्कृतिरेवात्र दोष आपतामिति चेत् । न, तैषम्यात्, तथाहि, "आशिषि नाथ" (२।१।५२) इति सूत्रेण आशिषि आत्मनेपदं नियमयता तद्विषये याचनाद्यर्थे विवक्षिते आत्मनेपद व्यवच्छिद्यते इति याचनार्थे प्रयुक्त आत्मनेपदं च्युतसंस्कृतमस्तु, प्रकृते तु एकत्वादिसंख्या-विशेषाविवक्षाया क्रियाफलस्य पराभिप्रेतत्वाद्विवक्षायाश्च प्रयुक्त बहुवचनं

अनार्य्यस्येति तातस्येति च वाच्यं, नत्वनयोः समासे गुणीभावः कार्य्यः । एवं समासान्तरेष्वप्युदाहार्य्यम् ।

विरुद्धमतिकृद् यथा,-

स्थितक्षमा रक्तभुवः शिवालिङ्गितमूर्त्तयः ।
विग्रहक्षपणेनाद्य गीरते ते गतागुणाः (२६) ॥

अत्र क्षमादिगुणयुक्ताः सुप्यमासते इति विवक्षिते रता इति विरुद्धा प्रतीतिः (२७) ।

पदैकदेशे यथासम्भवं क्रमेणोदाहरणम्,-

अलमतिचपलत्वात् स्वप्नमायोपमत्वात्
परिणतिविरसत्वात्सङ्गमेनाङ्गनायाः ।
इति यदि गतलज्जस्त्वं मालोचयामः
तदपि न परिणाद्यो विप्रलब्धस्त्वयाऽसि ॥

अत्र 'त्वात्' इति । यथा वा,-

तद्गच्छ सिद्धये पुत्र देवकार्य्यमुपैहि नः ।
अयेक्षते प्रत्ययमद्य लक्ष्मीर्बीजादृतः प्राग्दयादिवाम्भः ॥

अत्र, 'ह्यै' 'अै' इति पदैकदेशौ (२८) ।

सद्यादृग्रोदित्रमसदृशानां
कस्यादर्त्तिर्नो शिखरिविधर्त्तिं ।
यद्यादृक्ष्टेर्दलितभरणाम्
यद्यात्यश्मादपि धातुमताम् ॥

---

(२६) विरुद्धरते रता अत्र क्षमा सर्वं दर्शयन्ति ।

(२७) अत्रान्तरालेऽन्यो वाक्यार्थो दर्शनं, तदभिप्रायेणैव अनुवादः, अत्र तु वाक्यार्थे नास्त्यतः भेद इति दर्शितं ।

(२८) एवमन्येऽपि यथासम्भवं बहवो दर्शनीयाः, किन्तु ते दर्शनं बहुस्थानाः, एवं वर्णैकदेशेऽपि न पदैकदेशेऽवतरन्ति ।

सौजन्यमान्यजनिरूर्जितमूर्जितानां
सोऽयं दृशोः पतति कस्यचिदेव पुंसः ॥ (जुगु०)

अत्र पूयशब्दः ।

विनयप्रणयैककेतनं सततं योऽभवदङ्ग तादृशः ।
कथमद्य स तद्वदीक्ष्यतां तदभिप्रेतपदं समागतः ॥ (अम०)

अत्र प्रेतशब्दः ।

कस्मिन् कर्म्मणि सामर्थ्यमस्य नोत्तपतेतराम् ।
अयं साधुचरस्तस्मादञ्जलिर्बध्यतामिह ॥

अत्र किं पूर्वं साधुः उत साधुषु चरतीति सन्देहः (४४)।

किमुच्यतेऽस्य भूपालमौलिमालामहामणेः ।
सुदुर्लभं वचोवाणैस्तेजो यस्य विभाव्यते ॥ (नैषा०)

अत्र वचःशब्देन गीःशब्दो लक्ष्यते । अत्र खलु न केवलं पूर्वपदं, यावदुत्तरपदमपि पर्य्यायपरिवर्त्तनं न क्षमते । जलध्यादावुत्तरपदमेव, वडवानलादौ पूर्वपदमेव ।

यद्यप्यसमर्थत्वस्यैवाप्रयुक्तत्वादयः केचन भेदाः, तथाप्यन्यैः अलङ्कारकारैर्विभागेन दर्शिता इति, भेदप्रदर्शनेनोदाहर्त्तव्या इति च विभज्योक्ताः (४५) ॥

---

(४४) अत्र चरभागो "भूतपूर्वे चरट्"(५।३।५३) इति चरटप्रत्ययः किंवा "चरेष्ट" (३।२।१६) इति टान्तचरधातु ? इति सन्देहात् उक्तार्थसन्देह ।

(४५) सामर्थ्यतो विवक्षितार्थप्रतीतिसामर्थ्यविरह एवासामर्थ्यपदेनोच्यता, स च अप्रयुक्तत्वावाचकत्वनिहतार्थत्वसाधारण इति किमुक्तस्वरूपभेदकरणेनेति पूर्वपक्षयित्वा, प्राचीनप्रणाल्यवलम्बनेन, तिस्रोषां भेदप्रदर्शनद्वारा उदाहरणप्रापणानुरोधेन च एव कृतमिति सिद्धान्तयति यद्यपीति ।

चामाचार्य्यस्त्रिपुरविजयो, कार्त्तिकेयो विजेयः,
यस्त्वन्यस्तः सदनमुदधिर्भूरियं हन्तकारः ।
अस्त्येवैतत्, किमु कृतवता रेणुकाकण्ठबाधाम्
बद्धस्पर्द्धस्य परशुना लज्जते चन्द्रहासः (४२) ॥

अत्र 'विजेयः'-इति कृत्यप्रत्यय क्तप्रत्ययार्थेऽवाचकः (४३) ॥

अतिपेलवमतिपरिमितवर्णं लघुतरमुदाहरति यठः ।

परमार्थतः स हृदयं वहति पुनः कालकूटघटितमिव ॥ (क्रीडा०)

अत्र पेलवशब्दः ।

यः पूयते सुरसरिन्मुखतीर्थसार्थ-
स्नानेन यास्यपरिशीलनकीलनेन ।

आत्मनेपदं च न च्युतसंस्कृतं, "बहुषु बहुवचनम्" (१।४।२१) इत्यनेन "स्वरितञितः कर्त्रभिप्राये क्रियाफले"(१।३।७२) इत्यनेन च सूत्रेण यथाक्रमं बहुषु बहुवचनं कर्त्रभिप्रेतक्रियाफले विवक्षिते आत्मनेपदञ्च नियमयता एकत्वादिविवक्षायां बहुवचनं, परार्थाभिप्रेतक्रियाफलविवक्षायामात्मनेपदञ्च व्यवच्छिद्यते, न तु तत्तद्विवक्षास्वलेऽपि तस्य तस्य व्यवच्छेदः, परन्तु तत्तदर्थाविवक्षाया तेषां प्रयोगो निरर्थक इति यथोक्तमेव सम्यक् । एवमेव प्रदीपः ।

(४२) हन्तकारः षोडशमात्रात्मिका भिक्षा,-

'षोडशप्रमाणा भिक्षा द्वात्रिंशत्ता, तच्चतुष्टयम् ।
अष्ट, चतुर्णां प्राङ्हन्तकार द्विजोत्तमाः' । इति मार्कण्डेयात् ।

इदं किल परशुरामः कार्त्तिकं विजितवान्, कश्यपाय पृथिवीं दत्वा यज्ञेन सम्पूजयाञ्चक्रे तदाभोगे ऽयम्, परशुना रेणुकानाम्नीं स्वमातरं जघान चेति पौराणिकी गाथा ।

(४३) अर्थाद्यैः विहितेन यत्प्रत्ययेनातीतकालोपस्थापनात्सम्भवः । यत्प्रत्ययमात्रगतत्वेनात्र पदैकदेशदोषोऽयम् । 'विद्धदभिनव' इत्यादौ तु धातूपसर्गयोः सम्बन्धात् सम्बन्धोभय दोषस्तदुभयगतत्वात् पददोषः ।

यत्र हि विकटवर्णत्वं दीर्घसमासत्वञ्च उचितम्। (यथा,-

प्रागप्राप्तनिशुम्भशाम्भवधनुर्द्वैधाविधाविर्भवत्-
क्रोधप्रेरितभीमभार्गवभुजस्तम्भाप्तविघ्नः क्षणात्।
उज्जृम्भः परशुर्भवत्वशिथिलस्वत्कण्ठपीठातिथि-
र्येनानेन जगत्सु खण्डपरशुर्देवो हरः ख्याप्यते (४७)॥

यत्र तु न क्रोधस्तत्र चतुर्थपादाभिधाने तथैव शब्दप्रयोगः।)

उपहत उत्व प्राप्तो लुप्तो वा विसर्गो(४८)यत्र तत्। यथा,-

धीरो विनीतो निपुणो वराकारो दृपोऽत्र सः।
यस्य भृत्या बलोत्सिक्ता भक्ता बुद्धिप्रभाविताः (४९)॥

विसन्धिः सन्धेर्वैरूप्यं,-विश्लेषः(५०)[१] अश्लीलत्वं[२]

---

(४७) निशुम्भो नमन। हरेण खपरशोरेक खण्ड. परशुरामाय दत्त इति चन्द्रिका।

(४८) "अतो रोरप्लुतादप्लुते" (६।१।११३ पा०) इति सूत्रेण उत्वप्राप्ति।

(४९) बुद्धिप्रभावयुक्ता, (इतच्प्रत्यय)। पूर्वार्द्धे उपहतविसर्गत्वं, उत्तरार्द्धे तु लुप्तविसर्गत्वमिति। उपहतविसर्गाणा लुप्तविसर्गाणाञ्च बहूना मिश्रणे एव दोष।

(५०) विश्लेष अभाव। सन्धाभाव पुनर्द्विविध, 'वाक्ये तु सा नित्यमपेक्षते' इत्यनुसारेण नैत्यिक, आनुषाङ्गिकश्चेति, तत्रान्योऽपि प्रकृतिहेतुको ऽधिकारहेतुकश्चेति द्विविध, तत्रोदाहृतपूर्वश्लोकस्य पूर्वार्द्धे 'तानि दन्द्वे' इत्यत्रैत्यिको सन्धाभाव। उत्तरार्द्धे तु "दूदूदेत् द्विवचनं प्रगृह्यम्"(१।१।११ पा०) इत्यनेन द्विवचनस्य प्रगृह्यसज्ञकस्य "प्लुत प्रगृह्या अचि" (६।१।१२५ पा०) इति सूत्रेण प्रकृतिस्वभावविधानात् प्रगृह्यहेतुक आनुषाङ्गिक सन्धाभाव। उत्तरश्लोके तु "लोप शाकल्यस्य" (८।३।१९) इति सूत्रेण विहितस्यापि लोपस्य "आद्गुण" (६।१।

प्रतिकूलवर्णमुपहत-
लुप्तविसर्गं विसन्धि हतवृत्तम् ।
न्यूनाधिककथितपदम्
पतत्प्रकर्षं समाप्तपुनरात्तम् ॥ ५ ॥
अर्द्धान्तरैकवाचकम्
अभवन्मतयोगमनभिहितवाच्यम् ।
अपदस्थपदसमासं
सङ्कीर्णं गर्भितं प्रसिद्धिहतम् ॥ ६ ॥
भग्नप्रक्रममक्रमम्
अमतपरार्थं च वाक्यमेव तथा (४६) ।

रसानुगुणत्वं वर्णानां वक्ष्यते (८ प०), तद्विपरीतं प्रतिकूलवर्णं। यथा शृङ्गारे,-

अकुण्ठोत्कण्ठया पूर्णमाकण्ठङ्कलकण्ठि, माम् ।
कम्बुकण्ठ्राः क्षणं कण्ठे कुरु कण्ठार्त्तिमुद्धर ॥

रौद्रे यथा,-

देव: सोऽयमरातिशोणितजलैर्यस्मिन् ह्रदाः पूरिताः,
क्षत्त्रादेव तथाविधः परिभवस्तातस्य केशग्रहः ।
तान्येवाहितशस्त्रघस्मरगुरूण्यस्त्राणि भास्वन्ति मे,
यद्रामेण कृतं, तदेव कुरुते द्रोणात्मजः क्रोधनः ॥

---

(४६) दृष्टमतार्थमेयम्, क्लिष्टत्वमिव प्रतिकूलवर्णत्वादीनामपि केषाञ्चित् समासगतत्वेन पददोषत्वं समासतीति प्रदीपः ।

अहतमहतं कः सन्देहो, मधुन्यपि, नान्यथा,
मधुरमधिकं, चूतस्यापि प्रसन्नरसम्फलम् ।
सकृदपि पुनर्मध्यस्थः सन् रसान्तरविज्ञानो
वदतु, यदिहान्यत् स्वादु स्यात्प्रियारदनच्छदात् ॥

अत्र 'यदिहान्यत् स्वादु स्यात्'-इत्यत्रव्यम् (५३) । यथा वा,

जो परिहरिउं तीरइ मणम्मि ण सुन्दरत्तणगुणेण ।
अह णवर जस्स दोसो पडिवक्खेहिं पि पडिवण्णो (५४) ॥ [१]

अत्र द्वितीयतृतीयगणौ सकारभकारौ ।

विकसितसहकारभारहारि-
परिमलपुञ्जितगुञ्जितद्विरेफः ।
नवकिसलयचारुचामरश्री-
र्हरति मुनेरपि मानसं वसन्तः ॥

अत्र हारिशब्दः । (हारि-प्रमुदितसौरभेति पाठो युक्तः ।)

यथा वा,-

धन्यासा गुणरत्नरोहणभुवो धन्या सदन्यैव सा,
सम्भाराः खलु तेऽन्य एव, विधिना यैरेष सृष्टो सुवा ।

---

(५२) अत्र हि हरिणीच्छन्दसि 'वदतु यदिहा' इति षडाक्षर-स्थाने उचिताऽपि यतिर्भग्ना, षडाक्षरस्य 'हा'-इत्यस्य अरपदसम्बन्धात् । "न स म र स ला गः षड्वेदैर्हयैर्हरिणी मता", इति हरिणी-लक्षणम् ।

(५३) यः परिहर्तुं तीर्यते मनागपि न सुन्दरत्वगुणेन ।
अथ केवलं यस्य दोषः प्रतिपक्षैरपि प्रतिपन्न इति सं० ॥

नवरशब्दो केवलार्थो, अपिरेवार्थे । अत्र आर्यायां द्वितीयस्य 'हरिउं' इत्यनुरोः सगणस्य, तृतीयस्य च 'तीरइ' इत्यादिगुरोर्भगणस्य व्यवधानादस्पष्टत्वमात्रमधिकम् ।

कष्टत्वञ्च [३] । आद्यं यथा,-

राजन् विभान्ति भवतश्चरितानि तानि,
दुन्दोर्दुवंतिं दधति यानि रसातलेऽन्तः ।
धीदोर्बले अतितते उचितानुवृत्ती
आतन्वती विजयसम्पदमेत्य भातः ॥

यथा वा,-

तत उदित उदारहारहारि-द्युतिरुचिरैरुदयाचलादिवेन्दुः ।
निजवंश उदात्तकान्तकान्तिर्वत मुक्तामणिवच्चकास्त्यनर्घः ॥ [१]

संहितां न करोमीति स्वेच्छया सकृदपि दोषः । प्रकृत्यादिहेतुकत्वे तु असकृत् ।

वेगादुड्डीय गगने चलण्डामरचेष्टितः ।
अयमुत्पतते पत्री ततोऽत्रैव रुचिङ्करु (५१) ॥ [२]

अत्र सन्धावश्लीलता ।

उर्व्यसावत्र तर्वाली मर्वन्ते चार्ववस्थितः ।
नात्रर्जुं युजयते गन्तुं शिरो नमय तन्मनाक् ॥ [३]

इतं लक्षणानुसरणेऽप्यश्रव्यं(५२)[१],अप्रसिद्धगुरुभावान्तलघु[२], रसाननुगुणञ्च[३]दुष्टं यत्र, तत् दुष्टदुष्टं। क्रमेणोदाहरणम्,-

---

८७ पा०) इत्यनेन विहितं गुणं प्रति "पूर्वत्रासिद्धम्" (८ । २ । १)इत्यनेनासिद्धिविधानादसिद्धिहेतुकः सन्धेरभावः ।

(५१) नायकाधिष्ठितं सङ्केतस्थानं बोधयन्त्या दूत्या इयमुक्तिः । 'उण्डा-'इति जुगुप्साव्यञ्जकः । 'चिङ्कु'-इति व्रीड़ाव्यञ्जकः ।

(५२) 'अश्रव्यं' गुर्वादिनियमभङ्गम्, अपिशब्दात् तदननुसरणं सङ्गृह्यते। दुष्टस्य अश्रव्यत्वञ्च छन्दोभङ्गात् यतिभङ्गात्[१]स्थानविशेषे गणविशेषयोगाच्च। तत्राद्यं प्रसिद्धत्वादुपेक्ष्यान्ये उदाहृते ।

अहतमहतं कः सन्देहो, मधुन्यपि, नान्यथा,
मधुरमधिकं, चूतस्यापि प्रसन्नरसन्फलम् ।
सकृदपि पुनर्मध्यस्थः सन् रसान्तरविज्ञनो
वदतु, यदिहान्यत् स्वादु स्यात्प्रियारदनच्छदात् ॥

अत्र 'यदिहान्यत् स्वादु स्यात्'-इत्यत्रत्यम् (५३) । यथा वा,

जो परिहरिउं तीरइ मणम्मि ण सुन्दरत्तणगुणेण ।
अह णवर जस्स दोसो पडिवक्खेहिं पि पडिवण्णो (५४) ॥ [१]

अत्र द्वितीयतृतीयगणौ सकारभकारौ ।

विकसितसहकारभारहारि-
परिमलपुञ्जितगुञ्जितद्विरेफः ।
नवकिसलयचारुचामरश्री-
र्हरति मुनेरपि मानसं वसन्तः ॥

अत्र हारिशब्दः । (हारि-प्रमुदितसौरभेति पाठो युक्तः ।)

यथा वा,-

धन्यासा गुणरत्नरोहणभुवो धन्या वदन्त्येव सा,
सम्भाराः खलु तेऽन्य एव, विधिना यैरेष सृष्टो सुवा ।

---

(५३) अत्र हि हरिणीच्छन्दसि 'वदत यदिहा' इति षडक्षर-स्थाने उचिताऽपि यतिर्भग्ना, षडक्षरस्य 'हा'-इत्यस्य चरमपदसम्बन्धाभावे-नत्वात् । "न स म र स ला गः षड्वेदैर्हयैर्हरिणी मता", इति हरिणी-लक्षणम् ।

(५४) यः परिहर्तुं तीर्यते मनागपि न सुन्दरत्वगुणेन ।
अथ केवलं यस्य दोषः प्रतिपक्षैरपि प्रतिपन्न इति सं० ॥

नवरशब्दो केवलवाची, अपिरेवार्थः । अत्र आर्यायां द्वितीयस्य 'हरिउं' इत्यनुगुरोः सगणस्य, तृतीयस्य च 'तीरइ' इत्यादिगुरोर्भगणस्य व्यवधानादत्रव्यत्ययमात्रमधिकम् ।

श्रीमत्कान्तिजुषां द्विषां करतलात्, स्त्रीणां नितम्बस्थलात्
दृष्टे यत्र पतन्ति मूढ़मनसामस्त्राणि वस्त्राणि च ॥

अत्र वस्त्राण्यपीति पाठे लघुरपि गुरुतां भजते (५५)। [२]

हा नृप! हा बुध! हा कविबन्धो! विप्रसहस्रसमाश्रय, देव।
मुग्धविदग्धसभान्तररत्न, क्वासि गतः, क्व वयञ्च तवैते ॥ [३]

हास्यरसव्यञ्जकमेतदुत्तम् (५६)। न्यूनपदं यथा,-

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां,
वने व्याधैः सार्द्धं सुचिरसुषितं वल्कलधरैः।
विराटस्यावासे स्थितमनुचितारम्भनिभृतम्,
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु! ॥

अत्र, अस्माभिरिति, 'खिन्ने'-इत्यस्मात् पूर्वम् 'दुःखम्' इति (५७) च।

---

(५५) प्रथमे तुल्ययोगिताया उदाहृतं, "अयुजि नयुग-रेफतो यकारो युजि च नजौ जरगाश्च तुल्ययोगा" इति तल्लक्षणम्। उत्तरे तु शार्दूलविक्रीडितं दत्तं, "सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम्" इति तल्लक्षणम्। अत्र "तथा पादान्तगोऽपि वा" इति गुरुत्वनियामक-लक्षणानुसरणेऽपि वस्त्रयेत्यिल्लोपात् गुरुकार्यकरणाच्चमत्वेन दोषः, 'वस्त्राण्यपि' इति पाठे तु वस्त्रशब्देन गुरुभावप्राप्तिरिति न दोषः। तथाच पादान्त-लघोर्गुरुत्वे वस्त्रशब्देनैव चेत्।

(५६) करुणे तुल्ययोगितादीनां, रौद्रादौ दृष्टान्तालङ्कारादीनां, वीरे विषमालङ्कारादीनां, हास्ये च दोषकारैः व्याप्तगुण्यमिति नागेशः।

(५७) येन विना वाक्यस्यानाकाङ्क्षादिः क्रियाकारकाद्यन्यतमरूपस्य तस्य पदस्य, तत् पदञ्च यत्पदमाकाङ्क्षति, तस्य च यत्रोच्चारणे एव न्यूनपदत्वं, यथोदाहरणे,-'अस्माभिः'-इति कारकपदस्य, 'खिन्ने'-इति कारकपदेन व्याकाङ्क्षितस्य 'दुःखम्'इति पदस्य च अनभिधानम्। एतदतिरिक्तपदानभिधानं वाच्यानभिधानस्य विषयः। उभयत्रैव प्रकरणादिनो विवक्षितार्थप्रतीतिर्भवति। व्याकाङ्क्षत्वे तु नैवमिति भेदः।

अधिकपदं यथा,-

स्फटिकाद्रतिनिर्मलः प्रकामं
प्रतिसंक्रान्तनिभातयक्षतत्त्वः ।
अविरुद्धसमन्वितोक्तियुक्तः
प्रतिमल्लास्तमयोदयः स कोऽपि (५८) ॥

अत्र, आद्रतिशब्दः । यथा वा,-

इदमनुचितमक्रमञ्च पुंसां,
यदिह जरास्वपि मान्मथा विकाराः ।
यदपि च न हृतं नितम्बिनीनां
स्तनपतनावधि जीवितं रतं वा ॥

अत्र हृतमिति हृतं (५९), प्रत्युत प्रक्रमभङ्गमावहति । (तथाच, यदपि च न कुरङ्गलोचनानामिति पाठे निराकाङ्क्षैव प्रतीतिः ।) कथितपदं यथा,-

अधि-करतलतल्पं कल्पितस्वापलीला-
परिमिलननिमीलत्पाण्डिमा गण्डमाली ।

---

(५८) प्रतिमल्लानामस्तमयस्य (पराभवस्य) उदयः प्रारम्भो यस्मात्, सः । पूर्वं केनाप्यपराभूतानामपि ततः पराभवारम्भ इत्यर्थः, स च उदयपदादेव लभ्यत इति नोदयपदव्यर्थता ।

(५९) 'हृतं' व्यधिकं हृतं व्यर्थं वा, पूर्वार्द्धे पुंसां धर्म्मिणां विकारस्वरूपधर्म्मस्यानौचित्यसूचनम्; उत्तरार्द्धे तु जीवितरतयोर्धर्म्मयोः स्तनपतनावधित्वाकरणस्येति प्रक्रमभङ्गः । एवं 'यदपि च' इति समुच्चयार्थकेन चकारेण समुचितमन्यत् किमपि, 'न हृतम्' इत्यनेनाप्येतदाकाङ्क्षितमस्तीति ।

सूतनु, कथय कस्य व्यञ्जयत्यङ्गसैव
स्मरनरपतिलीलायौवराज्याभिषेकम् (६०) ॥

यत्र लीलेति । यतत्प्रकर्षं यथा,-

कस्कः कुत्र न घुर्घुरायितघुरी घोरो घुरेच्छूकरः,
कस्कः कं कमलाकरं विकमलं कर्त्तुं करी नोद्यतः ।
के के कानि वनान्यरण्यमहिषा नोन्मूलयेयुर्यतः
सिंहीस्नेहविलासबद्धवसतिः पञ्चाननो वर्त्तते ॥

समाप्तपुनरात्तं (६१) यथा,-

क्रेङ्कारः स्मरकार्मुकस्य, सुरतक्रीड़ापिकीनां रवः,
झङ्कारो रतिमञ्जरीमधुलिहां, लीलाचकोरीध्वनिः ।
तन्व्याः कञ्चुलिकापसारणभुजाक्षेपस्खलत्कङ्कण-
क्वाणः प्रेम तनोतु वो नववयोलास्याय वेणुस्वनः ॥

द्वितीयार्द्धगतैकवाचकशेषप्रथमार्द्धं (६२) यथा,-

---

(६०) हन्तः स्मरः स्वेनाप्यवशीकृतां त्वां वशीकुर्वन्नं तं जनमवलोक्य व्यञ्जनमेव रमणीजयलक्षणे स्वराज्येऽभिषेक्ष्यतीति भावः ।

(६१) क्रियाकारकान्वयेन समाप्तेऽपि वाक्ये विशेषाभिधित्सां विना पुनरुक्तवाक्यान्वयिपदाभिधानं यत्र, तत् । तथाहि उदाहरणे 'एतादृशः काणः प्रेम तनोतु व.'-इत्यनेन वाक्यसमाप्तावपि श्लोकपूरणाय पुनः काणस्य कर्तुः नवेत्यादिविशेषणाभिधानं, न च तत्र विशेषणदानस्यान्यत् प्रयोजनमस्ति ।

(६२) द्वितीयार्द्धगतम् 'एकं' वाचकं 'शेषम्' (अवशिष्टम्) यस्य, तादृशं प्रथमार्द्धं यत्र, तत्, यत्र प्रथमार्द्धगतं वाक्यं, द्वितीयार्द्धगतेन एकेन पदेन परिपूर्यते ; तत् अर्द्धान्तरैकवाचकमिति फलितम् । यथोदाहरणे भू' यदभाः ; तत् (तस्मात्) मद्गृहचरणपातं गच्छतामिति प्रथमार्द्धगतं वाक्यं, द्वितीयार्द्धगतेन तदित्यनेन परिपूर्यते इति ।

मरुणचरणपातं गम्यतां, भूः सदर्भा,
विरचय सिचयान्तं मुञ्च, धर्मः कठोरः।
तदिति जनकपुत्री लोचनैरश्रुपूर्णैः
पथि पथिकवधूभिः सिञ्चिता वीक्षिता च ॥

अभवन् मतः (दृष्टः) योगः (सम्बन्धः) यत्र, तत् (६३)। यथा,-

येषान्तास्त्रिदशेभदानसरितः पीताः प्रतापोष्मभि-
र्लीलापानभुवश्च नन्दनतरुच्छायासु यैः कल्पिताः।
येषां ऊरुतयः क्षतामरपतिक्षोभाः क्षमाचारिणां,
किन्तैस्वत्परितोषकारि विहितं किञ्चित्प्रवादोचितम् ॥

अत्र "गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्स्यात्"(३।१।२२ जै०सू०) इत्युक्तनयेन यच्छब्दनिर्देश्यानामर्थानां परस्परम् असमन्वयेन 'यैः'-इत्यत्र विधेयस्याप्रतीतिरिति। (क्षमाचारिभिरिति पाठे युज्यते समन्वयः (६४)। यथा वा,-

---

(६३) अत्र पदार्थयोरन्वयस्यैवासम्भवः; विधेयाविमर्शस्थले तु अन्वयसम्भवेऽपि उद्देश्यविधेयभावानवगम इति भेदः।

(६४) 'गुणानाम्' अप्रधानानां, 'परार्थत्वात्' प्रधानान्वयापेक्षित्वात्, 'असम्बन्धः' परस्परमनन्वयः, 'समत्वात्' प्रधानापेक्षितत्वौल्यात्। गुणानां परस्परमनाकाङ्क्षतया न परस्परमन्वयः, किन्तु प्रधानेनैव गुणानामिति सिद्धान्ते। प्रकृते तु 'यैः' इति यदर्थस्य विधेयतया क्षमाचारिसम्बन्धो विवक्षितः, स च न घटते, विभिन्नविभक्तिकत्वात्। यद्यपि 'यो गुणवान् तस्य यशः' इत्यादौ यत्तदर्थयोरिव यदर्थयोरपि भिन्नविभक्तिकतया उपस्थितयोरभेदान्वयः स्वीक्रियताम् इति,—येषां प्रतापोष्मभिः पीताः, यैः पानभुव कल्पिताः, येषां ऊरुतय इति श्लोकान्तरेण यदर्थानामभेदान्वये सति एकस्य क्षमाचारिपदार्थस्य विधेयत्वे सर्वत्रैव तस्य विधेयताप्रतीतिर्भवतीति। तदपि न, यदर्थानाम् उद्देश्यतयाऽप्रधानानां परस्परमन्वयासम्भवादिति। क्षमाचारिभि-

त्वमेवं सौन्दर्य्यं, स च रुचिरतायाः परिचितः,
कलानां सीमानं परमिह युवामेव भजथः ।
अपि द्वन्द्वं दिष्ट्या तदिति सुभगे, संवदति वाम्,
अतः श्रेयं यत् स्याज्जितमिह तदानीं गुणितया (६५) ॥

अत्र, 'यत्'-इत्यत्र तत्-इति, 'तदानीम्'-इत्यत्र यदा-इति वचनं भाति । (चेत्स्यादिति युक्तः पाठः) । यथा वा,-

संग्रामाङ्गणमागतेन भवता चापे समारोपिते
देवाकर्णय येन येन सहसा यद्यत् समासादितम् ।
कोदण्डेन शराः, शरैररिशिरस्तेनापि भूमण्डलं,
तेन त्वं, भवता च कीर्त्तिरतुला, कीर्त्त्या च लोकत्रयम् ॥

अत्र, आकर्णनक्रियाकर्म्मत्वे कोदण्डं शरानित्यादि (६६),

रिति पाठे तु अपाचारिपदार्थस्य तैरिति तत्पदार्थविशेष्यतया प्रतीतौ तत्पदोपस्थितानां सर्व्वेषामेव यदर्थानां विशेष्यतया अपाचारिपदार्थस्य प्रतीतिः सम्भवति ।

(६५) 'तदिति' तस्मात्, 'वां' युवयोः,'द्वन्द्वं' मिथुनं,'दिष्ट्या' भाग्येन,'संवदति''अपि' योग्यमेव भवति, 'अतः' पूर्व्वोक्तात् 'श्रेयं' अवश्यिष्टं समागमरूपं, 'यत्' यदि 'स्यात्,' 'तदानीम्' 'इह' द्वन्द्वे 'गुणितया' सौन्दर्य्यादिना, 'जितम्' उत्कृष्टतया सफलत्वेन वा इत्तं, अन्यथा योग्य-समागमाभावे विफलमेव तदित्यर्थः । अत्र यत् श्रेयं, तत् यदा स्यादित्यर्थो न भवति, तत्पदयदापदयोरभावादतो यत्पदस्य तदानीं-पदेनान्वयोऽभिधित्सितः, स च न सम्भवति यत्पदेन तदानींपदस्यान्वये आकाङ्क्षाया अभावादिति ।

(६६) अस्य प्राग्वदित्यनेनान्वयः । अत्र हि प्रथमार्द्धवाक्यार्थे उत्तरार्द्धेन सम्बन्धो विवक्षितः, स च न सम्पद्यते, तथाहि आकर्णनक्रियायां कोदण्डादिप्रातिपदिकार्थानां प्रत्येकं कर्म्मतयाऽन्वये कोदण्डं शरानिति

वाक्यार्थस्य कर्मत्वे,कोदण्डः शरान्-इति प्राप्तम्। न च,यच्छब्दार्थः तद्विशेषणं वा कोदण्डादि। न च, केन केन ?-इत्यादिप्रश्नः।

यथा वा,-"चापाचार्यस्त्रिपुरविजयी"(१२४पू०)-इत्यादौ भार्गवस्य निन्दायां तात्पर्यं, कृतवतेति परशौ सा प्रतीयते (६७)। (कृतवत इति तु पाठे मतयोगो भवति।)

द्वितीया स्यात्। अथ कोदण्डादीनां सर्वेषाम् परस्परसमन्वितानामपि एकदैव वाक्यार्थविधया कर्मत्वमिति न द्वितीयाप्रसङ्गः, प्रातिपदिकादेव द्वितीयाविधानेन वाक्यात्तदसम्भवादिति चेत्। न,-

"यो यो वीरः समायातस्तांस्तान् हृत्वा महीपते।
भीष्मो द्रोणो कृपः कर्णः सोमदत्तिर्धनञ्जयः॥"-इत्यादिवत् परस्परसमन्वितार्थकत्वात्, कोदण्डादिशब्देभ्यः, कोदण्डः शरान् इति प्रथमा स्यात्। यद्यपि यच्छब्दस्य बुद्धिस्थवाचकतया कोदण्डादिपदार्थ एव यच्छब्दार्थ इति यच्छब्दार्थस्य क्रियान्वये कोदण्डादीनामप्यन्वयो लभ्यते एवेति। तन्न, एवं सति कोदण्डादीनां पुनरुपादानं व्यर्थं स्यात्, यच्छब्दस्य साकाङ्क्षत्वप्रसङ्गश्च। अथ यदर्थयोः कर्मकर्मणोर्विशेषणानि कोदण्डादीनीति चेत्। न, तथा सति येन कोदण्डेन यैश्च शरान् समासादितं तदाकर्णयेति वाक्यार्थपर्यवसानेन पुनर्विशेषाकाङ्क्षाया अनिवृत्तेः, भिन्नविभक्तिकतया यत् शरान् समासादितमित्यन्वयासम्भवाच्च। ननु येन यदिति सामान्यतोऽवगमेन, केन केन किं किं ?-इति विशेषप्रश्ने सति तदुत्तरतया कोदण्डेन शरा इत्यादि उक्तमिति चेत्। न, प्रश्नवाचकपदाभावात्, येन येन यद्-यद् आसादितं तदाकर्णयेतिप्रतिपत्तेरेव कोदण्डादीनामुक्तत्वादिति।

(६७) अत्र परशुनिन्दासङ्गेन भार्गवनिन्दायां वैदग्ध्यातिशय इति तदेवाभिप्रेतमिति न वाच्यं, यथा स्तुत्योग्यत्वोपपत्तये परशुस्वामिनः शिवशिष्यत्वादीनि विशेषणानि, तथा तदयोग्यत्वप्रतिपादनाय तस्यैव कचिद् धर्मो वक्तुचितः, अन्यथा प्रक्रमभङ्गः स्यादिति, यथोक्तमेव समीचीनम्।

यथा वा,-

चत्वारो यज्ञर्त्विजः, स भगवान् कर्मोपदेष्टा हरिः,
संग्रामाध्वरदीक्षितो नरपतिः, पत्नी गृहीतव्रता ।
कौरव्याः पशवः, प्रियापरिभवक्लेशोपशान्तिः फलं,
राजन्योपनिमन्त्रणाय रसति स्फीतं यशोदुन्दुभिः ॥

अत्र,अध्वरशब्दः समासे गुणीभूत इति न तदर्थः सर्वैः संभुज्यते ।

यथा वा,-

जङ्घाकाण्डोरुनालो नखकिरणलसत्केसरालीकरालः
प्रत्यग्रालक्तकाभाम्रसरकिसलयो मञ्जुमञ्जीरभृङ्गः ।
भर्त्तुर्नृत्तानुकारे जयति निजतनुस्वच्छलावण्यवापी-
सम्भूताम्भोजशोभां विदधदभिनवो दण्डपादो भवान्याः ॥

अत्र, दण्डपादगता निजतनुः प्रतीयते, भवान्याः सम्बन्धिनी तु विवक्षिता (६८) ।

अवश्यंवक्तव्यमनुक्तं यत्र । यथा,-

अप्राकृतस्य चरितातिशयैश्च दृष्टै-
रत्यद्भुतैरपहृतस्य तथापि नाम्ना ।
कोऽप्येष वीरशिशुकाकृतिरप्रमेय-
माहात्म्यसारसमुदायमयः पदार्थः ॥

अत्र, अपहृतोऽस्मीत्यपहृतत्वस्य विधिर्वाच्यः । 'तथापि'इत्यस्य द्वितीयवाक्यगतत्वेनैवोपपत्तेः (६९) ।

---

(६८) 'असम्बन्धिनां निजादिपदार्थानां क्रियान्वयिकारकपदार्थे एवान्वय' इतिनियमेन निजपदार्थस्य दण्डपादे एवान्वयः स्यादिति ।

(६९) तथापीति तच्छब्दार्थः पूर्ववाक्योक्तं किमप्यर्थमपेक्षते इति पृथक्वाक्यत्वमादधिती प्रथमा विभक्तिरत्रावश्यंवाच्या । अत्र विधेया-विमर्शौभवन्मतयोगावपि स्तः ।

यथा वा,-

एषोऽहमद्रितनयामुखपद्मजन्मा
प्राप्तः सुरासुरमनोरथदूरवर्त्ती ।
स्वप्नेऽनिरुद्धघटनाधिगताभिरूप-
लक्ष्मीफलामसुरराजसुतां विधाय ॥

अत्र, मनोरथानामपि दूरवर्त्तीत्यप्यर्थो वाच्यः । यथा वा,
त्वयि निबद्धरतेः प्रियवादिनः प्रणयभङ्गपराङ्मुखचेतसः ।
कमपराधलवं मम पश्यसि ? त्यजसि मानिनि, दासजनं यतः ॥

अत्र, अपराधस्य लवमपीति वाच्यम् । अस्थानस्थपदं यथा,-

प्रियेण संग्रथ्य विपक्षसन्निधौ
उपाहितां वक्षसि पीवरस्तने ।
स्रजं न काचिद्विजहौ जलाविलां,
वसन्ति हि प्रेम्णि गुणा न वस्तुनि ॥

अत्र, काचिन्न विजहाविति वाच्यम् (७०)। यथा वा,-

लग्नः केलिकचग्रहश्रथजटाजालत्वेन निद्रान्तरे
मुद्राङ्कः गिरिकन्धरेन्दुशकलेनान्तःकपोलस्थलम् ।
पार्व्वत्या नखलक्ष्मशङ्कितसपत्नीनर्म्मस्मितव्रीड़या
प्रोन्मृष्टः करपल्लवेन कुटिलातास्वच्छविः पातु वः ॥

अत्र, नखलक्ष्मेत्यतः पूर्व्वं कुटिलातास्वेति वाच्यम् ।

अस्थानस्थसमासं यथा,-

---

(७०) यथाश्रुते, न काचित् विजहौ, अपि तु यथा स्यात् विजहाविति प्रतीयेत ।

यद्यापि स्तनशैलदुर्गविषमे सीमन्तिनीनां हृदि
स्थातुं याञ्चति मान एष धिगिति क्रोधादिवालोहितः ।
प्रोद्यद्दूरतरप्रसारितकरः कर्षत्यसौ तत्क्षणात्
फुल्लत्कैरवकोशनिःसरदलिश्रेणीलभाणं यशः ॥

अत्र, कङ्कस्योक्तौ समासो न कृतः ; कवेरुक्तौ तु कृतः ।

संकीर्णं यत्र वाक्यान्तरस्य पदानि वाक्यान्तरमनुप्रविशन्ति । यथा,-

किमिति न पश्यसि कोपं पादगतं बद्धरुषं गृहाणेमम् ।
ननु मुञ्च हृदयनाथं कण्ठे मनसस्तमोरूपम् ॥

अत्र, पादगतं बद्धरुषं हृदयनाथं किमिति न पश्यसि, इमं कण्ठे गृहाण, मनसस्तमोरूपं कोपं मुञ्चेति । (एकवाक्यतायान्तु क्लिष्टमिति भेदः ।)

गर्भितं, यत्र वाक्यस्य (७१) मध्ये वाक्यान्तरमनुप्रविशति । यथा,-

परापकारनिरतैर्दुर्जनैः सह सङ्गतिः ।
'यदामि भवतस्त्वत्त' न विधेया कदाचन ॥

अत्र तृतीयपादो वाक्यान्तरमध्ये प्रविष्टः । यथा वा,-

लग्नं रागावताङ्गा सुहृदमिह यथैवासियष्टारिकण्ठे,
मातङ्गानामपीड्योपरि परपुरुषैर्या च दृष्टा पतन्ती ।
तत्यक्तोऽयं न किञ्चिन्नणयति, विदितं तेऽस्तु, तेनासि दत्ता
भृत्येभ्यः, श्रीनियोगादृगदितुमिव गतेत्यस्तुधिं यस्य कीर्त्तिः ॥

---

(७१)'वाक्यस्य' खण्डस्य एकवाक्यस्य, वाक्यैकवाक्यतामात्रेण एकवाक्यतायन्नस्य वा वाक्यसमुदायस्य । द्विविधस्य अस्य यथाक्रममुदाहरणद्वयम् ।

अत्र, 'विदितं तेऽस्तु' इत्येतत्कृतं (७२), प्रत्युत लक्ष्मीरुतोऽपसरतीति विरुद्धमतिक्रान्तं ।

"मञ्जीरादिषु रणितप्रायं, पक्षिषु च कूजितप्रभृति ।
स्तनितमणितादि सुरते, मेघादिषु गर्जितप्रमुखम् ॥"-इति प्रसिद्धिमतिक्रान्तं, यथा,-

महाप्रलयमारुतक्षुभितपुष्करावर्त्तक-
प्रचण्डघनगर्जितप्रतिरुतानुकारी मुहुः ।
रवः श्रवणभैरवः स्वगितरोदसीकन्दरः
कृतोऽद्य समरोदधेरयमभूतपूर्वः पुरः ॥

अत्र, रवो मण्डूकादिषु प्रसिद्धो नतु उक्तविशेषणके सिंहनादे ।

भग्नः प्रक्रमः प्रस्तावः (७३) यत्र । यथा,-

नाथे निशायाः नियतेर्नियोगात्
अस्तं गते हन्त निशाऽपि याता ।
कुलाङ्गनानां हि दशानुरूपं
नातः-परं भद्रतरं समस्ति ॥

अत्र 'गता-'इति प्रक्रान्ते 'याता'-इति प्रक्रमेः (७४)। (गता

---

(७२) 'क्षतं' प्रयोजनं विनैव गर्भितं क्षतं, निष्प्रयोजनं वा । 'विदितं तेऽस्तु'-इत्यनेन अर्थयन्निमन्त्र्य, 'उत्तरकालं पतिपरित्यागोत्थमपराधं त्वं माऽभिदध्याः-इति पूर्वमेव मया पक्षपरिग्रहता ज्ञापितत्वम्' इत्यर्थाभिव्यक्तिद्वारा लक्ष्मीः ततोऽपसरतीति व्यज्यते इति भावः ।

(७३) प्रस्तावः उपक्रमः, येन हेतोरुपक्रमः तेनैवोपसंहार इति नियमस्य भङ्ग इत्यर्थः, ।

(७४) अत्र हि विभिन्नशब्दाभ्यां गम-या-प्रकृतिभ्यामुपस्थित एकोऽर्थो भिन्नप्रत्ययतो भातीति । अत्र 'न कोऽसि गतयो लोके यत्र यद्दो

निशाऽपीति तु युक्तम्।) ननु "नैकं पदं द्विःप्रयोज्यं प्रायेण"-इत्यन्यत्र (७५), कथितपदं दुष्टमिति चेदेवोक्तं, तत्कथमेकस्य पदस्य द्विःप्रयोगः। उच्यते, उद्देश्यमतिनिर्देश्यव्यतिरिक्तो विषय एकपदप्रयोगनियेधस्य (७६), तद्गति विषये प्रत्युत तस्यैव पदस्य सर्वनाम्नो वा प्रयोगं विना दोषः। तथाहि,

उदेति सविता ताम्रस्ताम्र एवास्तमेति च।
सम्पत्तौ च विपत्तौ च महतामेकरूपता॥

अत्र, रक्त एवास्तमेतीति यदि क्रियेत, तदा पदान्तर-प्रतिपादितः स एवार्थोऽर्थान्तरतयेव प्रतिभासमानः प्रतीतिं क्षणयति। यथा वा.-

---

न भासते' इति हरिवाक्यानुसारेण, स्थाने यद्वस्यापि भानसङ्कीर्णकः केचन यथाश्रुतमेव पक्षं समर्थयन्ति।

(७५) अन्यत्र वामनसूत्रे।

(७६) प्रतिनिर्देश्येति व्याख्याने क्त्यप्रत्ययः। 'उद्देश्याः' वक्तव्योऽर्थः, 'प्रतिनिर्देश्याः' पुनरप्यवश्यं वक्तव्यो यत्र, तस्माद्व्यतिरिक्तः; पूर्वापरयोरेकरूपरत्वार्थं यत्र पूर्वनिर्दिष्टस्यार्थस्य तेनैव पदेन तेनैव च रूपेण पुनर्निर्देश्यावश्यकत्वं तदन्यत्र दोष इति फलितोऽर्थः। तथाऽवश्यकत्वञ्च क्वचिदवश्यकत्वं वा नेत्यत्र विवदन्तुभय एव समाधत्ते। तथापि किञ्चित् सविष्योच्यते, वाक्यद्वये यदि एकस्य उद्देश्यत्वं विधेयत्वं वा स्यात्, यदि वा पूर्ववाक्ये विधेयस्य उद्देश्यस्य वा परवाक्ये उद्देश्यत्वं विधेयत्वं वा भवेत्, तदा पुनर्निर्देश्यं आवश्यकं। यथा 'उदेति सविता'-इत्यादौ उभयत्रैव सवितृरूपोद्देश्यत्वं ताम्रत्वस्य विधेयत्वं। 'कोदण्डेन धरा.' इत्यादौ पूर्वत्र विधेयस्य धरादेः परवाक्ये उद्देश्यत्वम्। एवं 'चन्द्रायते एकरूपापि हंस, हंसायते चारुगतेन बाला।' इत्यादौ पूर्ववाक्ये उद्देश्यस्य हंसस्य परवाक्ये विधेयतेति। उद्देश्यविधेयानर्गतानामपि उद्देश्यविधेयत्वम् बाध्यम्।

यशोऽधिगन्तुं, सुप्तलिप्सया वा,
मनुष्यसङ्घ्रामतिवर्त्तितुं वा।
निरुत्सुकानामभियोगभाजां
समुत्सुकेवाङ्कमुपैति सिद्धिः॥

अत्र प्रत्ययस्य। (सुप्तमीक्षितुं वेति युक्तः पाठः।)

ते हिमालयमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम्।
सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः॥

अत्र सर्वनाम्नः। (अनेन विसृष्टा इति तु वाच्यम्।)

महीभृतः पुत्रवतोऽपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिम्।
अनन्तपुष्पस्य मधोर्हि चूते द्विरेफमाला सविशेषसङ्गा (७७)॥

अत्र पर्य्यायस्य। (महीभृतोऽपत्यवतोऽपीति युक्तम्।)
अत्र सत्यपि पुत्रे कन्यारूपेऽप्यपत्ये स्नेहोऽभूदिति केचित् समर्थयन्ते (७८)।

विमर्दोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः।
नियता लघुता निरायतेरगरीयान्न पदं नृपश्रियः॥

अत्रोपसर्गस्य पर्य्यायस्य च। (तदभिभवः कुरुते निरायतिं। लघुतां भजते निरायतिः, लघुतामान्न पदं नृपश्रियः इति युक्तम् (७९)।)

---

(७७) अत्र उक्तापत्यपदौ पुत्रकन्योभयसाधारणौ। उक्ता अस्य -स्नीति बहुत्वविवक्षायां मतुप्।

(७८) केचिदित्यक्षरसः, इदानीं प्रदर्शितस्य सामान्यविशेषभावस्य दार्ष्टान्तिकेऽपि प्रदर्शयितुमुचितत्वादिति।

(७९) उक्तदोषजिहीर्षयैव कल्पितेऽस्मिन् पाठे अन्योन्यश्लो न दोषाय, निर्दोषस्यापि मतान्तरमण्डनपरत्वादस्य। वस्तुतः अत्र, 'अभिभूतिः कुरुते निरायतिम्।' इत्येव पाठ कल्पयितुं योग्य।

काचित्कीर्णा रजोभिर्दिवमनुविदधौ मन्दवक्त्रेन्दुलक्ष्मी-
रश्रीकाः काश्चिदन्तर्दिय इव दधिरे दाहमुद्भ्रान्तसत्त्वाः ।
भ्रेमुर्वात्या इवान्याः, प्रतिपदमपरा भूमियत्कम्पमानाः
प्रस्थाने पार्थिवानामशिवमिति पुरो भावि नार्य्यः शशंसुः ॥

अत्र वचनस्य । (काश्चित्कीर्णा रजोभिर्दिवमनुविदधु-
र्मन्दवक्त्रेन्दुशोभा निःश्रीका इति, 'कम्पमाना' इत्यत्र कम्प-
मानपुरिति च (८०) पठनीयम् ।)

गाढक्लान्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितम्,
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यत ।
विश्रब्धैः क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले,
विश्रान्तिं लभतामिदञ्च शिथिलज्याबन्धमस्मद्धनुः ॥

अत्र कारकस्य । (विश्रब्धा रचयन्तु शूकरवरा मुस्ताक्षति-
मित्यदुष्टम् ।)

अकलिततपस्तेजोवीर्य्यप्रथिम्नि यशोनिधा-
वविनयमदाघ्माते रोषान्मुनावभिधावति ।
अभिनवधनुर्विद्यादर्पोद्धताय च कर्म्मणे
स्फुरति रभसात्पाणिः पादोपसंग्रहणाय च (८१) ॥

अत्र क्रमस्य ; 'पादोपसंग्रहणाय' इति पूर्वं वाच्यम् । एव-
मन्यत्राप्यनुसर्त्तव्यम् । अविद्यमानः क्रमो यत्र (८२) । यथा,-

---

(८०) अन्यथा आख्यातप्रक्रमभङ्ग. स्यादिति प्रसङ्गादुक्तम् ।

(८१) अकलित. अपरिमित. । प्रथमद्वितीयपादार्थौ यथाक्रमं पादपरिग्रहधनुराकर्षणयोर्हेतु-इति तद्धिर्हेयक्रमेणैव निर्देशो युक्त. ।

(८२) पदघटितवाक्यरचनायाः प्रस्तुतार्थप्रत्यायकत्वे अक्रमत्वं,

इयं गतं सम्प्रति शोचनीयतां
समागमप्रार्थनया कपालिनः।
कला च सा कान्तिमती कलावतः,
त्वमस्य लोकस्य च नेत्रकौमुदी॥

अत्र 'त्वं'-शब्दानन्तरं चकारो युक्तः। यथा वा,-
शक्तिर्निक्षिंशजेयं तव भुजयुगले, नाथ, दोषाकरश्री-
र्वक्त्रे, पार्श्वे तथेया प्रतिवसति महाकुट्टिनी खड्गयष्टिः।
आस्तेयं सर्व्वगा ते विलसति च पुनः, किं मया दृष्टया ते,
प्रोच्येवेत्थं, प्रकोपाच्छ्रुकुटिकरसितया यस्य कीर्त्या प्रयातम्(८३)॥
अत्र, इत्थं प्रोच्येवेति न्याय्यम्। तया, 'लग्नं रागाहताङ्घ्रा'
(१३८ पृ०) इत्यादौ इति श्रीनियोगादिति वाच्यम्।
'अमतः' प्रकृतविरुद्धः (८४) परार्थो यत्र। यथा,—
राममन्मथशरेण ताड़िता दुःसहेन हृदये निशाचरी।
गन्धवद्रुधिरचन्दनोचिता जीवितेशवसतिं जगाम सा॥
अत्र, प्रकृते रसे विरुद्धस्य शृङ्गारस्य व्यङ्ग्योऽपरोऽर्थः।

प्रत्यायकत्वेऽप्यनौचित्येऽस्वानस्यपदता, अर्थैकमय्यामौचित्ये तु दुष्क्रमत्वम्, उपक्रमोपक्रमभयोपसंहारे भङ्गे प्रक्रमभङ्ग इत्येतयोर्भेदः।

(८२) निक्षिंश-दोषाकर-कुट्टिनी-सर्व्वगा-इष्टा-प्रयातशब्दाः यथाक्रमं खड्ग-चन्द्र-क्षेदिका-सर्व्वविख्याता-महती-प्रकृतरसमयार्थका अपि यत्र-यस्मिन्निमित्ता क्रियाधिक्य-दोषनिधान-आरब्धोज्झिती-कुत्सिता-अरती-पलायनरूपानभ्यर्थानुपस्थापयन्ति।

(८३) 'प्रकृतविरुद्ध' प्राकरणिकरसादिप्रतिकूल', 'परार्थ' रसादिरूपो व्यङ्ग्यार्थो यत्र तदिति। (परार्थं तत्र वाच्यार्थं इति प्रतिकूलविभावादि-पदाहृतेः।) 'श्रेयो शृङ्गारशोभायो, तथा वीरभवाभयो।
रौद्राद्भुतो, तथा हास्यकरुणो वैरिणो मिथ' इति॥

अर्थदोषानाह,-

अर्थोऽपुष्टः कष्टो
व्याहतपुनरुक्तदुष्क्रमग्राम्याः ॥ ७ ॥
सन्दिग्धो निर्हेतुः
प्रसिद्धिविद्याविरुद्धश्च ।
अनवीकृतः सनियमा-
नियमविशेषाविशेषपरिवृत्ताः ॥ ८ ॥
साकाङ्क्षोऽपदयुक्तः
सहचरभिन्नः प्रकाशितविरुद्धः ।
विध्यनुवादायुक्त-
स्यक्तपुनःस्वीकृतोऽश्लीलः ॥ ९ ॥

'दुष्टः' इति सम्बध्यते । क्रमेणोदाहरणम् -

अतिविततगगनसरणि-प्रसरत्यपरिमुक्तविश्रमानन्दः ।
मरुदुल्लासितसौरभ-कमलाकरहासलब्धविर्जयति ॥

अत्र अतिविततत्वादयोऽनुपादानेऽपि प्रतिपाद्यमानमर्थं न बाधन्ते इत्यपुष्टाः, न त्वसङ्गताः पुनरुक्ता वा (८५) ।

---

(८५) अत्र अतिविततत्वमतिविस्तीर्णत्वं बृहदाकारत्वमिति यावत्, (अत्र दीर्घत्वम्) । गगनसञ्चार एव भ्रमहेतुं तत्रातिविततत्वं सरणित्वञ्च उपयुज्यते । एवं मरुदुल्लासितेत्यादावपि । अन्यथा चेत्, अतिविततत्वादि हेतुगर्भविशेषणतया स्वरूपविशेषणतया वाभिप्रेतम् ? आद्ये अप्रसिद्धिः, द्वितीये गगनस्यातिविततत्वम् अन्धेरौष्ण्यमिव अतिप्रसिद्धत्वात् प्राप्तमेवेति तत्कथने पुनरुक्तिदोष इति । न, पूर्वोक्तस्य पुनरुक्तिरेव पुनरुक्तिर्न पूर्वप्राप्तस्यार्थस्यापीति भावः । प्रयोजनमाश्रित्यावाप्तार्थविशेषाभावेऽपि तत्तदभिधानेऽधिकपदत्वं, स्वरूपकथनार्थे प्रस्तुतानुपयोगिनोऽर्थस्य विवक्षायामपुष्टार्थत्वमित्यवयोर्भेदः ।

सदा मध्ये यासामियमहतनिष्यन्दसरसा
सरस्वत्युद्दामा वहति बहुमार्गा परिलसम् ।
प्रसादं ता एता घनपरिचिता. केन महता
महाकाव्यव्योम्नि स्फुरितमधुरा यान्तु रुचयः (८६) ॥

अत्र यासां कविरुचीनां मध्ये सुकुमार-विचित्र-मध्यमाभक्तिमार्गां (८७) भारतीं चमत्कारं वहति, ता. गम्भीरकाव्यपरिचिताः कथमितरकाव्यवत्प्रसन्ना भवन्तु, यासामादित्यप्रभाणां मध्ये त्रिपथगा वहति, ता मेघपरिचिताः कथं प्रसन्ना भवन्तीति सङ्क्षेपार्थः (८८)।

जगति जयिनस्ते ते भावा नवेन्दुकलादयः,
प्रकृतिमधुराः सन्त्येवान्ये मनो मदयन्ति ये ।
मम तु यदियं याता लोके विलोचनचन्द्रिका
नयनविषयं, जन्यन्येकः स एव महोत्सवः ॥

---

(८६) स्वकाव्यस्य गम्भीरार्थकतयाऽस्फुटार्थत्वमपदूषयितुं समर्थयितुं कस्यचिदुक्तिरियम् । प्रस्तुतपक्षे 'रुचय' अभिप्रायाः, 'प्रसाद' स्फुटतां 'यान्तु'-इत्यन्वयः । अप्रस्तुतपक्षे 'सरस्वती' नदी, 'परिलस.' सलक्ष्म, (परिगतो लसो यस्यां क्रियायामिति व्युत्पत्त्या परिलस सलक्ष्मं वा क्रियाविशेषणं) 'प्रसाद' स्वच्छकान्तिता ।

(८७) वैदर्भी-गौडी-पाञ्चाल्यास्त्रीतिमयती ।

(८८) आदित्यप्रभारूपो द्वितीयोऽर्थः उपमानं, तेन सह वाच्यार्थस्य सम्बन्धः व्यङ्ग्यः, अतः, किं, किंविशिष्टार्थं, यद्दूरान्तरेणोपमितसम्बन्धतोऽपि क्षणेनैव प्रतीयते ; किंवा यद्दूरान्तरेण अन्यवान्तरेण वा विरचितार्थः, क्षणेनैव प्रतीयते इति भेदः ।

अत्र, इन्दुकलादयो यं प्रति पर्यवसायिनः स एव चन्द्रिकात्वम् उत्कर्षार्थमारोपयतीति व्याहतत्वम् (८६)।

"श्रुतमनुमतम्"(४३९०)-इत्यादि, अत्र, 'अर्जुन अर्जुन-' इति (९०)'भवद्भिः'-इति चोक्ते 'सभीमकिरीटिनाम्'-इति किरीटिपदार्थः पुनरुक्तः। यथा वा,—

अस्त्रज्वालावलीढ़प्रतिबलजलधेरन्तरीर्वायमाणे
सेनानाथे स्थितेऽस्मिन्मम पितरि, गुरौ सर्वधन्वीश्वराणाम्।
कर्णालं सम्भ्रमेण, व्रज रूप, समरं, मुञ्च हार्दिक्य, शङ्काम्,
ताते चापद्वितीये वहति रणधुरं को भयस्यावकाशः॥

अत्र, चतुर्थपादवाक्यार्थः पुनरुक्तः।

भूपालरत्न, निर्दैन्यप्रदानप्रस्तुतोत्सव।
विश्राणय तुरङ्गं मे, मातङ्गं वा मदालसम्॥ (दुष्क०)

अत्र, मातङ्गस्य प्राङ्निर्देशो युक्तः।

स्वपिति यावदयं निकटे जनः,
स्वपिमि तावदहं, किमपैति ते।
तदपि साम्प्रतमाहर कूर्परं
त्वरितमूरुमुदञ्चय कुञ्चितम्॥ (गा०)

एषोऽविदग्धः।

---

(८६) पर्यवसायिनः तुल्यप्रायाः।

'उत्कर्षो वाऽपकर्षो वा प्राप्यत्वेन निगद्यते।
तत्त्वेनाथ तदन्यत्वेत् व्याहतोऽर्थस्तदा भवेत्' इति॥

(९०) अर्जुनं सम्बोध्य भवद्भिः, तेषामिदमेव किरीटिना अर्जुनत्वोक्तेः।

"मात्सर्य्यमुत्सार्य्य"-(१७पृ०)-इत्यादि। अत्र, प्रकरणाद्यभावे सन्देहः। (शान्तरुद्रार्य्यन्यतराभिधाने तु निश्चयः।)

गृहीतं येनासौ: परिभवभयाद्योचितमपि,
प्रभावाद्दूयस्याभून्न खलु तव कश्चिन्न विषयः।
परित्यक्तं तेन त्वमसि सुतशोकान्न तु भयात्,
विमोक्ष्ये शस्त्रं, त्वामहमपि, यतः स्वस्ति भवते॥

अत्र शस्त्रमोचने हेतुर्नोपात्तः।

दृष्टन्ते केनोक्तं कथय कमलातङ्कवदने,
यदेतस्मिन् हेम्नः कटकमिति धत्से खलु धियम्।
इदं तद्दुःसाधाक्रमणपरमास्त्रं स्मृतिभुवा
तव प्रीत्या चक्रं करकमलमूले विनिहितम्॥

अत्र, कामस्य चक्रं लोकेऽप्रसिद्धम्। यथा वा,-

उपपरिसरं गोदावर्य्याः परित्यजताध्वगाः,
सरणिमपरो मार्गस्तापद्वषद्भिरिहेष्यताम्।
दृष्ट हि विहितो रक्ताशोकः कयापि शताशया
चरणनलिनन्यासोदञ्चन्नवाङ्कुरकञ्चुकः॥

पादाघातेनाशोकस्य पुष्पोद्गमः कविषु प्रसिद्धो न पुनः अङ्कुरोद्गमः।

सुसितवसनालङ्कारायां कदाचन कौमुदी-
मवसि सुहृदि स्वैरं यान्त्यां गतोऽस्तमभूद्विधुः।
तदनु भवतः कीर्त्तिः केनाप्यगीयत येन सा
प्रियगृहमगान्मुक्ताशङ्का, क्व नासि शुभम्भदः॥

अत्रामूर्त्तोऽपि कीर्त्तिः ज्योत्स्नावत्प्रकाशरूपा कथितेति लोक-विरुद्धमपि कविप्रसिद्धेर्न दुष्टम् (६१) ।

सदा स्नात्वा निशीथिन्या सकलं वासरं बुधः ।
नानाविधानि शास्त्राणि व्याचष्टे च शृणोति च ॥ (वि०वि०)

ग्रहोपरागादिकं विना रात्रौ स्नानं धर्म्मशास्त्रेण विरुद्धम् ।

अनन्यसदृशं यस्य बलं बाह्वोः समीक्ष्यते ।
पाङ्गुण्यानुस्मृतिस्तस्य (६२) सत्यं सा निष्प्रयोजना ॥

एतत् अर्थशास्त्रेण ।

विधाय दूरे केयूरमनङ्गाङ्गनमङ्गना ।
बभार कान्तेन कृता करजोल्लेखमालिकाम् ॥

अत्र, केयूरपदे नखक्षतं न विहितमिति, एतत् कामशास्त्रेण ।

अष्टाङ्गयोगपरिशीलनकीलनेन
दुःसाधसिद्धिसविधं विदधद्विदूरे ।
आसादयन्नभिमतामधुना विवेक-
ख्यातिं समाधिधनमौलिमणिर्विमुक्तः (६३) ॥

अत्र, विवेकख्यातिरतः सम्प्रज्ञातसमाधिः, पश्चादसंप्रज्ञातरतो मुक्तिर्नतु विवेकख्यातौ, एतत् योगशास्त्रेण ।

एवं विद्यान्तरैरपि विरुद्धमुदाहार्य्यम् ।

---

(६१) एतच्च लोकविरुद्धमपि कविसमयप्रसिद्धिविरोध एव दोषः ।

(६२) यन्निमित्तमाश्रयमाणद्वैधरूपया षट् पाङ्गुण्यम्, स्वार्थे ष्यञ् ।

(६३) यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टौ अङ्गानि । 'दु साधायां' दुःप्राप्यायां 'सिद्धौ' अणिमादिकायां 'सविधं' निकटं, स्थितं पुरुषस्य बुद्धिसत्त्वविभेदरूपसम्प्रज्ञातसमाधिम् । 'विवेकख्याति' प्रकृतिपुरुषयोर्भेदज्ञानम् ।

प्राप्ताः श्रियः सकलकामदुघास्ततः किम्,
दत्तं पदं शिरसि विद्विषतां ततः किम् ।
सन्तर्पिताः प्रणयिनो विभवैस्ततः किम्,
कल्पं स्थितं तनुभृता तनुभिस्ततः किम् ॥

अत्र 'ततः किम्'-इति न नवीकृतम् (९४) । (तत्तु यथा,-

यदि दहत्यनलोऽत्र किमद्भुतं, यदि च गौरवमद्रिषु किं ततः ।
लवणमम्बु सदैव महोदधेः, प्रकृतिरेव सतामविषादिता ॥)

यत्नानुल्लिखितास्त्रमेव निखिलं निर्म्माणमेतद्विधेः,
उत्कर्षप्रतियोगिकल्पनमपि न्यक्कारकोटिः परा ।
याताः प्राणभृता मनोरथगतीरुल्लङ्घ्य यत्सम्पदः,
तस्याभासमणीकृताश्मसु मणेरश्मत्वमेवोचितम्(९५) ॥

अत्र, छायामात्रमणीकृताश्मसु मणेस्तस्याश्मतैवोचितेति सनियमत्वं वाच्यम् (९६) ।

---

(९४) अन्यालरेण निर्देशस्तं नवीकृतम् । 'किं ततः' इत्यस्य, किं तथात्-इत्यादिरूपेण शब्दपरिवर्त्तनेऽपि उत्कर्षान्तराभावात् अनवीकृतत्व-मिति कथितपदत्वात् भेदः ।

(९५) चिन्तामणेराभासेनैव मणीकृते पाषाणे यद्यपि चिन्तामणेर्गणने चिन्तामणेरेव परं पाषाणत्वमस्तु, तेषान्तु मणित्वमिति सोपहासोक्तिः ।

(९६) सनियमोक्तौ हि कारणान्तरव्यवच्छेदेन पाषाणानां निस्तारि-त्वं प्रतीयते । अनियमोक्तौ तु विशिष्टस्यैव तत्प्रतिपादकपदाभिधाने न्यूनपदत्वाभिधानाप्यत दोषो, अनयोस्तु भेदस्तत्त्वतो, अर्थविशेषाविवक्षायान्तु अत्यभेद ।

अत्र, एकेन किं न विहितो भवतः स नामेति सामान्यं वाच्यम् (९९)।

अर्थित्वे प्रकटीकृतेऽपि न फलप्राप्तिः प्रभोः, प्रत्युत
दुर्व्यन्दायरयिर्विरुद्धचरितो युक्तस्तया कन्यया।
उत्कर्षश्च परस्य, मानयशसोर्विध्वंसनं चात्मनः,
क्षीरत्वञ्च जगत्पतिर्दशमुखो देवः कथं क्ष्यते ?॥

अत्र, 'क्षीरत्वम्' उपेक्षितम्-इत्याकाङ्क्षति। नहि 'परस्य'-इत्यनेन सम्बन्धो योग्यः (१००)।

अन्या यक्षगिरामणिप्रणयिनी, शास्त्राणि चत्वार्यवं,
भक्तिर्भूतपतौ पिनाकिनि, पदं लङ्केति दिव्या पुरी।
उत्पत्तिर्द्रुहिणान्वये च, तदहो ! क्वेदृग्वरो लभ्यते,
स्याच्चेदेष न रावणः, क्व नु पुनः सर्वत्र सर्वे गुणाः॥(अप०)

अत्र, 'स्याच्चेदेष न रावणः' इत्यत एव समाप्यम् (१०१)।

---

(९९) यथाश्रुते कौस्तुभकारस्योपकारकत्वेनान्यादृशानन्दनिषेधहेत्वनवगमः। एकेनेति पाठे तु भेदानवगमाद्दोषः।

(१००) नहि उपादेये क्षीरत्वेऽमर्षसम्भवः, किन्तु तदुपेक्षायामिति। यदप्युच्यते,-परस्येत्यनेनान्वयात् परस्योत्कर्षो युज्यत एवेति। तन्न, 'परस्य'-इत्यस्य जनितान्वयतया, 'चात्मनः'-इत्यनेन व्यवहिततया च पुनरन्वयायोगात्। अत्र 'परस्य'-इति पदं वा 'उपेक्षितम्'-इति वा अन्यद्वा किमपि पदं कल्प्यमिति नियमाभावात् विवक्षितप्रतीतिविरहो दूषकतावीजम्।

(१०१) यत्र यदभिधानं विवक्षितप्रतीतिविघटकं तादृशेऽनुपयुक्ते स्थाने तदभिधानम् अपदयुक्तता, यथोदाहरणे, 'स्याच्चेदेष न रावणः' इत्यनन्तरं 'क्व नु पुनः'-इत्याद्यभिधानं समाधाने सर्वत्रस्थे रावणस्य त्याज्यत्वप्रतीतिं जनयति। प्रकाशितविरुद्धैकार्थस्य नाभिधानं यथा विवक्षितप्रतीतिप्रतिरोधः,-इत्यनयोर्भेदः। केचित्तु अपदयुक्तताभावार्थं दोष इति वदन्ति।

द्यूतेन बुद्धिर्व्यसनेन मूर्खता,
मदेन नारी, सलिलेन निम्नगा ।
निशा शशाङ्केन, धृतिः समाधिना,
नयेन चालङ्क्रियते नरेन्द्रता ॥

अत्र, द्यूतादिभिरुत्कटैः सहचरितैर्व्यसनमूर्खतयोर्निकृष्टयोर्भिन्नत्वम् (१०२) ।

"लग्नं रागावताङ्गया" (१३८)-इत्यत्र 'विदितं तेऽस्तु' इत्यनेन श्रीखण्डादपसरतीति विरुद्धं प्रकाश्यते(१०३) ।

प्रयत्नपरिबोधितः स्तुतिभिरद्य शेषे निशा-
मकोमलमपाण्डवं भुवनमद्य निःसोमकम् ।
इयं परिलुमाप्यते रणकयाऽद्य दोःशालिनाम्,
अपैतु रिपुकाननातिगुरुरद्य भारो भुव (१०४) ॥

अत्र यतिः प्रयत्नेन बोध्यसे धृति विधेयम् । यथा वा,-

वाताहारतया जगद्विषधरैराघ्रास्य निःशेषितं,
ते ग्रस्ताः पुनरम्बुतोयकणिकातीव्रव्रतैर्वर्षिभिः ।

---

(१०२) सहचरितानां हि प्रायश एकदर्थेन सर्वेषाम् उपादेयत्वं हेयत्वं वा प्रतीयेत, एतदेव दूषकताबीजम् ।

(१०३) यथा च विरुद्धं प्रकाश्यते, तथोक्तं प्राक् (१३८-) ।

(१०४) 'शेषे' इति क्रियापदम् । अनिद्रोऽपि बोध्यते, न तु बोधित शेते । विधेयांशभूते विधेयतया विवक्षितस्य विधेयत्वेनान्वयसम्भवः, अत्र तु विधायकतयोपक्षिप्तस्य विधानमिच्छतोर्भेदः ।

तेऽपि क्रूरचमूरुचर्मवसनैर्नीताः क्षयं लुब्धकैः,
दम्भस्य स्फुरितं विदन्नपि जनो जाल्मो गुणानीहते (१०५)॥

अत्र, वाताहारादित्रयं व्युत्क्रमेण वाच्यम् ।

अरे रामाहस्ताभरण, भसलश्रेणिशरण,
स्मरक्रीड़ाव्रीडाशमन, विरञ्चिप्राणदमन ।
सरोहंसोत्तंस, प्रचलदल, नीलोत्पल, सखे,
सखेदोऽहं, मोहं त्वयय, कयय, केन्दुवदना ?॥

अत्र, 'विरञ्चिप्राणदमन'-इति नानुवादत्वम्)।

"लग्नं रागाहताङ्ग्या" (१३८पृ०) इत्यादि । अत्र, 'विदितुं तेऽस्तु'-इत्युपसंहृतोऽपि 'तेन'-इत्यादिना पुनरुपात्तः(१०६) ।

---

(१०५) 'दम्भस्य' प्रकृते कापट्यस्य परापकाराद्यसत्फलाभिसन्धान-पूर्वकधर्माचरणरूपस्य 'स्फुरितं' दीप्तिं प्रचलद्रूपतां । 'गुणान्' धार्मिकत्वादीन् 'ईहते' प्रार्थयते, सम्भावयति वा, अर्थात् जनेषु । सर्व्व एव दुरभिसन्धिपूर्वकमेव धर्म्मा कर्म्म अनुतिष्ठन्ति, न तु धर्म्मबुद्धया, इत्यवार्म्मिका एव सर्व्वे इति चतुर्थपादतात्पर्य्यार्थः, एष एवार्थः पादत्रयेण समर्थितः। एवञ्च जगत् निःश्रेयसयितुं वाताहारः स्वीकृतः, तान् पक्षिणम् चञ्चुकणिकाव्रत-भक्षीकृतं, तान् त्वयं नेतुं चर्म्मवसनं गृहीतमितिरीत्या असदभिसन्धिपूर्व्वक-धर्म्माचरणमेव विधातुमुचितं, न तु तस्य, 'वाताहारतया' इतिरीत्या अनुवादो युक्तः। यथाश्रुतदक्ष्यनुसारिण्यस्तु मृगचर्म्मवसनं मेघतोयकणिकापानं वायुभक्षणञ्च यथोत्तरं तीव्रमिति तत्क्रमेण विधिर्युक्तः न तु अन्यथेति, एतदेव व्युत्क्रमविधानमित्याहुः ।

(१०६) क्रियाकारकाम्बयेन निराकाङ्क्षतया समाप्तेऽपि व्याक्षे पुनः कारकान्तराभिधानं व्यक्तपुनःस्वीकृतत्वं, यथोदाहरणे, न किञ्चित्कृणयतीत्यत्रैव कर्म्मकारकेण विदिक्रियाया अन्वये समाप्तेऽपि पुनः 'भक्तेभ्यः' इत्यादिना कर्म्मकारकाभिधानम्। समाप्तपुनरात्तत्वे तु पूर्व्वोक्तस्यैव कारकस्य विशेषण-दानमिति भेदः ।

हन्तुमेव प्रवृत्तस्य साध्यस्य विवरैरिव ।
यथाऽम्बु जायते यातो न तथा पुनरुन्नतिः ॥

अत्र, पुंस्यञ्जनस्यापि प्रतीतिः ।

यत्रैको दोषः प्रदर्शितः, तत्र दोषान्तराण्यपि सन्ति, तथापि तेषां तत्राप्रकृतत्वात्प्रकाशनं न कृतम् ॥

कर्णावतंसादिपदे कर्णादिध्वनिनिर्मितिः (१०७) । सन्निधानादिबोधार्थम् ;

अवतंसादीनि कर्णादाभरणान्येवोच्यन्ते, तत्र कर्णादिशब्दाः कर्णादिस्थितिप्रतिपत्तये, यथा,-

यस्या कर्णावतंसेन जितं सर्वं विभूषणम् ।
तथैव शोभतेऽत्यर्थमस्याः श्रवणकुण्डलम् ॥
अपूर्वमधुरामोदप्रमोदितदिगन्तरः ।
आययुर्भृङ्गसुभगाः शिरःश्रेष्ठरशालिनः ॥

अत्र, कर्ण श्रवण-शिरः-शब्दाः सन्निधानप्रतीत्यर्थाः (१०८) ।

विदीर्णाभिसुधाराशिकराले सङ्गरान्तरे ।
धनुर्ज्यांकिणचिह्नेन दोष्णा विस्फुरितं तव ॥

अत्र, धनुःशब्द आरूढत्वावगतये । (अन्यत्र तु,

जाबन्धनिस्पन्दभुजेन यस्य विनिश्वसद्वक्त्रपरम्परेण ।
कारागृहे निर्जितवासवेन लङ्केश्वरेणोषितमा प्रसादात् ॥

---

(१०७) ध्वनि शब्द । निर्मिति प्रयोग ।

(१०८) तया च प्रतीत्या अवतंसादे स्वरूपतो न ज्ञेयता, किन्तु अस्याः कर्णादिस्थित्या इति अवगम्यते, तदवगमे च वर्णनीयायाः उत्कर्ष ।

-इत्यत्र, केवलो जघनशब्दः।)

प्राणेश्वरपरिष्वङ्गविभ्रमप्रतिपत्तिभिः।
मुक्ताहारेण लसता हसतीव स्तनद्वयम् (१०९)॥

अत्र, मुक्तानाम् अन्यरत्नामिश्रितत्वबोधनाय मुक्ताशब्दः।

सौन्दर्यसम्पत्, तारुण्यं यस्यास्ते, ते च विभ्रमाः।
षट्पदान् पुष्पमालेव, कान् नाकर्षति सा सखे॥

अत्र, उत्कृष्टपुष्पविषये पुष्पशब्दः, निरुपपदो (११०) हि मालाशब्दः पुष्पस्रजमेवाभिधत्ते।

स्थितेष्वेतत्समर्थनम्॥ १०॥

न खलु, कर्णावतंसादिवत् जघनकाञ्चीत्यादि क्रियते।

जगाद मधुरां वाचं विग्दाक्षरशालिनीम्।

-इत्यादौ क्रियाविशेषणत्वेऽपि विवक्षितार्थप्रतीतिसिद्धौ, "गतार्थस्यापि विशेष्यस्य विशेषणदानार्थं क्वचित्प्रयोगः कार्यः"-इति न युक्तम् (१११)। युक्तत्वे वा,

चरणत्र-परित्राणरहिताभ्यामपि द्रुतम्।
पादाभ्यां दूरमध्वानं व्रजन्नेष न खिद्यते (११२)॥

-इत्युदाहार्यम्।

---

(१०९) हारो मुक्ताशब्दोक्तिति विश्व.। हार एव स्तनद्वयस्य हास'।

(११०) निरुपपदः विशेषणरहितः।

(१११) खिन्नेति हेतौ सप्तमी, अथवा 'न युक्तम्'-इत्यनेनान्वय.। 'गतार्थस्य'पदान्तरेणोक्तार्थस्य। अयं निष्कर्षः,-जगादेतिक्रियया उक्तार्थस्यापि 'वाचम्' इत्यस्य नानर्थक्यं, 'मधुराम्' इत्यादिविशेषणदानार्थं तदुपादानादिति वामनमतम्। मधुरं विग्दाक्षरं जगादेतिक्रियया क्रियाविशेषणतया विवक्षितार्थप्रतीतिसम्भवात् 'वाचम्'-इत्यनर्थकमेवेतिप्रकाशकृन्मतम्।

(११२) अत्र चरणत्रादीति विशेषणं न क्रियाविशेषणार्हमिति उत्तरक्रियासंयोगात्तत्कृतपादविहरणार्थकेन मूलधातुना उक्तार्थस्यापि

ख्यातेऽर्थे निर्हेतोरदुष्टता-

यथा,-

चन्द्रं गता पद्मगुणान्न भुङ्क्ते, पद्माश्रिता चान्द्रमसीमभिख्याम्।
उमासुखन्तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप्त लक्ष्मीः ।

अत्र, रात्रौ पद्मस्य सङ्कोचः, दिवा चन्द्रमसश्च निष्प्रभत्वं लोकप्रसिद्धमिति 'न भुङ्क्ते'-इति हेतुं नापेक्षते ।

अनुकरणे तु सर्वेषाम् ।

सर्वेषां श्रुतिकटुप्रभृतीनां दोषाणाम् । यथा,-

खगचक्षुषमद्राक्षमित्यादि कथयत्ययम् ।
पश्यैष च गवित्याह खलामानं यजेति च (११३)॥

वक्त्राद्यौचित्यवशाद्
दोषोऽपि गुणः क्वचित् क्वचिन्नोभौ ॥११॥

यत्तृ-प्रतिपाद्य-व्यङ्ग्य-वाच्य-प्रकरणादीनां महिम्ना दोषोऽपि क्वचिद्गुणः (११४), क्वचिन्न दोषो न गुणः। तत्र वैयाकरणादौ वक्तरि प्रतिपाद्ये च, रौद्रादौ च रसे व्यङ्ग्ये कष्टत्वं गुणः। क्रमेणोदाहरणम्,-

---

'यादाभ्याम्'-इत्यस्य नानर्थक्यम्, उक्तविशेषणदानर्थं तदुपात्तत्वादिति । तथाचार्यं सिद्धान्तः, यत्र यदुपादानं विना (विशेषणदानासम्भवेन) विवक्षितप्रतीतिविघातस्तत्रैव गतार्थत्वेऽपि तस्योपादानं युक्तं, नान्यत्रेति ।

(११३) चन्द्राक्षमिति श्रुतिकटु, (गौरिति वक्तव्ये) गवित्यनुचितसंस्कृति, खलामानमित्यप्रयुक्तम् ।

(११४) गुण इत्युक्तोत्कर्षक ।

दीधीवेवीट्समः कश्चिद्भुग्नदृङ्नोरभाजनम्।
क्ष्विप्त्यत्ययनिभः कश्चिद्यत्र सन्निहिते न ते (११५)॥
यदा त्वामहमद्राक्षं शब्दविद्याविशारदम्।
उपाध्यायं तदाऽऽपंसमस्प्राक्षञ्च सम्मदम्॥
अन्त्रंप्रोतबृहत्कपालनलककूरक्वणत्कङ्कण-
प्रायप्रेङ्खित भूरिभूषण-रवैराघोषयन्त्यम्बरम्।
पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लसद्-
व्यालोलस्तनभारभैरववपुर्दर्पोद्धतं धावति (११६)॥
वाचस्पत्यादयथा,-
मातङ्गाः, किमु वल्गितैः, किमफलैराडम्बरैर्जम्बुकाः,
सारङ्गाः, महिषाः, मदं व्रजत किं, शून्येषु शूरा न के।
कोपाटोप—समुद्भटोत्कट—सटा—कोटेरिभारैः पुनः
सिन्धुध्वानिनि ऊर्ह्वते स्फुरति यत् तद्गर्जितं गर्जितम्॥

---

(११५) "दीधीवेवीटाम्" (१।१।६) इति, "क्ष्विदिति च" (१।१।५ इति सूत्रेण च तत्रिषेधः।

(११६) 'अन्त्रैः' आँतड़ि Entrail इति नाम्ना प्रसिद्धैः, 'प्रोतानि' ग्रथितानि बृहन्ति 'कपालानि' शिरसः खर्पराः (खुली Skull इति भाषा), 'नलकानि' देहान्तर्वर्त्तीनि नली Tube नाम्ना प्रसिद्धानि च यानि, तान्येव क्रूरं क्वणन्ति, शब्दयन्ति कङ्कणानि, 'तत्प्रायाणि' तद्बहुलानि 'प्रेङ्खितानि' चलितानि यानि भूरीणि भूषणानि तेषां रवैः। पूर्वं 'पीतं' पश्चात् 'छर्दितं' वान्तं रक्तमेव कर्दमस्तेन 'घनः' व्याप्तः, किंवा तस्य 'घनः' काठिन्यं (जमाट् Congeal इति भाषा) यत्र, एवंभूतः 'प्राग्भारः' बहुभागो ययोः, तौ। अतएव घोरं विकटम् 'उल्लसन्तौ' प्रकाशमानौ 'व्यालोलौ' चञ्चलौ च यौ स्तनौ तावेव भारः गुरुत्वम्, तेन 'भैरवं' भीषणं वपुर्येषां सः। यत्र घोरश्चो रवः।

अत्र, सिंहे वाच्ये परुषाः शब्दाः। प्रकरणवशाद् यथा,-

रक्ताशोक, क्षणोदरी क्व नु गता त्वत्काऽनुरक्तं जनम् ?
नो दृष्टेति मुधैव चालयसि किं वातावधूतं शिरः ।
उत्कण्ठा-घटमान-षट्पद-घटा-संघट्ट-दष्ट-च्छद-
स्तत्पादाहतिमन्तरेण भवतः पुष्पोद्गमोऽयं कुतः ? ॥

अत्र, शिरोधूननेन कुपितस्य वचसि ।

क्वचिन्नीरसे न गुणो न दोषः । यथा-

शीर्णघ्राणाङ्घ्रिपादान् घृणिभिरपघनैर्घर्घराव्यक्तघोषान्
दोर्घाघ्रातानघौघैः, पुनरपि घटयत्येक उल्लाघयन् यः ।
घर्मांशोस्तस्य वोऽन्तर्द्विगुण-घन-घृणा-निघ्न-निर्विघ्न-वृत्ते-
र्वृत्तार्घाः सिद्धसङ्घैर्विदधतु घृणयः शीघ्रमंहोविघातम्(११७) ॥

अप्रयुक्तनिहतार्थौ श्लेषादावदुष्टौ । यथा,-

येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो
यश्चोद्वृत्त भुजङ्गहारवलयोगङ्गाश्च योऽधारयत् ।
यस्याङ्घ्रिं शिरसि स्मरन्ति सुरयश्च नामामरा:,
पायात्स स्वयमन्धकक्षयकरस्त्वां सर्वदोमाधवः (११८) ॥

---

(११७) 'घृणिभिः' अनुद्घाटदैः । 'अपघनैः' अर्थैः. अर्थादवयवैरप-घटितानि, 'घटयति' नूतनावयवैः संबध्नाति, 'उल्लाघयन्' नीरोगीकुर्वन्, 'अन्तः' हृदये द्विगुणा 'घना' निबिड़ा अभीष्टदा या 'घृणा' कृपा, तया 'निघ्ना' तदायत्ता, 'निर्विघ्ना' विघ्नविनाशिनी 'वृत्तिः' व्यवसायो यस्य । 'घृणयः' किरणाः, 'अंहो' दुरितम् । यद्यपि श्लेषेऽपि काव्ये सतोऽपि भङ्गिभावस्य न प्राधान्यमिति नीरसत्वव्यपदेशः ।

(११८) माधवपक्षे, 'अभवेन' अजन्मना । 'अन' यकटं । खल 'बलिजित्काय.' 'स्त्रीकृतः' नीहिनीत्वतां प्रापितः । 'उद्वृत्तभुजङ्ग'

अत्र, माधवपक्षे यमिमदन्धकक्षयशब्दौ अप्रयुक्तनिहतार्थौ।

अश्लीलं क्वचिदुणः। यथा, सुरतारम्भगोष्ठ्याम्,

("ह्यर्थैः पदैः पिशुनयेच्च रहस्यवस्तु"-इतिकामशास्त्रस्थितौ

करिरूपेण संवाधे प्रविश्यान्तर्विलोड़िते।

उपसर्पन् ध्वजः पुंसः साधनान्तर्विराजते (११९)॥ (त्री०)

यमकथासु,-

उत्तानोच्छूनमण्डूकपाटितोदरसन्निभे (१२०)।

क्लेदिनि स्त्रीव्रणे सक्तिरक्षमेः कस्य जायते॥ (जु०)

निर्वाणवैरदहनाः प्रथमादरीणाम्,

नन्दन्तु माण्डतनयाः सह माधवेन।

रक्तप्रसाधितभुवः हतविग्रहाश्च

स्वस्था भवन्तु कुरुराजसुताः सभृत्याः (१२१)॥

कालियसर्पस्य हन्ता। 'दनां' शब्दानां (नाम्नां) लयो यत्र सः, नामरूपात्मकजगतो ब्रह्मणि लय इति वेदान्तविदनुमतम्। 'खगं' गोवर्द्धनं, 'गां' पृथिवीं। यमिन मन्यातीति व्युत्पत्त्या यमिमयो राष्ट्रो. गिरोद्धर इति 'अन्धकाना' यादवानां क्षयस्य निवारणस्य कर्त्तेत्यर्थः। शिवपक्षे 'बलिजित्-काय' विष्णुशरीरं, 'पुरा' त्रिपुरासुरवधकाले, 'अश्लीलः' बाणरूपतां प्रापितः। 'अन्धकक्षयः' अन्धकासुरस्य नाश इत्यर्थः। सर्व्वदा उमाधवः इति पदविभागः।

(१२९) प्रस्तुतपक्षे पुंसो ध्वज केतुः। साधनं सेना।

(१२०) उत्तान. वैपरीत्येन स्थितः। उच्छूनः शोथवान्।

(१२१) प्रकृतपक्षे, 'प्रथमात्' पाण्डवलाभमात्। 'रक्ता' अनुरक्ता प्रकर्षेण साधिता वशीकृता च भूर्यैः। 'हतविग्रहाः' 'हतो' निहतो 'विग्रह.' युद्धव्यग्रो येषाम्। 'स्वस्था.' निश्चिन्ता इत्यर्थः। अथ च

यत्र, भाव्यमङ्गलसूचकम् । सन्दिग्धमपि वाच्यमहिम्ना क्वचिन्नियतार्थप्रतीतिहेतुत्वेन व्याजस्तुतिपर्य्यवसायित्वे गुणः ।

यथा,-

पृथुकार्त्तस्वरपातं भूषितनिःशेषपरिजनं देव ।
विलसत्करेणुगहनं संप्रति समभावयोः सदनम् (१२२)॥

प्रतिपाद्यप्रतिपादकयोर्भेदे सति अप्रतीतं गुणः । यथा,-

आत्मारामा विहितरतयो निर्विकल्पे समाधौ,
ज्ञानोद्रेकाद्विघटितमनोग्रन्थयः सत्त्वनिष्ठाः ।
यं वीक्षन्ते कमपि तमसां ज्योतिषां वा परस्तात्,
तं मोहान्धः कथमयमसुं वेत्ति देवं पुराणम् ॥

स्वयं वा परामर्शे । यथा,-

षडधिकदशनाडीचक्रमध्यस्थिताला (१२३)
हृदि विनिहितरूपः सिद्धिदस्तद्विदा यः ।
अविचलितमनोभिः साधकैर्मृग्यमाणः
स जयति परिणद्धः शक्तिभिः शक्तिनाथः ॥

'प्रथमाः' नाथाः, रुधिरेण मण्डितस्य शवशरीरस्य खर्गस्य मांस इत्यर्थो व्यज्यते ।

(१२२) श्लेषपक्षे पृथुकानां बालानामार्त्तस्वरः पात्र, भवि उचिता यविता भूषिताः, विलसत्कानां रेणुभिरित्यर्थः । राजपक्षे पृथूनि कार्त्त स्वरस्य सुवर्णस्य पात्राणि यत्र, करेणु हस्ती हस्तिशावको वा यत्र ।

(१२३) षडधिका दश षोड़श या नाड्य इडा-पिङ्गलादयस्तासां चक्रं कथिपूराख्य (हृदयस्थित) तन्मध्ये स्थित आत्मा स्वरूपं यस्य ।

अधमप्रकृत्युक्तिषु ग्राम्यो गुणः। यथा,-

फुल्लुक्करं कलमकूरणिहं वहन्ति
जे सिन्धुवारविडवा मह वल्लहा दे।
जे गालिदस्स महिसीदहिणो सरिच्छाः,
दे किंच मुद्धविअड्ढलपसूणपुच्छाः (१२४)॥

अत्र, कलम कूर महिसी दहि शब्दा ग्राम्या अपि विदूषकोक्तौ।

न्यूनपदं क्वचिद्गुणः। यथा,-

गाढ़ालिङ्गन यामनीकृत कुच प्रोद्भूत-रोमोद्गमा
सान्द्र-स्नेह-रसातिरेक-विगलच्छ्रीमन्नितम्बाम्बरा।
मा मा मानद, मातिमामलमिति श्यामाम्बरोल्लापिनी,
सुप्ता किं नु! मृता नु किं! मनसि किं लीना। विलीना नु किम्!॥

क्वचित् न गुणो न दोषः। यथा,-

तिष्ठेत् कोपवशात् प्रभावपिहिता! दीर्घं न सा कुप्यति,
स्वर्गायोत्पतिता भवेत् मयि पुनर्भावार्द्रमस्या मनः।
तां द्रष्टुं विबुधद्विषोऽपि न च मे शक्ताः पुरोवर्त्तिनीं,
सा चात्यन्तमगोचरं नयनयोर्य्यातेति कोऽयं विधिः॥

अत्र,'पिहिता'-इत्यतोऽनन्तरं, नैतदृयतः-इति, एतैर्न्यूनैः पदैः विशेषविधेरकरणान्न गुणः, उत्तरा प्रतिपत्तिः पूर्वां प्रतिपत्तिं बाधते इति न दोषः (१२५)।

---

(१२४) पुष्पोत्करं कलमशालिनिभं वहन्ति ये सिन्धुवारविटपा मम वल्लभास्ते। ये गालितस्य महिषीदधिनः सदृक्षास्ते किञ्च मुग्धविकचोत्पलपूतगन्धाः॥ -इति सं०। कलम धान्यविशेषः, कूर भक्तमिति देशी। विदूषकोक्तिर्मल्लिका।

(१२५) 'उत्तरा' 'दीर्घं न सा कुप्यति' इत्यादिरूपा परा, 'प्रतिपत्तिः' ज्ञान,

अधिकपदं क्वचिद्गुणः । यथा,-

यद् वञ्चनाङ्कितमतिर्बकचाटुगर्भं
कार्य्यान्मुखः खलजनः कृतकं ब्रवीति ।
तत्साधवो न, न विदन्ति, विदन्ति किन्तु,
कर्त्तुं दृया प्रणयभस्य न पारयन्ति ॥

अत्र, 'विदन्ति'-इति द्वितीयम् अन्ययोगव्यवच्छेदपरम् (१२६)।

यथा वा,

वद वद ! जितः स यत्नुः ? न हतो जल्पंश्च तव तवाग्रीति ।
चित्तं चित्तम् ! अरोदीद् हा हेति परं श्रुते मुखे ।
-इत्येवमादौ हर्षभयादिसूचके वक्तरि (१२७) ।

कथितपदं क्वचिद्गुणः(लाटानुप्रासे,अर्थान्तरसंक्रमितवाच्ये, विधितस्यानुवादत्वे च) । क्रमेणोदाहरणम्,-

सितकरकररुचिरविभा
विभाकराकार, धरणिधर, कीर्त्तिः ।
पौरुषकमला, कमला (१२८)
सापि तवैवास्ति नान्यस्य ॥ (ला०)

'पूर्वा' 'तिङेत् कोपवयात् ।' इत्यादिरूपा प्रथमा । अयं भावः, नैतदित्यादेरनुपादानेऽपि निषेधहेतुभूतस्य 'दीर्घं न सा कुरुते'इत्यादेरर्थेन निषेधो वाच्यत्वं प्रतीयते, अतस्तदनुपादानं न दोषाय ।

(१२६) यावत् एव विदन्ति वाक्ये इत्यर्थपरम् ।

(१२७) "विस्मये च विषादे च तथा दैन्येऽप्यधारणे ।
प्रसादने तथा हर्षे वाक्यमेकं द्विरुच्यते ॥" इति ।

(१२८) पराक्रमलक्ष्मीः लक्ष्मीश्चेत्यर्थः ।

ताला जाअन्ति गुणाः,
जाला दे सहिअएहिं घेप्पन्ति ।
रइकिरणाणुग्गहिआइं होन्ति
कमलाइं कमलाइं (१२९) ॥ (अ०)
जितेन्द्रियत्वं विनयस्य कारणं,
गुणप्रकर्षो विनयाद्वाप्यते ।
गुणप्रकर्षेण जनोऽनुरज्यते,
जनानुरागप्रभवा हि सम्पदः ॥ (वि०)

पतत्प्रकर्षमपि क्वचिद्गुणः। यथा,उदाहृते[१२७१०]"प्राग-प्राप्त"-इत्यादौ (१३०)। समाप्तपुनरात्तं क्वचिन्न गुणो न दोषः, यत्र न विशेषणमात्रदानार्थं पुनर्ग्रहणम्, अपि तु वाक्यान्तर-मेव क्रियते । यथाऽत्रैव "प्रागप्राप्त"-इत्यादौ (१३१) । अपदस्थसमासः क्वचिद्गुणः । यथा,-उदाहृते [१५८] "रक्ताशोक"-इत्यादौ (१३२) ।

---

(१२९) तदा जायन्ते गुणाः, यदा ते सज्जनहृदयैर्गृह्यन्ते ।
रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानीति सं० ॥ द्वितीयकमलपदं विकाशसौरभसौन्दर्यादिमत्कमलपरम् ।

(१३०) अत्र हि चतुर्थे पादे क्रोधाभावात् भङ्गेनैव पदं युक्तम् ।

(१३१) अस्य दूषकतायोजं हि जनितान्वयस्य पुनरन्वये निराकाङ्क्षता, सा च वाक्यान्तरकरणेन भवति, तत्र जनितान्वयेन केनाप्यनन्वयात् ; विशेषणदाने तु तेन विशेषणेन पुनरन्वये, जनितान्वयस्य विशेष्यस्य साकाङ्क्षेति।

(१३२) अत्र हि रङ्गारे दीर्घसमासस्यानौचित्यमित्यपदस्थोऽपि समास उद्वेगकं भवति क्रोधस्तत्कर्षयन् विप्रलम्भमेव पुष्णातीति गुणः ।

गर्भितं तथैव । यथा,-

होमि अवहत्थिअरेहो
णिरङ्कुसो अह विवेअरहिओ वि ।
सिविणे वि तुमम्मि मुणो
पत्तिहि भत्तिं ण पसुमरामि (१२३) ॥

अत्र, 'पत्तिहि'-इति मध्ये, दृढ़प्रत्ययोत्पादनाय । एवमन्यदपि लक्ष्यानुसारेण लक्ष्यम् (१२४) ॥

व्यभिचारिरसस्थायिभावानां(१२५)शब्दवाच्यता ।
कष्टकल्पनया व्यक्तिरनुभावविभावयोः ॥१२॥
प्रतिकूलविभावादिग्रहो दीप्तिः पुनः-पुनः ।
अकाण्डे प्रथनच्छेदौ(१२६),अङ्गस्याप्यतिविस्तृतिः॥१३॥
अङ्गिनोऽननुसन्धानं, प्रकृतीनां विपर्य्ययः ।
अनङ्गस्याभिधानञ्च रसे(१२७)दोषाः स्युरीदृशाः॥१४॥

---

(१२२) अवहत्थितरेखो निरङ्कुशोऽथ विवेकरहितोऽपि ।
स्वप्नेऽपि त्वयि पुनः प्रतीहि भक्तिं न प्रस्मरामीति संस्कृतम् ॥ अवहत्थिता अतिक्रान्ता रेखा मर्यादा येन सः । 'निरङ्कुश' यथेच्छाचारी ।

(१२४) 'अन्यत्' अदोषत्वादि, 'लक्ष्यात्' उदाहरणात्, 'लक्ष्यम्' निरूपणम् ।

(१२५) विद्यमाने रसस्य आस्वादात्मकस्य वाक्यजनितया अवाच्यतया च रसशब्देनात्र आस्वाद्यमानो विभावादिसम्बलित स्थायिभाव उच्यते, रसादिशब्दस्तु तत्रैव मुख्यः, केवलस्य स्थायिभावस्य रसशब्दवाच्यतायां महानेव दोषः, रत्यादिपदानां केवलरत्यादावेव मुख्यः इति भावेदः ।

(१२६) प्रथनच्छेदौ रसस्यैव ।

(१२७) 'रसे' रसते-इति व्युत्पत्त्या आस्वाद्यमाने रसभावादौ ।

स्वशब्दोपादानं व्यभिचारिणो (१२८) यथा,

सव्रीड़ा दयितानने, सकरुणा मातङ्गचर्माम्बरे,
सत्रासा भुजगे, सविस्मयरसा चन्द्रेऽमृतस्यन्दिनि।
सेर्षा जङ्गुसुतावलोकनविधौ, दीना कपालोदरे,
मार्व्वत्या नवसङ्गमप्रणयिनी दृष्टिः शिवायास्तु वः॥

अत्र व्रीड़ादीनाम्।

(व्यानम्रा दयितानने, सुकुलिता मातङ्गचर्माम्बरे,
सोत्कम्पा भुजगे, निमेषरहिता चन्द्रेऽमृतस्यन्दिनि।
भीलद्भ्रूः सुरसिन्धुदर्शनविधौ, म्लाना कपालोदरे
-इत्यादि तु युक्तम्)।

रसस्य स्वशब्देन शृङ्गारादिशब्देन वा वाचकत्वम्। क्रमेणोदाहरणम्,-

तामनङ्गजयमङ्गलश्रियं किञ्चिदुच्चभुजमूललोकिताम्।
नेत्रयोः कृतवतोऽस्य गोचरे काऽप्यजायत रसो निरन्तरः॥

आलोक्य कोमलकपोलतलाभिषिक्त-
व्यक्तानुरागसुभगामभिरामरूपाम्।
मध्येव बाल्यमतिवृत्य विवर्त्तमानः
शृङ्गारसीमनि तरङ्गितमातनोति॥

---

(१२८) अत्रेदं दूषणबीजम्-इति स्वशब्दे, विभावादिनाऽभिव्यक्तावेव चमत्कारास्वादयोरुत्कर्षः, वाच्यत्वेतु अनुद्भवापत्तेस्तयोरपकर्ष इति। एतच्च यत्र यस्य विभावादिना स्फुटतरं नाभिव्यक्तिमनुभवः, तत्र तस्य वाच्यत्वेऽपि न तयोरपकर्ष इति स्वपदोक्तिर्न दोष इति [१७१] वक्ष्यति। एवं रत्यादीनामास्वादत्व एव दोषो मतिवैराग्यतयाऽनास्वादत्वेऽपीति। एवं परत्रापि आस्वादाभावो दूषणबीजम् बोध्यम्।

स्थायिनो यथा,

संप्रहारे प्रहरणैः प्रहाराणां परस्परम् ।
ठणत्कारैः श्रुतिगतैरुत्साहस्तस्य कोऽभ्यभूत् ॥

अत्रोत्साहस्य ।

कर्पूरधूलिधवलद्युतिपूरधौत-
दिङ्मण्डले शिशिररोचिषि तस्य यूनः ।
लीलागिरोऽंशुकनिवेशविशेषकृत्ति-
व्यक्तक्षणोन्नतिरभून्नयनावनौ सा ॥

अत्र, उद्दीपनालम्बनरूपाः ग्रहारयोग्या विभावा अनुभाव-पर्य्यवसायिनः स्थिता इति कष्टकल्पना (१२८) ।

परिहरति रतिं, मतिं लुनीते,
खलति भयं, परिवर्त्तते च भूयः ।
इति पत विषमा दशास्य देहं
परिभवति प्रसभं, किमत्र कुर्म्मः ॥

अत्र, रतिपरिहारादीनामनुभावानां करुणादावपि सम्भवात् कामिनीरूपो विभावो बलतः प्रतिपाद्यः ।

---

(१२८) अनुभावं पर्य्यवसायिनि प्रहरणादावुत्साहादावेवेत्यर्थः, व्यापरसीति शेषः । अयं भावः, शाहस-चण्ड-मार्तण्डकोदण्डेति मम दृष्टेरतिक्रमे दृष्टेरुद्दण्डादि वस्तुनेव प्रथमं मम रतिव्यवहारयोग्य, मनो रतिव्यापारमनोनिरीक्षिणि विलम्ब । उद्दीपनस्तु 'अनुभावपर्य्यवसायिनि' इति पाठे अन्वयाभावा 'अनुभावानन्तरं व्यापारादिपर्य्यवसायिनः' इत्यर्थमाह ।

प्रसादे वर्त्तस्व, प्रकटय मुदं, सन्त्यज रुषं,
प्रिये! प्रायेणैते रजनिषु वतन्ति वचनाः।
निदानं सौख्यानां क्षणमभिमुखं, स्थापय मुखं
न मुग्धे! प्रत्येतुं प्रभवति गतः कालहरिणः॥

अत्र, ग्रहारे प्रतिकूलस्य शान्तस्यानित्यताप्रकाशनरूपो विभावस्तत्प्रकाशितो निर्वेदश्च व्यभिचारी (१४०) उपात्तः। णिद्धअ-रमणम्मि लोअणमहम्मि पडिए गुरुअणमज्झम्मि। सअलपरिहारहिअआ वणगमणं एव्व इच्छदि वहू (१४१)॥ अत्र सकलपरिहारवनगमने शान्तानुभावौ। (दूत्यना-द्यानयनव्याजेनोपभोगार्थं वनगमनं (१४२) चेत्, न दोषः॥

दीप्तिः पुनः-पुनर्यथा (१४३), कुमारसम्भवे रतिविलापे।
अकाण्डे प्रथनं यथा, वेणीसंहारे द्वितीयेऽङ्केऽनेकवीर-

---

(१४०) ग्रहारे उपात्तत्वेन अस्य व्यभिचारित्वम्। तेन विभावादिना प्रतिकूलरसाद्युपस्थित्या विरोधेन प्रकृतरसानास्वादमयत्वम्।

(१४१) निघृणरमणे लोचनपथं पतिते गुरुजनमध्ये।
सकलपरिहारहृदया वनगमनमेवेच्छति वधूरियं सर्वा॥

(१४२) निघृण इति भेदः। तथात्वे हि ग्रहारे एव पर्यवसानं न तु मानेऽपीति न दोषः। अत्र, गुरुजनसन्निधौ निघृणरमणदर्शने प्रकाशमद्वा वैरानुबन्धादि सम्भवात् न निघृणेत्यादिपदादेव ग्रहारप्रतीतिः।

(१४३) पुनःपुनर्दीप्तिर्दीपितस्यान्तरा अविच्छिद्य दीपनं अविच्छेदेन बहुशः प्रकाशनं। तच्च अङ्कुरादीनामेव दूरस्थं सम्भवीति केचित्। कुमारसम्भवे, "अथ, भोगपरायणा वशी"-इत्यादिना दीपितोऽपि मदनः "अथ सा पुनरेव" इत्यादिना पुनर्दीपितः। एवञ्च पुनःपुनरित्यारे वैरूप्यमिति दूषणमेवेदम्।

संचये प्रकृते, भानुमत्या सह दुर्योधनस्य शृङ्गारवर्णनम्(१४४)।

अकाण्डे छेदो यथा, वीरचरिते द्वितीयेऽङ्के 'करुण-मोचनाय गच्छामि'-इति राघवस्योक्तौ (१४५)।

अङ्गस्य अप्रधानस्य अतिविस्तरेण वर्णनं (१४६), यथा, हयग्रीववधे हयग्रीवस्य। अङ्गिनोऽननुसन्धानं (१४७) यथा, रत्नावल्यां चतुर्थेऽङ्के वाभ्रव्यागमने सागरिकाया विस्मृतिः।

प्रकृतयो दिव्या अदिव्या दिव्यादिव्याश्च, वीर-रौद्र-शृङ्गार-शान्त-रसप्रधाना धीरोद्धत-धीरललित-धीरप्रशान्ताः उत्तमाधम-मध्यमाश्च (१४८); तत्र रति-हास-शोकाद्भुतानि अदिव्योत्तमप्रकृतिवत् दिव्येष्वपि (१४९), किन्तु रतिः

---

(१४४) तदानीं करुणवीरादिरसप्रबन्धमेव मनो न शृङ्गाराद्यारे प्रवर्तेत, इति दोषः।

(१४५) तद्धि सीतां परशुरामभयात् व्याजेन निर्गमं प्रतिपादयन्ती रामस्यावीरत्वे पर्यवस्यतीति नायके रामे धीरत्वो नास्वादेत। इति दोष। करुणमोचनं विवाहदयमदिनोत्सवभेद। सङ्क्षिप्तवीरचरितेषु सर्वेषु करुणमोचनाय गच्छामीति पाठो नास्ति।

(१४६) 'अप्रधानस्य' प्रतिनायकादेर्वैकृतो वर्णने हि तत्रत एव अप्रकृतो रसादिः प्राधान्येनास्वादेत, न तु नायकगतः प्रकृतो रसादिरिति।

(१४७) 'अङ्गिनः' प्रधानस्य नायकस्य नायिकाया वा, अननुसन्धाने न तद्गतरसास्वादः।

(१४८) प्रकृतयो नायकादयः। दिव्या देवतैकरूपाः (इन्द्रादयः), अदिव्या मानुषैकरूपाः (वत्सराजादयः), दिव्यादिव्याः मानुषरूपेणावतीर्णा देवाः (रामादयः)। ते पुनर्धीरोदात्तादिभेदेन प्रत्येकं चतुर्विधा भूत्वा पुनः (गुणोत्कर्षापकर्षतत्साम्ये) उत्तमादिभेदेन प्रत्येकं त्रिधा भूता नवत्रिंशद्विधाः सम्पद्यन्ते।

(१४९) वर्णनीयानीति शेषः।

सम्भोगशृङ्गाररूपा उत्तमदेवताविषया न वर्णनीया, तद्वर्णनं हि पित्रोः सम्भोगवर्णनमिवात्यन्तमनुचितम्।

क्रोधं प्रभो, संहर संहरेति यावद्गिरः खे मरुतां चरन्ति।
तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार॥

-इत्युक्तवत् भ्रूकुट्यादिविकारवर्जितः क्रोधः सद्यःफलदः स्वर्ग-पातालगगनसमुद्रोल्लङ्घनाद्युत्साहश्च दिव्येष्वेव। अदिव्येषु तु यावदवदानं (१५०) प्रसिद्धमुचितं वा, तावदेव उपनिबद्धव्यम्, अधिकन्तु निबध्यमानमसत्यप्रतिभासेन, 'नायकवद् वर्त्तितव्यं, न प्रतिनायकवत्'-इत्युपदेशे न पर्य्यवस्येत्। दिव्यादिव्येषु उभयथापि। एवमुक्तस्य औचित्यस्य, दिव्यादीनामिव, धीरोदात्तादीनामप्यन्यथावर्णनं विपर्य्ययः (१५१)। तत्रभवान् भगवन्नित्युत्तमेन, न अधमेन; मुनिप्रभृतौ, न राजादौ; भट्टारकेति नोत्तमेन राजादौ (१५२), प्रकृतिविपर्य्ययापत्तेर्वाच्यम्।

---

(१५०) यावदवदानं दत्तं कर्म पूर्वं तेनानुचितमिति यावत्।

(१५१) एवं दिव्यादीनामप्यौचित्यस्यान्यथावर्णनमिव धीरोदात्तादीनामप्यौचित्यस्यान्यथावर्णनं विपर्य्यय इत्यन्वयः।

(१५२) अत्र प्रतिपुस्तकं विभिन्नः पाठः, तथाहि क्वचित् "भट्टारकेति राजादौ परमेश्वरेति न न क्वचिन्मुनिप्रभृतौ" इति पाठः, क्वचित्तूत्तमन्यथा। अयन्तु पाठो मदीयपुस्तकानुसारी, "तत्रभवान् भगवन्नित्युत्तमेनैव प्रयोक्तव्यं, नाधमेन; उत्तमेनापि मुनिप्रभृतावेव, न तु राजादौ; भट्टारकेति न राजादावुत्तमेन, किन्तु देवादावेव" इति मदीयः। "न राजादाविति, अधमेन तु राजादावेव न मुनिदेवादाविति केचित्" इति सङ्गच्छा। यदि 'न मुनिप्रभृतौ' इति पुस्तकेषु स्यात्, तदा 'केचित्'-इत्यनुपपन्नं स्यात्, अतश्च यदा मदीयेऽपि एवम्प्रकारकः कोऽपि पाठः, तस्मिन्नसाधुत्वात् मदीयस्य।

एवं देशकालवयोजात्यादीनां वेषव्यवहारादिकमुचितमेवोपनिबद्धव्यम् ।

अनङ्गस्य (रसानुपकारकस्य) वर्णनं यथा, कर्पूरमञ्जर्यां नायिकया स्वात्मना च कृतं वसन्तवर्णनमनादृत्य वन्दिवर्णितस्य राज्ञा प्रशंसनम् ।

'दृष्ट्या;'-इति नायिकापादप्रहारादिना नायककोपादिवर्णनम् (१५३) । उक्तं हि ध्वनिकृता,-

'अनौचित्यादृते नान्यत् रसभङ्गस्य कारणम् ।
औचित्योपनिबन्धस्तु रसस्योपनिषत्परा ॥'-इति (१५४) ॥

इदानीं क्वचिददोषा अप्येते,-इत्युच्यन्ते,-

न दोषः स्वपदेनोक्तावपि सञ्चारिणः क्वचित् ।

यथा,

औत्सुक्येन कृतत्वरा, सहभुवा व्यावर्त्तमाना क्रिया,
तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः ।
दृष्ट्वाग्रे वरमात्तसाध्वसरसा, गौरी नवे सङ्गमे
संरोहत्पुलका हरेण हसतान्निष्टा, शिवायास्तु वः ॥

अत्र, औत्सुक्यशब्द इव तदनुभावो न तया प्रतीतिकृत्(१५५)।

---

(१५२) नायिकापादप्रहारेण नायककोपस्य प्रायशोऽवस्थातः अनुचितमिति भेदः । अयं भावः,-एवंविधा अनौचित्यहेतवः रसदोषा भवन्तीत्यर्थपरेण कारिकायां 'दृष्ट्याः' इति पदेन एतदुक्तं भवति, अनौचित्यहेतवः सर्वे एव दोषा भवन्ति, परिगणितप्रकारस्तु प्रदर्शनार्थश्च इति।

(१५३) 'उपनिषत्' वेदसारभाग', नित्यरसस्वरूपभङ्गोपस्थापकवेदभागइव रसोपस्थितिनिदानमिति फलितार्थः ।

(१५५) अनौत्सुक्यस्य नैकोऽपि तादृशोऽनुभावादिरिति,

अत एव "दूरादुत्सुकम्" (४० ६०)-इत्यादौ व्रीडा-प्रेमादयनुभावानां विबलितत्वादीनामिव, उत्सुकत्वानुभावस्य सहसा-प्रसरणादिरूपस्य तथा प्रतिपत्तिकारित्वाभावादुत्सुकमिति स्थितम्।

सञ्चार्यादेर्विरुद्धस्य वाध्यस्योक्तिर्गुणावहा ॥१५॥

वाध्यस्योक्तिः न, न परं दोषः,यावत्प्रकृतरसपरिपोषकृत्। यथा,-

स्काकार्य्यं, अयलक्ष्मणः क च कुलम्-(६४ ६०)-इत्यादौ, अत्र, वितर्कादिषु उक्तेष्वपि चिन्तायामेव विश्रान्तिरिति प्रकृतरसपरिपोषः (१५६)।

येन उपात्तेन औत्सुक्यमसंपन्नं प्रतीयेत, येऽपि च स्वरादयः, ते नासाधारणाः, गुरुजनगञ्जनाभयादिनापि तेषां सम्भवात्, इति औत्सुक्यं स्वपदेनोपादीयते, व्रीड़ादीनान्तु असाधारण्यानुभावसत्त्वात् अनुभावमुखेनैव उपादानं युक्तम्, अतएव अमरुकविर्दूरादुत्सुकमितिश्लोके औत्सुक्यमेव केवलं स्वपदेनाभिदधत् व्रीड़ादीन् अनुभावमुखेन प्रतिपादयति स्म। तेनायं सिद्धान्त, येषां व्यभिचारिणां नासाधारण्यानुभावादिसम्भवस्त एव स्वपदेनोपादीयन्ते न सन्येऽपीति।

(१५६) अत्र हि प्रतिवरणं पूर्वभागोक्तानां श्रमाङ्गसञ्चारिणां वितर्कादीनाम्, उत्तरभागप्रतिपादितानाञ्च श्रङ्गाराङ्गसञ्चारिणाम् औत्-सुक्यादीनां यथोत्तरं बाधकतया चरमोक्तायां चिन्तायामेव बाधकत्वं पर्य्यवसन्-नमिति (विपक्षजयात् सैनिकोत्कर्षद्वारा राज्ञ इव) चिन्तोत्कर्षद्वारा श्रङ्गारस्यैव उत्कर्षइति। स चोत्कर्ष, वितर्कादीनां बाध्यतयोक्तावेव भवतीति गुणत्वं। तेन बाध्यमानैः यान्तस्य प्रतीत्यनुदयात् प्रकृतशृङ्गाररसास्वादविघातो नास्तीति न दोषत्वमिति।

(पाण्डु च्छामं वदनं, हृदयं सरसं, तवालसञ्च वपुः।
आवेदयति नितान्तं चेतियरोगं सखि, हृदन्तः (१५७)॥
-इत्यादौ साधारण्यं पाण्डुतादीनामिति न विरुद्धम्।
सत्यं मनोरमा रामाः, सत्यं रम्या विभूतयः।
किन्तु मत्ताङ्गनापाङ्ग भङ्गलोलं हि जीवितम्॥ वि०वि०)
-इत्यत्र, आदरमर्हद्भि वाध्यत्वेनैवोक्तम्। जीवितादपि अधिकमपाङ्गभङ्गस्यास्थिरत्वमिति प्रसिद्धभङ्गुरोपमानतया उपात्तं शान्तमेव पुष्णाति (१५८), न पुनः शृङ्गारस्यात्र प्रतीतिः।

---

(१५७) सरसं' अनुरसयुक्तं सानुरागञ्च।

'चेतियं चैत्यजल्पे परदाररतेऽपि च।

अन्यदेहचिकित्सार्हेऽसाध्यरोगे च जायते' इति विश्वः। अस्य, 'पाण्डुत्वाद्यनुभावपोषितस्य रोगस्य करुणाङ्गतया विरुद्धत्वेऽपि विप्रलम्भे समावेशात् अङ्गभावप्राप्त्या दोषत्वाभाव'-इति ध्वनिकृतम्। एतदयुक्तं, पाण्डुत्वादीनां ('व्याध्युन्मादाद्यपस्मारजाड्यमरणादिभिर्विप्रलम्भोऽभिनेतव्य'-इति भरतोक्त्या) रोगस्य विप्रलम्भसाधारण्यतया विरोधस्यैवाभावात्, इति प्रकाशकृतम्।

(१५८) मत्ताङ्गनापाङ्गस्येव शृङ्गारप्रतीत्या विरोधमाशङ्क्य परिहरति जीवितादिति, अयं परिहारः, शृङ्गारस्यानुभावाद्यप्रतीत्या न एतन्मात्रेण शृङ्गारप्रतीतिरिति न विरोधः, प्रत्युत उपमानतया उपात्तं तत् स्वस्य प्रसिद्धभङ्गुरत्वं तदातिशयञ्च उपस्थापयत् शान्तमेवोपकरोति, तथाहि, भङ्गुरोपमायां प्रसिद्धभङ्गुरस्यैव उपमानतानियमेन, उपमानस्य चातिशयनिश्चयेन च तस्य उपमानतया उपादानादेव प्रसिद्धभङ्गुरत्वतदातिशये उपस्थीयत इति। प्रसिद्धेति प्रसिद्धभङ्गुरञ्च तत् उपमानञ्चेति तस्य भाव इति विग्रहः।

तदङ्गाप्रतिपत्तेः । न तु, विनेयोन्मुखीकरणमत्र परिहारः, शान्तशृङ्गारयोर्नैरन्तर्य्यस्याभावात्, नापि काव्यशोभाकरणम्, रसान्तरादनुप्रासमात्राद्वा तथाभावात् (१५९) ।

आश्रयैक्ये विरुद्धो यः, स कार्य्यो भिन्नसंश्रयः(१६०)।
रसान्तरेणान्तरितः, नैरन्तर्य्येण यो रसः ॥१६॥

वीरभयानकयोरेकाश्रयत्वेन विरोध इति प्रतिपक्षगतत्वेन भयानको निवेशयितव्यः । शान्तशृङ्गारयोस्तु नैरन्तर्य्येण विरोध इति रसान्तरमन्तरे कार्य्यं । यथा नागानन्दे, शान्तस्य जीमूतवाहनस्य, अहो गीतम् ! अहो वादितम् ! -इत्यद्भुतमन्तर्निवेश्य मलयवती प्रति शृङ्गारो निबद्धः । न परं प्रबन्धे, यावदेकस्मिन्नपि वाक्ये रसान्तरव्यवधिना विरोधो निवर्त्तते । यथा,-

भूरेणुदिग्धान्, नवपारिजात-
मालारजोवासितवाङ्कमध्याः ।
गाढं शिवाभिः परिरभ्यमाणान्,
सुराङ्गनाश्लिष्टभुजान्तराला: ॥

---

(१५९) 'भयस्यैवात्र शृङ्गारप्रतीतिः, परन्तु तया गुडजिह्विकान्यायेन शिथिलमपि अभिसन्धीयत्य यान्ते निवेश्यन्ते इति अदोषता । यद्वा काव्यशोभानिमित्तमेव तदुपादानमतोऽदोषता'-इति ध्वनिकारसमाधानं दूषयति न त्विति । अभावादिति विरोधेनेति शेषः । 'तथाभावात्' काव्यशोभात्वात् ।

(१६०) अत्राश्रयसंश्रयशब्दौ आलम्बनाधारोभयपरौ, तेनालम्बनैक्येन विरोधे भिन्नालम्बनतया निवेश्य . आधारैक्ये च [illegible]

सद्योषितैः क्रव्यभुजां स्फुरद्भिः
पद्यैः खगानासुपवीज्यमानान् ।
संवीजिताश्चन्दनवारिसेकैः
सुगन्धिभिः कल्पलताद्रुफूलैः ॥
विमानपर्य्यङ्कतले निषण्णाः
कुतूहलाविष्टतया तदानीम् ।
निर्दिश्यमानान् ललनाङ्गुलीभि-
र्वीराः स्वदेहान् पतितानपश्यन् ॥

अत्र, बीभत्साश्चर्यारयोरन्तर्वीररसो निवेशितः (१६१) ॥

स्मर्य्यमाणो विरुद्धोऽपि, साम्येनाथ विवक्षितः ।
अङ्गिन्यङ्गत्वमापन्नौ यौ, तौ न दुष्टौ परस्परम्॥१७॥

अयं स रसनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥

एतत् भूरिश्रवसः समरभुवि पतितं हस्तमालोक्य तद्बन्धू-
रभिदधौ । अत्र पूर्वावस्थास्मरणं श्रृङ्गाराङ्गमपि करुणं

---

(१६१) भूरेषुदिग्धेत्यादिना अर्जुनविशेषणेन बीभत्सः, मन्दारिजातेत्यादिना अर्जुनविशेषणेन श्रृङ्गारः, अनयोश्च निर्देशक्रमेण प्रतीतिः । एवं भूरेषुदिग्धत्वादेः, मन्दारिजातमालारजोवासितत्वादेश्च रणोत्साहमूलकतया रणोत्साहप्रतीत्या वीररसः । एतच्च प्रथमतो बीभत्सः, ततो वीरः, ततश्च श्रृङ्गारः, ततः पुनर्वीर इति व्यत्यासम् । तेनात्रत्यांशभेदात् बीभत्सश्रृङ्गारयोरविरोधः । वीरस्य आलम्बनगत प्रतियोद्धृ, श्रृङ्गारस्य तु अर्जुना इति आलम्बनभेदादनयोरप्यविरोधः । "यद्यपि अत्र वीर एव प्रधानः, अन्यौ च तदभिचारित्वादिति न विरोधस्तथाप्येतावदविरोधः सम्भवतीति तदाहृतम्" इति प्रदीपः ।

परिपोषयति (१६२) ।

दन्तैः क्षतानि; करजैश्च विपाटितानि,
प्रोद्भिन्नसान्द्रपुलके भवतः शरीरे ।
दत्तानि रक्तमनसा मृगराजवध्वा
जातस्पृहैर्मुनिभिरप्यवलोकितानि ॥ (१६३)

अत्र, कामुकस्य दन्तक्षतादीनि यथा चमत्कारकारीणि तथा जिनस्य । यथा वा, परः स्पृहारी तदवलोकनात् सस्पृहः तद्वत् एतद्दृष्ट्यो मुनय इति साम्यविवक्षा (१६४) ।

---

(१६२) योग्यावस्थायां पूर्वावस्थाधारणस्य करणोद्दीपकत्वात् । शृङ्गाराङ्गतया शृङ्गारोऽपि कृतः । स्मृतस्य तस्य प्राधान्येनास्वाद्यत्वाभावादविरोधः ।

(१६३) मरुदेव मुमुक्षया स्वापत्यं जिघांसवे सिंहे स्वशरीरं दत्तवन्तं जिनदेवं प्रतीयवस्तुतिः । एवत्र परपरिताषदर्शनात् स्वपरत्वादनुरागात् पुनरुक्तम् ।

(१६४) अक्षयोः साम्यविवक्षया अङ्घ्रिणोरपि रसयोः साम्यं विवक्षितमित्याहाति । अत्र हि प्रकरणेन जिनस्य दयावीरत्वं दृष्ट्वा अन्वयव्यतिरेकाभ्यां शृङ्गारोऽपि उपलक्ष्यते, उभयोरेव सिंही आलम्बनं, न च विरोधिनोरसयोरेकालम्बनतया प्रतीतिविरुद्धमिति, एवं मुनिभिरित्यनेन मुनिषु यान्ति इव जातस्पृहैरित्यादिना अन्वयव्यतिरेकाभ्यां शृङ्गारोऽपि प्रतीयते, न चानयोः एकालंबनत्वं प्रतीतिविरुद्धमिति विरोधपरिहारता । साम्यविवक्षायान्तु शृङ्गारस्य उपमानत्वेन मानविषयालम्बनतया, मानवनिष्ठतया, पूर्वसिद्धतया च प्रतीतिः, वीरस्य सिंहालम्बनतया जिननिष्ठतया च प्रतीतिः, मानस्य च मुनिगतत्वेन तदाधीनत्वेन च प्रतीतिरिति न विरोधः । जिनस्य दैवं कर्म विषयजनकमिति प्रतीयमानोऽपि विषयो दयावीरत्वेन दुःखार्ति मात्रालुप्तो एव, मार्दि च वस्तुनिष्ठविषया रतिरत्रापि तेनेति वीर एव प्रधानम् ।

क्रामन्त्यः क्षतकोमलाङ्गुलिगलद्रक्तैः सदर्भाः स्थलीः
पादैः, पातितयावकैरिव, पतद्बाष्पाम्बुधौताननाः ।
भीता भर्तृकरावलम्बितकराश्चक्रुर्नार्यो ऽधुना
दावाग्निं परितो भ्रमन्ति पुनरप्युद्ग्रन्थिवाहा इव (१६५) ॥[१]

अत्र, चाटुके राजविषया रतिः प्रतीयते, तत्र करुण इव शृङ्गारोऽप्यङ्गमिति तयोर्न विरोधः (१६६) । (यथा (१६७),

एहि, गच्छ ; पतोत्तिष्ठ, वद, मौनं समाचर ।
एवमाद्यागमैर्मुग्धैः क्रीडन्ति धनिनोऽर्थिभिः ॥

अत्र, एहीति क्रीड़ति, गच्छेति क्रीड़तीति क्रीड़नापेक्षयोः आगमनगमनयोर्न विरोधः ।

क्षिप्तो हस्तावलग्नः, प्रसभमभिहतोऽप्याददानोऽंशुकान्तं,
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण ।
आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः,
कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः ॥[२]

इत्यत्र त्रिपुररिपुप्रभावातिशयस्य करुणोऽङ्गम् (१६८),

---

(१६५) विवाहाङ्गलाजहोमे प्रायो वधूनामेतादृशी अवस्था भवति ।

(१६६) शोच्यावस्थात करुण विवाहावस्थातश्च शृङ्गारः, द्वयोरपि अनयोर्नृपविषयकरतिभावेऽङ्गता, 'एतादृशो हि अस्य राज्ञः प्रभावः', येनैषाम् एतादृशी अवस्था जाता, येन चैषां पुनर्विवाह उल्लेख्यते' इति प्रत्ययात् । एवञ्चैककार्य्यव्यग्रयोर्भृत्ययोरिवानयोः (स्वभावतो विरोधिनोरपि) नात्र विरोधः प्रसरति ।

(१६७) प्रधानाङ्गभूतयोर्विरोधिनोरप्यविरोधं दृष्टान्तेन दृढयति यथेति ।

(१६८) । करुणोऽङ्गमिति करुणोद्दीपनविभावस्य त्रिपुरपुरस्त्रीनेक्षणस्य त्रिपुररिपुप्रभावातिशयाधीनत्वात् । एवञ्च त्रिपुरप्रभावातिशयस्य त्रिपुररिपुविषयकरतिभावोद्दीपनविभावत्वात् अङ्गिनि त्रिपुररिपुविषयकरति-

तस्य तु शृङ्गारः ; तयापि न करुणे विश्रान्तिरिति तस्य अङ्गतैव। अथ वा (१६८), प्राक् यया कामुक आचरति स्म, तया धराग्निरिति शृङ्गारपोषितेन करुणेन मुख्य एवार्थ उपोद्बलयते। उक्तं हि,-

'गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते।
प्रधानस्योपकारे हि तया भूयसि वर्त्तते॥' (१७०) इति।

प्राक् (४७०) प्रतिपादितरूपस्य रसस्य रसान्तरेण न विरोधः, नाप्यङ्गाङ्गिभावो भवति (१७१) इति रसग्रहणेनात्र स्थायिभाव उपलक्ष्यते॥

इति काव्यप्रकाशे दोषदर्शनो नाम सप्तम उल्लासः॥

भावे करणोऽङ्गमिति पर्यवस्यति। एवं पूर्वं मयूरो यया करालम्बनादिकमू अकार्षीत्, तयेदानीं धराग्निरित्युपभानभावेन, पूर्वोक्तस्यानुभावतोपबृंहणेन च शृङ्गार करुणस्याङ्गं यतू परम्परया प्रधानस्य भावस्याङ्गमिति विरोधिनोरप्यनयो प्रधानेऽङ्गभावेनाविरोध। यद्यपि शृङ्गारापेक्षया करुणोऽङ्गी, तथापि तस्य प्रकर्षणपर्यवसान नास्ति, तेनापि भावप्रकर्षणात् रसत्वमेव तदिति तात्पर्यम्।

(१६८) अन्य यथा छेदे औदासीन्येन खड्गनिर्माता तत्कर्तयतू वा भित्त्वा नाङ्कं, तथा करुणस्तत्कर्तयन्नपि शृङ्गारो नाङ्गिनि भावेऽङ्गमिति शेषत्वरक्षणं भावाङ्गतया तस्य शृङ्गारस्य औदासीन्यादित्यायङ्का पक्षान्तरम् उपन्यस्यति अथ वेति। यथा केवल खड्गोन छेदेऽङ्गं किन्तु निपातितः स इति निपातयितुः छेदेऽङ्गभाव, तथा केवलः करुणो नाङ्गाङ्गितया विवक्षित, किन्तु शृङ्गारेणोक्त यत्न स इति तत्कर्तयितु शृङ्गारस्याङ्गभावोऽत्रत इति विद्वान्त। उदाहरणग्रहणेनैतत् प्रतिपादितम्,-यतू, अङ्गिनि वाक्यात् परम्परया वा अङ्गस्यानुग्रहेण विरोध इति।

(१७०) 'गुण' अङ्गं, 'संस्कार' उत्कर्षं, 'तया' उक्ताङ्गसंस्कारत्व।

(१७१) रसस्य वेद्यान्तरसम्पर्कशून्यतया रसान्तरेणाग्रहणे।

॥ अष्टम उल्लासः ॥



एवं दोषानुक्त्वा गुणालङ्कारविवेकमाह,-

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः(१)॥१॥

आत्मन एव हि यथा शौर्यादयः, न आकारस्य ; तथा, रसस्यैव माधुर्यादयो गुणाः, न वर्णानाम् । क्वचित्तु शौर्यादिसमुपचितस्य आकारमहत्त्वादेर्दर्शनात् 'आकार एवास्य शूरः'-इत्यादेर्व्यवहाराद्यत्र अशूरेऽपि विततास्यतित्वमात्रेण 'शूरः' इति (२), क्वापि शूरेऽपि मूर्त्तिलाघवमात्रेण 'अशूरः'-इति अविश्रान्तप्रतीतयो(३)यया व्यवहरन्ति, तद्वत् मधुरादिव्यञ्जक-सुकुमारादिवर्णानां मधुरादिव्यवहारप्रवृत्तेः,अमधुरादिरसाङ्गानां वर्णानां सौकुमार्यादिमात्रेण माधुर्यादि, मधुरादिरसोपकरणानां तेषामसौकुमार्यादेरमाधुर्यादि रस-

---

(१) 'अचलस्थितय' नियतावस्थाना', नैयत्यञ्च रसेन तदुपकारेण च बोध्यम्, तेन रसं विना ये न तिष्ठन्ति, तिष्ठन्तश्चावश्यं रसमुपकुर्व्वन्तीत्यर्थः । इदञ्च स्वरूपकथनम्, अचलत्वन्तु रसोत्कर्षकत्वे सति रसधर्म्मत्वम्, तथात्वे सति रसनियतस्थितिकत्वं, नियमेन रसोपकारकत्वं वेति विवेकं बोध्यमिति प्रदीप ।

(२) अत्र व्यवहरन्तीत्यविभेनान्वय', एवं परत्र, माधुर्यादि-इत्यत्रापि ।

(३) न विश्रान्ता यावार्थे पर्य्यवसन्ना प्रतीतिर्येषां ते, अदूरदर्शिन इति ।

पर्य्यन्तविश्रान्तप्रतीतिबन्ध्या व्यवहरन्ति (४)। अत एव माधुर्य्यादयो रसधर्म्माः समुचितैर्वर्णैर्व्यज्यन्ते, नतु वर्णमात्राश्रयाः (५)। यथैषां व्यञ्जकत्वं, तयोदाहरिष्यते।

उपकुर्व्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः(६)॥२॥

ये वाचकवाचकलक्षणाङ्गातिशयमुखेन मुख्यं रसं सम्भविनम् उपकुर्वन्ति, ते कण्ठाद्यङ्गानामुत्कर्षाधानद्वारेण शरीरिणोऽपि उपकारका हारादय इव, अलङ्काराः; यत्र तु नास्ति रसः, तत्रोक्तिवैचित्र्यमात्रपर्य्यवसायिनः। क्वचित्तु सन्तमपि न उपकुर्व्वन्ति।

---

(४) अयं भावः,-वितताकारस्य शुकुमारवर्णादीनाश्चाश्रयौचित्यवशेन व्यञ्जकत्वप्रतिपत्तये उपचारेण 'अस्य अयमाकार एव शूरः, एते वर्णा एव मधुराः' इत्यादि क्वचित् अभियुक्ता व्यवहरन्ति, तत्त्वतोऽयमोऽनभिव्यक्तवितताकारस्यैव शूरत्वं, शुकुमारवर्णादीनामेव माधुर्य्यादि अन्वयमाना तथैव व्यवहरन्ति, नैतावता गुणस्य वर्णधर्म्मत्वसिद्धिरिति।

(५) अभ्युपगन्तुं शक्या इति शेषः। 'मधुरा रचना' इत्यादिव्यवहारादेव अभियोगेन रचनायामपि तदभ्युपगमप्रसङ्गादिति भावः। तथाच गुणस्य रसैकधर्म्मत्वे लाघवं, वर्णरचनोभयवृत्तित्वे गौरवमिति स्थितम्। एतदर्थमेव 'वर्णमात्राश्रयाः' इत्युक्तम्।

(६) 'सन्तं' स्फुटतयावस्थितम्। यं परम्। अङ्गद्वारेणेति, अनेन रसधर्म्मत्वं निरस्तम्। इदमपि सङ्गच्छमानम्, अलङ्काराः, रसोपकारकत्वेऽपि तद्वृत्तित्वम्, तथात्वे सति रसानित्यतावस्थितिकत्वम् अनित्यत्वेन रसोपकारकत्वं वा इति प्रदीपः।

यथाक्रममुदाहरणानि,-

अपसारय घनसारं, कुरु हारं दूर एव, किं कमलैः ।
अलमलमालि, मृणालैः, इति यदति दिवानिशं बाला ॥

-इत्यादौ वाचकमुखेन,

मनोरागस्तीव्रं विषमिव विसर्प्यत्यविरतं,
प्रमाथी निर्धूमं ज्वलति विधुतः पावक इव ।
छिनत्ति प्रत्यङ्गं ज्वर इव गरीयानिति-दृतः,
न मां त्रातुं तातः प्रभवति, न चाम्बा, न भवती ॥

-इत्यादौ वाच्यमुखेन अलङ्कारौ रसमुपकुरुतः (७) ॥

चित्ते विघट्टदि, ण टुट्टदि सा गुणेसु,
सेज्जासु लोटदि, विसट्टदि दिम्मुहेसुं ।
बोलम्मि वट्टदि, पवट्टदि कव्वबन्धे,
धाणे ण तुट्टदि चिरं, तरुणी तरट्टी (८) ॥

-इत्यादौ वाचकमेव (९),

---

(७) पूर्वत्र, शृङ्गारव्यञ्जक-रेफात्तप्राय शब्दसङ्घट्टं तु शृङ्गारमुपकरोति । उत्तरत्र तु, 'विषमिव'-इत्युपमाशब्देन विसर्पणव्याप्तिप्रयत्नोत्था विप्रलम्भोत्कर्ष इति प्रदीप । 'स्वच्छन्दोच्छ्वसद्'-इत्यादौ चित्रकाव्ये न कश्चित् स्फुटो रस इति नात्र तदुदाहृतम ।

(८) चित्ते विघटते, न तुष्यति सा गुणेषु,
शय्यासु लुठति विसर्पति दिङ्मुखेषु ।
वचने वर्त्तते, प्रवर्त्तते काव्यबन्धे,
ध्याने न तुष्यति चिरं तरुणी प्रगल्भा ॥-इति छ० ।

विघटते चमत्करोति, चित्तावस्थरूप कर्म करोतीत्यर्थ इति उद्योतकृत्, विघटते लुप्यति विवेकहीना भवतीति तु वय । तरट्टी प्रगल्भेति देशीति मङ्केश्वर ।

(९) चमत्करोतीति शेषः । न तु रसमिति पदेयान्वय । अत्र हि शृङ्गारो रस, तस्य तत्रैव टवर्गात्तप्राणोऽनुप्रास इति ।

मित्रे जातेऽपि गते, सरोरुहवने बन्धानने ताम्यति,
क्रन्दत्सु भ्रमरेषु, वीक्ष्य दयितासङ्गं पुरः सारसम्।
चक्राङ्केन वियोगिना बिसलता नास्वादिता नोज्झिता,
कण्ठे केवलमर्गलेव निहिता जीवस्य निर्गच्छतः॥
-इत्यादौ वाच्यमेव, नतु रसम्। अत्र बिसलता न जीवं रोद्धुं क्षमेति प्रकृतानुगुणोपमा (१०)।

एष एव (११) च गुणालङ्कारप्रविभागः। एवञ्च (१२) 'समवायवृत्त्या शौर्य्यादयः, संयोगवृत्त्या तु हारादय' इत्यस्तु गुणालङ्काराणां भेदः, ओजःप्रभृतीनामनुप्रासोपमादीनाञ्च उभयेषामपि समवायवृत्त्या स्थितिरिति गड्डलिकाप्रवाहेणैषां

---

(१०) 'अत्र' एतादृशविप्रलम्भावस्थायां, 'जीवं रोद्धुं' जीवनिरोधाय, 'न क्षमा' नार्पयितुं योग्या। जीवनिरोधनिमित्तं कण्ठे बिसलतार्पणमनुचितम्-इत्यर्थः; विप्रलम्भोत्कर्षे हि जीवनिर्गमोपाय एवावलम्ब्यते, न तु तन्निरोधोपाय इति इयमुपमा 'प्रकृतं' विप्रलम्भं रसमपकर्षयतीति भावः।

(११) 'एष एव' पूर्वोक्त एव, न अन्यप्रकारः, नापि च विभागाभावः।

(१२) एवञ्च (गुणालङ्कारयोरुक्तरीत्या प्रविभागसत्त्वे च) इत्यभिधानमनर्थकमेव। तदभिधानमिदम्,-लौकिका गुणालङ्काराः सम्बन्धभेदेन तिष्ठन्तीति नेयं भेदोऽस्तु, काव्ये पुनरलौकिकानां गुणालङ्काराणामेकेनैव समवायसम्बन्धेनावस्थितिरिति भेदोऽनुपपन्नः। योऽपि च भेदव्यवहारः, स गड्डलिकाप्रवाहन्यायेन, यथा हि, केनापि कारणेन पुरोऽनुसरन्तीं कामपि गड्डलिकां (मेषीं), विनैव निमित्तविचारम्, इतरा अप्यनुगच्छन्ति, अग्नौ पतितामपि च तामनुपतन्ति, तथा, कश्चन प्राक्तनः केनचिदभिप्रायेण गुणालङ्कारयोर्भेदमाह स्म, तदनुसारेण, विनैव निमित्तविचारं, केवलमाधुनिकानामेव अवधार्यन्ते। समवायवृत्तिरत्र अयुत-(अपृथक्)-सिद्धानाम्, तच्चतानियतसम्बन्धरूपो वा कश्चन सम्बन्धः, न पुनर्वैशेषिकप्रसिद्धः समवाय इति।

भेदः'-इत्यभिधानमसत् । यदप्युक्तं, 'काव्यशोभायाः कर्त्तारो धर्म्मा गुणास्तदतिशयहेतवस्तु अलङ्काराः(१३)'-इति; तदपि न युक्तं, यतः, किं समस्तैर्गुणैः काव्यव्यवहारः, उत कतिपयैः, यदि समस्तैः, तत्कथमसमस्तगुणा गौड़ी पाञ्चाली च रीतिः काव्यस्यात्मा ? (१४) । अथ कतिपयैः, ततः,

'अद्रावत्र प्रज्वलत्यग्निरुच्चैः, प्राज्यः प्रोद्यन्धूमसत्येष धूमः ।'

-इत्यादावोजःप्रभृतिषु(१५)गुणेषु सत्सु काव्यव्यवहारप्राप्तिः ।

स्वर्गप्राप्तिरनेनैव देहेन वरवर्णिनी ।
अस्या रदच्छदरसो न्यक्करोतितरां सुधाम् ॥

-इत्यादौ विशेषोक्तिव्यतिरेकौ गुणनिरपेक्षौ काव्यव्यवहारस्य प्रवर्त्तकौ (१६) ।

---

(१३) उक्तं वामनेन । 'काव्यशोभा' काव्यव्यवहारनिदानस्तत्कर्षः । 'तदतिशयः' तस्या गुणसमुदायस्या अतिशयः आधिक्यम् ।

(१४) वामनेन हि, 'रीतिरात्मा काव्यस्य, सा च पदसङ्घटनात्मिका त्रिविधा, वैदर्भी गौड़ी पाञ्चाली च ; समग्रगुणा वैदर्भी, प्रसादौजोगुणा गौड़ी ; माधुर्य्यप्रसादगुणा तु पाञ्चाली'-इत्युक्तम् । एतन्मते गुणा न रसधर्म्माः, नापि च त्रय एव, किन्तु दश इत्यनुपदं व्यक्तीभविष्यति ।

(१५) वामनोक्तौज'प्रसादार्थव्यक्तिषु । एषां स्वरूपं वक्ष्यते ।

(१६) पूर्व्यार्द्धे विशेषोक्तिरुत्तरार्द्धे व्यतिरेक' । 'एकगुणहानिकल्पनया द्वेषगुणदार्ढ्यकल्पना विशेषोक्ति'-रिति, 'उपमेयस्य गुणातिरेकत्वं व्यतिरेकः'-इति च वामनेनैवोक्तम् । अयमभिसन्धिः, यत् हि काव्यव्यवहारनिदानशोभाजनका न केऽपि गुणाः सन्ति, येऽपि च वामनमतसिद्धाः प्रसादादयः सन्ति, ते हि रौद्रादिरसव्यञ्जका' नाम्नि मुख्यारप्रधाने च द्वौ काव्यव्यवहारप्रवर्त्तनाय प्रभवन्तीति एतावेवालङ्कारौ काव्यव्यवहारं प्रवर्त्तयत इत्यस्य भवताङ्गीकार्य्यम्, एवञ्च यत्रापि अलङ्कारत्वे गुणलक्षणातिव्याप्तिः,

माधुर्यौजः-प्रसादाख्यास्त्रयस्ते न पुनर्दश (१७)।

एषां क्रमेण लक्षणमाह,-

आह्लादकत्वं(१८)माधुर्यं श्रृङ्गारे द्रुतिकारणम् ॥३॥

श्रृङ्गारे (अर्थात्) सम्भोगे, द्रुतिर्गलितत्वमिव (१९)

अव्यत्वं (२०) पुनरोजःप्रसादयोरपि।

करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम् (२१)।

अत्यन्तद्रुतिहेतुत्वात्।

दीप्तात्मविस्तृतेर्हेतुरोजो वीररसस्थिति ॥४॥

व्याप्तिश्च व्यङ्ग्यालक्षणम्, आभ्यां गुणालङ्कारयोर्भाया अनतिशायनादिति। अन्यलता यत् काव्यस्वरूपनिरूपणे 'सगुणौ'-इति विशेषणं दत्तं, तत् न वामनाद्युक्तगुणयोगाभिप्रायेण, किन्तु स्वोक्तरसधर्मगुणानां परम्परया सम्बन्धतात्पर्येण, रसवत्त्वे तदङ्गतमिति। वस्तुतः अन्यलता 'तददोषौ सगुणौ' इत्यनेन काव्यस्य स्वरूपलक्षणं न तु लक्षणमिति क्वचित् गुणाभावेऽपि न दोषः।

(१७) 'श्लेषः प्रसादः समता माधुर्यं सुकुमारता।
अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः'॥
इति वामनाद्युक्ता दश यद्गुणा अर्थगुणाश्च।

(१८) 'आह्लादकत्वम्' (स्वार्थे कत्वात्) आनन्दस्वरूपता इति प्रदीपः। आस्वाद्यमानत्वादेरेव रसस्वरूपतया आनन्दात्मकाह्लादहेतुः रत्यादिगतः कश्चन धर्मः इति नरेश्वरः। द्रुतिकारणं आह्लादकत्वं माधुर्यं, तच्च शृङ्गारे रत्यन्यत्र, एवं परत्र।

(१९) वामनादिकान्तमवधिं सुकुमारविचित्रयोरवस्थाविशेषः द्रुतिः, सा च मधुररसास्वादादेः(मनःआर्द्रीभावापरनाम्नः)लाभते,न तु माधुर्यमेव स इति। (२०) तेन 'अव्यत्वं(अव्याद्रुहेतुकरत्वं)माधुर्यम्' इति भास्करोक्तं दुष्टम्। (२१) क्रमादिति शेषः।

चित्तस्य विस्तारस्वरूपदीप्तित्वजनकमोजः (२२) ।

वीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण च ।

वीरात् वीभत्से, ततो रौद्रे सातिशयमोजः (२३) ।

शुष्केन्धनाग्निवत् स्वच्छजलवत्सहसैव यः (२४)॥५॥

व्याप्नोत्यन्यत्प्रसादोऽसौ सर्व्वत्र विहितस्थितिः ।

'अन्यत्' इति व्याप्यमिह चित्तम् ।

'सर्व्वत्र' इति सर्व्वेषु रसेषु, सर्व्वासु रचनासु च ।

गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता ॥६॥

गुणवृत्त्या उपचारेण (२५), तेषां गुणानाम्, (आकारे शौर्यस्येव) ।

---

(२२) स्निग्धस्यापि सामाजिकमनसो द्रव्यादात्मकविषयविशेषसम्बन्धेन (सूर्यकान्तसूर्यकिरणसम्बन्धेन ज्वलनमिव) तेजस्त्वस्यात्मविशेषो विस्तारः ।

(२३) पारिशेष्यात् उक्तेतरेषु हास्यभयानकाद्भुतेषु उभयात्मैव माधुर्यौजसो स्थितिरिति बोध्यम् । तत्र हास्यादीनां मृदुरागद्रुविभावादिप्रभवत्वे माधुर्यं प्रधानम्, वीरादिद्रुविभावादिप्रभवत्वे तु ओज प्रधानमिति उद्योतकृत् । एवञ्च तत्र तत्र रचनापि तादृशी कार्या । 'हास्ये सर्व्वदैव मसृणं माधुर्यं, खलं ओज, भयानकेऽद्भुते च ओज. प्रधानं खलं माधुर्यम्' इति तु निदर्शनकृत् ।

(२४) ओजसि शुष्केन्धनाग्निवत्, माधुर्ये स्वच्छसलिलवदिति । आश्रयतया रसे, व्यङ्ग्यतया च रचनायामिति च विभागः । येन गुणेन रसा सहसैव चित्तं व्याप्नुवन्ति, स प्रसाद इति फलितोऽर्थः । 'व्याप्नोति यः' इति कर्त्तृतया निर्देशोऽन्वयबलेन करणत्वावगतये ।

(२५) 'उपचारेण' स्वव्यङ्ग्यतादिसम्बन्धेन लक्षणया, मधुरं शब्दं मधुरोऽयं इति व्यवहार इति भावः ।

कुतस्त्रय एव, न दश ? इत्याह,-

केचिदन्तर्भवन्त्येषु, दोषत्यागात्परे स्थिताः।
अन्ये भजन्ति दोषत्वं कुत्रचित्, न ततो दश ॥७॥

बहूनामपि पदानामेकपदवद्भासनात्मा यः श्लेषः, यश्च आरोहावरोहक्रमरूपः (२६) समाधिः, या च विकटत्वलक्षणा (२७) उदारता, यश्चोजोमिश्रितशैथिल्यात्मा प्रसादः ; तेषामोजसि अन्तर्भावः (२८)। दृढक्रमत्वरूपं माधुर्यं भङ्ग्या(२९)साक्षाद् उपात्तम्। प्रसादेन अर्थव्यक्तिर्गृहीता (३०)। मार्गभेदरूपा समता क्वचिद्दोषः, तथाहि, "मातङ्गाः किमु वल्गितैः"-[१५७ पृ०]-इत्यादौ, सिंहाभिधाने सरणमार्गत्यागो गुणः। कष्टत्वग्राम्यत्वयोर्दुष्टताभिधानात् तन्निराकरणेन अपारुष्यरूपं सौकुमार्यम्, औज्ज्वल्यरूपा (३१) कान्तिश्च स्वीकृता। एवं न दश शब्दगुणाः।

---

(२६) आरोहो गाढता, अवरोहः शैथिल्यं, तयोः क्रम वैरस्यजनको विन्यासः, स च आरोहपूर्वकोऽवरोह, अवरोहपूर्वको वा आरोह।

(२७) विकटत्वं विच्छेदात् पदानां न्यूनत्वायत्तम्।

(२८) वामनाद्युक्तस्य ओजस इव एषामपि गाढबन्धत्वेन ओजोगुणव्यञ्जकवर्णसङ्घट्टेन ओजोगुणेऽन्तर्भावः। एवमन्यत्रापि।

(२९) 'भङ्ग्या' माधुर्यव्यञ्जकमध्येऽसमासार्धकाद्यन्तिपदोपादानरूपं प्रकारान्तरं भङ्गिः, तया।

(३०) अर्थव्यक्तिर्भौटिल्यघोषस्थापनसामर्थ्यम्।

(३१) कष्टत्वं श्रुतिकटुत्वम्, अपारुष्यं श्रुतिसुखावहत्वम्, औज्ज्वल्यं श्रोत्रिकादिसाधारणपदविन्यासवैलक्षण्येन असौकिकचमत्कारयोक्तित्वम्।

'पदार्थे वाक्यरचनं, वाक्यार्थे च पदाभिधा ।
प्रौढ़िर्व्यासस्समासौ च, साभिप्रायत्वमस्य च (२२) ॥'

-इति या प्रौढ़िः, ओज इत्युक्तम् (२३) तत् वैचित्र्यमात्रं न गुणः, तदभावेऽपि काव्यव्यवहारप्रवृत्तेः(२४) । अपुष्टार्थत्वाधिक्यपदत्वानवीक्षितत्वामङ्गलरूपाश्लीलग्राम्याणां निराकरणेन च साभिप्रायत्वरूपमोजः (२५), अर्थवैमल्यात्मा (२६)

---

(२२) उक्तश्लेषादिनामकान् दश अर्थगुणानपि दूषयति 'पदार्थे' इति । 'अस्य' पदस्य विशेषणादेरिति यावत् । उक्तपञ्चप्रकारा प्रौढिरित्यर्थः । तत्राद्या यथा, चन्द्रे वक्तव्ये अतिलोचनसदृशं ज्योतिरिति वाक्यरचनं । द्वितीया यथा, कान्तार्थिनी सङ्केतस्थानं गच्छतीति वक्तव्ये 'अभिसारिका' इति पदाभिधानम् । तृतीया यथा, परस्वं नापहर्त्तव्यमिति एकस्मिन् वाक्यार्थे वक्तव्ये, परार्थं नापहर्त्तव्यं, परवस्त्वापहारो अनुचितः, परामरणहरणम् इहासत्यानिष्करमित्यादिना नानावाक्येन प्रतिपादनं व्यासः । चतुर्थी यथा, 'ते हिमालयमासाद्य' इत्यादिना एकेनैव वाक्येन नानावाक्यार्थीभूतव्यासत्वस्य उक्तिः समासः । पञ्चमी यथा, 'कुर्या' हरस्यापि पिनाकपाणेः' इत्यादौ पिनाकपाणेरिति विशेषणस्य सार्थकत्वम् । भट्टेश्वरानुयायिनस्तु 'साभिप्रायत्वमस्य च' इति पाठं साधीकुर्वन्ति, तन्मते चतुर्विधैव प्रौढिः ।

(२३) 'इति' उक्तपञ्चविधा या प्रौढिः 'ओजः-इत्युक्तं' (ओजः-इति नाम्ना अर्थगुणतया वामनादिभिरुक्तं) 'तत्' वैचित्र्यमात्रमित्यन्वयः ।

(२४) अत्र, तत्सत्त्वेऽपि रसाद्यभावे काव्यव्यवहाराप्रवृत्तेरेव-इत्यपि शेषः । अयमभिप्रायः, गुणानामेव काव्यव्यवहारहेतुत्वमङ्गीकुर्वतां वामनादीनामेतदङ्गे ओजसि गुणत्वेनाभिमतेऽपि काव्यव्यवहारो न स्यादिति ।

(२५) एतच्च साभिप्रायत्वरूपमोजः न केवलं वैचित्र्यमात्रं किन्तु अपुष्टार्थत्वदोषाभावरूपमपीति बोध्यम् ।

(२६) अर्थवैमल्यम् अधिकपदानुपादानेन अपेक्षितार्थमात्रपरिग्रहात् वाक्यार्थस्य विशदप्रतीतियोग्यत्वम् ।

प्रसादः, उक्तिवैचित्र्यरूपं माधुर्य्यम्, अपारुष्यरूपं (३७) सौकुमार्य्यम्, अग्राम्यत्वरूपा उदारता च स्वीकृता। अभिधास्यमानस्वभावोत्प्रेक्षालङ्कारेण रसध्वनिगुणीभूतव्यङ्ग्याभ्यां (३८) च वस्तुस्वभावस्फुटत्वरूपा अर्थव्यक्तिः, दीप्तरसत्वरूपा कान्तिश्च स्वीकृता। क्रमकौटिल्यानुल्बणत्वोपपत्तियोगरूपघटनात्मा (३९) श्लेषोऽपि विचित्रत्वमात्रम्। अवैषम्यस्वरूपा (४०) समता दोषाभावमात्रं न पुनर्गुणः, कः खलु

---

(३७) अपारुष्यं निष्ठुरार्थानभिधानं। परुषेऽप्यर्थे वाच्येऽपरुषरूपेण अभिधानं, यथा 'मृत.' इति वक्तव्ये 'कीर्त्तिशेषं गत' इत्युक्तिरिति प्रदीपः।

(३८) रसस्य प्राधान्ये रसध्वनिना, अप्राधान्ये रसगुणीभूतव्यङ्ग्येन रसवदलङ्कारेणेति विशेषः।

(३९) क्रमकौटिल्यं व्यतिक्रमः, तस्य अनुल्बणत्वम् अस्फुटत्वं, तत्रोपपत्तिर्युक्तिस्तस्या योग इति, यथा,-

दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरा-
दुच्चैः पिहितलोचनां विहितक्रीड़ानुबन्धच्छलः।
दैवज्ञेन कृतस्वरः सपुलकप्रेमोल्लसन्मानसाम्
अन्तर्हासलसत्कपोलफलकां धूर्त्तोऽपरां चुम्बति॥

-इत्यत्र पिहितनयनामतिक्रम्यान्यां चुम्बनाद् व्यतिक्रमः, अस्य अस्फुटत्वम्, अनया तदज्ञानात्; तत्रोपपत्तिः, एवमनया तु न ज्ञातव्यमिति युक्तिरिति प्रदीपतद्द्योतकृतः। दर्पण-निदर्शकृतस्तु, क्रमः क्रियापरम्परा; कौटिल्यं विदग्धचेष्टितम्; अनुल्बणत्वं प्रसिद्धिः; उपपत्तिः उपपादकयुक्तिविन्यासः; तेषां योगो मेलनं, स एव रूपं यस्याः सा घटना आत्मा यस्य सः। तथाहि उक्तश्लोके ज्ञानाः क्रियापरम्परा; पश्चादुपेत्य नयनविधानादि विदग्धचेष्टितम्; अयमर्थो लोकप्रसिद्धः, एकासनसंस्थिते, पश्चादुपेत्य, नयने पिधाय, दैवज्ञकृतस्वर इति चोपपादकानि, एषामत्र योग इत्याहुः।

(४०) उपक्रान्तस्य उपसंहारे परित्यागः (प्रक्रमभङ्गदोषस्वरूपः)वैषम्यम्।

अनुन्मत्तोऽन्यस्य प्रस्तावेऽन्यदभिदध्यात् । अर्थस्य अयोनेरन्यच्छायायोनेर्वा यदि न भवति दर्शनं तत्कथं काव्यम् (४१), -इत्यर्थदृष्टिरूपः समाधिरपि न गुणः ।

तेन नार्थगुणाः वाच्याः,

वाच्या वक्तव्याः ।

प्रोक्ताः शब्दगुणाश्च ये (४२) ।

वर्णाः समासो रचना तेषां व्यञ्जकतामिताः ॥८॥

के कस्य ? इत्याह,-

मूर्ध्नि वर्गान्तगाः स्पर्शा अटवर्गाः, रणौ लघू,
अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा ॥९॥

---

(४१) व्यायानि केनाप्यनुल्लिखितपूर्वं, यथा,-

'सद्योऽस्थिद्रुतमक्षणक्षितिकुलप्रस्पर्द्धि भारङ्करम्' इत्यादि ।

अन्यच्छायायोनि अन्यैरुल्लिखितमूलको रचनानैपुण्येन अभिनव इव प्रतीयमानोऽर्थः, यथा,-

निजनयनप्रतिबिम्बैरम्बुनि बहुश एतारिता कापि ।
नीलोत्पलेऽपि विभ्रमति करमर्पयितुं कुतूहलावी ॥

अत्र हि नयननीलोत्पलयो प्रसिद्धोपमानयोरप्यभिनवव्यायमर्थं द्योतयति । अयमभावः, लोकयात्रकाव्यादिदर्शनजन्यनिपुणतया काव्येतिहासयोरर्थदर्शनाभावे काव्यशरीरमेव न निष्पद्यत इत्यर्थदृष्टे काव्यशरीरनिर्वाहकत्वमेव न तु गुणत्वमिति ।

(४२) ये च माधुर्यादयः प्रसादाद्या (गुणत्वेन) 'शब्दगुणाः' 'प्रोक्ताः', 'तथा'-इत्यन्वयः । 'शब्दगुणा' इत्युक्तिस्तु शब्दात्मना वर्णादीनां व्यञ्जकत्वसम्भवप्रदर्शनाय ।

टठडढवर्जिताः कादयो मान्ताः, शिरसि निजवर्गान्त्य-युक्ताः, तथा रेफणकारौ ऋलान्तरिताविति वर्णाः ; समासा-भावो मध्यमः समासो वेति समासः ; 'तथा' माधुर्य्यवती पदा-न्तरयोगेन(४३), रचना माधुर्य्यस्य व्यञ्जिका। उदाहरणम्,

अनङ्गरङ्गप्रतिमत्तदङ्गभङ्गीभिरङ्गीकृतमानताङ्गाः।
कुर्वन्ति यूनां सहसा यथैताः स्वान्तानि शान्तापरचिन्तनानि॥

योग आद्यतृतीयाभ्यामन्त्ययोः, रेण, तुल्ययोः।
टादिः, शषौ, वृत्तिदैर्घ्यं, गुम्फ उद्वत ओजसि॥१०॥

वर्गप्रथमतृतीयाभ्यामन्त्ययोः (द्वितीयचतुर्थयोः), रेफेण अध ऊर्परि उभयत्र वा यस्य कस्यचित्, तुल्ययोः (तेन तस्यैव) सम्बन्धः, टवर्गौ (अर्थात्) णकारवर्ज्जौ, शकार-षकारौ ; दीर्घसमासः ; विकटा सङ्घटना ओजसः (४४)। उदाहरणम्,-मूर्द्धामुद्वृत्तलक्तेत्यादि [११२ पृ०]।

---

(४३) पदान्तरयोग' सन्धि, 'यथा प्रतिमं तदङ्गम्'-इति पदयोः सन्धौ 'न'-इति मधुरवर्णोत्पत्तिरिति महेश्वरः। वस्तुतः सन्धिं विनापि पौर्वा-पर्य्यविपर्य्येणापि रचना मधुरा भवतीति पदान्तरयोगः पदान्तरेण सम्बन्ध इत्यर्थः।

(४४) व्यञ्जिका इति शेषः। द्वितीयचतुर्थयोर्व्विजातीययोरपि सम्बन्धः, (तेन तस्येत्यस्य प्रथमेन प्रथमस्य द्वितीयेनेत्याद्यर्थं कल्पयित्वा) विजातीयेन प्रथमादिना विजातीयप्रथमादेरपि योगोऽस्य व्यञ्जकः, षकारस्य सकारेण वर्ज्जनमिति महेश्वरः। दीर्घसमासोऽपि विकट एवास्य व्यञ्जक इत्युद्योतकृत्।

श्रुतिमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेत् (४५) ।
साधारणः समग्राणां, स प्रसादो गुणो मतः ॥११॥

समग्राणां रसाना सङ्घटनानाञ्च । उदाहरणम्,-

परिम्लानं पीनस्तनजघनसङ्गादुभयतः,
तनोर्मध्यस्यान्तःपरिमिलनमप्राप्य हरितम् ।
दृढं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः,
कृशाङ्ग्याः सन्तापं वदति विसिनीपत्रशयनम् ॥

यद्यपि गुणपरतन्त्राः सङ्घटनादयः, तथापि,

वक्तृवाच्यप्रबन्धानामौचित्येन क्वचित् क्वचित् ।
रचना वृत्तिवर्णानामन्यथात्वमपीष्यते ॥१२॥

क्वचिद्वाच्यप्रबन्धानपेक्षया वक्तौचित्यादेव रचनादयः । यथा,-

मन्यायस्तार्णवाम्भःश्रुतिकुहरचलन्मन्द्रध्वानधीरः,
कोणाघातेषु (४६) गर्जत्प्रलयघनघटान्योन्यसंघट्टचण्डः ।
क्षणाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः,
केनास्मिन् सिंहनादप्रतिरसितसखो दुन्दुभिस्ताड़ितोऽसौ ? ॥

यत्र हि नवाच्यं क्रोधादिव्यञ्जकम्(४७), अभिनेयार्थञ्च काव्य-

---

(४५) तथाच श्रुतिमात्रेणार्थबोधकाः सर्वे एव (सुकुमारा वा विकटा वा) वर्णादयः प्रसादगुणस्य व्यञ्जका इत्यर्थोलभ्यते ।

(४६) कोणः वादनदण्डः । केचित्तु,-

'ढक्कायुतसहस्राणि भेरीशतशतानि च ।
एकदा यत्र वाद्यन्ते कोणाघातः स उच्यते' ॥

-इति पारिभाषिकेषु शब्देषु सत्स्वपीत्यर्थकाद्धः ।

(४७) प्रत्यक्षत्वात् तस्येति शेषः । 'अभिनेय.' अभिनयबोधनीय',

मिति तत्प्रतिकूला उद्धता रचनादयः, वक्ता चात्र भीमसेनः। क्वचिद्वक्तृप्रबन्धानपेक्षया वाच्यौचित्यादेव रचनादयः। यथा,-

प्रौढ़च्छेदानुरूपोच्छलनरयभवत्सैंहिकेयोपघात-
त्रासाल्लटाङ्गतिर्य्यग्वलितरविरथेनारुणेनेक्ष्यमाणम्।
कुर्वत्काकुत्स्थवीर्य्यस्तुतिमिव मरुतां कन्धरारन्ध्रभाजाम्
भाङ्कारैर्भीमसेतन्निपतति वियतः कुम्भकर्णोत्तमाङ्गम्॥

क्वचिद्वक्तृवाच्यानपेक्षाः प्रबन्धोचिता एव ते, तथाहि, आख्यायिकायां भङ्कारेऽपि न मसृणवर्णादयः, कथायां रौद्रेऽपि नात्यन्तमुद्धताः, नाटकादौ रौद्रेऽपि न दीर्घसमासादयः (४८)। एवमन्यदप्यौचित्यमनुसर्त्तव्यम्॥

इति काव्यप्रकाशे गुणालङ्कारभेदनियतगुण-
निर्णयो नाम अष्टम उल्लासः॥

'अर्थ.' प्रतिपाद्यो यस्य तत् नाटकादीत्यर्थः। अभिनयस्यते हि झटिति अर्थप्रत्यायनमेवोचितं, दीर्घसमासादिना तु न तद्विलम्ब कार्यमिति।

(४८) आख्यायिकायां गद्यस्य प्राधान्यम् गद्ये च विकटवर्णैरेव अध्यहितत्वात् न मसृणवर्णादयः, किन्तु विप्रलम्भकरुणयोः तस्यामपि न दीर्घसमासादि, तयोरतिसौकुमार्य्यात्। कथायान्तु वर्णनीयस्य सुखप्रतिपत्तेरेवोद्देश्यत्वात् न उद्धता वर्णादय। नाटकादौ विक्षेपेण अभिनयसौकर्य्यात् न दीर्घसमासादय इति प्रदीपः।

॥ नवम उल्लासः ॥

गुणविवेचने कृतेऽलङ्काराः प्राप्तावसराः, इति संप्रति शब्दालङ्कारान् आह-, (१)

यदुक्तमन्यथा वाक्यमन्यथाऽन्येन योज्यते (२)।
श्लेषेण काकुा वा, ज्ञेया सा वक्रोक्तिस्तथा द्विधा॥१॥

'तथा' इति श्लेषवक्रोक्तिः, काकुवक्रोक्तिश्च। तत्र पदभङ्गश्लेषेण यथा,-

नारीणामनुकूलमाचरसि चेज्जानासि, कश्चेतनो
वामानां प्रियमादधाति, हितकृन्नैवाबलानां भवान्?।
युक्तं किं हितकर्तृनं ननु बलाभावप्रसिद्धात्मनः,
सामर्थ्यं भवतः पुरन्दरमतच्छेदं विधातुं कुतः (३)॥

---

(१) वक्रोक्त्यर्थान्तरन्यासौ यमकं श्लेषचित्रके।
पुनरुक्तवदाभास शब्दालङ्कृतयस्तु षट्॥

(२) एकेनान्याभिप्रायेणोक्तम् वाक्यम् अन्येन यदि अन्याभिप्रायकतया कल्प्यते, तदा वक्रोक्ति। 'अन्येन' इति स्वयमन्यथाकरणरूपात् अपह्नुतेर्व्यवच्छेद। अत्र च तत्तत्पदानां परिवृत्त्यसहत्वेन, शब्दस्यैव चमत्काराधायकत्वेन च शब्दालङ्कारत्वमस्य।

(३) 'जानासि' अभिज्ञोऽसि। 'मतम्' दृष्टम्। अत्र नारीणामिति पदं कामिनीपरतया वक्ता उक्तम्, प्रतिवक्ता तु, न नारीणामित्यर्थपरतया योजितम्, ततश्चेन श्लेषपरतयोक्तम् वामानामिति पदम् वक्ता नारीपरतया परिकल्प्य, हितकृदितिपदं, हितकारिपरतया अबलानामिति च नारीपरतया

अभङ्गश्लेषेण यथा,-

अहो! केनेदृशी बुद्धिर्दारुणा तव निर्मिता?।
त्रिगुणा श्रूयते बुद्धिर्नतु दारुमयी क्वचित् (४)॥

काकाक्षेपेण यथा,-

गुरुजनपरतन्त्रतया दूरतरं देशमुद्यतो गन्तुम्।
अलिकुलकोकिलललिते नैष्यति सखि, सुरभिसमयोऽसौ(५)॥

वर्णसाम्यमनुप्रासः,

स्वरवैसादृश्येऽपि व्यञ्जनसदृशत्वं वर्णसाम्यम्। रसाद्यनुगतः प्रकृष्टो न्यासोऽनुप्रासः (६)।

उक्तम्। प्रतिभङ्गा पुनः ते पदे यथाक्रमं क्षितश्छेत्तृपरतया दुर्बलपरतया च व्याख्याय, दुर्बलाभिप्रायेण 'बलाभावप्रसिद्धात्मन.' इति पदं प्रयुक्तं। बला पुनः तत् पदं बलासुरनायक-(इन्द्र)-परतया योजितम्। अत्र, नारीणामित्यत्र अबलानामित्यत्र च सभङ्गः श्लेषः। यद्यपि अत्रैव बामानामित्यादिषु अभङ्गः श्लेषोऽपि सम्भवति, तथापि केवलाभङ्गश्लेषप्रदर्शनार्थमुत्तरोदाहरणम्।

(४) त्रिगुणा सत्त्वरजस्तमोगुणात्मिका। अत्र 'दारुणा' क्रूरा, काष्ठेन वा-इत्युभयार्थपक्षेऽपि दारुणेति पदस्य न भङ्गः।

(५) अत्र नैष्यतीति निषेधाभिप्रायेण, नायिकयोक्तम्, सख्या तु, काकाक्षेपो न श्रूयते, अपि तु एष्यत्येवेत्यर्थकतया योज्यते इति प्रदीपः।

(६) 'रसाद्यनुगत' प्रकृतरसव्यञ्जकवर्णसम्बन्धित्वेन प्रकृतरसानुकूलः। 'प्रकृष्ट' अनतिव्यक्षिततया चमत्कृत्याधायकः 'न्यासः' विन्यासः, निवेशनं आवृत्तिरिति। तथा चानतिव्यक्षितत्वेन चमत्कृत्याधायिका प्रकृतरसव्यञ्जकवर्णावृत्तिरनुप्रास इति फलितम्। अत्रैव वर्णसाम्यपदस्य तात्पर्यम्। प्रकृते साम्ये तदननुगतवर्णस्य साम्यमप्यसङ्गतमिति भाटानुप्रासयतः। प्रकृतरसप्रतिकूलेऽपि अनुप्रासव्यवहारो भाक्त इति।

छेकवृत्तिगतो द्विधा (७) ।

छेकाः विदग्धाः । वृत्तिर्नियतवर्णगतो रसविषयो व्यापारः ।
'गतः' इति छेकानुप्रासो वृत्त्यनुप्रासश्च ।
किं तयोः स्वरूपम् ? इत्याहः,-

सोऽनेकस्य सकृत्पूर्वः,

अनेकस्य (अर्थात्) व्यञ्जनस्य 'सकृद्' (एकवारं) सादृश्यं छेकानुप्रासः । उदाहरणम्,-

ततोऽरुणपरिस्पन्दमन्दीकृतवपुः शशी ।
दधे कामपरिच्छामकामिनीगण्डपाण्डुताम् (८) ॥

एकस्याप्यसकृत्परः ॥ २ ॥

एकस्य, अपिशब्दादनेकस्य व्यञ्जनस्य द्विर्बहुकृत्वो वा सादृश्यम् वृत्त्यनुप्रासः (९) । तत्र (१०),

---

(७) अनुप्रासो हि द्विविध वर्णानुप्रास शब्दानुप्रासश्चेति, निरर्थकवर्णानामनुप्रास प्रथम, द्वितीयस्तु पदात्मकाना सार्थकवर्णानामनुप्रासस्वरूप । तत्र प्रथम वर्णानुप्रास विभजति छेक इति। छेकगत छेकानां प्रचुरप्रयोज्यः, वृत्तिगत वृत्तान्तर्निविष्ट । वृत्तिश्च माधुर्यादिव्यञ्जकसुकुमारादिवर्णगतत्वेन मधुरादिरसोपकारक गुम्फ्य सङ्घटनाख्य कथन व्यापारविशेष ।

(८) 'स्पन्द' 'मन्द' इत्यत्र, 'गण्ड' 'पाण्डु'-इत्यत्र चानेकव्यञ्जनस्य साम्यम

(९) "वस्तुतस्तु छेकानुप्रासमिश्र वाक्यम्, अन्यथा एकस्य सकृदाश्रयेरसभङ्गापत्ति , एवञ्च एकस्यैव सकृदसत्त्वात्, अनेकस्य तु असकृत् साम्यम् वृत्त्यनुप्रास इति पर्य्यवसन्नम" इति प्रदीप । एकस्य सकृत्साम्य न चमत्कारजनकमिति शास्त्रानुप्रासत्व अन्यत्रदनुमतमिति यथाश्रुतमेव सम्यगिति तु वय ।

(१०) वृत्त्यनुप्रासघटकतयोद्दिष्टां वृत्तिं प्रसङ्गात् विभजति तत्रेति ।

माधुर्य्यव्यञ्जकैर्वर्णैरुपनागरिकोच्यते।
ओजःप्रकाशकैस्तैस्तु परुषा,

उभयत्रापि प्रागुदाहृतम् [२२२ पृ०। २ एवं ११ प०]।

कोमला परैः ॥ ३ ॥

'परैः' शेषैः। तामेव केचित् ग्राम्येति वदन्ति। उदाहरणम्,-

अपसारय घनसारं, कुरु हारं दूर एव, किं कमलैः।
अलमलमालि, मृणालैरिति वदति दिवानिशं बाला (११)॥

केषाञ्चिदेता वैदर्भीप्रमुखा रीतयो मताः।

'एताः' त्रिस्रो वृत्तयः, वामनादीनां मते वैदर्भीगौड़ीपाञ्चाल्याख्या रीतयो मताः।

शब्दस्तु लाटानुप्रासो भेदे तात्पर्य्यमात्रतः (१२)॥४॥

---

(११) अत्र न केऽपि वर्णा माधुर्य्यव्यञ्जकाः, येऽपि च त्रयो ह्रस्वरकाराः, ते तु गुरुरकारेण व्यवहिता न माधुर्यं व्यञ्जयितुमीशाः।

(१२) शब्दः सार्थकवर्णगतः। उद्देश्यविधेयभावादि, कर्तृत्वकर्मत्वादिरूपस्य पदार्थयोः सम्बन्धोऽन्वयः, स एवात्र तात्पर्यशब्देनाभिहितः; तन्मात्रस्यैव भेदे (न तु स्वरूपतोऽर्थतः क्रमतश्च भेदेऽपि)। अत्रापि वर्णसाम्यमित्यनुषज्यते। तेन विभिन्नान्वयपराणां समानानुपूर्वीकाणां तत्तत्स्वरूपाणामेकार्थानां वर्णानां (वर्णयोर्वा) व्यतिव्यवधानेनावृत्तिः शब्दानुप्रासः, स च 'लाटानुप्रास' इत्युच्यते। शब्दानुप्रासस्तु प्रथमतो द्विविधः, पदगतो नामगतश्चेति। तत्राद्योऽपि एकानेकपदगतत्वेन द्विविधः, अन्त्यश्च एकसमासगतत्वेन, एकसमासगतत्वेन विभिन्नसमासगतत्वेन च त्रिविध इति मिलित्वा शब्दानुप्रासः पञ्चविधः। एतदेव 'पदानां स' इत्यादिना 'तदेवं पञ्चधा मतः' इत्यन्तेन दर्शयिष्यते।

यत्र गतोऽनुप्रासः, यत्रार्थयोरभेदेऽप्यन्वयमात्रभेदात्, लाटजन-वल्लभत्वाच्च लाटानुप्रासः । एष पदानुप्रास इत्यन्ये ।

पदानां सः,

'सः'-इति लाटानुप्रासः । उदाहरणम्,-

यस्य न सविधे दयिता, दवदहनस्तुहिनदीधितिस्तस्य ।
यस्य च सविधे दयिता, दवदहनस्तुहिनदीधितिस्तस्य (१२) ॥

पदस्यापि,

अपिशब्देन 'सः' इति समुच्चीयते । उदाहरणम्,-

वदनं वरवर्णिन्यास्तस्याः सत्यं सुधाकरः ।
सुधाकरः क्व नु पुनः कलङ्कविकलो भवेत् ॥

वृत्तावन्यत्र, तत्र वा ।

नाम्नः स वृत्तवृत्तयोश्च,

एकस्मिन् समासे, भिन्ने वा समासे, समासासमासयोर्वा 'नाम्नः' प्रातिपदिकस्य, (न तु पदस्य), सादृश्यम् (१४) ।

---

(१२) अत्र 'सविधे दयिता'इत्यादीनां वर्णानां पदानां तात्पर्यभेदेनाहुः । पूर्वार्द्धे दवदहनस्यैव, उत्तरार्द्धे तुहिनदीधितेरेव च विधेयतया आरोपणं, न तु स्वरूपेण यथाक्रमं तापकरत्वस्य शीतलत्वस्य च विधेयत्वं विवक्षितं, तथात्वे भिन्नार्थकत्वापत्त्या लाटानुप्रासो न स्यात् । लाटानुप्रासादौ उद्देश्यविधेययोर्वैपरीत्येन निर्देशो न दोषाय ।

(१४) "अत्र 'समासे' इत्युपलक्षणम्, पञ्चविधसमासेऽपि यथा । तेन, "कषायते धावतेन कान्ता, कान्तायते सर्वसुखेन वायु "-इत्यादि संगच्छते" इति ।" इति, एवं "नाम्न -इत्युपलक्षणम्,

जिह्वा विषं भवानल विहरत्यवरोधने ।
विहरत्यवरोधिस्ते रिपुवर्गोदितं गत ॥ इति केचित्"इति च उद्योतकृत् ।

उदाहरणम्,-

सितकरकरुचिरविभा विभाकराकार, धरणिधर, कीर्त्तिः।
पौरुषकमला कमला सापि तवैवास्ति नान्यस्य ॥

तदेवं पञ्चधा मतः ॥ ५ ॥

अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनःश्रुतिः।

यमकम् (१५);

'समर-समरसोऽयम्'-इत्यादावेकेषामर्थवत्त्वे अन्येषामनर्थकत्वे भिन्नार्थानामिति न युज्यते वक्तुम्,-इति 'अर्थे सति'इत्युक्तम्। 'सा'-इति सरो रस इत्यादिवैलक्षण्येन तेनैव क्रमेण स्थिता।

पादतद्भागवृत्ति तद्व्यात्यनेकताम् ॥ ६ ॥

प्रथमो द्वितीयादौ [३] द्वितीयस्तृतीयादौ [२], तृतीय-चतुर्थे [१], प्रथमस्त्रिषु [१], अपीति (१६) सप्त। प्रथमो

---

(१५) 'अर्थभिन्नानां' विभिन्नार्थानां (तेन लाटानुप्रासाद्भेदः)। सा तत्-क्रमिका। एकेन क्रमेण व्यवस्थानार्थानां समानवर्णानां (वर्णयोर्वा) आवृत्तिः यमकमिति फलितोऽर्थः।

'यमकादौ भवेदैक्यम् डलयोः रलयो. पयोः।
बवयोर्णनयोर्दान्ते सविसर्गाविसर्गयोः॥
सबिन्दुकाबिन्दुकयो .....' इत्युद्योतकृत्।

(१६) 'द्वितीयादौ' द्वितीये, तृतीये, चतुर्थे वा। 'तृतीयादौ' तृतीये चतुर्थे वा (न तु प्रथमेऽपि, तस्य 'प्रथमो द्वितीयादौ'-इत्यनेन गतार्थत्वात्)। त्रिष्वपि द्वितीये तृतीये चतुर्थेऽपि।

'यमकस्तु विधातव्यं न कदाचिदपि त्रिपात्' इति नियमात् एकस्य अपरपादद्वयगतत्वेन भेदो. भ. कृतः. इति. एकपादस्थतादृशसंघर्षोपि पादगतं यमकं सप्तविधमेव। अनेकपादावृत्तिरूपं संकीर्णन्तु पादगतं अनन्तरोक्तम् चतुर्विधम्।

द्वितीये, तृतीयश्चतुर्थे ; प्रथमश्चतुर्थे, द्वितीयस्तृतीये इति द्वे । तदेवं पादजं नवभेदम् (१७) । अर्द्धावृत्तिः, श्लोकावृत्तिश्चेति द्वे (१८) । द्विधा विभक्ते पादे प्रथमपादादिभागः पूर्ववत्(१६)द्वितीयादिपादादिभागेषु, अन्तभागोऽन्तभागेष्विति विंशतिभेदाः, (श्लोकान्तरे हि नासौ भागावृत्तिः (२०) । त्रिखण्डे त्रिंशत्, चतुःखण्डे चत्वारिंशत्(२१) । प्रथमपादादिगतान्त्यार्द्धादिभागो द्वितीयपादादिगते आद्यार्द्धादिभागे 'यस्यते'-इत्याद्यन्वर्थतानुसरणेनानेकभेदम्(२२),-अन्तादिकम्

---

(१७) यथाक्रमं पादद्वयस्यावृत्ति , पृथक्तया च पादद्वयस्य वृत्तिरिति संकीर्णमपि पादगतं यमकं द्विविधमेव । तत्र यथाक्रमं पादद्वयस्य चावृत्तौ अर्द्धावृत्ति श्लोकावृत्तिर्वा भवतीति विशेषनामानौ तौ भेदावपहाय नवभेदमित्युक्तम् ।

(१८) एतेषां विशेषनामानि ग्रन्थादवगन्तव्यानि ।

(१६) पूर्ववत् पादावृत्तिरीत्या । प्रथमपादस्य चादिभागोऽन्तभागश्च यथाक्रमं द्वितीयादिपादानां चादौ चान्ते च भागे चावर्त्येते, एवं द्वितीयस्य चाद्यन्तभागौ तृतीयादीनामाद्यान्तभागयोरपीति बोध्यम् । इदञ्च चाद्यभागोऽपरस्याद्यएव भागोऽन्त्यभागोऽन्त्य एव भागे इति सजातीयभागावृत्तिरूपम् बोध्यम् ।

(२०) तेन न प्रत्येकमेकादशविधत्वेन द्वाविंशत्यापत्तिः ।

(२१) प्रतिभागमावृत्तेर्दशविधत्वात् ।

(२२) विजातीयभागावृत्तिमाह प्रथमेति । 'अन्वर्थता' योगार्थता । प्रथमादिपादानामन्तादिभागयोर्द्वितीयादिपादानामादावन्ते च यथाक्रममावृत्तौ अन्तादिकम् आदान्तिकञ्च यमकम्, एतयोरेकत्र समावेशे सङ्कीर्ण । एवं मध्यादिकादपि ऊह्यम् । आद्यादिकादि तु न विजातीयमिति अत्र नोक्तम् ।

आद्यन्तिकम्, तत्समुच्चयः ; मध्यादिकम्, आदिमध्यम्, अन्तमध्यं, मध्यान्तिकं, तेषां समुच्चयः । तथा तस्मिन्नेव पादे आद्यादिभागानां मध्यादिभागेषु, अनियते च स्थाने आवृत्तिरिति प्रभूततमभेदम् । तदेतत्काव्यान्तर्गडुभूतम् (२३),- इति नास्य भेदलक्षणम् कृतम् । दिङ्मात्रमुदाक्रियते,-

सन्नारीभरणोमायमाराध्य विधुशेखरम् ।

सन्नारीभ-रणोऽमायस्ततस्त्वं दृथिवीं जय (२४) ॥ [प्र०तृ०]

विनाऽयमेनो नयताऽसु-खादिना
विना यमेनोनयता सुखादिना ।
महाजनोऽदीयत मानसादरम्
महाजनोदी यतमानसादरम्(२५)॥ [प्र० द्वि० एवं तृ० च०]

---

(२३) 'अन्तर्गडुभूत' रसास्वादविलम्बकृतया दृष्टेर्ग्रन्थिभूतमिव ।

(२४) 'सन्नारीभरणोमाय'-सतीनां नारीणां भरणमाभरणस्वरूपाम् उमां याति शरीरार्द्धरूपेण प्राप्नोति यस्तमर्द्धनारीस्वरूपम् । 'आराध्य' आराधय । 'तत' आराधनात्, 'सन्नारीभरण' सन्ना अवसन्ना अरीणाम् द्रमा यत्र, तादृशो रणो यस्य स· सन् । 'अमाय' अकपटः ।

(२५) विना अयम् एनः नयता असु-खादिना विना यमेन अनयता सुखादिना । महाजन. अदीयत मानसात् अरम्, महाजनोदी यतमानसादरम् इति पदपाठ । 'अयं''विना'(पक्षिस्वरूप पुरुष)'यमेन''यतमानसादर' (यतमानानां रक्षितसदृयुक्तानां सादं विषाद राति ददातीति तत्)यस्मात् तथा'अरं'(शीघ्रं)'मानसात्'(मानसं चित्तमेव मानस मानसशरस्तस्मात्) 'अदीयत'(अखण्डात) । अयं किम्भूत ?-'महाजन'(महात्मा), 'महाजनोदी'च (महत् उत्तमम् अजन्ति क्षिपन्ति ये इन्द्रियास्तेषां सदसारक) । यमेन किम्भूतेन ? 'एनो' 'विना'(अपराधमन्तरे)'नयता'(स्वइरं प्रापयता) 'असु-खादिना'(प्राणभक्षकेण), 'सुखादिना''जनयता'च(दीनं कुर्वता च)।

स त्वारम्भरतोऽवश्यमवलम् विततारवम् ।
सर्व्वदा रणमानैषीद्दावानलसमस्थितः ॥
सत्वारम्भरतोऽवश्यमवलम्बित-तारवम् ।
सर्व्वदारण-मानैषी दावानलसमस्थितः (२६) ॥ [श्लो०आ०]
अनन्तमहिमव्याप्तविश्वाम् वेधा न वेद याम् ।
या च मातेव भजते प्रणते मानवे दयाम् ॥[भा०आ०।एवंपरत्र]
यदानतोऽयदानतो नयात्ययं न यात्ययम् ।
शिवे हिता शिवेहितां स्मरामितां स्मरामि ताम्(२७)॥[युग्मम्]

---

(२६) स तु आरम् भरत. अ-वश्यम् अवलं वितंतारवम् । सर्व्वदा रणम् आनैषीत् स्मानं अवलम् अ-स्थित । सत्वारम्भरत अवश्यम् अवलम्बिततारवम् । सर्व्वदारण-मानैषी दावानलसमस्थित. इति पदपाठः । 'स तु' 'आर' (अरिसमूहम्)'अवल' (सैन्यशून्यं),'वितताराव' (विस्तृतार्त्तनादम्), 'अवलम्बित-तारव' च (अवलम्बितं तारव तरुसमूहो वन येन तत्) यथा स्यात् तथा 'सर्व्वदा''रण''आनैषीत्' (प्रापयामास) । आरं कीदृशम् ?-'भरतः' (अतिशयेन) 'अ-वश्यम्' अवशीभूत अनायत्तं । स किम्भूतः ?-'अवल' यथा तथा, 'अ-यान्' (अ-गच्छन्, शीघ्रगामी), 'अ-स्थित.' (न विष्णौ स्थितः, विष्णुपरायण), 'अवश्यं' (नियतम्) 'सत्वारम्भरत ' (सात्विककर्म्मानुष्ठान-निरतः), 'सर्व्वदारण मानैषी' (सकलजनहृदयविदारकमानेच्छु), 'दावानलसमस्थित '(दावाग्नितुल्य)चेत्यर्थः ।

(२७) यस्यामानतोऽयं जन 'नयात्यय' (नीतिविरुद्धं) 'न याति', कुतः ?-'अयदानत.' (अर्थात् तयैवास्य शुभावहविधिदानात्) । 'शिवे' (मङ्गले) 'हिताम्' (अनुकूलाम्), 'शिवेन' (महादेवेन) 'ईहिताम्' (प्रार्थनीयाम्), 'स्मरेण' (कन्दर्पेण) 'अमिताम्' आत्मयोग्याम् अभिभूताम् वा । अत्र एकस्मिन्नेव पादे आद्यन्तिक भागावृत्तिरूपकम् ।

सर स्वतिप्रसादं मे, स्थितिं चित्तसरस्वति ।
सरस्वति, कुरु क्षेत्र कुरुक्षेत्र-सरस्वति, (२८) ॥
ससार साकन्दर्पेण कन्दर्पेण स सारसा ।
शरन्नवाना बिभ्राणा नाविभ्राणा शरन्नवा (२९)॥

मधुपराजि पराजित-मानिनी-
जनमन सुमनः सुरभिश्रियम् ।
अधत वारित-वारिजविप्लवं
स्फुटित ताम्र ततास्रवनं जगत् (३०) ॥

एवं वैचित्र्यसहस्रैः स्थितमन्यदुन्नेयम् ।

वाच्यभेदेन भिन्ना यत् युगपद्भाषणस्पृशः ।

---

(२८) हे 'सरस्वति,' 'मे' (मम) 'स्वतिप्रसादम्'(शोभनातिप्रसन्नताम्) 'सर'(प्रयच्छ) । 'क्षेत्र'(शरीरमेव)'कुरुक्षेत्र', तत्र हे सरस्वत्याख्यनदी-रूपे, 'चित्तसरस्वति' (चित्तसरट्टे), मद्या सरट्टस्थितेरौचित्येन मम चित्तसरट्टे 'स्थिति' कुरु इत्यर्थ । अत्र प्रथमार्द्धे आद्यन्तिकमेव वैरूप्यं, उत्तरार्द्धे तु आद्यन्तिकम् अन्तादिकञ्चोभयमिति तथा सरट्टत्व ।

(२९)'सरा' 'शरत्' कन्दर्पकूपेण 'दर्पेण' 'साक' 'ससार'। किम्भूता ?-'स-सारसा' (सारसेन पक्षिविशेषेण पद्मेन वा सहिता), 'शर' (काशड) 'बिभ्राणा (पोषयन्ती, परिपाक प्रापयन्तीत्यर्थ), 'नवाना'(नवम अत्र शकट कर्दमाभावेन पथि वर्त्तमानं वा),'न अविभ्राणा'(वीनां पक्षिणा आश्रय अन्द , न तेन रहिता) च । अत्र द्वयोरर्द्धयोरादन्तिकम् अन्तादिकञ्चोभयमिति तत्सरट्टत्व ।

(३०) 'सुमन ' पुष्प 'सुरभि ' वसन्तकाल' । 'ताम्र ' ताम्रवत् मलिन-रक्तवर्ण । 'तत' विस्तृतम् । अन्तावियतभागे मध्यमध्यत्व-यमकसरट्टत्व ।

श्लिष्यन्ति शब्दाः, श्लेषोऽसावक्षरादिभिरष्टधा॥७॥

'अर्थभेदेन शब्दभेदः'(२१)-इति दर्शने, 'काव्यमार्गे स्वरो न गण्यते' इति च नये वाच्यभेदेन भिन्ना अपि शब्दा यत् युगपदुच्चारणेन श्लिष्यन्ति (भिन्नं स्वरूपमपह्नुवते), स श्लेषः । स च, वर्ण-पद-लिङ्ग-भाषा प्रकृति-प्रत्यय-विभक्ति-वचनानां भेदादष्टधा (२२)। क्रमेणोदाहरणम्,-

अलङ्कारः शङ्काकर-नरकपालं परिजनो
विशीर्णाङ्गो भट्टी, वसु च तृप एको वञ्चयाः ।

---

(२१) 'सकृदुच्चरितः शब्दः सकृदर्थं गमयति'इतिनियमेन एकेन शब्देनार्थ-द्वयप्रतीत्यसम्भवात् अर्थद्वयप्रतीत्यर्थं (श्लेषस्थले) एकाकारौ द्वौ शब्दौ स्व.-रूपावस्थमङ्गीकार्यौ, तौ च एकेन प्रयत्नेनैकदोच्चार्यतया पृथक्तया नानुभूयेते, तथाच एकप्रयत्नोच्चार्यतया भेदेन अननुभूयमानत्वात् यः श्लेष इव (भिद्यमानः), स श्लेषः-इति फलितम् । विभिन्नसमासादीनामुदात्तादिस्वर-भेदनियमात् तदनुसारेण उच्चारणे श्लेषाभावप्रसङ्गस्तु, 'काव्ये उदात्तादि-स्वरविशेषमनादृत्य सर्वत्रैव समासादिष्वेकविधमेवोच्चारणम्' इत्यङ्गीकारेण निरस्तः । "यत्रानेकस्मिन् अर्थे प्रकरणादिकं युगपद्वृत्तयति, तत्र श्लेषः; ..... यत्र तु एकत्रैव, तत्र व्यञ्जना" इति उद्योतस्तु । यत्र एकस्मिन्नपि अर्थे न प्रकरणादिनियमस्तत्रापि श्लेष इति तु वयम् । अत एव "यत्र प्रकरणादिनियमाभावात् द्वावप्यर्थौ वाच्यौ" इत्यनुपदं वक्ष्यति च ।

(२२)विजातीयवर्णेऽपि विभिन्नस्वरूपापह्नवो हि चमत्कारातिशयं पुष्णातीति वर्णादीनां सर्वेषां यत्र यैर्जातीयैरपि (विभक्तिविशेषयोग-समासादिभिरेकरूपैश्च) श्लिष्टत्वम्, तत्र तच्छ्लेषनामभिः व्यपदेशः । यथोदाहरणे विधुविधिशब्दयोः चकारेकारवर्णयोः विजातीययोरपि (सप्तमीविभक्तियोगेन औकारता-पक्षपातैकरूप्यात्) श्लेषः, स, एव चमत्कारातिशयजनकतया व्यपदेश्यः । एवं परत्रापि ।

अवश्येयं स्थाणोरपि भवति सर्वामरगुरोर्,
विधौ वक्रे मूर्द्धि स्थितवति वयं के पुनरमी ॥ [व०]
दृष्टुकार्त्तस्वरपातं भूपतिनिःशेषपरिजनं देव ।
विलसत्करेणुगहनं संप्रति समभावयोः सदनम् ॥ [प०]
भक्तिप्रच्छविलोकनप्रणयिनी नीलोत्पलस्पर्द्धिनी
ध्यानालम्बनता समाधिनिरतैर्नीतेहितप्राप्तये ।
लावण्यैकमहानिधी-रसिकता लक्ष्मीदृशोस्तन्वती
युष्माकं कुरुता भवार्त्तिशमनं नेत्रे तनुर्वा हरेः (२३)॥ [लि०]
एष वचनश्लेषोऽपि ।

प्रकृत्यादिघटकाना एकस्य वर्णस्य विजातीयत्वे वर्णश्लेष, प्रकृत्या दक्षरूपस्य वर्णसमुदायस्य तथात्वे प्रकृत्यादिश्लेष । विभक्त्यन्तसमुदायस्य विभक्त्यन्तरूपत्वे पदश्लेषः, तदन्तर्गतायां केवलायां प्रकृतेः प्रत्ययस्य वा तथात्वे तु यथायथं प्रकृत्यादिश्लेष । विभक्तिर्हि द्विधा सुप्तिङ्प्रत्ययभेदात्, एवञ्च सामान्य-विशेषन्यायेन विभक्त्यन्तरूपयो सुप्तिङ्प्रत्ययो श्लिष्टत्वे विभक्तिश्लेष, तदन्यत्र प्रत्ययश्लेष इति विवेक ।

(२३) भक्तिप्रच्छ भक्तिनम्, स च नेत्रपक्षे विलोकनस्य कर्म, तनुपक्षे कर्त्ता । ध्यानालम्बनता ध्यानविषयता, नेत्रपक्षे हितप्राप्तये नीते (सर्वा-त्मना ध्येयत्वेन नेत्रयोरपि ध्येयत्वादिति भट्टेश्वर । 'नेत्रसमत्वा ध्यान परस्परावलोकनप्रतिनिधितया तारामैत्रकापरनाम-चक्षूरागजनकमिति नेत्रमपि स्वय एव ध्येयमिति तु वय)। तनुपक्षे हितप्राप्तये नीता । एवं तनुपक्षे 'महानिधी' इत्यत्र 'टुलोपे पूर्वस्य दीर्घोऽण' [६।३। १११ पा०] इति श्लेषे रकारे परे दीर्घ इति विवेक । अत्र 'प्रणयिनी'-इत्यादिषु स्त्रीप्रत्ययकृत्तद्धितयोर्विशेषणयोश्च श्लेष, एवञ्च तयोरत्र ग्रहण । महानिधी-इत्यत्र प्रत्ययसमासतद्धितयो । कुरुतामित्यत्र आत्मनेपद-परस्मैपदविशेषणयोश्च विशेषणेतरस्थितयो श्लेष । एवं 'हरेरत्रभवान् कामतनु' इत्यत्र वचनश्लेषनिरपेक्षयोर्विशेषणेष इति ध्वनयो दृष्टयुक्ति ।

महदे सुरसन्धम्मे तमव समासङ्गमागमाहरणे ।
हर वङ्कसरणं तं चित्तमोहमवसर उमे सहसा (३४) ॥[भा०]
अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति ।
सामर्थ्यकृदमित्राणां मित्राणाञ्च नृपात्मजः (३५) ॥ [प्रक्ष०]
रजनिरमणमौलेः पादपद्मावलोक-
क्षणसमयपरोक्षापूर्वसम्पत्सहस्रम् ।
प्रमयनिवहमध्ये जातुचित् त्वत्प्रसादात्
अहमुचितरुचिः स्यान्नन्दिता सा तया मे (३६) ॥ [प्रत्य०]

---

(३४) अत्र 'संस्कृतप्राकृतयोः श्लेषः' इति प्रदीपादयः, 'संस्कृत-महाराष्ट्रयोः' इति तु दर्पणादयः । वयन्तु प्राकृतमहाराष्ट्रभाषा-क्षत्राणामनुसरणात्तन्मरुदर्शनादुदासीना एवाम । तत्र संस्कृतपक्षे महदे, सुर-धम्मं मे तम् अव समासङ्गम् आगमाहरणे । हर वङ्क-सरणम् तम् चित्तमोहं अवसरे उमे सहसा इति च्छेदः । 'महः' उत्सवः । 'सुरसन्नं' सुरैः सम्या मिलनं यस्मात् तत्, सुराणां सम्या सम्यानं यत्र तत्, सुराणामभिलषनीयमिति वा । 'अव' रक्ष । 'आगमाहरणे' विघ्नोपार्जने । 'वङ्क' अनेकं वारंवारं 'सरणं' संसारो यस्मात् सं ।

पक्षान्तरे, महइ देहि रसं धम्मे तमोवगामागामं गमागमात् हर णः । हरवङ्क सरणं तं चित्तमोहम् अवहरउ मे सहसा इति च्छेदः । मह देहि रसम् धर्म्मे तमोवगामागामं गमागमात् हर नः । हरवधु, सरणं तं चित्तमोहोऽवसरतु मे सहसा इति सः । रसं प्रीतिं । गमा-गमात् संसारात् । अत्र सहसेति पदादन्यत्र सर्व्वत्रैव भाषाश्लेषः ।

(३५)'वक्ष्यति' धारयिष्यति कथयिष्यति च ।'सामर्थ्यकृत्' सामर्थ्यकृत्सा सामर्थ्यकारकश्च यथाक्रममर्थः । अत्र वक्ष्यत्योः, कृन्तिकरीत्योश्च प्रकृत्योरेव विभिन्नस्वरूपता, न तु प्रत्ययव्यापीति प्रकृतिश्लेषः ।

(३६) सुधाः उत्सवः । सहस्रमित्यत्र पदं क्रियाविशेषणम् । अत्र 'नन्दिता'(आनन्दक) अस्म, तया 'नन्दिता' (नन्दिनलक्षणकरणाधिकरण-

सर्वस्वं हर सर्वस्य, त्वं भवच्छेदतत्परः।
नयोपकारसांमुख्यमायासि तनुवर्त्तनम् (३७)॥ [वि०]

भेदाभावात्प्रकृत्यादेर्भेदोऽपि नवमो भवेत् (३८)।

नवमोऽपीत्यपिर्भिन्नक्रमः। उदाहरणम्,-

योऽसत्कल्परगोत्राणां पक्षच्छेदक्षणक्षमः।
शतकोटिदतां बिभ्रद्विबुधेन्द्रः स राजते (३९)॥

भावः नन्दिता) त्यादित्यर्थः। एवञ्च 'स्याम्' 'स्यात्' इति उत्तमपुरुष-प्रथमपुरुषयो. श्लेष. (तस्य च पृथगनुक्तेः प्रत्ययश्लेषान्नभावः)। तथा नन्दितेत्यत्र क्त्वतलयोः कृत्तद्धितप्रत्यययोश्च श्लेषः।

(३७) गिरं प्रति भक्तस्य, पुत्रं प्रति दक्षोक्तिरियम्। तत्र प्रथम-पक्षे, 'हर' गिर। 'भवच्छेदतत्पर.' संसारनिवर्त्तकः। 'नयोपकार-सांमुख्यं' (नीतेरुपकारस्य च सांमुख्यमानुकूल्यं यस्मात् तत्) 'तनुवर्त्तनं' (शरीरावस्थितिम्) 'आयासि'(प्राप्नोषि) इति। पक्षान्तरे च 'हर' इति 'भव' इति च क्रियापदम्। 'उपकारसांमुख्यं' (प्रत्युपकारकरणं) 'नय' (अपनय), 'वर्त्तनम्' (जीविकाम्) 'आयासि' (परेषाम् आयास-[क्लेश]-दायकम्) 'तनु' (विस्तारय) इत्यर्थः। अत्र 'हर' इत्यादिपदम् एकत्र सकलम्, अपरत्र तु तिङन्तमिति विभक्तिश्लेषः। एवम् 'आयासि' 'तनु'-इत्यादावपि बोध्यम्।

(३८) पूर्वम् "अक्षरादिभिरष्टधा" इत्युक्तेः, अत्र, भेदाभावा-दक्षरादेरिति पाठो भविष्यत्यधिकः।

(३९) 'क्षपक्षमः' क्षणमात्रेणैव समर्थः। राजपक्षे 'परगोत्राणां' शत्रु-कुलानां 'पक्षस्य' सहायस्य। 'शतकोटिदतां' शतकोटिभिः वज्रतुल्येन अस्त्रेण दतां (छिन्नं खण्डयति यः तस्य भावस्तत्ता) छेदकतामिति, 'विबुधेन्द्रः' पण्डितराज इति, चार्थः। इन्द्रपक्षे 'परगोत्राणां' भेदपर्वतानां 'पक्षस्य' पतत्रस्य इति 'विबुधेन्द्रः' देवराज इति चार्थः। राजपक्षे शतकोटिदता-

अत्र, प्रकरणादिनियमाभावात् द्वावप्यर्थौ वाच्यौ ।

ननु (४०) स्वरितादिगुणभेदात् भिन्नप्रयत्नोच्चार्य्याणां,

मित्यस्य यत्कोटेर्दीप्तताभित्यर्थकत्वेऽस्तु अयं नाम प्रभेद, किन्तु पूर्वोक्तावेव प्रत्ययालेखप्रलयनिक्षेपौ ।

(३०) श्लेषो हि प्रथमतो द्विविधः, सभङ्गोऽभङ्गश्चेति । तत्राद्यः पृथु-कार्त्तस्वर-पात्रमित्यादौ, अत्र हि पृथु कार्त्तस्वरस्य पात्रमिति, पृथुकानाम् आर्त्तस्वरस्य पात्रमिति च पदभङ्गः । अन्यस्तु योऽक्षर-गोत्राणामित्यादौ, अत्र हि उभयत्रापि पक्षे एकरूपाण्येव पदानि ।

तत्र सभङ्गश्लेषो विजातीयशब्दयोः श्लेषत्वेन शब्दश्लेषः, तत्र हि उदात्तानुदात्तस्वरितानामन्यतम नैक एव स्वरः, किन्तु भिन्नो द्वौ, न च, स्वरभेदे उच्चारणप्रयत्नस्य ऐक्यम्, अपि तु विभिन्नत्वमेव, विभिन्नप्रयत्नोच्चार्यत्वयोग्यताश्च विजातीयत्वमेव नियतम्, तथापि 'काव्यमार्गे स्वरो न गण्यते'-इति नियममाश्रित्य स्वरविशेषमननुसन्धायोच्चारणात् श्लिष्टं संभवतीति ।

अभङ्गस्तु अर्थश्लेष एव, तत्र स्वरभेदेन उच्चारणप्रयत्नभेदात् न शब्दानामपि वैजात्यम्, किन्त्वर्थयोरेव । तथा, श्लेषस्य उपमाद्यलङ्कारान्तर-संकीर्ण एव नियतः, उपमादयस्तु श्लेषासंकीर्णा अपि दृश्यन्तीति सामान्यविशेषन्यायेन, श्लेषः उपमाद्यलङ्कारान्तरबाधक इति उपमाद्य-लङ्कारान्तराणां प्रतिभायाः (छायायाः आपातनः प्रतीतेः) उत्पत्तौ हेतुः, श्लेषेणैव हि अर्थद्वयस्योपस्थित्या उपमादय प्रतीयन्ते, तथापि श्लेषो विशेषतया अलङ्कारपदवीमधिरुह्य उपमादीन् दृश्यमानानपि प्रति-भासीति तेषां प्रतिभानमात्रं न तु तेषां प्ररोह-वस्तुनः स्थितिरिति । द्विविधोऽपि श्लेषोऽर्थसापेक्षतया वस्तुनोऽर्थालङ्कार एवेति केचिदर्थालङ्कारमध्ये संसृष्टेः इति अस्य शब्दालङ्कारत्वकथन मनोचितमिति पूर्वपक्षः ।

अस्य पूर्वपक्षस्य वामनत्वम्,-अभङ्गश्लेषस्यार्थालङ्कारत्वमिच्छन्, श्लेष-स्थले उपमादीनां प्रतिभानमेव भवति, श्लेष एव उपमादिरूपतया अलङ्कारः इत्यपरः, उभयरूपत्वादलङ्कार इति चान्य इति ।

तद्भावादभिन्नप्रयत्नोच्चार्य्याणाञ्च शब्दानां बन्धोऽलङ्कारान्तरप्रतिभोत्पत्तिहेतुः (४१) शब्दश्लेषोऽर्थश्लेषश्चेति द्विविधोऽपि अर्थालङ्कारमध्ये गणितोऽन्यैरिति कथमयं शब्दालङ्कारः ?। उच्यते,-दृष्ट (४२) दोषगुणालङ्काराणां शब्दार्थगतत्वेन यो

---

(४१) यत्र अलङ्कारान्तरस्य प्रतिभाया उत्पत्तिहेतुरिति षष्ठीसमासः कार्यः, 'एकप्रयत्नोच्चार्य्याणां तच्छायाञ्चैव विभ्रताम्।

स्वरितादिगुणैर्भिन्नैर्बन्ध श्लिष्ट इहोच्यते।

अलङ्कारान्तरगता प्रतीतिं जनयत् पदं।

द्विविधैरर्थशब्दोक्तिविशिष्ट तत्प्रतीयताम'

-इत्युक्तेः, "श्लेषप्रतिभोत्पत्तिहेतुरलङ्कारान्तरमेक" इति विभिन्नविभक्तितया पृथक्करणेन (२।१।४ पृ०) निर्देश्यमानत्वाच्च। एवञ्च महेश्वराद्यायाराध्यादिनोऽपि बहुश्रोत्रिनोक्तमयं रोचते।

(४२) तत्र प्रथमतः पूर्वपक्षप्रथमाय दूषयितुं दोषगुणालङ्काराणां शब्दार्थगतत्वे नियामकं दर्शयति इहेति। अयमत्र सिद्धान्तः,-शब्दार्थयोर्मध्ये यस्मिन् (शब्दे अर्थे वा) सति ये दोषगुणालङ्काराः सन्ति, असति च न सन्ति, ते तदधीनस्वरूपतया तदीया इति व्यवस्थाप्यन्ते। एतन्मूलक एव 'शब्दपरिवृत्तिसहत्व सहत्वाभ्यां (तच्छब्दमनुपादाय तच्छब्दसमानार्थकशब्दान्तरोपादान शब्दपरिवृत्ति, तत्सहत्वासहत्वाभ्यां शब्दपरिवर्त्तनेऽपि सम्भवासम्भवाभ्याम) शब्दार्थगतत्वव्यवस्थिति' इति प्राचां प्रवादः। एवञ्च यथा, श्रुतिकटुत्वादयो दोषाः, ओजआद्यपरनामानो (श्रवणादुक्ता) गाढत्वादयो गुणाः, अनुप्रासादयश्चालङ्काराः तस्मिन् तस्मिन् शब्दे सति सन्ति, असति न सन्ति चेति शब्दगता इत्युच्यन्ते, यथा च, अपुष्टार्थत्वादयो दोषाः, ओजआद्यपरनामानो (श्रवणादुक्ता) प्रौढिप्रभृतयो गुणाः, उपमादयश्चालङ्काराः सति तस्मिन् तस्मिन्नर्थे सन्ति, असति च न सन्ति च, तत्तच्छब्देन स्वपर्य्यायेणापि सहत्वे च इत्यर्थगता इति नियम्यन्ते, तथा उभयश्लेषोदाहरणत्वया निर्दोषेऽपि 'स्वयञ्च यद्वा'-इत्यादौ, परार्द्धेऽत्र प्रथमार्द्धेऽपि तस्मिन् तस्मिन् शब्दे सति असति च श्लेषस्य सत्त्वासत्त्वाभ्यां शब्दाधीनस्वरूपत्वाविशेषेण शब्दालङ्कारत्वमवश्यं वाच्यम्। न चैवमपि अर्थश्लेषस्य निर्दिश्यमानत्वं प्रश्नम, 'लोकेश'-इत्यादौ लोकादिपदपरिवर्त्तनेनान्यादिपदोपादानेऽपि श्लेषव्याकुलतया तस्यार्थश्लेषविषयत्वादिति। अयञ्च सिद्धान्तः, 'दृष्ट'-इत्यादि-'सहत्व च'-इत्यन्त-प्रतीकप्रतिपाद्यः।

विभागः, स अन्वयव्यतिरेकाभ्यामेव व्यवतिष्ठते, तथाहि, कष्टत्वादि-गाढत्वाद्यनुप्रासादयः, व्यर्थत्वादि-प्रौढ्याद्युपमादय-स्तद्भावतदभावानुविधायित्वादेव शब्दार्थगतत्वेन व्यवस्थाप्यन्ते ।

स्वयञ्च पल्लवाताम्रभास्वत्करविराजिता । (इत्यभङ्ग)

प्रभातसन्ध्येवास्तापफललुब्धे हितप्रदा(४३)॥(इति सभङ्ग)

-इति द्वावपि शब्दैकसमाश्रयाविति द्वयोरपि शब्दश्लेषत्वमुपपन्नं, न तु आद्यस्यार्थश्लेषत्वम् । अर्थश्लेषस्य तु स विषयः, यत्र शब्दपरिवर्त्तनेऽपि न श्लेषत्वखण्डना । यथा,-

श्लोकेनोन्नतिमायाति श्लोकेनायात्यधोगतिम् ।

अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च ॥

न च (४४), अयमुपमाप्रतिभोत्पत्तिहेतुः श्लेषः, अपि तु श्लेषप्रतिभोत्पत्तिहेतुरुपमा । तथाहि (४५) यथा,

'कमलमिव मुखं मनोज्ञमेतत्कचतितराम्' । इत्यादौ

---

(४३) पार्श्वतीपक्षे अस्तापः (न दुःखेन आप्यत इति व्युत्पत्त्या) दुर्लभं यत् फलं मोक्षादि, तल्लुब्धानामीहितस्य वाञ्छितस्य प्रदात्रीत्यर्थः । प्रभातसन्ध्यापक्षे अस्तापस्य निद्राभावः, अन्यत् समानम् ।

(४४) पूर्वपक्षस्य हितायशंकं निराकरोति न चेति । उपमाया या प्रतिभा ज्ञाया आपाततः प्रतीति, तस्या उत्पत्तिहेतुः सम्यादृक्, एवमेवार्थे परत्रापि द्रष्टव्यं । श्लेषस्यापि आपाततः उपमादीनां 'प्रतीतावपि न तथात्वमलङ्कारत्वे किन्तु श्लेषस्यैवालङ्कारत्वमिति पूर्वपक्षस्य सारः । यद्वा चात्र उपमाया एवालङ्कारत्वं, श्लेषस्य प्रतिभानमात्रं तथा 'उपपत्तिपर्य्यालोचने तु'-इति (२१० । २५०) वक्ष्यमाणग्रन्थावसरे एव प्रतिपादयिष्यते । पल्लवाताम्रेत्यादिशब्दसाम्येनेयमुपमा ।

(४५) ननु मुखक्रियासाम्यश्लेषोपमाप्रयोजकत्वेन शब्दसाम्यमकिंचित्करमिति अत्रोपमैव नास्ते-त्याशङ्क्य निराकरोति 'तथाहि' इत्यादिना, 'अस्मात्' इति हेत्वन्तेन । कचतितरां दीप्यतेतराम् । कचकचमिलस्य कुचांशुविस्तरपक्षे कचवा कचा यस्य तत्, इतरपक्षे कचकचेतिशब्देन खचितं तत् तदिति भावः ।

गुणसाम्ये, क्रियासाम्ये, उभयसाम्ये वा उपमा; तथा,

'सकलकलं पुरमेतज्जातं सम्प्रति सुधांशुबिम्बमिव'।

-इत्यादिशब्दमात्रसाम्येऽपि सा युक्तैव (४६)। तथाहि उक्तम् रुद्रटेन,-'स्फुटमर्थालङ्कारावेतावुपमा-समुच्चयौ, किन्तु आश्रित्य शब्दमात्रं सामान्यम्, इहापि (४७) सम्भवतः' इति। न च (४८), 'कमलमिव मुखम्'-इत्यादिः साधारणधर्म्म-प्रयोगशून्य उपमाविषय इति वक्तुं युक्तम्, पूर्णोपमाया निर्विषयत्वापत्तेः (४९)।

देव त्वमेव पातालमाशानां त्वं निबन्धनम्।
त्वं चामरमरुद्भूमिरेको लोकत्रयात्मकः (५०)॥

---

(४६) गुणक्रिययोरिव वाचकतासम्बन्धेन समानशब्दस्य, समानशब्द-वाच्यत्वस्य वा साधारणधर्म्मत्वस्य सम्भवेन गुणक्रिययोरेव उपमाप्रयोजकत्वे मानाभावादिति शेषः।

(४७) इहापि शब्दालङ्कारमध्येऽपीत्युद्योतकृत्।

(४८) नन्वु उपमादिसंकीर्णस्य श्लेषस्यासम्भवात्, उपमादीनान्तु श्लेषं विनापि सम्भवात् सामान्यविशेषन्यायेन श्लेषस्यैवोपमादिबाधकत्वमिति, 'कमल-मिव सुखं मनोज्ञम्'-इत्यादावपि अर्थश्लेष एवालङ्कारः, मनोज्ञत्वस्य, उपमानो-पमेययोश्चन्द्रसुखयोर्भेदेन भिन्नतया श्लिष्टत्वात्। यत्र तु न साधारणधर्म्मो-पादानं, तत्र श्लेषाभावादुपमैवालङ्कार इत्याशेषं समाधत्ते नचेति।

(४९) तस्या. साधारणधर्म्मानुपादाननियतत्वादिति शेषः।

(५०) उपमादालङ्काराणां श्लेषस्य च सामान्यविशेषभावं, श्लेषस्य निर्विषयत्वपरिहारञ्चापनेतुं श्लेषसंकीर्णोदाहरणं दर्शयति देवेति। एक-स्मिन् पक्षे, 'आशानां' दिशां, 'निबन्धनं' नियमनस्थानं, भूलोक इति यावत्, भूलोके एव सर्व्वगत्या दिगवधारणात्। 'अमरमरुद्भूमि' 'च' 'अमराणां' देवानां, 'मरुतां' मरुत्स्थानञ्च 'भूमिः', आकाशस्थानम्, स्वर्लोक इति यावत्।

-इत्यादिः श्लेषस्य च उपमादयलङ्कारविविक्तोऽस्ति विषय इति; द्वयोर्योगे (५१) सङ्कर एव। उपपत्तिपर्य्यालोचने (५२) तु उपमाया एवायं युक्तो विषयः, अन्यथा विषयापहार एव पूर्णोपमायाः स्यात्।

न च, अविन्दुसुन्दरी नित्यं गलल्लावण्यविन्दुका।

-इत्यादौ (५३) विरोधप्रतिभोत्पत्तिहेतुः श्लेषः, अपितु

प्रकारान्तरे च 'अलं' (अत्यर्थं) 'यातां', 'आयासम्' (अभिलाषाणां) 'निबन्धन' (कारणं), 'रामरमणतश्च भूमिः' (पात्रम्) इति। अत्र उपमाया असंकीर्णोदाहरणप्रदर्शनस्यैव प्रकृतोपयोगितया यद्यपि रूपकं न दोषाय। तेनाप्यसंकीर्णोदाहरणन्तु 'येन ध्वस्तम्' इत्यादि; अतएव 'इत्यादिः'-इत्यनादिपदम् प्रयुक्तं।

(५१) एवञ्च श्लेषस्य उपमाद्यसंकीर्णविषयवत्त्वात् सामान्यविशेषभावो नास्तीति नोपमाबाधकत्वं श्लेषस्य, परमलङ्कारान्तरयोरिवानयोरप्येकत्रोपनिपातेन सङ्कर एव युक्त इत्याह द्वयोरिति।

(५२) नन्वेवं चेत् 'स्तनौ मदकला'-इत्यादावपि श्लेषरूपमायाश्च सत्त्वात् सङ्कर एवास्तां नतूपमा,-इत्याशेपे आह उपपत्तीति। इयमत्रोपपत्तिः, प्रधानयोर्द्वयोरेकत्र समावेशो हि सङ्करः, न चात्र द्वयोरेव प्राधान्यं, येन सङ्करः स्यात्, प्राधान्यञ्चात्र उपमायाः, श्लेषस्य तद्विशेषकतया तदङ्गमित्यप्रधानमेव, न हि श्लेषं विना साधारणधर्मसम्भवः, न च तं विना उपमा सम्भवति; यच्च यद्विशेषकं, तत्तदङ्गम्, अङ्गञ्चाप्रधानमेव; न चाप्रधानेन व्यपदेश, 'प्रधानेन हि व्यपदेशा भवन्ति'-इति नियमात्, अत्र उपमैव प्रधानभूता व्यपदेशहेतुरिति। 'अन्यथा' उपपत्तिपक्षेऽपि सङ्करस्वीकारे। 'स्यात्'-इति, अविशेषेण 'कमलमिव सर्वं मनोरमम्' इत्यादावेकश्लेषमूलकपूर्णोपमास्थलेऽपि सङ्करस्वीकारप्रसङ्गः, सङ्करस्याङ्गाङ्गिभावरूपम्, इति सङ्करेणैव तत्र तत्रापि व्यपदेश आस्ताम्, न तु पूर्णोपमयेति भावः।

(५३) परमलङ्कारान्तराधानेऽपि श्लेषबाधकत्वं दर्शयति न चेति। अविन्दुरपि लावण्यविन्दुकेति विरोधः, अत्र तु प्रतिबिम्बित इन्दुरिति विरोधभङ्गः।

श्लेषप्रतिभोत्पत्तिहेतुर्विरोधः, न हि अत्र अर्थद्वयप्रतिपादकः (५४) शब्दश्लेषः, द्वितीयार्थस्य प्रतिभातमात्रस्य प्ररोहाभावात्। न च (५५), विरोधाभास एव विरोधः, श्लेषाभासः श्लेषः, तदेवमादिषु वाक्येषु श्लेषप्रतिभोत्पत्तिहेतुरलङ्कारान्तरमेव। तथा च, सद्वंशमुक्तामणिः (५६)। [१]

नाल्पः कविरिव स्वल्पश्लोको देव, महान् भवान् (५७)। [२]

---

(५४) 'अर्थद्वयप्रतिपादक' उभयविधार्थस्यान्वयबोधकतया अभिप्रेत। 'द्वितीयार्थस्य' विन्दुरहितविन्दुसहितरूपार्थस्य। 'प्रतिभातमात्रस्य' शब्दशक्तिमहिम्ना आपातत उपस्थितमात्रस्य। 'प्ररोहाभावात्' प्रस्फुटत्वाभावात् प्रकृतान्वयाप्रवेशात्। अयं भावः, उभयविधार्थस्य विवक्षितत्वे एव 'अर्थभेदेन शब्दभेदः'-इति नियमात् शब्दयो श्लेष स्वीक्रियते, न चात्र, उभयविधार्थान्वयो विवक्षित, द्वितीयार्थस्यापि अन्वये प्रवेये वास्तविकविरोधप्रसङ्गादिति सात्त्विक प्रवेश एवात्र नास्ति, दूरे चाभासस्य विरोधितेति।

(५५) नन्तु विरोधाभासस्य विरोधालङ्कारत्वमिव श्लेषाभासस्यापि श्लेषालङ्कारत्वमस्तु इत्याक्षेपे समाधत्ते न चेति। अयं भावः, वास्तविकविरोधस्य दोषतया विरोधाभासस्यैव विरोधालङ्कारत्व स्वीक्रियते, श्लेषस्य तु वास्तविकस्य सत्त्वेन तस्यैवालङ्कारत्व युक्तम् न तु तदाभासस्यापीति।

(५६) 'सद्वंश' सत्कुलमेव सद्वेणुश्च 'मुक्तामणि', एवञ्चात्र यत्र शब्दे श्लेषसयुक्त वेणुकुलयो रूपकमेव राजति मुक्तामणित्वारोपे हेतुरिति शिष्टपरम्परितरूपकम्, इदमेव एकदेशविवर्तिरूपकमित्युच्यते। श्लेषस्तु अविवक्षितत्वया तदङ्गत्वेन न प्रधानमिति।

(५७) 'श्लोक' पद्य यशश्च। 'महान् भवान्', अल्प कविरिव न स्वल्पश्लोक इत्यर्थः। अत्र व्यतिरेक श्लोकयशश्लेषसयुक्त इति श्लेषव्यतिरेकोऽयम्। श्लेषस्तु तदङ्गतया अप्रधानमेव।

अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः ।
अहो दैवगतिश्चित्रा तथापि न समागमः (५८) ॥ [३]
आदाय चापमचलं, कृत्वाऽहीनं गुणं, विषमदृष्टि ।
यच्चित्रमच्युतगुरो लक्ष्यमभाङ्क्षीन्नमस्तस्मै (५९) ॥ [४]

-इत्यादौ एकदेशविवर्त्ति रूपक-श्लेषव्यतिरेक समासोक्ति-विरोधत्वमुचितम्, न तु श्लेषत्वम् (६०) ।

शब्दश्लेषः-(६१)इति च उच्यते, अर्थालङ्कारमध्ये च लक्ष्यते इति कोऽयं नयः । किञ्च (६२) वैचित्र्यमलङ्कार इति, य

---

(५८)'अनुराग' प्रणयविशेष, लौहित्यानुगतिश्च । 'पुर सरो'ऽग्रगामी तत्पुरुषश्च । 'समागमो' मिलन स्त्रीपुंसयोरभेद । अत्राभिधया नियमनेनार्थद्वयान्वयबोधस्याभावात् न श्लेष, किन्तु श्लिष्टविशेषणमहिम्ना सादृश्यप्रतीतिमात्रमिति समासोक्तिरेवालङ्कारः ।

(५९) त्रिलोचन, हिमाचलं धनुः, वासुकिं ज्यां, विष्णुं शरञ्च विधाय त्रिपुरासुरं जघानेति प्रसिद्धोऽर्थः । अचलमुच्चं धनुः, हीनो हीर्णः, अथवा अहीनो धनुर्दण्डादन्यूनो गुणः, विषमा लक्ष्यादन्यत्र निक्षिप्ता दृष्टिः, तथापि लक्ष्यभङ्ग इति विरोधाभासः, स एव प्रधानं श्लेषस्य प्रयोजकाभावादिलुप्तश्लेषः ।

(६०) अलङ्कारश्लेषेति शेषः ।

(६१) पूर्वपक्षस्य तृतीयचरणं दूषयति यच्छ्लेष इति ।

(६२) ननु शब्दालङ्कारतया न शब्दश्लेषव्यपदेशः, किन्तु विभावादयो शब्दयो श्लेषरूपतया तथा व्यपदेश्याः, अर्थालङ्काररूपतया च अर्थालङ्कारमध्ये गण्यन्ते इति को दोष इत्यत आह किञ्चेति । य एव (शब्दो वा अर्थो वा) 'कविप्रतिभायाः' कविसम्बन्धे 'सरसः' स्फुरणं, तस्य 'गोचरो' विषयः, तस्यैव (शब्दे वा अर्थे वा) विचित्रता, इति हेतोः, स्वैव (शब्दो वा अर्थो वा) 'अलङ्कारभूमि' अलङ्कारस्थानम् । विचित्रताया एवालङ्कारतया यत्र विचित्रता, तस्यैव पुनरलङ्कार इति फलितार्थः । एवञ्च शब्दोभयविध-

एव कविप्रतिभासंरम्भगोचरस्तत्रैव विचित्रता इति सैवालङ्कारभूमिः ।

अर्थसुखप्रेक्षितत्वमेतेषा शब्दानामिति चेत् (६३), अनुप्रासादीनामपि तथैवेति तेऽपि अर्थालङ्काराः किं नोच्यन्ते ? रसादिव्यञ्जकस्वरूपवाच्यविशेषतव्यपेक्षत्वेऽपि हि अनुप्रासादीनामलङ्कारता (६४)। शब्दगुणदोषाणामपि अर्थापेक्षयैव गुणदोषता। अर्थगुणदोषालङ्काराणां शब्दापेक्षयैव(६५)व्यवस्थितिरिति तेऽपि शब्दगतत्वेनोच्यन्ताम् । 'विधौ (६६) वक्रे मूर्ध्नि'-इत्यादौ च वर्णादिश्लेषे एकप्रयत्नोच्चार्यत्वेऽर्थश्लेषत्वं शब्दभेदेऽपि प्रसज्यतामित्येवमादि स्वयं विचार्यम् ।

तच्चित्रं यत्र वर्णानां खड्गाद्याकृतिहेतुता ॥८॥

श्लेषस्यैव कविप्रतिभासंरम्भविषयतया श्लेषस्यैव वैचित्र्यमिति कृत्वा एव तत्रैव इति भावः । अलङ्कारभूमिरिति विधेयापेक्षतया सैवेत्यस्य स्त्रीत्वनिर्देशेति ।

(६३) ननु निरर्थकशब्दानां श्लेषासम्भवेन श्लेषस्यार्थसापेक्षतया अर्थालङ्कारत्वनिबन्धनमेवेति पूर्वपक्षयति अर्थसुखेति ।

(६४) रसादिव्यञ्जकं यत् स्वरूपं अनुकूलवर्णादिरूपं, यच्च वाच्यविशेषः अर्थविशेष, तयोः तव्यपेक्षत्वे अधीनत्वे, सतीति शेषः । अपिर्भिन्नक्रमेणान्वेति, अनुप्रासादीनामपि रसादिव्यञ्जकस्वरूपवाच्यविशेषतव्यपेक्षत्वे सति हि अलङ्कारतेत्यर्थः । अनुप्रासो हि रसादिव्यञ्जक अरूपमपेक्षते, अनुप्रासशब्दश्च तदीय ('अनु' रसाद्यनुगतत्वेन "प्रक्रमैक्य आप" इत्याप इति) व्युत्पत्ते । रसादयश्च अवश्यं न वस्त्वन्तीति अनुप्रासस्यार्थापेक्षा । छेकानुप्रासस्योच्चारश्च वाच्यविशेषं वाक्यादेरपेक्षते इति ।

(६५) शब्देनार्थबोधं विना तथाव्यवहारात् ।

(६६) एकप्रयत्नोच्चार्यत्वमेवार्थश्लेषत्वे न नियामकमनियमात् विचारितम् ।

सन्निवेशविशेषेण यत्र न्यस्ता वर्णाः खड्ग-मुरज-पद्मादया-कारमुल्लासयन्ति, तच्चित्रं काव्यम् (६७) । कष्टं काव्यमेतदिति दिङ्मात्रं प्रदर्श्यते । उदाहरणम्,-

मारारिग्रकरामेभमुखैरासाररंहसा ।
सारारब्धस्तवा, नित्यं तदर्त्तिहरणक्षमा ॥
माता नताना, सङ्घट्टः श्रियां, बाधितसंभ्रमा ।
मान्याथ, सीमा रामाणां, शं मे दिश्याद्दुमादिमा (६८) ॥

(खड्गबन्ध)

(६७) चित्रं चित्रालङ्कारयुक्तम् ; क्वचित् 'चित्रमलङ्कार'-इत्येव पाठ । यद्यपि यद्वात्मकानां वर्णानां खड्गाद्याकारहेतुता नास्ति, तथापि तद्व्यञ्जकानां चित्रात्मकवर्णानां तथात्वेन तेषु तथात्वमुपचर्यते ।

(६८) खड्गबन्धो यथा,—



खड्गबन्धप्रकारो यथा, मध्येऽधरि अधश्च यावदायतान् खड्गो लेख्यः, तस्य उपरिभागावयवमध्ये 'मा' इति मात्रयुक्तं वर्णं विन्यस्य, तदूर्ध्वाधोऽङ्कमेण (उपरि अधो वा) एकस्यां धारायां 'रा'-इत्यादीन् 'क'-इत्यन्तान् चतुर्दश वर्णान् न्यसेत्, खड्गफलके च 'मा'-इति वर्णो विन्यस्य, (तस्य च ऊपरं 'मा'-इति वर्णं प्रविशेत्) । ततोऽपरधारायामधरोऽङ्कमेण 'रा'-इत्यादीन् 'क'-इत्यन्तान् चतुर्दश वर्णान् विन्यसेत् (मा-वर्णः 'मध्ये मात्रयुक्तं प्रविशेत्) ततश्च खड्गस्य एकस्यां उपरिभागायां


सरला वङ्कलारम्भतरलालिवलारवा।
वारलावङ्कलामन्दकरलावङ्कलामला (६८)॥
(सुरजबन्धः)

निष्क्रमणक्रमेण 'सा'-इत्यादीन् 'डः'-इत्यन्तान् षष्ठ वर्णान् विन्यस्य, अपरस्यामुपरिष्यावां प्रवेशक्रमेण 'स्रि'-इत्यादीन् 'अं'-इत्यन्तान् षष्ठ वर्णान् न्यसेत्। (माकारः प्राथमिके माकारे प्रविष्टः)। ततश्च खड्गसदौ 'मा'-मन्दादयः क्रमेण 'या-इत्यादि 'सी-इत्यन्तं वर्णत्रयं विन्यस्य तदधस्तनमध्ये माकारौ विन्यस्य। ततश्च तदूर्ध्वभागावां निष्क्रमणक्रमेण 'रा'-इत्यादीन् 'यम्'-इत्यन्तान् चतुरो वर्णान् विन्यस्य अपरभागायां प्रवेशक्रमेण 'मे'-इत्यादि 'डु'-इत्यन्तं वर्णचतुष्टयं विन्यसेत्। (माकारो-ऽधस्तनमध्यस्थमाकारे प्रविष्टः)।

ततश्च षष्टेर्मूलभागे माकारस्याधः क्रमेण 'दिमा'-इति वर्णद्वयं न्यसेत्।

श्लोकयोरयमर्थः, मारस्य कन्दर्पस्य अरिः शिवः, यत्र इन्द्रः, रामो रघुनन्दनः परशुरामो वा दशमुखो रावणः, एतैराकारश्लेषेण भारावस्यात-शब्देनेन भारमतिशयम् सफलं वा आरब्धः स्तवो यस्याः सा। तेषां भारादिभक्तादीनां निर्वं पोढ़ाक्षरत्वमर्थात्। श्रियां संपदः समेऽवस्थानम्। बाधितो निरस्तः संभ्रम उद्वेगो यस्याः सा। रामाणां रमणीयानां भारीणां सीमा परा काष्ठा मैथिलभूमिः रमणीयतमेति यावत्। आदिमा निम्ना। अन्यत् सुगमम्।

(६८) सुरजबन्धो यथा,—



अस्य न्यासप्रकारस्त्वयम्, षड्विक्रमेण प्रथमपादवर्णान् लिखित्वा, तेषामधोऽधस्तथैवापरपादत्रयवर्णान् लिखेत्, ततरूपेषु रेखाविशेषदानेन श्लोकोद्धारो सुरजोत्पादनञ्च कार्यम्, यथा, प्रथमादिपादचतुष्टयस्य यथाक्रमं प्रथम-द्वितीय-तृतीय-चतुर्थवर्णेषु अधोगत्या एका रेखा देया, ततश्च तद्रेखापतत. चतुर्थादिपादचतुष्टयस्य व्युत्क्रमेण पञ्चम-षष्ठ-सप्तमाष्टमेषु ऊर्ध्वगत्या एका रेखा देया ; एव रेखाद्वयेन प्रथमपादोत्पत्ति । ततश्च द्वितीयपाद-प्रथमवर्ण-प्रथमपादद्वितीयवर्णयोरेका रेखा, तदपतः प्रथमपादतृतीयवर्ण-द्वितीयपादचतुर्थवर्णयोरेका, तदपतः द्वितीयपादपञ्चमवर्ण-प्रथमपादषष्ठवर्णयेरेका, तदपतः प्रथमपादसप्तमवर्ण-द्वितीयपादाष्टमवर्णयोश्चैका-इत्येवं-रेखाचतुष्टयेन द्वितीयपादोद्धारः । यथैव प्रथम-द्वितीयपादयोर्येषु येषु वर्णेषु रेखाचतुष्टयदानेन द्वितीयपादोद्धार, तथैव तृतीय-चतुर्थपादयोस्तेषु तेषु वर्णेषु रेखाचतुष्टयेन तृतीयपादोद्धारः कार्यं । एवं चतुर्थादिपादचतुष्टयस्य व्युत्क्रमेण प्रथम-द्वितीय-तृतीय-चतुर्थवर्णेषु ऊर्ध्वगत्या एका रेखा, एका च रेखा तदपतः प्रथमादिपादचतुष्टयस्य क्रमेणाधोगत्या पञ्चम-षष्ठ-सप्तमाष्टमवर्णेषु देया, एव रेखाद्वयेन चतुर्थपादोत्पत्ति ।


श्लोकस्यायमर्थः, पक्षत्यागत्या मरुत् विशेया। मरुत्ता मेघादिकौटिल्यरहिता । षड्भैरनेकैरारम्भैरेतामिस्तरलानाम् चञ्चलानाम् अस्थिरतानां चमरचमूनाम् चारवः कोलाहलो यस्यां, सा । चारुता कुतः षड्जा यस्याम्, सा । चमन्दा उद्योगिनः (अर्थात् एणाय) मरुत्ता (मरं राजपाद्यभागं खानि गच्छन्तीति) राजानः यस्यां सा, मरुदेव युद्धारम्भोपयोगी मरुत्तिति । अमङ्गले शुक्लपक्षे अमला निर्मला, (अमङ्गले कृष्णपक्षेऽपि अमला इति वार्थ)। मरुत्येवत मरुत्तिपाठे (मरं मरुत्वाद्यं खाति आदत्ते इति व्युत्पत्त्या) मरुत्वाद्योद्यमवतीति मरुत्तरः ।

भासते प्रतिभासार ! रसाभाताहतावि भा ।
भावितात्मा, शुभा वादे, देवाभा वत ते सभा (६८) ॥

(पद्मबन्धः)

---

(६८) पद्मबन्धो यथा,—



अस्य स्वाङ्गप्रकारो यथा, अष्टदलपद्मं लेख्यम्, तस्य कर्णिकायाम् श्लोकस्य आदिमो वर्णः न्यास्य, स च अष्टधा लिखितः। प्रतिदलं द्वौ द्वौ वर्णौ लेख्यौ, तस्य दिग्दलेषु निर्गमप्रवेशाभ्यां स्थितौ वर्णौ, विदिग्दलेषु तु न स्थितौ। तस्य प्राच्यदले आदौ निर्गमः श्लोकान्ते च प्रवेशः, दक्षिणोत्तरदलयोर्विपर्ययेण

रसासार, रसा सारसायताच्च, च्छतायसा ।
सातावात, तवातासा रच्छतख्वख्छतच्चर, (७०) ॥

(सर्व्वतोभद्रम्)

प्रवेशः, पश्चिमदले तु प्रविश्यैव निर्गम., आग्नेयकायव्यदलयो. प्रवेश एव, नैर्ऋतेशानयोस्तु निर्गम एव । तथाहि प्रथमे कर्णिकाया भा-इति, पूर्व्वदले निर्गमक्रमेण सते-इति, आग्नेयदले प्रवेशक्रमेण प्रति-इति चैते वर्णा लेख्याः, भा-इति वर्ण. कर्णिकास्थ स्त्रिदः, ततो दक्षिणदले निष्क्रमणक्रमेण सार-इति वर्णद्वयम् लेख्यम्, तस्मिन् वर्णद्वये च प्रवेशक्रमेण रसा-इति वर्णद्वयं स्त्रिदम्, कर्णिकायाश्च भावर्ण स्त्रिद. एवमन्येऽपि चक्रादिष्वाप्यूह्यम् ।

श्लोकस्यायमर्थ, हे 'प्रतिभासार', सद्भावनयाधिमतिमत्, 'ते सभा' 'भासते' । किंभूता सा, 'रसाभासा' रसैराभासा शोभिता । 'छतविभा' अछता अक्षता, आविभा सम्यगुद्दीप्तिर्यस्या. सा । 'भाविताता' भावितः निर्णीतः ध्यातो वा आत्मा यस्यां सा । 'वारे' तत्त्वधार्यां 'सभा' । 'देवाभा' देवसभास्वरूपा इत्यर्थः ।

(७०) सर्व्वतोभद्रस्य न्यासप्रकारविशेषप्रदर्शनं निरर्थकं, पादचतुष्टयस्य क्रमेणाधोऽधोलिखनमेव पर्य्याप्तम् ; तथा हि ते एव हि "तद्दिं सर्व्वतोभद्रं भ्रमणं यदि सर्व्वतः"-इति दण्डिलक्षणे सर्व्वतोभ्रमणस्य प्रतीतिसम्भवात् । सर्व्वतोभ्रमणञ्च अनुलोमेन, प्रतिलोमेन, अनुलोमप्रतिलोमाभ्यां, प्रतिलोमानुलोमाभ्याञ्च ; अध क्रमेण, उपरिक्रमेण, अधउपरिक्रमेण, उपर्य्यधः-क्रमेण च चतुर्धा च एव श्लोक आयातीत्येवंरूपम् ।

यथा—

र	सा	सा	र	र	सा	सा	र
सा	य	ता	च्च	च्च	ता	य	सा
सा	ता	वा	त	त	वा	ता	सा
र	च्च	त	ख्व	ख्व	त	च्च	र

अत्र हि प्रथमादिपादानामनुलोमेनैव प्रतिलोमेनोच्चारणेऽपि न एव वर्णा:

सम्भविनोऽन्ये प्रभेदा' शक्तिमात्रप्रकाशका सतु काव्य-रूपतां दधतीति न प्रदर्श्यन्ते ।

पुनरुक्तवदाभासो विभिन्नाकारशब्दगा ।

एकार्थतैव,

भिन्नरूपसार्थकानर्थकशब्दनिष्ठमेकार्थत्वेन मुखे भासनं (७१) पुनरुक्तवदाभास । स च,

शब्दस्य,

भावान्ति । एव प्रतिपाद प्रथमादिवर्णचतुष्टयस्य पञ्चमादिवर्णचतुष्टयस्य वा अनुलोमप्रतिलोमाभ्याम, प्रतिलोमानुलोमाभ्या वा तृतीय पादा । एवं, पादचतुष्टयस्य प्रथमाना अष्टमानाञ्च वर्णाना अध क्रमेण उपरिक्रमेण वा उच्चारणे प्रथमपाद, अथवा प्रथमवर्णचतुष्टयस्य अष्टमवर्णचतुष्टयस्य वा क्रमेण उपर्यध क्रमेण, अधउपरिक्रमेण वा उच्चारणे प्रथम पाद । एव-रीत्या प्रत्येकपादाना द्वितीयवर्णचतुष्टयेन सप्तमवर्णचतुष्टयेन च द्वितीयपादस्य, तृतीयवर्णचतुष्टयेन षष्ठवर्णचतुष्टयेन च तृतीयपादस्य, एव चतुर्थवर्णचतुष्टयेन पञ्चमवर्णचतुष्टयेन च चतुर्थपादस्य च उत्पत्तिरित्येव बहुविध भ्रमणमूह्यम् ।

रक्षत तु भवन्तु भवत्तर इति शब्दच्छेद । श्लोकस्यायमर्थ, हे रक्षाधार (पृथ्वीनेत), रक्षतक्षम रक्षा (पृथ्वी) भवतायथा (भवत नायित अव शुभावहविधिर्यैं, तान् क्षति अक्ष प्रापयति या, सा, सोऽन्तकर्म्मणि रक्षस रूपम्), अनाथा (अनुपलया, तस्य उपलक्षे-रक्षस्य रूपम्) च (च) अस्तु रक्षस्पर्श । हे धारधावताच्च, (धारवत् पक्षवत् धावत अक्षिणी यस्य सः) हे धातापात, (धाते क्षये धवात अवक्षय, अन्तक्षय), हे अनक्षर, (अनक्षर, तस्य सम्बोधने, हा हाने रक्षसम्बो रूपम्) ।

(७१) मुखे आभासन । भासनम् प्रतीति, तथा च कारिकाक्षम्

सभङ्गाभङ्गरूपकेवलशब्दनिष्ठः । उदाहरणम्,-

अरिवधदेहशरीरः, सहसा रविसूततुरगपादातः ।
भाति सदानत्यागः स्थिरतायामवनितजतिलकः (७२) ॥

चकासत्यङ्गनारामाः कौतुकानन्दहेतवः ।
तस्य राज्ञस्सुमनसो विबुधाः पार्श्ववर्त्तिनः (७३) ॥

तथा शब्दार्थयोरयम् ॥ ९ ॥

एकार्थतेवेतिपदम् एकार्थतया व्यापारतो भासनपरमितिबोध्यम् । विभिन्नरूपयोर्वस्तुनो भिन्नार्थयोरपि शब्दयोरापातत एकार्थतया प्रतीतिः पुनरुक्तवदाभासः ।

(७२) 'अरिवधदेहशरीरः' अरिवधदा हैहा (चेटा) येषाम्, तान् अरिणः (अपयुक्तान् योधान्) हैरयति (प्रेरयति) यः सः । 'सहसारवि-सूतत्तुरगपादातः' सहसा रविभि. सूता' (सदु जवा. सम्बद्धाः) तुरगा पादातास्च (पदातिकाः) यस्य, सः । 'स्थिरतायाम्' 'अवः'(पर्व्वत इव) 'अवनितजतिलकः', 'सदानत्यागः' सतामु विषये आनत्या (अतिनम्रभावेन धनोपार्जनेन वा) 'भाति' शोभते इत्यर्थः ।

(७३) 'अङ्गनारामाः' अङ्गने एव आ (समन्तात्) रमन्ते इति अङ्गनारामा (अपवादिकः) । 'कौतुकानन्दहेतवः,' कौतुकेन (उत्कण्ठयापि अभिलाषेण नृत्यगीतादिना वा) आनन्द (विषयो) नन्दस्य धनोपार्जनस्य, हेतवः । (कौतुकेन आनन्दहेतवः-इति यथाश्रुतार्थकरणे आनन्दशब्दस्य परिवृत्तिसङ्क्रमेण अस्य शब्दमात्रालङ्कारोदाहरणत्वापत्तिः) । 'सुमनसः' 'सु' (शोभनानि) मनांसि येषां ते । 'विबुधाः' पण्डिताः ।

अत्र श्लोकद्वये शब्दगत एवायमलङ्कारः, तथाहि हैहयशरीर-इति हावेव शब्दौ सार्थकौ सभङ्गौ च । सारथि-सूत-इति द्वयोरादौ निरर्थकौ, अन्यत्र सार्थकौ, अभावेन सभङ्गौ । दान-त्याग-इति अभावपि निरर्थकौ सभङ्गौ च । अङ्गनारामाशब्दयोः पूर्वः सभङ्गः निरर्थकश्च, उत्तरस्तु अभङ्गः सार्थकश्च ।

उदाहरणम्,-

तनुवपुरजघन्योऽसौ करिकुञ्जररुधिररक्तखरनखरः।
तेजोधाम महःप्रथुमनसामिन्द्रो हरिर्जिष्णु (७४)॥

अत्रैकस्मिन् पदे परिवर्त्तिते नालङ्कार इति शब्दाश्रयः, अपरस्मिंस्तु परिवर्त्तिनेऽपि स न हीयते-इत्यर्थनिष्ठ इत्युभयालङ्कारोऽयम्॥

॥ इति काव्यप्रकाशे शब्दालङ्कारनिर्णयो नाम
नवम उल्लासः॥

कौतुकानन्दशब्दयो र्मूर्खोऽभङ्ग, उत्तरस्तु समङ्गं, उभावपि सार्थकौ। सुमनसो त्रिधा इति द्वावेव अभङ्गौ सार्थकौ चेति शब्दगतस्यास्य षड्विधत्वम। एतेषां शब्दानां परिवृत्त्यसहत्वात शब्दालङ्कारत्वम।

(७४) असौ हरिः (सिंहः), तनुवपुरपि (क्षीणशरीरोऽपि) अजघन्य (श्रेष्ठ) इति विधेयम। स किम्भूत ?—करिकुञ्जराणाम (गजश्रेष्ठानाम्) रुधिरेण रक्ता (लोहिता) खरा (तीक्ष्णा) च नखरा यस्य सः, तेजसाम् धाम (आश्रय), महसा (तेजसा) प्रथुमनसाम (विपुलान्तःकरणानाम्) इन्द्रः (प्रभुः), जिष्णुश्च (जयशीलश्च) इति। अत्र तनु-कुञ्जर-रक्त-धाम हरिपदानि परिवृत्त्यसहानि, वपुरादिपदानि तु तत्सहाशीत्युभयालङ्कारत्वम्। धाम महः इत्यत्र हरिर्जिष्णु -इत्यत्र च शब्दगतत्वमेव, उभयोरेव शब्दयोः परिवृत्त्यसहत्वादिति। एवं करिणाश्चका वर्ण एव शब्दा उत्तरत्र स्थिताः अत्रार्थवाचका इति मते 'करिकुञ्जर' इत्यत्र अर्थगतोऽयमलङ्कार उभयशब्दयोरेव परिवृत्तिसहत्वादिति तु विभावनीयम्।

॥ दशम उल्लासः ॥

अर्थालङ्कारानाह (१),-

साधर्म्यमुपमा भेदे,

उपमानोपमेययोरेव (२), (न कार्य्यकारणादिकयोः)

(१) "उपमानन्वयसहस्रमेयोपमा तथा । उक्तेषाद्य संसन्देहौ रूपकापह्नुती तथा । श्लेषेणया समासोक्तिः प्रोक्ता चैव निदर्शना । अप्रस्तुतप्रशंसातिशयोक्ती परिकीर्तिते । प्रतिवस्तूपमा संहृदृष्टान्तौ दीपकं तथा । उक्तयोगितया चैव व्यतिरेक प्रकीर्तितः । आक्षेपो विभावना च विशेषोक्तिस्तथैव च । यथासंख्यमर्थान्तरन्यास सारो विरोधवत् । सभावोक्तिरया व्याजस्तुति प्रोक्ता सहोक्तिवत् । विनोक्ति-परिवृत्ती च भाविकं काव्यलिङ्गवत् । पर्यायोक्तमुदात्तञ्च समुच्चय उदीरितः । पर्यायपरिवृत्तमाञ्च प्रोक्त परिकरस्तथा । व्याजोक्तिपरिसख्ये च विशेष हेतुमालया । अन्योन्यमुत्तर चैव सारो सहदयैरिति । समाधिश्च प्रहर्षेण भ्रान्तिमाञ्च प्रत्यनीक मीलितञ्च सामान्यञ्च विशेषवत् । तद्गुणातद्गुणौ चैव व्याघात मौलिकौ तथा । सङ्कीर्णसृष्टी चैवमेकवस्तूदीरिता' इति प्रदीपे ।

(२) तत्र साधर्म्यं हि साहश्यं परिणामकः सम्बन्धोऽत्र, एकधर्मिसम्बन्धित्वमनुयोगित्व एव निवेश, (यथा, यत्र च उपमेय, यथाक्रम ये तथा उपमानत्वेन प्रतीय मानुयोगिनौ, यथा, अनेकयोः एकस्मिन् सम्बन्धः, एकस्य वा अनेकस्मिन् सम्बन्ध इति तथा सति, यथाक्रम ये अनेकस्थौ प्रतियोगिनौ तावेव पुनरनेकस्थौ अनुयो-

यथेवयादिशब्दा (६) यत्सदृशस्तेनोपमानतामतीतिरिति दृष्टयुपमानविशेषत्वान्येते; तथापि शब्दशक्तिमहिम्ना श्रुत्यैव षष्ठीवत्साधर्म्यं प्रतिपादयन्तीति तत्सद्भावे श्रौती उपमा। तथैव, "तत्र तस्येव"-[५।१।११६ पा० सू०]-इत्यनेनेवार्थे विहितस्य वतेरुपादाने।

---

(६) यथादिशब्दानां साधर्म्यात्सम्बन्धवाचकत्वं प्रतिपादयन् तत्सद्भावे श्रौतत्वं प्रतिपादयति यथेवेति। 'यत्सदृशः' यदनन्तरमुपात्तः। 'तस्येव' तदृशस्येव। 'श्रुत्यैव' श्रवणमात्रेणैव। 'सम्बन्धं' प्रकृते उपमानोपमेयगतं साधर्म्यसम्बन्धरूपं साधर्म्यम्। अयमत्र पूर्वः पक्षः यदि यदर्थं धर्मविशेषं प्रतिपादयति तत् तद्विशेषणं, 'एकविशेषणस्य साकल्ये स्वार्थं प्रत्याययतीति नियमः, यथा, नीलमुत्पलमित्यादौ नीलपदम् उत्पलपदार्थे स्वार्थं प्रत्याययत् उत्पलपदस्य विशेषणं भवति, तत्र साधर्म्यस्य स्वार्थम् प्रत्याययति, तथा, 'सखं मनोरमं कमलं यथैतत्' इत्यादौ यथाशब्दः कमलपदोत्तरमुपात्तत्वेन कमलपदार्थे उपमानतां प्रत्याययतीति कमलपदस्य विशेषणमिति उपमानभूते कमले एव साधारण्यधर्मसम्बन्धं बोधयतु, तदन्यस्मिन् उपमेये सखे कथं तदवगमयेत्? इति उपमानोपमेययोः साधर्म्यस्य शब्दाभिधेयत्वात् कथं श्रौतत्वमिति। सिद्धान्तयति, राज्ञो राज्ञेवेत्यादौ अव्ययशब्दान्तरोपात्ता यथोपमाभिधः सादृश्यार्थं राजनि स्वामित्वं प्रत्याययन्नो तद्विशेषणं भवन्यपि यथा राजराजयोः स्वस्वामिभावं सम्बन्धं प्रत्याययति, तथा उपमाने उपमानतां प्रत्याययन्नोऽपि यथादिशब्दा उपमानोपमेययोः साधर्म्यसम्बन्धं श्रवणमात्रेण उपस्थापयन्त्येवेति, अत एव श्रौतः शब्दशक्तेरेवैतन्माहात्म्यम्। विशेषणमभ्युपेत्यार्थं सिद्धान्तः, वस्तुतः यथादयः शब्दा नोपमानविशेषणानि हि, 'यत् यदर्थं धर्मविशेषं प्रत्याययति, तत् तद्विशेषणम्,-इति नियमस्तावत् यदर्थस्य यदर्थान्वयबोधे, तत् तद्विशेषणमित्येव विद्वान्, न तु यथादयः शब्दा उपमानवाचकाः, येन उपमाने तदन्वयबोधं जनयेत्, उपमानविशेषणानि स्युः, यथादिशब्दैरुपमानतायाः श्रौतत्वेऽपि तस्याः शाब्दबोधरूपविषयतयैव प्रकाशनेन न तेषामुपमानविशेषणत्वम्।

'तेन तुल्यम्(७)सुखम्' इत्यादावुपमेये एव, 'तत्तुलयमस्य-' इत्यादौ चोपमाने एव, 'इदञ्च तच्च तुल्यम्' इत्युभयत्रापि तुल्यादिशब्दानां विश्रान्तिरिति साम्यपर्य्यालोचनया तुलयता-प्रतीति रिति साधर्म्म्यस्यार्थत्वात्तुलयादिपदोपादाने चार्थौ। तद्वत्, "तेन तुलयम् क्रिया चेत् वतिः-" [५।१।११५ पा० सू०]-इत्यनेन विहितस्य वतेः स्विती।

'इवेन नित्यसमासो (८) विभक्त्यलोपः पूर्व्वपदप्रकृति-स्वरत्वम्' इति नित्यसमासे इवशब्दयोगे समासगा।

---

(७) तुल्यादिशब्दानां धर्म्मिवाचकत्वं प्रतिपादयन् तत्सद्भावे आर्थत्वं व्यवस्थापयति तेन तुल्यमिति। यत्र सर्व्वत्र तत्पदार्थः कमलम्, इदम्पदार्थश्च मुखम्। उपमेये इति, उपमाने इति च विश्रान्तिरित्यनेनान्वेति। उभयत्र उपमाने उपमेये च। विश्रान्तिः पर्य्यवसानम्, तात्पर्य्यमिति फलितार्थः। साम्यस्य साधर्म्म्यस्य। पर्य्यालोचना अनुसन्धानम्। तुल्यता साधर्म्म्यसम्बन्धान्वितता, या च तेन तुल्यं मुखमित्यादौ उपमेयतारूपा, तत्तुल्यमस्येत्यादौ उपमानतारूपा, इदञ्च तच्च तुल्यमित्यादौ उभयरूपैव पर्य्यवस्यतीति न साधर्म्म्यमेव तुल्यता। अयं भावः, तुल्यादिशब्दानां उक्तरूपधर्म्मिवाचकतया यद्यपि तत्सद्भावे साधर्म्म्यं शब्दात् न प्रतीयते, तथापि अर्थादाक्षिप्यत एव तदिति आर्थत्वम्, तथाहि कमलेन तुल्यं मुखमित्यत्र प्रयुक्त एव, यद्यपि वैधर्म्म्यसत्त्वयोरभेदान्वयबोधः, तत्र मुखस्य कमलतुल्यताप्रतीतिरिति निर्व्वि-

(७) वादं तु प्रतीतिः कमलमुखयोः साधर्म्म्यानुसन्धानं विनानुपपन्ना, मुखयोः साधर्म्म्यं विना कमलेन मुखस्य तुलनायाः (साधर्म्म्यसम्बन्धान्विततारूपायाः) एतन्निष्पत्तेरिति तुल्यताप्रतीत्यन्यथानुपपत्त्या अर्थात्-निश्चिते एव साधर्म्म्यमिति।

(८) यत्र "इवो यामप्रतिपदिकयोः" (२।४।७१) सू०) इति समासविधायके "इवेन समासो विभक्त्यलोपः पूर्व्वपदप्रकृतिस्वरत्वञ्च"

क्रमेण उदाहरणम्,-

स्वप्नेऽपि समरेषु त्वां विजयश्रीर्न मुञ्चति ।
प्रभावप्रभवं कान्तं स्वाधीनपतिका यथा ॥ [सा०औ०]

चकितहरिणलोललोचनायाः
क्रुधि तरुणारुणतारहारकान्ति ।
सरसिजमिदमाननञ्च तस्याः
समभिति चेतसि संमदं विधत्ते ॥ [सा०आ०]

अत्यायतैर्नियमकारिभिरुन्नतानाम्,
दिव्यैः प्रभाभिरनपायमयैरुपायैः ।
यौरिर्भुजैरिव चतुर्भिरदः सदा यो
लक्ष्मीविलासभवनैर्भुवनं बभार ॥ [स०औ०]

अवितथमनोरथपथप्रथनेषु
प्रगुणगरिमगीतश्रीः ।
सुरतरुसहभ्रः स भवान्
अभिलषणीयः क्षितीश्वरो न कस्य ॥ [स०आ०]

गाम्भीर्य्यगरिमा तस्य सत्यं गङ्गाभुजङ्गवत् । [त०औ]
दुरालोकः स समरे निदाघाम्बररत्नवत् ॥ [त०आ०]

स्वाधीनपतिका (६) कान्तं भजमाना यथा लोकोत्तर-

इति वार्त्तिकदर्शनेन, "व्याकरणे वैकल्पिकत्वाङ्गीकारात् वार्त्तिके तथोपादानाच्च नित्यपदप्रक्षयोऽप्रामाणिक" इत्युद्योतकृत् प्राह स्म, एवमेवाङ्गीकुर्वन् रसगङ्गाधरकृदपि 'प्राचिरेण एव वारिधरो मे वेदनां हरतु दयिताश्वरेण' इत्यादौ(प्राचिरेणो वारिधर एव इत्येवान्वयश्च कर्त्तव्यत्वात्) वाक्यमत एवमुदाजहार ।

(६) । तदु यदोक्तासे "अत्र च यद्यर्थालङ्कारभेदात् सप्तधा भेदा"

चमत्कारभूः, तया, जयश्रीस्वदासेवनेनेत्यादिना प्रतीयमानेन विना यद्यपि नोक्तैर्वैचित्र्यं, वैचित्र्यञ्चालङ्कारः, तथापि (१०) न ध्वनिगुणीभूतव्यङ्ग्यव्यवहारः, न खलु व्यङ्ग्यसंस्पर्शपरामर्शादत्र चारुताप्रतीतिः, अपि तु वाच्यवैचित्र्यप्रतिभासादेव। रसादिस्तु (११) व्यङ्ग्योऽर्थोऽलङ्कारान्तरञ्च सर्वत्र

अत्र तु यानि श्लेषोत्प्रेक्षादीनि उपमोदाहरणतयाऽभिहितानि, तान्येतानि चित्रकाव्योदाहरणानि भवितुं नार्हन्ति, एतेषु राजविषयकभावादिरूपस्य व्यङ्ग्यस्य सत्त्वेनाव्यङ्ग्यत्वलक्षणस्य चित्रकाव्यत्वप्रयोजकस्याभावादिति पूर्वापरविरुद्धाभिधानम्। तथा अलङ्कारद्वयस्य एकत्र उपनिपाते,-

"एषा संसृष्टिरेतेषां भेदेन यदिह स्थिति. ॥५३॥
अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वन्तु सङ्कर" । (१०उ०)

-इत्यनेन संसृष्टिसङ्करव्यतिरिक्तं स्वतन्त्रमलङ्कारद्वयं वक्ष्यते, तदनुसारेण श्लेषोत्प्रेक्षादौ प्रभावप्रभवेत्याद्यनुप्रासस्यापि सत्त्वेन उपमानुप्रासयोः संसृष्टिसङ्करयोरन्यतर एवास्तु अलङ्कारो न तु उपमेति अस्योपमोदाहरणत्वाभिधानमसङ्गतमित्यपरं पूर्वापरविरुद्धाभिधानमिति। पूर्वपक्षद्वयमनादृत्य समाधानकार इत्यादिरिति। 'अव्यभिचारि' नियतावस्थितिकम्। 'अगणयित्वा' (अनावश्यकतया) अनालोच्य। 'तदलङ्काराः' काव्यालङ्काराः। अत्रेदं समाधानम्, इहालङ्कारस्यैव प्रकृततया तस्यैव विवेचनमपेक्षितम्, रसादिरूपस्तु व्यङ्ग्योऽर्थः (अन्ततः) अलङ्कारद्वयञ्च सर्वत्रिनेव काव्ये सम्भवति, तत्र श्लेषोत्प्रेक्षादौ राजविषयकभावादेर्यदि स्फुटत्वमङ्गीकरोषि, तदा ध्वनित्वं, गुणीभूतव्यङ्ग्यत्वं वा अस्तु, अथास्फुटत्वं चेत्, तदा चित्रत्वमस्तु (अव्यङ्ग्यं त्वरं स्फुटमिति चित्रकाव्यलक्षणे अव्यङ्ग्यपदस्य अस्फुटव्यङ्ग्यपरत्वादिति)। एतद्विवेचनमत्राप्रकृततया उपेक्ष्य, प्रस्तुता. काव्यालङ्कारभूता उपमादय केवलं प्रदर्शिता', न तु चित्रकाव्यप्रभेदा अपीति। "ते चालङ्कारनिर्णये निर्णेष्यन्ते"-इत्यनेन तु नैवमभिहितम्, 'यान्येवालङ्कारोदाहरणानि, तान्येव चित्रकाव्यप्रभेदोदाहरणानीति, किन्तु यदेवालङ्कारनिरूपणं, तदेव चित्रकाव्यप्रभेदनिरूपणमित्येवोक्तम्, (अत एव, निर्णेष्यन्ते-इत्युक्तम्, न तूदाहरिष्यन्ते-इति), अलङ्कारप्रभेदे हि निरूपिते चित्रकाव्यप्रभेदनिरूपणाय नापरं किञ्चिदपेक्षितं स्यात्, तथाहि अनुप्रासचित्रोपमाचित्रमित्येवमादयश्चित्रकाव्यप्रभेदाः स्वनिरूपणाय केवलमनुप्रासोपमादिनिरूपणमेवापेक्षन्ते, इतरांशस्य विज्ञातत्वात्; ततश्च श्लेषोत्प्रेक्षादौ चित्रकाव्यताभावेऽपि न प्रायश्चित्तं पूर्वापरविरुद्धाभिधानमिति।

अन्यभिचारीत्यगणयित्वैव तदलङ्कारा उदाहृताः । तद्धितत्वेन (१२) तु उदाक्रियमाणा विरसतामावहन्तीति पूर्वापरविरुद्धाभिधानमिति न चोदनीयम् ॥

तद्वत् धर्मस्य लोपे स्यात्,
न श्रौतौ तद्धिते पुनः [१३] । [५]

एवं न द्वितीयमपि, तथाहि सत्यामेवोपमायां तया सह चमत्कारे संसृष्टिः सङ्करो वा सम्भवतीति एवोपमास्वर्कं एव संसृष्ट्यादिस्वेऽपि उपमालक्षणमावश्यकमेव, एवास्तु विशेषः, चमत्कारितायां यद्यलङ्कारान्तरस्य उपमया तुल्यबलत्वं दि, तदा संसृष्टा सङ्कीर्णा वा उपमा भवति, तुल्यबलत्वादि नो चेत्, शुद्धैव उपमा भवतीति, एतद्विवेचनन्तु अत्रानुपयुक्ततया उपेक्ष्य, प्रकृतत्वात् काव्यालङ्कारभूता उपमैव कोऽस्य प्रदर्शित इति । ततश्च स्वप्नेऽपीत्यादौ अनुप्राणस्य यदुपमातुल्यबलत्वमङ्गीकरोषि, तदाङ्गीक्रियतामस्माभिः संसृष्टा सङ्कीर्णा वा उपमा न्याय्या तुल्यबलत्वे, तदा शुद्धैव उपमेति न पूर्वापरविरुद्धाभिधानमिति । वस्तुतस्तु अत्रोपमालक्षणचमत्कारेण सातिशयेन अनुप्राणलक्षणचमत्कारस्य तिरोधानात् शुद्धोपमैवालङ्कार इति सर्वमवदातम् ।

(१२) नन्वियमाद्योदाहरणयोग्यतया रमणीयरचितान्येव उपमोदाहरणानि किमिति नोपन्यस्तानीति अत आह तद्धितत्वेनेति ।

(१३) अत्रायमभिसन्धिः, एवार्थविहितवतिरूप एव हि तद्धिते श्रौतो भवेत्, स च वतिप्रत्ययः "तत्र तस्येव" (५।१।११६)-इति सूत्रेण षष्ठीसप्तम्यन्तादेवोपमानपदात् विहितत्वा साधारणधर्म एव लाक्षणिकबोधजनकत्वमियत्तयैव साधारणधर्मलाक्षात् इति साधारणधर्मोपादानं विना लाक्षणिकत्वा तद्धितश्रावणस्यैव न कदाचन उपमाभेद इति ।

धर्मः साधारणः, तद्धिते कल्पबादौ (१४) आर्थेव। तेन मत्व (१५)। उदाहरणम्॥

धन्यस्यानन्यसामान्यसौजन्योत्कर्षशालिनः।
करणीयं वचश्चेतः, सत्यं तस्याश्वतं यथा॥ [वा० औ०]
आकृष्टकरवालोऽसौ सम्पराये परिभ्रमन्।
प्रत्यर्थिसेनया दृष्टः कृतान्तेन समः प्रभुः॥ [वा० आ०]
करवाल इवाचारः [स० औ]
तस्य वागमृतोपमा (१६)। [स० आ०]
विषकल्पं मनो वेत्सि, [त० आ०]
यदि जीवसि तत् सखे॥

उपमानानुपादाने
वाक्यगाऽथ समासगा [१७]॥ २॥ [२]।

---

(१४) तद्धितार्थनिर्देशे, "तेन तुल्यं क्रिया चेद् वति."-(५।१।११५) इत्यनेन विहिते इति तदर्थेन साधारणधर्मद्वयायां तत्क्रियायामेव पर्यवसानात् साधारणधर्मोपादानं विना नैव तुल्यार्थवृत्तेः सम्भव इति तद्विधानार्थे दर्शयति कल्पबादाविति।

(१५) वाक्यगा समासगेति द्विविधा औती, वाक्य-समास-तद्धितगेति त्रिविधा आर्थीति मिलित्वा धर्मलोपे सुप्ता षड्विधा।

(१६) अमृतोपमेति अमृतमोदमीयते वा, अमृतस्येवोपमा (उपमानं) यस्या इति वा समासः। विषकल्पमिति अत्र "इदंदमाप्तौ कल्पब्देशीयरः"-(५।३।७० वा०)-इति एतेन विहितस्य कल्पप्प्रत्ययस्य (विषकल्पं मन इति सामानाधिकरण्येन निर्देशात्) इदंदमाप्तिर्विहितो धर्मो वर्ण्यः, इदंदमाप्तिश्च विहितप्रत्ययस्वधर्मसम्बन्धद्वारा स्वधर्मेति अत्र उदाहृता. (कल्पादिसूत्रम्) निर्देशस्वरस्य वाक्यत्वात् आर्थीति।

(१७) उपमानपदादेरे उपमानविशेषवस्तु वतिप्रभृतिसहितस्य

सअल-कारण पर-वीसाम-सिरि-विअरणं ण सरसकव्वस्स ।
दीसइ अह वा णिसम्मइ सरिसं असंसमेत्तेण (१८) ।
कव्वस्सेत्यत्र कव्वसममिति, सरिसमित्यत्र णूणमिति पाठे एषैव समासगा ॥

वादेर्लोपे [१६] समासे सा कर्माधारक्यचि क्यङि] कर्मकर्त्रोर्णमुलि [२०], [६]

विधानात् तदनुपादाने तद्धितप्रत्ययसम्भवेनात्र न तद्धितगा सम्भवति, नापि श्रौती, इवादीना उपमानान्वितस्यैव स्वार्थबोधकत्वनियमेन उपमानानुपादाने तेषामनुपादानासम्भवात्, अतो द्विविधैव । एवमेव प्रदीप, अतश्च दर्पणकटुङ्कादिषु श्रौत्यार्थीमेदेन चातुर्विध्यं न रुचिरम ।

(१८) सकलकारणपरविश्रामश्रीविततरणं न सरसकाव्यस्य ।
दृश्यतेऽथ वा निगद्यते सदृशमनागमालेखेति य० ।

"अलौकिकदर्शनश्रवणाविषयत्वेन दुर्लभतया उत्कृष्टगुणम अस्मदगोचरं किञ्चित् उपमानं भविष्यतीति साहश्यपर्यवसानादुपमानलुप्तेयमुपमा" इति उद्योतकृत् । "उपमानवाचकात् यत्पदादप्यलरम् इवादेः सम्भवादनुपादानमस्योपमायामानुपादानम्, तेनात्र सदृशपदेन सामान्यत उपमानोक्तावपि न क्षति सदृशशब्दादिशब्दप्रयोगात्" इति तु महेश्वर ।

(१९) अत्र उपमा वाक्यगा न सम्भवति, सद्य चन्द्रकागते इत्येतावन्मात्रेण उपमाया अप्रतीते , नापि तद्धितगा श्रौती वा सम्भवति, वत्यादीना तद्धितानाम्, इत्यादीनाञ्च औपम्यप्रतिपादकतया तत्प्रयोगे औपम्यप्रतिपादकशब्दासम्भादित्यन्यथा विभजते वादेरिति एवमेव प्रदीप । उप मानादाचारे'-इति (३।१।१०पा०)-सूत्रेण कर्मपदात्, "अधिकरणाच्च" इति सप्तम्यर्थार्त्तिकेन च अधिकरणपदात् च क्यङ् विहित । एवं "कर्तुः क्यङ्सलोपश्च" इति(३।१।११पा०) इति सूत्रेण कर्तृपदात् क्यङ् विहित । तथा "उपमाने कर्मणि च" इति (३।४।४५।पा०) इति सूत्रेण कर्मणि कर्तरि उपपदे णमुल् विहित । तत्र यद्यपि यत्रयत्क्यङ्सलां प्रयोगे उपमा प्रतीयते, तथापि यथा यथा शब्दा उपमावाचकाः, तथोदाहरण-व्याख्यानावसरे एव प्रतिपादयिष्याम ।

(२०) कर्मकर्त्रोर्णमुलोऽदृष्टिशोपे क्रियायामगा'-इति सन्दिग्धत्वात् नात्र सन्दोहद्वारगा मान्या ।

वाशब्द उपमाद्योतक इति वादेरुपमाप्रतिपादकस्य लोपे घट,-समासेन, कर्मणोऽधिकरणाद्योत्यत्वेन क्यचा,' कर्तुः क्यङा, कर्मकर्तोरुपमदयोर्णमुता च भवेत्। उदाहरणम्,-

ततः कुमुदनाथेन कामिनीगण्डपाण्डुना।
नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलङ्कृता॥ [द्वयोः स०]

तथा,

असितभुजगभीषणासिपत्रो
रुरुरुचिकाङ्कितचित्तदूर्णचारः।
पुलकिततनुरुल्कपोलकान्तिः
प्रतिभटविक्रमदर्शनेऽवमासीत्॥ [बहूना स०]
पौरं सुतीयति जनं, समरान्तरेऽन्यौ [कर्तृक्यच्]
अन्तःपुरीयति चिचित्रचरित्रचक्षुः। [अ०क्यच्]
नारीयते समरसीम्नि कृपाणपाणेः [अभ्यङ्]
आलोक्य तस्य चरितानि सुमन्त्रयेना॥
युधे निदाघघर्माम्भुदर्भं पश्यन्ति तं परे। [कर्म०णमुल्]
स पुनः पार्थपञ्चारं सञ्चरत्यवनीपतिः. (२१)॥ [कर्तृ०णमुल्]

---

(२१) क्यच्क्यङ्पसङ्गादुपमावाचकत्वाभावेन एव, उपमाप्रतिपादकस्य लोप, तथाहि क्यच्क्यङौ केवल आचारसुखाचारौ वा सामान्यतोऽर्थे, विशेषाचारस्तु तत्पदसान्निध्यात् प्रतीयते, यथा, 'पौरं जनं सुतीयति'-इत्यत्र, सुतकर्माचारतुल्यपौरजनकर्माचारकर्तेत्यर्थः, अत्राचार स्नेहपालनादि। 'समरान्तरेऽन्यं इरीयति'इत्यत्र क्यन इराधिकरण्याचार-तुल्यसमरान्तराधिकरणकाचारकर्तेत्यर्थः, अत्राचार स्तब्धदृष्टिहारादि। एवं 'नारीयते' इत्यत्र नारीकर्तृकाचारतुल्याचारकर्तेत्यर्थः, अत्राचार सकातर्यविनयादि। ततश्च क्यच्क्यङोराचारगतसादृश्यप्रतिपादकत्व-

एतद्-
द्विलोपे क्विप्समासगा [२२] ॥ २ ॥ [२]

एतयोर्धर्म्मवाद्योः । उदाहरणम्,-

सविता विधवति, विधुरपि
सवितरति, तया दिनन्ति यामिन्यः ।
यामिनयन्ति दिनानि च
सुखदुःखवशीकृते मनसि (२३) ॥ [क्विप्]

मेवास्ति, न तु प्रकृतोदाहरणतया विवक्षितायाः सवादिना (उपमानेन) मौरजनादेः (उपमेयस्य) उपमायाः प्रतिपादकत्वमिति । सा च उपमा तुल्याचारप्रतीत्यनन्तरं (तुल्याचारं साधारणधर्म्मीकृत्य) प्रतीयते । एवं यमुलोऽपि क्रियागततुल्यत्वमर्थं, तथाहि 'निदाघधर्म्मांशुदर्यं पश्यन्ति तं परे' इत्यस्य निदाघधर्म्मांशुकर्मकदर्शनक्रियातुल्यतत्कर्मकदर्शनकर्त्तारः परे इत्येवमर्थं, 'पार्थश्चुरं सञ्चरति' इत्यस्य पार्थकर्तृकसञ्चारक्रियातुल्य-सञ्चरणकर्त्तेत्यर्थं, ततश्च यमुलः क्रियागततुल्यत्वप्रतिपादकत्वेऽपि प्रकृतायाः (निदाघधर्म्मांशुपार्थाभ्यां उपमानाभ्यां व्यवनीपतेरुपमेयस्य) उपमायाः प्रतिपादकत्वं नास्ति, उत्तरकालन्तु तुल्यक्रियाप्रतीतिमूला सम्प्रतीत्युपयुज्यते । एवञ्च दर्पणे यदत्र दोषदर्शनम्, तत् स्वच्छेऽपि मुखे मलिमेक्षणमिव, दर्पणमालिन्यविजृम्भितमेवेति प्रतिभाति ।

(२२) 'अथ द्विलोपे विभज्यते, तत्र धर्म्मवाद्योर्लोपे वाक्यगा न सम्भवति, भिन्नयोरुपमानोपमेययोर्मुखं चन्द्र इत्येतावन्मात्रयोरुपादाने उपमाया व्यवगमात् । नापि तद्धितगा, तद्धितस्यैव कल्पबादिरूपस्य उपमाद्योतकत्वेन सत्त्वात् द्विलोपासम्भवात् । नापि श्रौती, इवाद्युपमादित्यन्यथा विभज्यते एतदिति' इति प्रदीपः ।

(२२) अत्र 'कर्त्तुः क्यङ्सलोपश्च'(३।१।११) इति सूत्रव्याख्यानावसरे "धर्म्मप्रातिपदिकेभ्यः क्विप् वा वक्तव्यः" इति वार्त्तिकेन विहितः क्विप्-प्रत्ययः एव तुल्याचाररूपसाधारणधर्म्मवाचक इति। तस्य "अरुर्द्विषदजन्तस्य" (६।३।६७) इति सूत्रेण नित्यं लुप्तत्वात् धर्म्मलोपः ।

परिपन्थिमनोराज्यशतैरपि दुराक्रमः ।
सम्परायप्रवृत्तोऽसौ राजते राजकुञ्जरः (२४) ॥ [स०]

धर्मोपमानयोर्लोपे वृत्तौ वाक्ये च दृश्यते (२५)। [२]

ठुण्ठुणन्तो मरिहिसि कण्टअकलिआइं केअइवणाइं।
मालइकुसुमसरिच्छं भमर, भमन्तो वि ण पाविहिसि (२६)॥
कुसुमेण समभिति पाठे वाक्यगा।

क्वचिद्वाद्युपमेयासे, [१]
आमे निरासे।
अरातिविक्रमालोकविकस्वरविलोचनः।
क्षमाणोद्यद्दोर्दण्डः स सहस्रायुधीयति (२७)॥

अत्रात्मा उपमेयः।

---

(२४) राजा कुञ्जर इवेति "उपमितं व्याघ्रादिभि सामान्याप्रयोगे" (२।१।५६। पा०) इति सूत्रेण समास। दुराधर्षत्वस्य साधारणधर्मस्यातिप्रसिद्धतया तदनुपादानेऽपि नोपमाप्रतीतिर्व्याघात।

(२५) तद्धिते तु नेय, उपमानलोपे तद्धितस्यैवाभावात्। नापि चौती उपमानाप्रयोगे इवादेरप्रयोगादिति प्रदीप। वृत्तौ समासे।

(२६) ठुण्ठुणायमानो मरिष्यसि कण्टककलितानि केतकीवनानि।
मालतीकुसुमसदृश्य भ्रमर, भ्रमन्नपि न प्राप्स्यसीति छ०।

ठुण्ठुणायमान ठुण्ठुणित्याकारशब्देन प्रार्थयमान इति निदर्शनकृत्। अत्र प्रकृतत्वात् मालती उपमेया, कुसुमान्तरस्याप्राप्त्युपदेशेन तदप्राप्यकुसुमसदृशोपमानमिति प्रतीतेरलोपमितिक्रियानिष्पत्तिरिति उद्योतकृत्।

(२७) सहस्रमायुधानि यस्य, तमिवाचरतीत्यर्थात् कर्मत्वेनोपमेयभूत आत्मा कर्मत्वेन नोपात्त। प्रदीपे तु सहस्रारायुधीयतीति पाठ, तस्य, सहस्रारं चक्रमायुधं यस्य (विष्णो), तमिवाचरतीत्यर्थ।

त्रिलोपे च समासगा ॥ ४ ॥ [१].

त्रयाणां वादिधर्मोपमानानाम् । उदाहरणम्,-

तरुणिमनि लतावलोकना ललितविलासविलब्धविग्रहा ।

स्मरशरविसरान्वितान्तरा मृगनयना हरति मुनेर्मनः ॥

अत्र सप्तम्युपमानेत्यादिना यदा समासलोपौ भवतः, तदोदाहरणम् (२८) ।

क्रूरस्य (२९) आचारस्यायःशूलतयाऽध्यवसयात्, अयः-शूलेनान्विच्छति 'आयःशूलिक'-इत्यतिशयोक्तिर्नतु क्रूराचारोपमेय-तैक्ष्ण्यधर्म्म-वादीनां लोपे त्रिलोपेवमुपमा ।

---

(२८) "अत्र यदि मृगशब्देन लक्षणया नयने विवक्ष्येते, तदा नेदमुदाहरणं [मृगपदस्यैव उपमानप्रतिपादकस्य सत्त्वप्रसङ्गात्], यदा तु मृगनयने इव (चक्षुषी) नयने यस्या इत्यर्थो विवक्ष्यते, तदा सप्तम्युपमानपूर्व्वपदस्य बहुव्रीहिरुत्तरपदलोपश्च इति (२।२।२४। पा० सू०) वार्त्तिकेन उपमानपूर्व्वपदस्य नयनशब्देन बहुव्रीहौ उपमानवाचिमृगलोचनेतिपूर्व्वपदे उत्तरपदभूतस्य-नयनशब्दस्य लोपे उपमेयभूतस्य नयनमात्रस्योपादानात् इदमुदाहरणम्" इति प्रदीपः । त्रिलोपे चकारान्तरसमासात् एतद्विधेयता ।

(२९) अत्र 'उपमानमात्रलोपादानेऽपि त्रिलोपो बलवति, यथा 'आयः-शूलिक' इति, अत्र हि क्रूराचार उपमेयः', तीक्ष्णत्वादिरूपः साधारणो धर्म्मः, इवादिश्च लोपात्', तेनात्रोपमानभूतमयःशूलमेवोपात्तम्' इति केचिदाहुः, तन्निराकरोति क्रूरस्येति । अन्विच्छति व्यवहरति । इदमत्र निराकरणम्, नेह उपमानोपमेयभावः प्रतीयते, तद्बोधकाभावात्, किन्तु क्रूराचार एव निर्दयत्वरूप अयःशूलसादृश्येन (आरोपात्) निर्द्दिश्य अतिशयोक्तिरलङ्कार इति ।

एवमेकोनविंशतिर्लुप्ताः(२०),पूर्णाभिः सह पञ्चविंशतिः॥

'अनयेनेव (२१) राज्यश्रीर्दैन्येनेव मनस्विता।

मन्त्रौ साध्य विषादेन, मन्त्रिनीव हिमाम्भसा॥

-इत्यभिन्ने साधारणे धर्म्मे,

द्योत्स्नेव नयनानन्दः, सुरेव मदकारणम्।

प्रभुतेव समाक्रष्टसर्व्वलोका नितम्बिनी॥

-इति भिन्ने च तस्मिन्, एकस्यैव वस्तुपमानोपादाने मालोपमा,

यथोत्तरमुपमेयस्योपमानत्वे, पूर्व्ववदभिन्नभिन्नधर्म्मत्वे,

अनवरतकनकवितरण-

जलदयभूतकरतरङ्गितार्थितनेः।

भणितिरिव मतिर्मतिरिव

चेष्टा,चेष्टेव कीर्त्तिरतिविमला॥ [अभि०ध०]

मतिरिव मूर्त्तिर्मधुरा, मूर्त्तिरिव सभा प्रभावचिता ।
तस्य सभेव जयश्रीः शक्या जेतुं नृपस्य, न परेषाम् ॥ [भि०घ०]
-इत्यादिका रसनोपमा च' न लक्षिता, एवंविधवैचित्र्य-सहस्रसम्भवात्, उक्तभेदानतिक्रमाच्च ॥

उपमानोपमेयत्वे एकस्यैवैकवाक्यगे ।

अनन्वयः,

उपमानान्तरसम्बन्धाभावो-(२२)-ऽनन्वयः । उदाहरणम्,-

न केवलं भाति नितान्तकान्ति-
र्नितम्बिनी सैव नितम्बिनीव ।
यावद्विलासायुधलास्यवासा-
स्ते तद्विलासा इव तद्विलासाः ॥

विपर्य्यास उपमेयोपमा तयोः ॥ ५ ॥

तयोरुपमानोपमेययोः, (२३) परिवृत्तिः (अर्थात्) वाक्य-द्वये, इतरोपमानव्यवच्छेदपरा (उपमेयेनोपमा इति) उप-मेयोपमा ।

---

(२२) अत्र बहुव्रीहि. समास. । एतच्चानन्वयपदव्युत्पादनं, लक्षणन्तु कारिकोक्तम्-एकस्मिन् वाक्ये एकस्यैव (तत्सदृशवस्त्वन्तरासत्त्व-प्रतिपादनाय) उपमानोपमेयभावोऽनन्वय इत्येव शास्त्रम् । उपमायां न एकस्यैव उपमानोपमेयभाव, उपमेयोपमायान्तु वाक्यद्वये स इति तयो-र्व्यवच्छेद. । स्वेन स्वस्य उपमाऽनन्वय इति तु निष्कर्षः ।

(२३) परिवृत्तिरिति विपर्य्यासपदस्यार्थः । एकवाक्ये परिवर्त्तना-सम्भवात्, 'अर्थात्' 'वाक्यद्वये' इति उक्तम् । इतरोपमानेति विशेषणम्, एकस्य उभयत्र साधारणधर्मत्वे सतीति विशेषणं सूचयति, एकेन हि धर्मेण तस्य वाक्ये ऽपरस्य तत्र वाक्यमर्थप्राप्तमपि

उदाहरणम्,

कमलेव मतिर्मतिरिव कमला,
तनुरिव विभा, विभेव तनुः ।
धरणीव धृतिर्धृतिरिव धरणी
सततं विभाति वत यस्य ॥

सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् (३४)।

पुनः यद्देनोच्यमानं तेन धर्म्मेण तयोः सदृशं तृतीयं वस्तु व्यवच्छिनत्तीति उद्योतकृत् प्राह च । अत एव सविता विधवतीत्यादौ सत्यपि उपमानोपमेययोर्वाक्यद्वये विपर्य्यासे साधारणधर्म्मस्य भिन्नतया नोपमेयोपमा, तत्र हि सविता विधवतीत्यत्र शीतकरत्वादिः साधारणो धर्म्मः, विधुरपि सवितरतीत्यत्र तु उष्णकिरणत्वादिः साधारणो धर्म्मः इति । अयमत्र निष्कर्षः, पूर्ववाक्योक्तसाधारणधर्म्मस्यैव साधारणधर्म्मीभूत्व पूर्ववाक्योक्तेन उपमेयेन पूर्ववाक्योक्तस्य उपमानस्य उपमा उपमेयोपमेति ।

(३४) उत्कटैककोटिः संशयः सम्भावनं । संशये हि कोटिद्वयं (पक्षद्वयं) वर्त्तते यथा 'अयं पुरुषो न वा ।' इत्यत्र एका कोटिः पुरुषस्य विधिः अपरा च 'न वा' इति पुरुषस्य निषेधः । यस्मिन् संशये कोटिद्वयमध्ये एकस्याः कोटेः उत्कटत्वं (निश्चितप्रायत्वम्) स एव संशयः सम्भावनमित्युच्यते । यथोदाहरणे पद्मलक्ष्म्याः पादलग्नत्वं निश्चितप्रायमिवोक्तम् । प्रकृतस्य (उपमेयस्य) । समेन समत्वतया । उपमेयस्य उपमानत्वेन सम्भावना उत्प्रेक्षा इति तु निष्कर्षः, यथोदाहरणे उपमेयभूता पादशोभा उपमानभूत-यथोक्तहर्षहेतुकपादपतित-पद्मशोभात्वेन सम्भाविता । अत्रालङ्कारत्वे धर्मोतिशयेषणं प्रकरणप्राप्तमस्यैव, तेन प्रतिभोत्थापितायाः वास्तविकसम्भावनायाः, अप्रस्तुतसाधारणधर्म्ममूलायाः सम्भावनायाश्च चमत्कारजनकतया अलङ्कारत्वाभावेन नोत्प्रेक्षात्वप्रसङ्गः, रमणीयधर्म्मनिबन्धना प्रतिभोत्थापितैव हि सम्भावना चमत्करोतीति सैवालङ्कारः । तद्वाचकास्तु प्रायम्-प्रायो-नूनम्-मन्ये-शङ्के-ध्रुवम्-शङ्के-तर्कयामि-जाने-उत्प्रेक्षे-इत्येवमादयो बहवः, एवं 'उपमानस्य अधोनिक्षेपे इवशब्दोऽपि' -इति चक्रवर्त्ती । 'तिङन्तसमभिव्याहृत इवशब्दः सम्भावनोत्प्रेक्षाद्योतकः, नामसमभिव्याहृतस्तु इवशब्दस्तथैव उत्प्रेक्षाद्योतकः, यत्र सम्भावनोपयुक्तविशेषणदानं ;

समेन उपमानेन । उदाहरणम्,-

उन्मेषं यो मम न सहते जातिवैरी निशायाम्,
इन्दोरिन्दीवरदलदृशा तस्य सौन्दर्यदर्पः ।
नीतः शान्तिं प्रसभमनया वक्त्रकान्त्येति हर्षात्
लग्नां मन्ये ललिततनु, ते पादयोः पद्मलक्ष्मीः ॥
लिम्पतीव तमोऽङ्गानि, वर्षतीवाञ्जनं नभः (३५) ।

-इत्यादौ व्यापनादि लेपनादिरूपतया सम्भावितम् (३६)।

यथा,-

बालेन्दुवक्त्राण्यधिकाम्रभावात् बभुः पलाशान्यतिलोहितानि ।
सद्योवसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम् ॥

-इत्यादौ यत्र-क्वचित् स्थितैरपि गम्यतैर्यक्त्वलौहित्यादिना उपमाया वक्तुं शक्यत्वेऽपि सद्योवसन्तनायकसमागत-वनस्थलीसम्बन्धित्व-रूपविशेषणकल्पनम् उत्प्रेक्षागमकं । तदन्यस्थले इवशब्दः उपमाबोधक.' इति तु उद्योतकृत् । दर्पणकृतस्तु,-तुशब्दोऽपि उत्प्रेक्षाबोधक इति, एवम् उत्प्रेक्षाबोधकानामेषां सम्भावनाबोधकत्वाभावे नायमलङ्कारः, यथा,-

यदेतच्चन्द्रास्ये जडदलदलीलां वितनुते,
तदाचष्टे लोक. मृगक इति नो मां प्रति तथा ।
अहन्त्विन्दुं मन्ये त्वदरिविरहाक्रान्तहरिणी-
कटाक्षोल्कापातव्रणकिणकलङ्काङ्कितनुम् ॥

इत्यादौ (निश्चयार्थकतया) नायमलङ्कार इति, तथा उत्प्रेक्षाबोधकेव-शब्दश्च क्वचित् प्रतीयमानोऽपि भवति, यथा,

तन्वङ्गाया मुखमेव इदं न प्रकटीकृतम् ।
धात्रा गुणिने ध्यानं न दत्तमिति लज्जया ॥

इत्यत्र लज्जयेवेत्युत्प्रेक्षाबोधक इवशब्दो झटिति प्रतीयते, तत्रयोर्लज्जाया असम्भवात्, इवशब्दं विना वाक्यार्थस्याप्रतीतेः'-इति च आहुः ।

(३५) अत्र मुखस्येव दृष्टिमिष्टतां गतेति अन्यत्रेदम् । अत्रांशेऽपमा ।

(३६) न तु, 'तमसो लेपमकुर्वत्तमलोत्प्रेक्ष्यम्'-इत्यलङ्कारसर्वस्वकारोक्तम् युक्तम्, व्यापनस्य लेपनतयोत्प्रेक्षणेनैव चमत्कारपर्यवसानात् तत्कर्तृत्वपर्यन्तोत्प्रेक्षणे प्रयोजनविरहेण तत्रालाक्षणिकत्वादिति भेदः ।

ससन्देहस्तु (भेदोक्तौ तदनुक्तौ च) संशयः(३७)॥६॥

भेदोक्तौ यथा,-

अयं मार्त्तण्डः किं ? स खलु तुरगैः सप्तभिरितः,
क्षयालुः किं ? सर्व्वाः प्रसरति दिशो नैष नियतम्।
कृतान्तः किं ? साक्षान्मधुरिपुवपुर्नोऽसाविति चिरं
समालोक्याजौ त्वां विदधति विकल्पान् प्रतिभटाः॥

---

(३७) अत्र प्रकृतस्य धर्मेणेति पूर्वसूत्रादनुवर्त्तते, तेन, उपमेयस्य उपमानरूपतया संशयः ससन्देहालङ्कार इति लक्षणम्। अत्रापि चालङ्कारत्वे सतीति विशेषणस्य सत्त्वात् प्रतिभानुत्थापितेऽचमत्कारिणि 'स्थाणुर्वा पुरुषो वा' इति संशये न संशयालङ्कारत्वप्रसङ्गः। संशयश्च उभयस्मिन् पक्षे तुल्यरूपो भासः, तेन सम्भावनाया अपि संशयविशेषरूपतया मोक्षेऽलङ्कारे ससन्देहालङ्कारत्वप्रसङ्गः, सम्भावनाया एकस्मिन् पक्षे आधिक्येन उभयत्र तुल्यरूपत्वाभावादिति। अत्र च ससन्देह इति नाम महेश्वरं विना प्रायः सर्व्व एवालङ्कारिकाः, ततश्च (बहूनां सन्देहानां प्रायशः सत्त्वात्) सन्देहेन सह वर्त्तमानः सन्देहः ससन्देह इति यथाकथञ्चित् व्युत्पत्तिः कार्य्या। अयमेव सन्देहालङ्कारः संशयालङ्कारशब्दाभ्यां व्यपदिश्यते।

स चायं भेदोक्तानुक्तिभ्यां द्विविधः। भेदो वैधर्म्यम्, तच्च उपमानोपमेययोरेकस्मिन् अवर्त्तमानमपरत्र वर्त्तमानं धर्मविशेषरूपम् प्राह्यं, यथोदाहरणद्वये, यथाक्रमं सप्ताश्वसम्बन्ध उपमेये राजनि अवर्त्तमानः उपमाने सूर्य्य एव वर्त्तते, एवं क्षयितत्वविनाशवत्त्वं उपमाने चन्द्रादाववर्त्तमानं उपमेये नृपे एव वर्त्तते इति तयोरेकस्मिन्न वैधर्म्योक्तिरिति। अयमाद्यः प्रभेदोऽपि द्विविधः, निश्चयगर्भो निश्चयान्तश्चेति। निश्चयः गर्भे (मध्ये) यस्येति बहुव्रीह्या याहशसंशयानन्तरं निश्चये जातेऽपि पुनः संशयः, स निश्चयगर्भः। निश्चयश्च उपमानविषयत्वेन उपमेयावधारणरूपो प्राह्यः, एकोपमानविषयत्वेनावधारणेऽपि उपमानान्तरत्वेन संशयोदयसम्भवात्, संशयस्य निश्चयगर्भत्वं नाममात्रे। यथोदाहरणे, सूर्य्ये सप्ताश्वसम्ब-

भेदोक्तावित्यनेन न केवलमयं निश्चयगर्भो, यावन्निश्चयान्तोऽपि सन्देहः स्वीकृतः । यथा,-

इन्दु किं ? क कलङ्कः, सरसिजमेतत् किमस्तु कुत्र गतम् ।
ललितसविलासवचनैर्मुग्धमिति, हरिणाक्षि, निश्चितं मरतः ॥

किन्तु निश्चयगर्भ इव नात्र निश्चय. प्रतीयमान इति उपेक्षितो भट्टोद्भटेन । तदनुक्तौ यथा,-

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः ?
शृङ्गारैकरसः स्वयं नु मदनो? मासो नु पुष्पाकरः ? ।
वेदाभ्यासजडः कथं नु (३८) विपयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ? ॥

'उपमेयधर्मादर्शनेन रात्र सूर्यभिन्नत्वावधारणेऽपि लगातत्स्वरूपेणापि पुन संशय· समभवत्येव, इत्यनेन निश्चयगर्भत्वमुपपद्यते । निश्चय च्यन्ते (समाप्नो) यस्येतिव्युत्पत्त्या याद्दशसंशयानन्तरं निश्चये जाते (निश्चयस्यैव संशयनिवर्त्तकतया) पुन संशयादुदय स निश्चयान्त । उपमेयस्वरूपेण उपमेयावधारणमेव उपमेये उपमानसंशयनिवर्त्तकमिति तदेवात्र निश्चयपदेनोच्यते, तादृशनिश्चयानन्तरमेव हि संशयादुदयेन निश्चयान्तत्वमुपपद्यते, यथोदाहरणे, ललितसविलासवचनादिरूपधर्मादर्शनात् उपमेयस्वरूपेण उपमेयनिश्चये पुन कोनापि उपमान रूपेण न संशयः । परन्तु 'वाच्यस्य संशयस्य वाच्येनैव निश्चयेन निवृत्तिरर्थसंचितमिति निश्चयान्तस्थले निश्चयस्य वाच्यत्वमावश्यकम्, तस्य वाच्यत्वे च न तादृशचमत्कारित्वम्'-इति मन्यमानेन भट्टोद्भटेनायं निश्चयान्तप्रभेद उपेक्षित, वस्तुतो मन्यतेऽर्थतः; ततश्च निश्चयगर्भस्थले निश्चयपदेन पूर्वोक्तोपमानभिन्नत्वेन निश्चय वाच्यो वा प्रतीयमानो वा स्यात्' । निश्चयान्तस्थले तु निश्चयपदेन उपमेयस्वरूपेणैव निश्चयो स्यात्, स च वाच्य एव नियतः इति । एतत्सर्वं दृष्टौ स्पष्टम् ।

(३८) अत्र तु प्रभवेत, नैव प्रभवेदित्यर्थं, एवञ्चात्र उत्तरार्द्धे सम्बन्धेऽसम्बन्धरूपा अनिश्चयोक्तिः ।

तद्रूपकमभेदो य उपमानोपमेययोः ।
अतिसाम्यात् (अनपह्नुतभेदयोः) अभेदः (२९) ।
समस्तवस्तुविषयम्, द्वौता आरोपिता यदा ॥७॥
आरोपविषया त्वव(४०)आरोप्यमाणा यदा शब्दोपात्ताः,

---

(२९) परस्परविरुद्धधर्मवत्त्वेन उपस्थितत्या प्रकाशितविभिन्नस्वरूपयोरपि उपमानोपमेययोरतिसाम्यप्रदर्शनाय काल्पनिकोऽभेदारोपो रूपकमिति निष्कर्षः, यथा 'मुखचन्द्रं पश्य'-इत्यादौ मुखस्य-चन्द्रस्वरूपपरस्परविरुद्धधर्मवत्तया उपस्थितयोर्मुखचन्द्रयोरभेदारोप इति । अतिशयोक्तौ उपमेयस्य न उपमेयगतधर्मवत्तया उपस्थितिरिति ततो भेदः, अपह्नुतौ तु उपमेयगोपनेन भेदस्याप्रकाशः, अत्र तु न स इति ततोऽपि भेदः । आरोपलक्षणासम्भवस्थले रूपकम्, साध्यवसानलक्षणासम्भवस्थले तु अतिशयोक्तिः । एवं मुखपद्मेत्यादिसमासस्थले विशेषणस्य मुख्यतया, उपमानगतत्वे रूपकम्, उपमेयगतत्वे उपमा, उभयत्र तुल्यरूपत्वे सतयो भेदः, अत्र यथाक्रमं उदाहरणत्रयम्, विकसितं मुखपद्ममिति, सङ्कुचितं मुखपद्ममिति, रमणीयं मुखपद्ममिति चेति ।

तत्र रूपकं तावत् द्विविधं, साङ्गं, निरङ्गं, परम्परितञ्चेति । तत्रापि साङ्गं समस्तवस्तुविषयम्, एकदेशविवर्त्ति चेति द्विविधम् । निरङ्गञ्च केवलं मालारूपञ्चेति द्विविधम् । परम्परितन्तु श्लिष्टाश्लिष्टशब्दनिबन्धनतया द्विविधं तत् प्रत्येकं केवलं मालारूपञ्चेति चतुर्विधमिति मिलिता रूपकस्यापि भेदाः । तत्र प्रथमं सकलोल्लासेन साङ्गमेतदित्यनेन साङ्गस्य प्रभेदद्वयं क्रमेण प्रदर्शयता साङ्गं निरूपितम् ।

(४०) आरोपविषयाः आरोपाधिकरणानि उपमेयाः । आरोपविषयस्यानुपादानेऽतिशयोक्तेरेव प्रसङ्गः, अतः रूपके आरोपविषयस्योपादानं निश्चितमेवेति आरोपविषया इवेति दृष्टान्ततया उक्तम् । आरोप्यमाणा उपमानानि ।

तदा (समस्तानि वस्तूनि (४१) विषयोऽस्येति) समस्तवस्तु-विषयम् । आरोपिता इति-वक्ष्यवचनमविवक्षितम् । यथा,-

ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारकाक्षी
न्यन्तर्धानव्यसनरसिका रात्रिकापालिकीयम् ।
द्वीपाद् द्वीपं भ्रमति दधती चन्द्रसुद्राकपाले
न्यस्तं सिद्धाञ्जनपरिमलं लाञ्छनस्य च्छलेन (४२) ॥

अत्र (४३) पादत्रये, अन्तर्धानव्यसनरसिकत्वमारोपितधर्म्म एवेति रूपकपरिग्रहे साधकमस्तीति तत्सङ्करायङ्का न कार्य्या ।

---

(४१) वस्तूनि आरोप्यमाणानि । विषय. यद्बुद्धिप्रतिपाद्य । अविवक्षितमिति अन्यथा आरोप्यमाणस्य एकत्वे द्वित्वे वाऽसम्भवः स्यादिति भेद ।

(४२) छुरणमङ्गभेद. । व्यसनं कौतुकम् क्रीडा वा । कापालिकी तत्स्वरूपा विभेदयोगिनी । सुद्राकपालं दीक्षाकालगृहीतोपकरणम् । परिमलचूर्णम् । अत्र आरोप्याणां भस्मादीनां सर्व्वेषां यद्बोधात्तत्वात् समस्तवस्तुविषयरूपकम्, एवं कापालिक्या आरोप एव तदङ्गानां (तद्रूपकरणानां तदानुगुण्यकारणां) भस्मादीनामप्यारोपात्तस्य साङ्गत्वम् । 'भस्मालिप्ता ज्योत्स्ना इत्यादिरीत्या उपमानविशेषणक एव मयूरव्यंसकादित्वात् समास कार्य्य इति नोपमान-पदस्य प्राग्निपातनियम , मयूरव्यसकादिपदेन सर्व्वत्रैव रूपकोदाहरणानि सङ्गच्छन्ते'-इत्युद्योतलताभाषय । अथवा तु पद्यस्य चतुर्थपादेऽपह्नुति ।

(४३) ननु ज्योत्स्ना भस्मेवेत्यादिरीत्या उपमितसमासस्यापि सम्भवेन अत्र उपमा वा स्यात् रूपक वेति सशयोदयेन उपमया रूपकस्य सन्देहङ्कर एव स्यात्, न तु रूपकनिश्चायङ्का निरास्यतीति अत्रेति । इदमत्र निराकरणम्, अन्तर्धानव्यसनरसिकत्वं हि कापालिक्या एव सम्भवति, न तु रात्रेः, उपमायामिवशब्दे तु उपमेयभूतायां रात्रेरेव प्राधान्येन तत्र नान्तर्धानव्यसनरसिकत्वमा सदृश्यस्य स्यादिति रूपकसाध्यीयत । अथ

श्रौता आर्थाश्च ते यस्मिन्नेकदेशविवर्त्ति तत्।

केचिदारोप्यमाणाः शब्दोपात्ताः, केचिदर्थसामर्थ्यादवसेयाः-इत्येकदेशविवर्त्तनात् (४४) एकदेशविवर्त्ति। यथा,-

जस्स रणंतउरए करे कुणंतस्स मण्डलग्गलअं।
रससंमुही वि सहसा परंमुही होइ रिउसेणा (४५)॥

अत्र रणस्यान्तःपुरत्वमारोप्यमाणं शब्दोपात्तं, मण्डलाग्रलताया नायिकात्वं, रिपुसेनायाश्च प्रतिनायिकात्वम् अर्थसामर्थ्यात् (४६) अवसीयते-इत्येकदेशे विशेषेण वर्त्तनात् एकदेशविवर्त्ति।

साङ्गमेतत्,

उक्तद्विभेदं सावयवम् (४७)॥

'न कार्य्यो'-इत्यनन्तरम् "अथ वा न्यस्तं खाञ्जनमञ्जनं कुसुदिनीप्रोल्लास-विधिप्रदमिति चतुर्थः पादः, एवं रूपकेणैव निर्व्यूढः."-इति क्वचित् पाठः। स च वङ्गभिषीकाक्षुण्णदृष्टतया अनाकर इवाभाति।

(४३) 'एकदेशविवर्त्तनात्' एकस्मिन् देशे एकस्मिन् अंशे विवर्त्तनात् विशेषेण वर्त्तनात्। अर्थात् आरोप्यमाणस्य सर्व्वत्र वाच्यत्वे एकांशे प्रतीयमानत्वरूपस्य विशेषस्य सत्त्वात् एकदेशविवर्त्ति इति नाम सार्थकं।

(४५) यस्य रणान्तःपुरे करे कुर्व्वतो मण्डलाग्रलताम्।
रससम्मुखापि सहसा पराङ्मुखी भवति रिपुसेनेति सं०।
मण्डलाग्र खड्गः।

(४६) पार्श्वस्थहीनरपि बोधकं करे-कुर्वतः-इति विशेषणं, रससम्मुखीत्यादिस्त्रीलिङ्गं, रणेऽन्तःपुरत्वारोपश्चेति लक्षणस्य अर्थसामर्थ्यम्।

(४७) खत एव वर्णनीयतया अङ्गिनः (प्रधानस्य) अवयवाना (स्वस्वतत्तावर्णनीयतया प्राधानानां तत्तत्सर्गिणां) रूपणं, सङ्गितं यत् अङ्गिनः

निरङ्कन्तु ।

मुद्रम् (४८),

यथा,-

कुरङ्गीवाङ्गानि स्तिमितयति गीतध्वनिषु यत्,
सखी कान्तोदन्तं श्रुतमपि पुनः प्रश्नयति यत् ।
अनिद्रं यच्चान्तः स्वपिति, तदहो वेद्मभिनवा
प्रवृत्तोऽस्याः खेलुं हृदि मनसिजः प्रेमलतिकाम् ॥

माला तु पूर्ववत् (४९) ॥ ८ ॥

मालोपमायामिवैकस्मिन् बहव आरोपिताः । यथा, -

सौन्दर्यस्य तरङ्गिणी, तरुणिमोत्कर्षस्य हर्षोद्गमः,
कान्तेः कार्मणकर्म, नर्मरहसामुल्लासनावासभूः ।
विद्रा वक्रगिरा, विधेरनवधिप्रावीण्यसाचाच्चातुरिक्रया,
वाणाः पञ्चमिलीमुखस्य, ललनाचूडामणिः सा प्रिया(५०)॥

नियतारोपणोपायः स्यादारोपः परस्य यः ।
तत्परम्परितं श्लिष्टे वाचके भेदभाजि वा(५१) ॥९॥

रूपण, तत् सावयवं रूपकम्, अङ्गरूपकसहितम् अङ्गिनो, रूपणमिति यावत् ।

(४८) निरङ्गम् अङ्गानामारोपरहितं केवलमाङ्गिनो यद्रूपणम् ।

(४९) पूर्ववत् पूर्वोक्तमालोपमायामिव । एतेन य एव कारिकाकार स एव वृत्तिकार इत्यायाति, अन्यथा कारिकालक्षता, वृत्तिलक्षदर्शितायाः मालोपमाया अलक्षितत्वेन, अत्र कारिकायां पूर्ववदिति तस्या दृष्टान्ततयोद्भावनमनुपपन्नं स्यादिति ।

(५०) कार्मणकर्म वशीकरणक्रिया । नर्मरहसाम् रहस्यपरिहासानाम् । उल्लासना विलसनम् ।

(५१) नियतं वर्णनीयतया अवश्यापेक्षणीय यत् आरोपणम्, तस्य उपायः (साधारणधर्मसम्बन्धतया) निमित्तं यः परस्य (अन्यस्य)

यथा,-

विद्वन्मानसहंस, वैरिकमलासङ्कोचदीक्षागुरो,
दुर्गामार्गणनीललोहित, समित्स्वीकारवैश्वानर।
सत्यप्रीतिविधानदक्ष, विजयप्रस्थापभीम, प्रभो,
साम्राज्यं वरवीर, वत्सरशतं वैरिष्वमुष्मै: क्रिया: (५२)॥

[शि०प०मा०]

अत्र, मानसमेव मानसम्, कमलाया: सङ्कोच एव कमलानामसङ्कोच:, दुर्गाणाम् अमार्गणमेव दुर्गाया मार्गणं, समितां स्वीकार एव समिधां स्वीकार:, सत्ये प्रीतिरेव सत्यामप्रीति:, विजय: (परपराभव:) एव विजय: (अर्जुन:)-एवमारोपणनिमित्तो हंसादेरारोप:।

आरोप: तत् परम्परितम्, (कार्यकारणभावरूपा आरोपपरम्परा जाता यत्रेति व्युत्पत्ते:)। यत्र वर्णनीयारोपणं प्रति अन्यारोपणमेव केवलं कारणतया विवक्षितं, तत् परम्परितमिति तु निष्कर्ष:। तच्च द्विविधम्, उपायभूते रूपके आरोप्यारोपविषययोर्वाचकस्य श्लिष्टत्वात् सिद्धरूपत्वाच्चेति। साङ्गरूपके तु वर्णनीयस्य अङ्गिन: रूपणं प्रसिद्धसाधर्म्यनिमित्तकमेव, न तु तत्र अङ्गरूपणमेव निमित्तं, तस्य तदृ विनापि उपपत्ते:, तत्र अङ्गरूपकन्तु प्रसिद्धसाधर्म्यनिमित्तकस्य अङ्गिरूपकस्य परिपोषकमात्रमिति साङ्गरूपकादस्य भेद:।

(५२) अत्रापमेव मानसं मानसस्य। कमलाया: सङ्कोच:। दुर्गाणां कोट्टानां (गढ़ Fort) अमार्गणं अन्वेषणम्, समितां युद्धानां। समिधां काष्ठानां। सत्यां दुर्गायां।

यदपि शब्दार्थालङ्कारोऽयमित्युक्तं (५३) वक्ष्यते च, तथापि प्रसिद्धानुरोधादत्रोक्तः। एकदेशविवर्त्ति चेदमन्यैरभिधीयते (५४)।

भेदभाजि यथा,

आलानं जयकुञ्जरस्य (५५), दृषदां सेतुर्विपद्वारिधेः,
पूर्वाद्रिः करवालचण्डिमरसो, लीलोपधानं श्रियः।
संग्रामाध्वत--सागर--प्रमथन--क्रीड़ा--विधौ मन्दरः,
राजन्, राजति वीरवैरिवनितावैधव्यदक्षे भुजः॥[अग्नि०प०मा०]

---

(५३) मानसादिपदस्य परित्यक्तत्वात् हंसादिपदस्य च लक्ष्यत्वादुभयालङ्कारत्वमिति। 'उक्तं' श्लेषनिरूपणप्रस्तावे (२०७।४ प०)'दृष्ट दोषगुणालङ्काराणाम्'इत्यादिना) उक्तप्रायम्। 'वक्ष्यते'शब्दालङ्कारनिरूपणप्रस्तावे 'उक्तमत्र यथा काव्ये'-इत्यादिना, 'एवञ्च यथा पुनरुक्तवदाभासः परम्परितरूपकश्चोभयोर्भावाभावानुविधायितया उभयालङ्कारौ'-इत्यनेन, व्यवस्थाप्यते। प्रसिद्धिस्तु अन्येषामालङ्कारिकाणामर्थालङ्कारमध्ये गणनरूपा ज्ञाता।

(५४) 'यथा रूपेऽन्य पुरस्कारोपे तद्विशिष्टसम्बन्धस्य सदृशापह्नवतादौ व्ययोग्यतया सदृशादेव नाविकाद्यारोपः, तथा राजनि हंसत्वारोपे तद्विशिष्टस्यान्तःकरणसम्बन्धायोग्यतया सदृशत्वात् मानसे मानसरस्त्वारोप एकदेशविवर्त्ति'-इति परैरुच्यते, यदीदम् अर्थालङ्कार एव न स्यात् तदा अर्थालङ्कारविशेषस्य एकदेशवर्त्तिरूपकस्य इदमुदाहरणमेव न स्यादिति तेषामुक्तिरसङ्गता स्यादिति भावः।

(५५) अत्र जये कुञ्जरत्वारोपे भुजे आलानत्वारोपो निमित्तम्, भुजे च आलानत्वारोपे जये कुञ्जरत्वारोपो निमित्तमिति परस्परसापेक्षविशिष्टैरपि परस्परावच्छेदमात्राधीनस्थितिकाभिरिष्टकाभिर्हर्म्यविशेषनिर्माणमिव न दोषाय इत्युद्योतकृत्।

यत्र जयादेर्भिन्नशब्दवाच्यस्य कुञ्जरत्वादारोपे भुजस्य आलानत्वादारोपो व्यज्यते।

अलौकिक-महालोक-प्रकाशित-जगत्त्रयः।
स्तूयते देव सहंशसुत्कारत्वं न कैर्भवान्(५८)॥ [शि०प०के०]

निरवधि च निराश्रयत्व यस्य
स्थितमनिवर्त्तितकौतुकप्रपञ्चम्।
प्रथम दृष्ट भवान् स कर्ममूर्त्ति-
र्जयति चतुर्दशलोकवल्लिकन्दः (५९)॥ [अप्पि०प०के०]

-इति च अमालारूपकमपि (६०) परम्परितं द्रष्टव्यम्॥

---

(५८) अलौकिकस्य महत्या (उत्कटया) आलोकः(प्रदर्शनम्)एव अलौकिको महान् आलोकस्तेन प्रकाशितं (प्रकृतपक्षे सम्भोषितम्) जगत्त्रयं येन स भवान्। सत्कारत्वप्रभया जगत्त्रयप्रकाशासम्भवात्, नेदं राजनि सत्कारत्वारोपे निमित्ततयोपात्तम्, किन्तु तदपेक्षया उत्कर्षप्रदर्शनायैवोक्तमिति, सत्कुले वेणुत्वारोप एव तन्निमित्तमिति।

(५९) निरवधि कालपरिच्छेदशून्यम्। निराश्रयत्व सर्वाधिस्थितत्वाद् आश्रयशून्यत्व। स्थितम् अवस्थानम्। अतएव अनिवर्त्तित कौतुकस्य आश्चर्यस्य प्रपञ्चो विस्तारो यस्मात् सः। विष्णुं प्रति भक्तस्योक्तिरियमिति चन्द्रिका।

(६०) अत्र मालारूपकमपीति पाठं मन्यमानेन, 'प्रकृतारोपं प्रति यदि बहवोऽपरारोपाः स्यात् परम्परया वा निमित्ततया उपात्तास्तदादि आलारूपकम्'-इत्यङ्गीकुर्वतेन अनेनैवेक उल्लोदाहरणद्वयमेतादृशमालारूपकविषयमिति प्रतिपादितम्, तच्च तत एवावगन्तव्यम्।

'किसलयकरैर्लतानां, करकमलैः कामिनां मनो जयति ।
नलिनीनां कमलमुखैः, सुखेन्दुभिर्योषितां मदनः (६१)॥'
-इत्यादि रूपनारूपकं न वैचित्र्यवदिति(६२) न लक्षितम् ॥

प्रकृतं यन्निषिध्यान्यत्साध्यते सा त्वपह्नुतिः ।

उपमेयम् असत्यं कृत्वा उपमानं सत्यतया यत् स्थाप्यते, सा तु अपह्नुतिः (६३) । उदाहरणम्,-

अयामः प्रागल्भ्यं परिणतरुचः शैलतनये,
कलङ्को नैवायं विलसति शशाङ्कस्य वपुषि ।
अमुष्येयं मन्ये विगलदमृत-स्यन्द-शिशिरे
रतिश्रान्ता शेते रजनिरमणी गाढमुरसि ॥ [वा० अम०]

---

(६१) योषितामित्यस्य व्यवस्थितमपि करकमलैरित्यनेनापि योज्यत्वादृक्षयः। अत्र (रूपकोपमायामिव) पूर्वपूर्वेषामारोप्यमाणानां परत्वपरत्व आरोपविषयत्वात् रूपनारूपकमिदम् । परिणामालङ्कारस्तु रूपके एवान्तर्भवति ।

(६२) उत्कर्षांशयतया उपमानीकृतानां पुनरुपमेयीकरणे तदुत्कर्षस्यागमनमिति न वैचित्र्यवदिति उद्योतकृत् ।

(६३) निषिध्येति क्त्वाप्रत्ययार्थं व्यापारार्थमविवक्षितम्, तेन पूर्वं पश्चाद् वा उपमेयस्वरूपनिषेधसहितस्योपमेयस्य उपमानरूपतास्थापनमपह्नुतिरिति। अत्रालङ्कारद्वये सतीति विशेषणमस्त्येव, तेन प्रतिभातुत्थापिते न दोषः। अपह्नुतिश्च द्विविधा, वाच्या प्रतीयमाना चेति । प्रतीयमाना तु बहुभिर्भङ्गिभिर्निबध्यते, तथाहि, क्वचित् कपटार्थकशब्दोपादानात्, क्वचित् परिहारार्थकशब्दोपादानात्, क्वचिच्च अन्ययेति उदाहरणबलाच्च स्वयमूहनीयम् । अत्र, 'उपमेयमिति, दृष्टप्रकाशकम्, किञ्चिदपह्नुत्य कस्यचित् प्रदर्शनम् अपह्नुतिरित्येव लक्षणम्'-इत्युद्योतकृत् ।

धूत्यं वा,-

वत सखि, कियदेतत्पश्य वैरं स्मरस्य,
प्रियविरहक्षणेऽस्मिन् रागिलोके तथाहि।
उपवन-सहकारोल्लासि भृङ्ग-च्छलेन
प्रतिविषिखमनेनोद्वहितं कालकूटम् ॥ [प्र०अप०]

अत्र हि न सभृङ्गाणि सहकाराणि, अपि तु सकालकूटाः शरा इति प्रतीतिः। एवं वा,-

असुश्लिष्टावष्टम्भास्थतसरसि नूनं स्वगहयः
स्मरः शर्वक्षुष्टः प्रथुजघनभागे निपतितः।
यदङ्गाङ्गाराणां प्रशमपिशुना नाभिकुहरे
शिखा धूमस्येयं परिणमति रोमावलिवपुः ॥ [प्र०अप०]

अत्र न रोमावलिः, धूमशिखेयमिति प्रतिपत्तिः।
एवमियं भङ्ग्यन्तरैरप्यूह्या ॥

श्लेषः स, वाक्ये एकस्मिन् यत्रानेकार्थता भवेत्॥१०॥

एकार्थप्रतिपादकानामेव शब्दानां यत्रानेकोऽर्थः, स श्लेषः(६४)।

---

(६४) एकार्थप्रतिपादकानाम् 'अर्थभेदेन शब्दभेद'-इति नियमेन 'एकार्थस्यैव वाचकशब्दस्यानेकार्थानाम्। 'यत्र' यस्मिन् वाक्यद्वारे विद्यमाने इति शेषः। 'अनेकोऽर्थः', प्रकरणादेरनियमेन बुध्यते-इति शेषः। 'नन्वेकार्थ-प्रतिपादकानां कथमनेकोऽर्थो वाच्य ?'। तथाविधाकारैरपरैः शब्दैः सह श्लिष्टतयेति ब्रूमः। 'एष चेत् अस्य शब्दालङ्कारत्वे किं बाधकम् ?'। यद्भूयस्त्वसहत्वमिति ब्रूमः। भूयस्त्वसहानां श्लिष्टानां शब्दानां प्रकरणादिनियमाभावादनेकार्थप्रतिपादकत्वेऽर्थश्लेष इति फलितम्। केचित्तु 'एकार्थप्रतिपादकानां' सामान्यैकधर्मावच्छेदेन सामान्यशब्दानामैक्य अर्थस्य

उदाहरणम्,-

उदयमयते, दिङ्मालिन्यं निराकुरुतेतराम्,
नयति निधनं निद्रामुद्रां, प्रवर्त्तयति क्रियाः ।
रचयतितरां स्वैराचार-प्रवर्त्तन-वन्धनम्
यत यत लसत्तेजःपुञ्जो विभाति विभाकरः (६५) ॥

अत्राभिधाया अनियन्त्रणात् द्वावप्यर्कभूपौ वाच्यौ ।

परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः ।

प्रस्तुतार्थप्रतिपादकवाक्येन श्लिष्टविशेषणमाहात्म्यात् (६६)
(न तु विशेष्यस्य सामर्थ्यादपि) यत् अप्रस्तुतस्य अर्थस्य अभिधानं,
सा (समासेन शब्देनार्थद्वयकथनात्) समासोक्तिः ।

वाचकानाम् । अनेकोऽर्थ विशेषरूपो भागो यस्य । यथोदाहरणे उदय-शब्देन सामान्योदयवाचकादुदयपदादर्कोदयराजोदययोरुदयविशेषरूपयो-रर्थयो प्रतीतिरिति आह ।

(६५) राजपक्षे दिङ्मालिन्यं दारिद्र्येण । निद्रामुद्रा निद्रा एव मुद्रा (निश्चलाकृतिः) । स्वैराचारो यथेष्टाचार । विभाकरशब्दार्थकभूपः । एतच्च विभाकरशब्दस्य परित्यक्तवाच्यतया अभिप्रेतयो रूढ्यैव एव । अन्यत्र तु सर्वत्रार्थस्यैव इति विभावनीयम् । क्वचित्तु विभां नीत्वा राज्यस्य प्रकाशं स्थापयति, उन्नतिम्, करोतीति व्युत्पत्तिमवलम्ब्य विभाकरपदमपि परित्यक्तरूढि विशेषणमिति सर्वत्रैव अर्थस्यैव इति आह ।

(६६) श्लिष्टम् प्रस्तुताप्रस्तुतार्थोभयपरत्वम् । प्रस्तुतार्थसत्त्वविशेषणमात्र-महिम्ना यदप्रस्तुतार्थस्य बोधनं, सा समासोक्तिरिति । विशेष्यस्यापि उभयार्थपरत्वे तु श्लेष इति । तत्रार्थे विशेषण,-प्रकरणादीनां नियमे श्लेषो व्यङ्ग्यः, अनियमे वाच्य इति ।

उदाहरणम्,-

लद्धिअए तुम्ह वाङम्मुहं जीए स को वि उल्लासो।
जअलच्छी तुह विरहे ण हुज्जला दुव्वलाणं सा (६७)॥

अत्र जयलक्ष्मीशब्दस्य केवलं कान्तावाचकत्वं नास्ति।

निदर्शना।

अभवन् वस्तुसम्बन्ध उपमापरिकल्पकः [६८] ॥११॥

निदर्शनं दृष्टान्तकरणम्। उदाहरणम्,-

क्व सूर्य्यप्रभवो वंशः, क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥ [वा०नि०]

अत्र उडुपेन सागरतरणमिव मन्मत्या सूर्य्यवंशवर्णनमित्युपमायां पर्य्यवस्यति। यथा वा,-

उदयति विततोर्द्धरश्मिरज्जौ
अहिमकरौ, हिमयाम्नि याति चास्तम्।
वहति गिरिरयं (६९) विलम्बिघण्टा-
द्वयपरिवारितवारणेन्द्रलीलाम्॥ [प०नि०]

---

(६७) लब्ध्वा तव वाङ्मुखं, यया. स कोऽप्युल्लासः।
जयलक्ष्मीस्तव विरहे न खलूज्ज्वला दुर्व्वलानां सेति सं०। ०ल्लु

(६८) 'अभवन्' असम्भवन्, अनुपपद्यमान, तात्पर्य्यविषय इति यावत्। वस्तुनोर्वाक्यार्थयो पदार्थयोर्वा सम्बन्धोऽन्वय। यत्रोदाहरणे सूर्य्यवंशवर्णनेऽहं सागरं तितीर्षुरस्मीति सम्बन्धोऽनुपपन्नो वक्ष्यमाणामुपमां कल्पयति।

(६९) गिरि रैवतपर्व्वतः। अत्र सप्तम्येकपदबोध्येन वारणेन्द्रलीलापदार्थेन गिरिपदार्थस्यान्वयोऽनुपपन्न इति यथोक्तोदाहरणकल्पनम्।

उदाहरणम्,-

उदयमयते, दिङ्मालिन्यं निराकुरुतेतराम्,
नयति निधनं निद्रामुद्रां, प्रवर्त्तयति क्रियाः ।
रचयतितरां स्वैराचार-प्रवर्त्तन-कर्त्तनम्
वत यत लसत्तेजःपुञ्जो विभाति विभाकरः (६५) ॥

अत्राभिधाया अनियन्त्रणात् द्वावप्यर्कभूपौ वाच्यौ ।

परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः

प्रस्तुतार्थप्रतिपादकवाक्येन श्लिष्टविशेषणमाहात्म्यात् (६६)
(न तु विशेष्यस्य सामर्थ्यादपि) यत् अप्रस्तुतस्य अर्थस्य अभिधानं,
सा (समासेन सङ्क्षेपेणार्थद्वयकथनात्) समासोक्तिः ।

वाचकानाम् । अनेकोऽर्थ विशेषरूपो भाना अर्थ । यथोदाहरणे उदय-रूपेण सामान्योदयवाचकादुदयपदादर्कोदयराजोदययोरुदयविशेषरूपयो-रर्थयो प्रतीतिरिति आह ।

(६५) राजपक्षे दिङ्मालिन्यं दारिद्र्यम् । निद्रामुद्रा निद्रा एव मुद्रा (निरुक्ताहता) । स्वैराचारो यथेष्टाचार । विभाकरशब्दामरूप । एवञ्च विभाकरशब्दस्य परिहृत्यवहृतया अप्रिसक्ते शब्दश्लेष एव । अन्यत्र तु सर्वत्रार्थश्लेष इति विभावनीयम् । केचित्तु विभां नीत्वा राज्ञस्य प्रकाशं ग्लपति, उन्नतिम्,करोतीति व्युत्पत्तिमपेक्ष्य विभाकरपदमपि परिहृतिरूढ विशेषणमिति सर्वत्रैव अर्थश्लेष इति आह ।

(६६) श्लिष्टम प्रस्तुताप्रस्तुतार्थोभयपक्षकम् । प्रस्तुतार्थगतविशेषणमाहात्म्य-महिम्ना यदप्रस्तुतार्थस्य बोधन, सा समासोक्तिरिति । विशेष्यस्यापि समानार्थसद्भावे तु श्लेष इति । तत्रायं विशेष,-प्रकरणादीनां नियमे श्लेषो व्यङ्ग्य, अनियमे वाच्य इति ।

अप्रस्तुतप्रशंसा सा, या सैव प्रस्तुताश्रया [७२]॥१२॥

अप्राकरणिकस्याभिधानेन प्राकरणिकस्याक्षेपोऽप्रस्तुतप्रशंसा ।

कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति ।
तदन्यस्य वचस्तुल्ये तुल्यस्येति च पञ्चधा [७३]॥१३॥

तदन्यस्य कारणादेः । क्रमेणोदाहरणम्,-

याताः, किं न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्कृते
नो कार्या, नितरां रुगाक्षि, कथयत्येवं सखास्ये मयि ।
लज्जामन्थरतारकेण निपतत्पीताम्बुना चक्षुषा
दृष्ट्वा मां, हसितेन भाविमरणोत्साहस्यया सूचितः ॥

अत्र प्रस्थानात् किमिति (७४) निवृत्तोऽसीति कार्ये दृष्टे कारणमभिहितम् ।

राजन्, राजसुता न पाटयति मां, देव्योऽपि तूष्णीं स्थिताः,
कुञ्जे, भोजय मां, कुमारसचिवैर्नाद्यापि किं भुज्यते ? ।

---

(७२) सैव अप्रस्तुतप्रशंसैव । प्रस्तुताश्रया प्राकरणिकार्थप्रतिपत्तिपरा । प्राकरणिकेनाप्राकरणिकाक्षेपः समासोक्तिः, इयन्तु अप्राकरणिकेन प्राकरणिकार्थाक्षेप इति भेदः ।

(७३) निमित्ते कारणे । कार्ये प्रस्तुते कारणस्य अप्रस्तुतस्य, कारणे कार्यस्य, सामान्ये विशेषस्य, विशेषे सामान्यस्य, एवं तुल्ये तुल्यस्येति पञ्च ।

(७४) किमिति प्रश्ने, किं प्रस्थानात् निवृत्तोऽसि ? इति प्रश्ने । तत्र च प्रस्थाननिवृत्तिप्रश्ने, अत्र किं, प्रस्थानात् निवृत्तोऽसि इत्येतदुत्तरं युक्तं । अत्र तु प्रस्थाननिवृत्तिकारणमभिहितं, तेनापि च प्रस्थानात् निवृत्तोऽसि इत्युत्तरं अर्थतः प्रतीयते ।

अत्र कथमन्यस्य लीलामन्यो वहतीति तत्सदृशीमित्युपमायां पर्य्यवसानम् ।

दोर्भ्यां तितीर्षति तरङ्गवतीभुजङ्गम्,
आदातुमिच्छति करे हरिणाङ्कबिम्बम् ।
मेरुं लिलङ्घयिषति ध्रुवमेष देव,
यस्ते गुणान् गदितुमुद्यममादधाति ॥

-इत्यादौ मालारूपायेया द्रष्टव्या ॥

स्वस्वहेत्वन्वयस्योक्तिः क्रियया चैव साऽपरा ।

क्रियया चैव स्वस्वरूप-स्वकारणयोः सम्बन्धो यदवगम्यते, सा अपरा निदर्शना (७०) । यथा,-

उन्नतं पदमवाप्य यो लघुः, हेलयैव स पतेदिति ब्रुवन् ।
शैलशेखरगतो हृषत्कणद्वारुमारुतधुतः पतत्यधः (७१) ॥

अत्र पातक्रियया पतनस्य, लाघवे सति उन्नतपदप्राप्तिरूपस्य च सम्बन्धः ख्याप्यते ।

---

(७०) क्रियारूपेण स्वेन कार्येण स्वस्य (क्रियारूपस्य कार्यस्य) स्वकारणेन सम्बन्धस्य (कार्यकारणभावरूपस्य) यत् प्रतिपादनं, सा अपरा निदर्शनेत्यर्थः ।

(७१) ब्रुवन् प्रतिपादयन् । अत्र हि पतनोत्पतनक्रियारूपेण कार्येण स्वेन, पतेत्पदप्रतिपाद्यस्य स्वस्य (पतनरूपकार्यस्य) स्वकारणेन (लघीयस उन्नतपदप्राप्तिरूपेण) सम्बन्धः (कार्यकारणभावात्मकः) प्रतिपाद्यते । तथाच लाघवे सति उन्नतपदप्राप्तिः पाते हेतुः, यथा हृषत्कणद्वारुमारुतधुतः पतत्यधः इत्यन्वयव्यतिरेकादिदमपि निदर्शनम् ।

क्रमेणोदाहरणम्,-

पुंस्त्वादपि प्रविचलेत् यदि, यद्यधोऽपि
यायात्, यदि प्रणयने न महानपि स्यात्।
अभ्युद्धरेत्तदपि विश्वसितीदृशीयं
केनापि दिक् प्रकटिता पुरुषोत्तमेन (७८)॥ [श्लेषहेतुः]
येनास्यभ्युदितेन चन्द्र, गमित. क्लान्तिं, रवौ तत्र ते
युज्येत प्रतिकर्त्तुमेव, न पुनस्तस्यैव पादग्रहः।

---

(७८) अप्रस्तुतविष्णुपक्षे पुंस्त्व पु चिह्न, (नारीभूयात्तत्परत्वात्)। अध पातालं, (पृथ्वीरक्षणाय कूर्ममूर्त्या पातालगमनात्)। प्रणयने याचने, 'न महान्' वामन., (बलिरूपायात् प्रार्थनसमये तथाभावात्)। पुरुषोत्तम नारायण। राजपक्षे पुंस्त्व पौरुषम। अध खलदध्वग। अन्यत् सुगमम्। उभयपक्षे दिक् पन्था रीतिरिति यावत्। ननु 'प्रकरणेन राजरूप प्रस्तुतोऽर्थ एव प्रथमसमुपस्थीयते,-इति कथमत्र अप्रस्तुतप्रशंसा, अप्रस्तुतार्थस्य प्रथमत उपस्थित्यामेव तत्सम्भवात्'। उच्यते, पुरुषोत्तमादिशब्दानां सत्पुरुषादिरूपे प्रस्तुतेऽर्थे यौगिकी (प्रकृतिप्रत्ययलभ्या) शक्तिरिति प्रकरणादिसहिताभिधा बाधित्वा अभिधाशक्तिर्नारायणादिरूपमप्रस्तुतमर्थं प्रथममेवोपस्थापयति, ततश्च प्रस्तुतार्थबोध इति। यत्र हि उभयशक्तिमपि अर्थं अभिधावृत्तं सम्भवत्येव प्रकरणादिकं नियामकम्, यत्र पुनरेकशक्तिम् अभिधा, अपरशक्तिम् यौगिकी शक्ति, तत्र अभिधैव बलवती अपरा प्रकरणादिसहितामपि बाधते, अत्र च मूले "अवयवशक्तेः समुदायशक्तिर्बलीयसी" इति नियम। अतएव नात्र श्लेषोऽपि उभयार्थस्यापि अभिधेयत्वात्, प्रकरणान्नियमाभावाच्चेति।

दृश्यं नाथ, शुकस्तवारिभवने मुक्ताऽध्वगैः पञ्जरात्
चित्तस्थानवलोक्य शून्यवलभावेवैकमाभाषते ॥
अत्र प्रस्थानोद्यतं भवन्तं ज्ञात्वा सहसैव त्वदरयः पलाय्य गता इति कारणे (७५) प्रस्तुते कार्यमुक्तम् ।

एतत् तस्य मुखात्क्रियत्, कमलिनीपत्रे यत्पयो वारिणो
यन्मुक्तामणिरित्यमंस्त स जड़ः, श्रद्धान्यदस्मादपि ।
अङ्गुल्यग्र-लघु-क्रिया-प्रविलयिन्यादीयमाने शनैः
कृत्वोड्डीय गतो ममेत्यनुदिनं निद्राति नार्त्तः शुचा (७६)॥

अत्रास्याने जडानां ममत्वसम्भावना भवतीति सामान्ये प्रस्तुते विशेषः कथितः ।

सुहृद्वधू वाष्प-जल-प्रमार्ज्जनं
करोति वैर प्रतियातनेन यः ।
स एव पूज्यः, स पुमान्, स नीतिमान्,
सजीवनं तस्य, स भाजनं श्रियः ॥

अत्र कृष्णं निहत्य नरकासुरबधूनां यदि दुःखं प्रशमयसि, तत् त्वमेव श्लाघ्यः-इतिविशेषे प्रस्तुते सामान्यमभिहितम् ।

तुल्ये प्रस्तुते तुल्याभिधाने त्रयः प्रकाराः,-श्लेषः, समासोक्तिः, सादृश्यमात्रं वा तुल्यात् तुल्यस्य हि आक्षेपे हेतुः (७७) ।

---

(७५) कारणे अप्रस्तावनरूपे । कार्ये पथिकमुक्तशुकाभाषणरूपम् ।

(७६) सुखादिति सुखमिति शेषः । अत्र जडसामान्यप्रस्तावे जड़-विशेषस्तत्वमुक्तम् ।

(७७) अप्रस्तुतोक्त्या प्रस्तुताक्षेपस्त्रये सदृशो. श्लेषसमासोक्त्यलङ्कारयो-रन्तर्भावात् अत्र श्लेषपदम् विशेषणविशेष्यसादिसम्बन्धानां सर्वेषामेव उप-लक्षणपरम्, समासोक्तिपदञ्च विशेषणमात्रस्य उभयार्थबोधकपरमिति ।

कचिदध्यारोपेणैव । यथा,-

कस्त्वं भोः ? कथयामि,-दैवकृतकं मां विद्धि याकोटकम्,
वैराग्यादिव यक्षि ? साधु विदितं, कस्मादिदं ? कथ्यते ।
वामेनात्त वटस्तमध्वगजनः सर्वात्मना सेवते,
न च्छायापि परोपकारकरणी मार्गस्थितस्यापि मे (८२)॥

कचित्तु अंशेष्वध्यारोपेण । यथा,-

सोऽपूर्वो रसनाविपर्ययविधिस्तत्कर्णयोश्चापलम्,
दृष्टिः सा मदविप्लुतस्वपरदिक्, किं भूयसोक्तेन वा ।
सर्वं विप्लुतवानसि भ्रमर हे, यद्वारणोऽद्यापि सौ
अन्तःशून्यकरो निषेव्यत इति भ्रान्तः, क एष ग्रहः ?(८३) ॥

अत्र रसनाविपर्यासः शून्यकरत्वञ्च भ्रमरस्यासेवने न हेतुः,
कर्णचापलन्तु हेतुः, मदः प्रत्युत सेवने निमित्तम् (८४) ॥

---

(८२) अत्र वस्तुपालेन स्वदत्तस्वागङ्गीकारात् अतीवनिर्विज्ञः अधमजातिर्हिज्ञः कश्चित् पुरुषः प्रस्तुतः प्रतीयते । अचेतनेन वाक्यार्थेन याकोटकेन सह उक्तिप्रत्युक्तिसम्भवात् वाक्यार्थे याकोटकादिरूपे प्रतीयमानार्थस्य अधमजाति-दिङ्मूढ-प्रभृतेः आरोपः आक्षेपश्च ।

(८३) रसनाविपर्यासः जिह्वापरिवर्तनं, (अन्तिमभागात् करीषात् उपरिष्टं रसनाग्रम् इति), पूर्वविपरीताभिधानञ्च । चापलं चाञ्चल्यं अस्थिरता, अवणभागेन मतपरिवर्त्तनञ्च । स्वपरदिक् निजपरभागं, ग्राह्यत्यागाद्यविवेकश्च । शून्यकरः यच्छिन्नशुण्डादण्डः, अतशून्यहस्तश्च । ग्रहः आग्रहः ।

(८४) तथाच कर्णचापलांशे न प्रतीयमानार्थस्य अध्यारोपः आक्षेपश्च, तद्व्यतिरिक्तरसनाविपर्ययादिरूपांशत्वे आरोपः आक्षेपश्च इति ।

क्षीणेनैतदनुष्ठितं यदि, ततः किं लज्जसे नो मनाक् ?
अस्त्येवं जड़धामता तु भवतो यद्व्योम्नि विस्फूर्जसे(७९)॥[सा०दे०]

आदाय वारि परितः सरितां मुखेभ्यः,
किं तावदर्जितमनेन दुरर्णवेन ।
वारीक्षितं च, बड़वादहने हुतश्च
पातालकुक्षिकुहरे विनिवेशितश्च ॥ [सा०दे०]

भूयश्च काचित् वाच्ये प्रतीयमानार्थानध्यारोपेणैव भवति(८०)।
यथा,-

अब्धेरम्भः-स्खलित-भुवनाभोग-पातालकुक्षेः
पोतोपाया दूढ हि बहवो लङ्घनेऽपि क्षमन्ते ।
आहो! रिक्तः कथमपि भवेदेष दैवात्, तदानीं
को नाम स्यादवटकुहरालोकनेऽप्यस्य कल्पः ! (८१) ॥

---

(७९) पादौ रश्मि चरणश्च (सूर्यकिरणपातेनैव चन्द्रस्य तेजस्वित्वमिति)। जड़ंजलं जड़धामता हिमाश्रयता, मूर्खता च (जड़पदस्य भावप्राधान्येन निर्देशात्) इति चन्द्रिका ।

(८०) वाच्यस्य अप्राकरणिकार्थस्य यत्रविशे न तत्र प्रतीयमानस्य प्राकरणिकार्थस्य आरोप, तस्य यत्रसम्भविते तु तदारोप आवश्यक एव, अन्यथा अयोग्यत्वबुद्धया अर्थबोध एव न स्यात् । एतच्च उदाहरणेन स्फुटीभविष्यति ।

(८१) अम्भसा स्खलितो भुवनस्य आभोगः (विस्तारः) पातालस्य कुक्षि (मध्यम्) च येन, तस्य । अवटो गर्तः स्यात् । कुहरं छिद्रं गभीरभागः । अत्र उपमर्दनयोग्यस्य प्रभो पूर्णतैव वरम्, न रिक्तता, अस्मत्तोपमर्दनापत्तेरिति प्रस्तुतम् प्रतीयमानम् । अत्र वाच्यार्थस्य स्वत एव सम्भवितया न तत्र प्रतीयमानार्थाध्यारोपः आवश्यक ।

यच्च तदेवान्यत्वेनाध्यवसीयते, सा अपरा। यथा,-

अहं लडहत्तणअं अज्जव्व अ काडू वत्तणछाआ।
सामा सामाण्णपआवडणो रेहए अ ण होदू॥ (८७)

'यद्यर्थस्य' यदिशब्देन चेच्छब्देन वा उक्तौ यत् कल्पनम्, (अर्थात् असम्भविनोऽर्थस्य), सा तृतीया। यथा,-

राकायामकलङ्कश्चेद्यताशोर्भवेद्वपुः।
तस्या मुखं तदा साम्यपराभवमवाप्नुयात्॥

कारणस्य शीघ्रकारितां वक्तुं कार्यस्य पूर्वमुक्तौ (८८) चतुर्थी। यथा,-

हृदयमधिष्ठितमादौ मालत्याः कुसुमचापबाणेन।
चरमं रमणीवल्लभ, लोचनविषयं त्वया भजता॥

प्रतिवस्तूपमा तु सा॥ १५॥

सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः।

---

(८७) अन्यत् सौकुमार्यम् अन्यैव च कापि वर्त्तनच्छाया।
श्यामा सामान्यप्रजापते रेखेव च मा भवतीति मत्।
लडहत्तणअ-यद्द' सौकुमार्यं देशी। वर्त्तन शरीरम्।
'गीतकाले भवेदुष्णा शीते च सुखशीतला।
वर्षाशरद्योर्माध्या सा श्यामा परिकीर्त्तिता'॥
रेखा निर्भोगपरिपाटीवेषश्चन्द्रा निर्माणार्थं प्रथमं कठिनीयातो वा।

(८८) पूर्वं कार्योत्पत्त्युपयुक्तत्वात् पूर्वम्, तद् कार्यस्य कारणस्वभावेन वर्णनेऽपि भवति। यथा-

कमलेन मुखाक्रान्तं इव दिवसादिना।
तेन विच्छायतां विभ्रन्मण्डलन्तु मयोषितम्॥-इति दर्पणकृत्।

निगीर्य्याध्यवसानन्तु प्रकृतस्य परेण यत् ।
प्रस्तुतस्य यदन्यत्वं, यद्यर्थोक्तौ च कल्पनम् ॥१३॥
कार्य्यकारणयोर्यश्च पौर्वापर्य्यविपर्य्ययः ।
विज्ञेयातिशयोक्तिः सा, (८५)

उपमानेनान्तर्निगीर्णस्य (८६) उपमेयस्य यदध्यवसानं सैका । यथा,-

कमलमनम्भसि, कमले च कुवलये, तानि कनकलतिकायाम् ।
सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम् ॥
अत्र मुखादि कमलादिरूपतया अध्यवसितम् ।

---

(८५) अतिशय अतिशयिता प्रसिद्धिमतिक्रान्ता लोकातीता उक्तिः अतिशयोक्तिः, सा च एतेषु परस्परमत्यन्तं-विलक्षणेष्वपि चतुर्षु प्रभेदेषु अस्तीति एतेषां प्रभेदानामतिशयोक्तिरिति साधारणं नाम न्यायसङ्गतम् । कमलानामेव यथा पङ्कजनाम, तथा एतेषामेव अतिशयोक्तिरिति नाम योगरूढमिति न कोऽपि दोषः ।

(८६) अन्तर्निगीर्णस्य अन्तर्गिलितस्येव स्वरूपेणानुपस्थितस्य (स्ववाचकशब्देन अनुपात्तस्य) । अध्यवसानम् (स्वरूपेणानुपस्थिततया) सर्वथैव अभेदप्रतीतिरूप उत्कटारोपः । अयञ्च प्रभेद आध्यवसानलक्षणा-सम्भवस्थल एव भवतीत्युक्तम् प्राक् । दर्पणकृतस्तु, अन्तर्निगीर्णपदस्य अप्रधानीकृतस्व-रूपं मन्यमान 'सुखं हिनीयशब्द' इत्यादौ विषयस्य स्वरूपोपादानेऽपि एतमतिशयोक्तौ प्रभेदमाहुः ।

दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिविम्बनम् (९१)॥१६॥

एतेषां साधारणधर्मादीनां। दृष्टोऽन्तः (निश्चयः) यत्र स दृष्टान्तः (९२)।

त्वयि दृष्ट एव तस्या निर्वाति मनो मनोभवज्वलितम्।
आलोके हि हिमांशोर्विकसति कुसुमं कुमुदत्याः॥

एष साधर्म्येण (९३)। वैधर्म्येण तु,-

तवाहवे साहसकर्मधर्मणः
करं कृपाणान्तिकमानिनीपतेः।

---

(९१) अत्र वाक्यइये इति पूर्वखण्डादनुवर्त्तते। एतेषां साधारणधर्मोपमानोपमेयानां। प्रतिविम्बनं विम्बप्रतिविम्बभाव, उपमानोपमेयभाव इति यावत्। प्रतिवाक्यं विभिन्नत्वेऽपि साधारणधर्मस्य तुल्यरूपतया वाक्यार्थयोरुपमाश्रयत्वादत्रापि दृष्टान्त इति फलितम्। प्रतिबिम्बोपमायां धर्मस्य ऐक्यम्, अत्र तु विभिन्नता इति प्रतिबिम्बोपमातो भेदः। यथा, प्रथमोदाहरणे, एकदा ऊर्द्धपदाधिरूढस्यावनतिरनुचितेति ऊर्द्धपदाधिरूढस्यावनतेरनौचित्य साधारणो धर्म्मः। एव द्वितीयोदाहरणे स्वाभाविककार्य्यदर्शन न विस्मयकरमिति स्वाभाविककार्य्यदर्शनस्य विस्मयाजनकत्वं साधारणो धर्म्मः शब्दभेदेन निर्दिष्टः।

(९२) निश्चय प्रस्तुतस्य अर्थस्य निःसन्देहा (निश्चितप्रामाण्या) प्रतीतिः, योदाहरणवाक्येन प्रतिपाद्यमानो अर्थः चेत्तावद्भावनिरूप्या असत्यत्वमेव प्रतीयते। तदिय सत्ता योगरूढिः।

(९३) मनोविकारनिर्व्वाणस्य कुसुमविकाशस्य च धर्म्मस्य परस्पर भेदः। तथापि अत्र कुसुमयोर्मुकुलितत्वनिवारणादिरूप साधारणो धर्म्मोऽस्तीति तमवलम्ब्य वाक्यार्थयो साहश्यम्। अत्र दृष्टान्तो न व्यतिरेकेण दत्त इति साधर्म्योदाहरणम्।

साधारणो धर्म्म उपमेयवाक्ये, उपमानवाक्ये च (कथितपदस्य दुष्टतयाऽभिहितत्वात् (८६) शब्दभेदेन यत् उपादीयते, सा (वस्तुनो वाक्यार्थस्योपमानत्वात्) प्रतिवस्तूपमा । यथा,-

देवीभावङ्गमिता परिवारपदं कथं भजत्येषा ।
न खलु परिभोगयोग्यं दैवतरूपाङ्कितं रत्नम् ॥

यदि दहत्यनलोऽत्र किमद्भुतम्, यदि च गौरवमद्रिषु किं ततः ।
लवणमम्बु सदैव महोदधेः, प्रकृतिरेव सतामविपादिता ॥
-इत्यादि मालाप्रतिवस्तूपमा द्रष्टव्या । एवमन्यत्रापि अनुसर्त्तव्यम् (९०) ।

---

(८६) तथाच शब्दभेदेनेति विशेषणमतुक्तमपि व्यर्थमवधेयम् बोध्यम् । "अत्र (कारिकायाम्) हितिति हये इति च पदे अनेकोपलक्षके, मालानुरोधात्"-इति प्रदीपः । तेन वाक्यार्थयोर्वाक्यार्थानां वा उपमानोपादानस्य एकस्यैव धर्म्मस्य भिन्नशब्दोपात्तत्वं प्रतिवस्तूपमा इति फलितम् । उपमायान्तु पदार्थयोः साम्यं, तच्च वाच्यं, अत्र तु वाक्यार्थयोः, तदपि गम्यमेवेति ततो भेदः । साम्यप्रतिपादकसामानिवादीनाम् पदत्वेन तैः पदार्थयोरेव साम्यं बोध्यते, 'पदार्थः पदार्थेन अन्वेति'-इति नियमात्, वाक्यार्थयोः साम्यं गम्यमेव नियतमिति अत्र दर्पणकृतो वाच्यसाम्यव्यावर्त्तकं गम्यसाम्येति विशेषणदानं किमर्थमिति न जानीमहे ।

(९०) अन्यत्रापि वैधर्म्म्यस्थलेऽपि । यथा,

यशोर्थं एव चतुराश्चन्द्रिकापानकर्म्मणि ।
विनाप्यस्मान् निपुणाः सन्तो रतकर्म्मणि ॥-इति । दर्पणेऽप्येवम् ।

कारकस्य च बहीषु क्रियासु सकृद्वृत्तिर्दीपकम्। यथा,-

खिद्यति कूणति वेल्लति विवलति
निमिषति विलोकयति तिर्य्यक्।
अन्तर्नन्दति चुम्बितुमिच्छति
नवपरिणया वधूः शयने (९८)॥

मालादीपकमाद्यञ्चेद् यथोत्तरगुणावहम्।

पूर्वेण पूर्वेण (९९) वस्तुना उत्तरमुत्तरं चेदुपक्रियते, तत् मालादीपकम्। यथा,-

सङ्ग्रामाङ्गनमागतेन भवता चापे समारोपिते,
देवाकर्णय, येन येन सहसा यत् यत् समासादितम्।
कोदण्डेन धराः, शरैररिगिरस्तेनापि भूमण्डलम्,
तेन त्वं, भवता च कीर्त्तिरतुला, कीर्त्त्या च लोकत्रयम्॥

नियतानां सकृद्धर्मः(१००),सा पुनस्तुल्ययोगिता॥१८॥

---

(९८) कूणति सङ्कुचति। वेल्लति परिहत्य याते। विवलति विशेषतः चपलायते। विवलते इति पाठो भवितुं युक्तः।

(९९) कारिकायां यथोत्तरमिति वीप्सायुतेरादावित्यत्रापि वीप्सा वक्ष्येति प्रतिपादयति पूर्वेण पूर्वेणेति। उपक्रियते उपरज्यते, विशेष्यते, सविशेषणीक्रियते। यथोदाहरणे पूर्वोक्तेन कोदण्डेन समासादनक्रियाद्वारा परोक्षाः धराः सविशेषणीक्रियन्ते, तैर्धारिगिरः, एवं परत्रापि। 'तत्' सदा। मालादीपकमिदन्तु न मालोपमादीनामिवेति पृथगुक्तम्।

(१००) यदुपादीयते इति शेषः। सा धर्मस्य सकृदुपादानरूपा। प्रकृताप्रकृतयोरुभयोरेव एकदा सकृद्धर्मसम्बन्धे दीपकम्, तयोरेकस्य (प्रकृतस्यैव अप्रकृतस्यैव वा) तथात्वे तुल्ययोगितेत्यनयोर्भेदः।

भटाः परेषां वि-शरारुतामगुः
दधत्यवाते स्थिरतां हि पांशवः (६४) ॥

सकृद्वृत्तिस्तु धर्म्मस्य प्रकृताप्रकृतात्मनाम् ।
सैव(६५)क्रियासु बहीषु कारकस्येति दीपकम् ॥ १७ ॥

प्राकरणिकाप्राकरणिकानाम् (अर्थात् (६६) उपमानोपमेयानां) धर्म्मः क्रियादिः, एकवारमेव यदुपादीयते, तत् (एकस्यैव समस्तवाक्यदीपनात्) दीपकम् । यथा,-

किवणाणं धणं याआणं फणमणी केसराइं सीहाणम् ।
कुलवालिआणं अ तणा कदी छिप्पन्ति अमिआणं ॥ (६७)

---

(६४) वि-शरारुतां विशीर्णतां पलायमानतां । वाते ते स्थिरतां न दधतीत्यतिरेकेण साधर्म्यो पर्य्यवसानात् दृष्टान्तोपपत्तिरिति चन्द्रिका । पलायनास्थिरत्वयो धर्म्मयोर्भेदः । परन्तु देशान्तरसंयोगजनकत्वरूपस्य साधारणधर्म्मस्य सत्त्वात् ऽनयोरुपमा, ततश्च प्रस्तुतवाक्यार्थयोरुपमेति ।

(६५) सैव सकृद्वृत्तिरेव । तथाच दीपकं द्विविधं, एकस्य धर्म्मस्य एकवारं प्रस्तुताप्रस्तुतोभयवृत्तित्वे एकम्, अपरञ्च एकस्य कारकस्य एकवारमेवानेकासु क्रियासु सम्बन्धे इति । अत्र प्रथमप्रभेदस्थले उपमाप्रतीतिं विनापि वाक्यार्थस्य पर्य्यवसानात् नोपमा प्रथमं बोध्यते, किन्तु व्यज्यते इति नातीवोपमा । एकस्यापि धर्म्मस्य द्विरुक्तेः वाक्यद्वयस्याभावेन च न प्रतिवस्तूपमादृष्टान्तौ ।

(६६) यस्य धर्म्मस्य प्राकरणिकाप्राकरणिकोभयवृत्तित्वम्, तमेव साधारणधर्म्ममाश्रित्य तयोरुपमानोपमेयभावं प्राप्नोतीत्यर्थादित्युक्तम् ।

(६७) कृपणानां धनं नागानां फणमणिः केसरा सिंहानाम् ।
कुलबालिकानान्तु कलाः कृत व्युत्पन्नेऽहतानामिति यं० ।
कुलपालिकानामित्यपि भवति ।

हेत्वोरुक्तावनुक्तौ नां च्चे, साम्ये निवेदिते ॥१८॥
शब्दार्थाभ्यामथाक्षिप्ते, श्लिष्टे तद्वत्त्रिरष्ट तत् ।

व्यतिरेकस्य हेतुः उपमेयगतमुत्कर्षनिमित्तम्, उपमानगतमपकर्षनिमित्तं, तयोर्द्वयोरुक्तिः, एकतरस्य द्वयोर्वा अनुक्तिरित्यनुक्तित्रयम् (१०४), एतद्भेदचतुष्टयमुपमानोपमेयभावे शब्देन प्रतिपादिते ; आर्थेन च क्रमेणोक्तौ चत्वार एव भेदाः ; आक्षिप्ते चौपम्ये तावन्त एव ; एवं द्वादश । एते श्लेषेऽपि भवन्तीति चतुर्विंशतिर्भेदाः । क्रमेणोदाहरणम्,-

असिमात्रसहायस्य प्रभूतारिपराभवे ।
अन्यतुच्छजनस्येव न स्वयोऽस्य महाहतेः ॥ [अप्पय०]
अत्रैव तुच्छेति महार्हतेरित्यनयोः पर्य्यायेण युगपद्वा

वक्तव्य , अस्यैवं श्लोकस्य पुनराक्षिप्तिराक्षिप्यमेव, अपकर्षश्च तत्राक्षिप्यमिति, यौवनस्यास्यैवमुपमानमित्युत्कृष्टम । एव

हनूमदाद्यैर्यशसा मया पुनर्द्विषा हृषैर्द्वैतपथ श्रितोऽहत ॥

-इत्यपि भङ्ग्यैवोपमेयस्य न्यूनतोदाहरणम, अत्र हि आत्मावमाननस्यैव प्रस्तुतत्या आत्मनो दूतापसदत्वमेव विवक्षितम्, तदुत्कर्षश्च आत्मनः शत्रूपहसनीयत्वेनेति । वस्तुत उपमानात् उपमेयस्य न्यूनत्व वस्तुपथवत सामान्यजनीयमेवेति न तत्कृतम् चमत्कारान्तरमिति तत्प्रभाव उपमादिरेव व्यवहार ।

(१०४) एकतरस्य उत्कर्षनिमित्तमात्रस्य, अपकर्षनिमित्तमात्रस्य वा, एतयोर्द्वयोर्वानुक्तिरित्यनुक्तित्रयम् । शब्देन इवादिना । आर्थेन क्रमेण तुल्यादिपदेन । चत्वार इति मूलेक्त हेतोरुक्तत्रयमेवेति शेष । तावन्तश्चत्वार । एते द्वादश । श्लेषेऽपीत्यादिना श्लेषसमुच्चय ।

नियतानां प्राकरणिकानामेव, अप्राकरणिकानामेव वा ।
क्रमेणोदाहरणम्,-

पाण्डु श्यामं वदनं, हृदयं सरसं, तयालसश्च वपुः ।
आवेदयति नितान्तं श्वेतियरोगं सखि, हृदन्तः ॥ [प्रा०]
कुमुद-कमल-नीलनीरजालिर्ललितविलासजुषोर्द्वयोः पुरः का ।
अस्तमदस्तरश्मिरम्बुजन्म प्रतिहतमेकपदे तयाननस्य ॥[अप्रा०]

उपमानाद्यदन्यस्य व्यतिरेकः स एव सः(१०१) ।

अन्यस्य उपमेयस्य व्यतिरेक आधिक्यम् । superiority

क्षीणः क्षीणोऽपि शशी भूयोभूयोऽभिवर्द्धते सत्यम् ।
विरमं प्रसीद सुन्दरि, यौवनमनिवर्त्ति यातन्तु ॥

-इत्यादावुपमानस्योपमेयादाधिक्यमिति यत्केनचिदुक्तम्(१०२), तदयुक्तम्, अत्र यौवनगतास्थैर्य्याधिक्यं हि विवक्षितम् (१०३)।

---

(१०१) यदित्यव्ययं व्यतिरेकपदान्वयि । व्यतिरेकः आधिक्यम् उत्कर्षः । स एव व्यतिरेक एव । स व्यतिरेक व्यतिरेकनामालङ्कारः ।

(१०२) अत्र हि उपमानस्य शशिनः क्षीणस्योऽपि पुनर्वृद्धिरित्युत्कर्षः, उपमेयं यौवनन्तु न पुनरावर्त्तते इत्यपकर्षम । केनचित्, 'उपमानाद् उपमेयस्य आधिक्ये विपर्य्यये वा व्यतिरेक' इत्यङ्गीकुर्वता अलङ्कारसर्व्वस्वोपजीव्येन । एतन्मते उपमानाद् उपमेयस्य न्यूनतायामपि व्यतिरेकः ।

(१०३) अयमभिप्रायः, उत्कर्षापकर्षौ हि प्रकरणानुसारिणौ न वस्तुगतौ, तथाहि यदेव कस्मिंदपकर्षकं तदेवान्यत्र उत्कर्षकमपि भवति, यथा, शशिविशेषणे वर्णप्रमाणरहितत्वमपकर्षकं भवदपि मूर्खनिरूपणे तदेवोत्कर्षकं भवति । तत्र प्रकृते मानापनोदानुकूलतया यौवनास्थैर्य्यस्यैव उत्कर्षो

यथा,-

हरवन्न विषमदृष्टिर्हरिवन्न, विभो, विधूतवितततृषः।
रविवन्न चातिदुःसह-कर-तापितभूः कदाचिदसि ॥

[ले०आ०मा०]

अत्र तुल्यार्थैर्वतिः, विषमादयश्च शब्दाः श्लिष्टाः (१०६)।

नित्योदितप्रतापेन त्रियामामीलितप्रभः।
भास्वतानेन भूपेन भास्वानेष विनिर्जितः ॥ [ले०आलि०]

अत्र हि आक्षिप्तैवोपमा। भास्वतेति श्लिष्टः। यथा वा,-

स्वच्छात्मतागुणसमुल्लसितेन्दुबिम्बं
बिम्बप्रभाधरमकल्मिमहृद्यगन्धम्।
यूनामतीव पिबतां रजनीषु यत्र
तृष्णां जहार मधु, नाननमङ्गनानाम् (१०७) ॥

अत्रेवादीनां तुल्यादीनाञ्च पदानामभावेऽपि श्लिष्टविशेषणाक्षिप्तैवोपमा प्रतीयते। एवञ्जातीयकाः श्लिष्टोक्तियोग्यस्य पदस्य पृथक् (१०८) उपादानेऽन्येऽपि भेदाः सम्भवन्ति, तेऽपि अनयैव दिशा द्रष्टव्याः ॥

---

(१०६) एकत्र विषम-दृष्ट-करयन्द्राः यथाक्रमम् अयुग्म-दृष्टनामाहुरकिरणार्थकाः, अपरत्र असम-धर्म-राजयोग्यार्थपराः।

(१०७) मधुपाने तृष्णा यावत्, ननङ्गनाननपाने इति भावः। अत्र उत्कर्षापकर्षहेतुं उपभोगेऽपि वैरस्याऽहत्वानाऽहसे इति महेश्वरः।

(१०८) पृथक् स्वतन्त्रोपात्तपदार्थतिरोधानतया, अपरोक्षतिरोधानतया च।

अनुपादानेऽन्यत् भेदत्रयम्; एवमन्यत्रापि द्रष्टव्यम्। अत्र इवशब्दस्य सद्भावाच्छाब्दमौपम्यम्।

असिमात्रसहायोऽपि प्रभूतारिपराभवे।
नैवान्यतुच्छजनवत्सगर्वोऽयं महाधृतिः॥ [अन्ये आ०]

अत्र तुल्यार्थे वतिरित्यार्थमौपम्यम्।

इयं सुनयना दासीकृत-तामरसश्रिया।
आननेनाकलङ्केन जयतीन्दुं कलङ्किनम्॥ [अन्ये आचि०]

अत्रेवादि-तुल्यादिपदविरहेन आक्षिप्तैवोपमा।

जितेन्द्रियतया सम्यग्विद्याद्वनिषेविणः।
अतिगाढगुणस्यास्य नाजवङ्गुरा गुणाः॥ [ले आ०]

अत्रेवार्थे वतिः, गुणशब्दः श्लिष्टः, शाब्दमौपम्यम्।

अखण्डमण्डलः श्रीमान् पर्व्वेष पृथिवीपतिः।
न निशाकरवज्जातु कलावैकल्यमागतः॥ [ले आ०]

अत्र तुल्यार्थे वतिः, कलाशब्दः श्लिष्टः।

मालाप्रतिवस्तूपमावन्मालाव्यतिरेकोऽपि सम्भवति, तस्यापि भेदा एवमूह्याः (१०५)। दिङ्मात्रमेवोदाक्रियते,

---

(१०५) इयन्तु पाठप्रणाली विद्याविनोदीपरब्रह्मेश्वरादिस्वकृतितया अङ्गीकृता। निदर्शनलक्षणन्तु क्रमप्राप्ततया श्लेषे आक्षिप्तौपम्यप्रदर्शनमेव प्रथमसङ्गतमिति मन्यमाना, 'मालाप्रतिवस्तूपमावत्' इत्यादि 'विधमादयश्च यद्वा. श्लिष्टा' इत्यन्तं सन्दर्भ, 'श्लिष्टविशेषणाक्षिप्तौपम्या प्रतीयते' इत्यनन्तरं बाधु पठन्ति। अस्मद्भिस्तान्यधिकं पाठमङ्गीकृतम्।

ज्योत्स्ना मौक्तिकदाम चन्दनरसः शीताशुकान्तद्वयः
कर्पूरं कदली मृणालवलयान्यम्भोजिनीपल्लवाः।
अन्तर्मानसमाख्यया प्रभवता तस्याः स्फुलिङ्गोत्कर-
व्यापाराय भवन्ति, हन्त, किमनेनोक्तेन न ब्रूमहे॥[उ०अति०]

क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना(११२)॥२१॥

हेतुरूपक्रियाया निषेधेऽपि तत्फलप्रकाशनं विभावना। यथा,-

कुसुमितलताभिरुद्धता-प्यधत्त रुजमलिकुलैरदष्टापि।
परिवर्त्तते स्म, नलिनी-लहरीभिरजोलिताप्यघूर्णत सा॥

विशेषोक्तिरखण्डेषु कारणेषु फलावचः।

मिलितेष्वपि कारणेषु (११३) कार्य्यस्याकथनं विशेषोक्तिः।

---

(११२) क्रियतेऽनयेति क्रियाशब्द प्रसिद्धहेतुपरः। विभावयति कारणान्तरं कल्पयतीति विभावना कारणान्तरकल्पना, प्रसिद्धकारणाभावेऽपि कार्योत्पत्तिर्हि कार्यस्य कारणान्तर कल्पयति। विरोधाभासे उभयमेव परस्परं बाध्यतया प्रतीयते, इह तु कारणाभावेन कार्यमेव बाध्यतया प्रतीयते, नतु कार्येण प्रमाणनिश्चितः कारणाभावोऽपि बाध्यतया प्रतीयते इति भेदः। इत्यमेव उद्योतकृत्। कारणाभावस्य क्वचित् तज्ज्ञादिना साक्षात् क्वचिच्च कारणाभावविरोधिन उक्त्या परम्परया प्रतिपाद्यते, यथा 'यः कौमारहर' (४पृ०) इत्यादौ उत्कण्ठाकारणविरोधिनासक्ति।

(११३) कारणेषु प्रसिद्धहेतुषु। अत्र बहुत्वमविवक्षितम्। अकथनम् अभावप्रतिपादनमिति यावत्, तच्च क्वचित् तज्ज्ञादिना साक्षात्, क्वचिच्च कार्यविरोधिन उक्त्या परम्परया, यथा द्वितीयोदाहरणे गतिध्वंसरूपकार्यस्य विरोधिनी गतिरभिहिता। साक्षादुक्तौ स्फुटत्वम् परम्परयोक्तौ अस्फुटत्वमिति

निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया(१०९)॥२०॥
वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः ।

विवक्षितस्य प्राकरणिकत्वादनुपसर्जनीकार्यस्य (११०), अवश्य-वक्तव्यत्वमतिप्रसिद्धत्वं वा विशेषं वक्तुं निषेधो (निषेध इव) यः, स वक्ष्यमाणविषय उक्तविषयश्चेति द्विधा आक्षेपः । क्रमेणोदाहरणम्,-

ए, एहि किं वि कीइ वि कए
णिक्किव, भणामि अलमहव वा ।
अ-विआरिअ-कज्जारम्भ-
आरिणी मरउ ण भणिस्सं (१११) ॥ [व०अय०]

---

(१०९) अवश्यवक्तव्यस्यार्थस्य विधिनात्यर्थं विशेषप्रतिपत्तये निषेधा-भिधानम् आक्षेप । 'क्वचित्तु, वक्तुमित्युपलक्षणं करिष्यमाणत्वादि निषेध आक्षेप । यथा,-

नां सुन्दरीं वर्णयितुं न मे वाणी प्रवर्तते ।

-इत्यत्र करिष्यमाणवाणीप्रवृत्तेर्निषेधो वर्णनीयस्यातिवाच्यतां व्यनक्तीति आह' इति उद्योतकृत् । 'अनिष्टस्यार्थस्य निषेधनात्यर्थं विशेषप्रतिपत्तये विधानमपर आक्षेप । यथा,-

गच्छ गच्छसि चेत् कान्त पन्थानः सन्तु ते शुभाः ।
अद्यापि जन्म नर्मदा भूयाद् यत्र गतो भवान् ॥' इति दर्पणकृत् ।

(११०) अनुपसर्जनीकार्यस्य अनुपेक्षणीयस्य । अनुपेक्षणीयत्वादि निषेधो विशेषबोधनार्थं भवति इति ज्ञापनार्थं विशेषणमिदम् । अति-प्रसिद्धत्वमिति इदमुपलक्षणम्, दर्पणकृतस्य अन्यत्वादि विशेषस्य सङ्ग्रहात् ।

(१११) ए, एहि किमपि कृत्वा अपि इह निःकृप, भणामि अलमथवा ।
अविचारितकार्यारम्भकारिणी विरहात्र मरिष्यामीति भ० ।

सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।

यत्तु, सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ॥२३॥

साधर्म्येण वैधर्म्येण वा सामान्यं विशेषेण यत्समर्थ्यते(११६), विशेषो वा सामान्येन, सोऽर्थान्तरन्यासः। क्रमेणोदाहरणम्,-

निजदोषाहतमनसामतिसुन्दरमेव भाति विपरीतम्।
पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम् ॥ [सा०सा०वि०]

सुसितवसनालङ्कारायां कदाचन कौमुदी-
महसि सुहृदि स्वैरं यान्त्यां गतोऽस्तमभूद्विधुः।
तदनु भवतः कीर्त्तिः केनाप्यगीयत, येन सा
प्रियमटहसगान्मुक्ताशङ्का, क्व नासि शुभप्रदः ॥ [सा०वि०सा०]

गुणानामेव दौरात्म्यात् धुरि धुर्यो नियुज्यते।
असञ्जातकिणस्कन्धः सुखं स्वपिति गौर्गलिः (११७) ॥
[वै०सा०वि०]

---

(११६) समर्थ्यते सोपपत्तीक्रियते निःसन्देहं प्रतीयते। अनुपपद्यमानतया समाध्यमानयोः सामान्यविशेषयोरुपपादनार्थं तयोरन्यतररूपोदाहरणोपन्यास अर्थान्तरन्यास। कार्यकारणयो. परस्परं दृष्टान्तदार्ष्टान्तिकभावविरहात् नैव तयो समर्थ्यसमर्थकभावः सम्भवतीति न तल्लक्षणभेदः क्षीयतः।

(११७) गलिः कुत्सित इति चन्द्रिका। समर्थो.यधुर्यश्चेद इत इति महेश्वरः। अनस· (गडे) इति स वर्यं। गुणाभावात् गलिर्गौर्न धुरि नियुज्यते इति वैधर्म्यम्।

सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।

यत्तु, सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ॥२३॥

साधर्म्येण वैधर्म्येण वा सामान्यं विशेषेण यत्समर्थ्यते(११६), विशेषो वा सामान्येन, सोऽर्थान्तरन्यासः। क्रमेणोदाहरणम्,-

निजदोषाहतमनसामतिसुन्दरमेव भाति विपरीतम्।
पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम् ॥ [सा०सा०वि०]

सुसितवसनालङ्कारायां कदाचन कौमुदी-
महसि सुहृदि स्वैरं यान्त्यां गतोऽस्तमभूद्विधुः।
तदनु भवतः कीर्त्तिः केनाप्यगीयत, येन सा
प्रियसुहृदमगान्मुक्ताशङ्का, क्व नासि शुभप्रदः ॥ [सा०वि०सा०]

गुणानामेव दौरात्म्यात् धुरि धुर्यो नियुज्यते।
असञ्जातकिणस्कन्धः सुखं स्वपिति गौर्गलिः (११७) ॥
[वै०सा०वि०]

---

(११६) समर्थ्यते सोपपत्तीक्रियते नि सन्देहं प्रतीयते। अनुपपद्यमानतया समाध्यमानयो सामान्यविशेषयोरुपपादनार्थं तयोरन्यतरस्योदाहरणोपन्यास अर्थान्तरन्यास। कार्यकारणयो परस्परं दृष्टान्तदार्ष्टान्तिकभावविरहात् नैव तयो समर्थ्यसमर्थकभाव सम्भवतीति न तल्लक्षणाद. क्षीकृत.।

(११७) गलिः कुत्सित इति चन्द्रिका। समर्थो.बधुर्वहो हुत इति मल्लेश्वर। अनस् (गडे) इति तु वयं। गुणाभावात् गलिर्गौर्न धुरि नियुज्यते इति वैधर्म्यम्।

सा अनुक्तनिमित्ता, उक्तनिमित्ता, अचिन्त्यनिमित्ता च (११४)।
क्रमेणोदाहरणम्,-
निद्रानिदानावुदिते दूरतो सखीजने द्वारपदं परान्ते ।
शयीकृताश्लेषरसे भुजङ्गे चचाल नालिङ्गनतोऽङ्गना सा ॥
[अ०नि]

कर्पूर इव दग्धोऽपि शक्तिमान् यो जने जने ।
नमोऽस्त्वनार्द्रवीर्य्याय तस्मै मकरकेतवे ॥ [उ०नि०]

स एकस्त्रीणि जयति जगन्ति कुसुमायुधः ।
हरतापि तनुं यस्य शम्भुना न बलं हृतम् ॥ [अवि०नि०]

यथासङ्ख्यं क्रमेणैव क्रमिकाणां समन्वयः(११५)॥२२॥

यथा,-

एकस्त्रिधा वससि चेतसि चित्तभव
देव, द्विषाञ्च विदुषाञ्च दृगीहयाञ्च ।
तापञ्च सम्मदभरञ्च रतिञ्च पुष्णन्
शौर्य्येण घृणया च विनयेन च लीलया च ॥

विशेषः । यथा, 'यः कौमारहरः' इत्यादौ अनुक्तकण्ठादिरोधिन्या उक्तकण्ठाद्या उक्तिः । कारणप्रतिषेध-फलावचनयोः साधारण्ये यथाक्रमं विभावनाविशेषोक्तौ स्फुटे भवतः, परस्परया व्यत्यासे तु ते अस्फुटे । अतएव 'स कौमारहरः' इत्यादौ उभयोरेव अस्फुटत्वम् । अतएव अस्फुटत्वेन उक्तम् (७८०) "अत्र स्फुटो न कश्चिदलङ्कारः" इति ।

(११३) मकरध्वजादिना स्मरस्य निमित्तस्योक्तौ अनुक्तनिमित्ता, दूरधिगमत्व मस्य वचने अचिन्त्यनिमित्तता, यथा अन्योदाहरणे तनुं हरता हरेण कथं बत न कुसुमिशस्य चेतः क्षुभ्यति चित्तभवं न मन्यते इति चतुर्थोन्मेषोक्तौ ।

(११५) येन क्रमेण यावत्सङ्ख्यका ये प्रथमतो निर्दिष्टास्तेनैव क्रमेण पश्चादपि तेषां यावत्सङ्ख्येषु पदार्थेषु समन्वयो यथासङ्ख्यालङ्कारः ।

जातिश्चतुर्भिर्जात्याद्यैर्विरुद्धा स्याद्गुणस्त्रिभिः ॥२४॥
क्रिया द्वाभ्यामपि द्रव्यं द्रव्येणैवेति ते दश(१२०)।

अभिनवनलिनीकिसलय-
क्वणालवलयादि दवदहनराशिः ।
सुभग, कुरङ्गकदृशोऽस्याः
विधिवशतस्त्वद्वियोगपविपाते ॥ (१) [जा० जा०]

गिरयोऽप्यनुन्नतियुजो मरुदप्यचलोऽब्धयोऽप्यगम्भीराः ।
विप्रलभ्याप्यतिलघुर्नरनाथ, तवान्तिके नियतम् ॥ (२)[जा० गु०]

येषा कण्ठपरिग्रहप्रणयिता सम्प्राप्य धाराधरः
तीक्ष्णः सोऽप्यनुरज्यते च कमपि स्नेहं पराप्नोति च (१२१)।
तेषां सङ्गररङ्गसङ्गमनसा राज्ञा त्वया भूयते,
पांसूना पटलैः प्रसाधनविधिर्निर्वर्त्यते कौतुकम् ॥ (३)[जा० क्रि०]

रूपकम्, आरोपस्य साध्यत्वात्, तस्य सिद्धत्वे एव रूपकातिशयोक्तौ स्वीकारात्, मुखचन्द्रमित्यादुदाहरणेषु तथैव दर्शनात् । अतएव दर्पणकृता "सिद्धेऽध्यवसायस्यातिशयोक्तिर्निगद्यते" इत्युक्तम् । अपि शब्दादेरभावे विरोधस्यास्फुटत्व, यथा नवमोदाहरणे इति ।

(१२०) जात्याद्यैः जातिगुणक्रियाद्रव्यैः । त्रिभिः गुणक्रियाद्रव्यैः । गुणेन जातेर्विरोध एव जात्या गुणस्य विरोध इति न पृथगुक्तिः । परत्वापेक्षम् । जात्यादयो द्वितीयोल्लासे दर्शिताः ।

(१२१)'अत्र धाराधरत्व-(खड्गत्व)-जातेरनुरागस्नेहपराप्तिक्रियाभ्यां विरोधः, सोऽस्ति-विकृतत्वार्थकत्वादविरोध' इति प्रदीपः । 'तीक्ष्णः सोऽपि' इत्युक्त्या तीक्ष्णत्वगुणेनापि विरोधः स्फुट प्रतीयते ---

अहो हि मे बद्धपराद्धमायुषा,
यदप्रियं वाच्यमिदं मयेदृशम् ।
त एव धन्याः सुहृदः पराभवं
जगत्यदृष्ट्वैव हि ये क्षयं गताः (११८)॥[वै०वि०सा०]

विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः ।

वस्तुवृत्तेन (११९) अविरोधेऽपि विरुद्धयोरिव यदभिधानं, स विरोधः ।

---

(११८) पूर्वार्द्धप्रदर्शितस्य सुहृत्क्षयदर्शनस्य विपरीतं 'सुहृत्क्षया-दर्शनमिति वैधर्म्यम् ।

(११९) वस्तुवृत्तेन वस्तुगत्या यथार्थ्येन । विरुद्धार्थप्रतिपादकस्य पदादेरर्थान्तरपरत्वादिना वस्तुतो विरोधाभावेऽपि आपातत. विरोध-प्रतीतिरविरोधाभा अलङ्कार., अयमेव विरोधाभास इत्युच्यते । विरोधश्च भिन्नदेशतया प्रविष्टयोरेकदेशस्वस्वभावादिरूपः पर्यवस्यति, यथोदाहरणे, नलिनीकिसलयादि दवदहनराशिरिति कथनात् नलिनीकिसलयत्वादि-जात्या दवदहनत्वजातेर्विरोध. । एकदेशस्थयोर्भिन्नदेशतायाम् अवस्थिति-अलङ्कारो वक्ष्यते । प्रकृतस्य वाक्यार्थस्य विरोधे एव विरोधालङ्कारः, व्यङ्ग्यार्थस्य विरोधे तु नायमलङ्कार. किन्तु विरोधालङ्कारध्वनि, यथा "तिग्मरुचिरप्रताप-" (५१ पृ०) इत्यादौ ।

विरोधश्च तत्रैव स्फुटं प्रतीयते यत्र विरोधस्फुटकोऽपिशब्द., यथा द्वितीयादिषु उदाहरणेषु; यत्र वा क्रिययोर्विरोधे तयो वस्तुस्वभावबोधक-शब्द., यथा अष्टमे उदाहरणे, यत्र वा, 'अभूत् भवति भविष्यति' इत्यादिभि क्रियापदै विरुद्धयोरैक्यं साध्यतया प्रतीयते, यथा प्रथम-पञ्चम-सप्तमेषु उदाहरणेषु। सप्तमे अभूत् इति क्रियापदमस्ति, अन्ययोस्तु वाक्यसमाप्त्यर्थं क्रयोरपि क्रियापदयोरध्याहारः । अत एव प्रथमसप्तमयोरुदाहरणयोर्न

विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर्जडयति च तापञ्च कुरुते (१२४) ॥(८)
[कि॰कि॰]

अयं वारामेको निलय इति रत्नाकर इति
श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः ।
क एव जानीते निजकरपुटीकोटरगतं
क्षणादेनंताम्यत्तिमिमकरमापास्यतिमुनि.(१२५)॥(९)[कि॰इ॰]

समद-मतङ्गज-मदजल-
निस्यन्दतरङ्गिणीपरिष्वङ्गात् ।
क्षितितिलक, त्वयि तटजुषि
शङ्करचूडापगापि कालिन्दी (१२६) ॥(१०)[इ इ॰]

स्वभावोक्तिस्तु डिम्भादेःस्वक्रियारूपवर्णनम्॥२५॥(१२७)

---

(१२४) ड-लयोरैक्यात् जडयति जलयति, शीतलयति ।

(१२५) मुनिरगस्त्य । पानक्रियाया अगस्त्येन कर्त्रा, मकरेण कर्मणा च द्रव्येण विरोध, नरविशेषस्य अगस्त्यस्य मकरपानासम्भवात् ।

(१२६) शङ्करचूडापगा गङ्गा। कालिन्दी यमुना। मदजलनीलिम्ना गङ्गाया नीलता, तेन इद विरोधापादनम् ।

(१२७) डिम्भादेरित्यादिना विवेकशक्तिरहितानां तिर्यगादीनां ग्रहणमिति मल्लेश्वरोद्योतौ । वस्तुत उपलक्षणमेतत्, एवं क्रियारूपेत्यपि उपलक्षणम्, तेन यस्य कस्यचित् वस्तुनोऽसाधारणधर्मवर्णनमेव स्वभावोक्ति, यथा वस्तुन. स्वभावस्य तत्तल्लक्षणस्य ग्रहणविशिष्टस्य धर्मस्य प्रकाशो भवेत तादृशी उक्तिरिति यावत् ।

सृजति च जगद्विदधति च
संहरति च हेलयैव यो नियतम् ।
अवसरवशतः शफरो
जनार्दनः सोऽपि चित्रमिदम् (१२२) ॥ (४) [ना०द्र०]

सततं सुखलालसका
बहुतरदुष्टकर्मघटनया नृपते ।
द्विजपत्नीना कठिना:
सति भवति कराः सरोजसुकुमाराः ॥ (५) [उ०उ०]

पेशलमपि खलवचनं दहतितरां मानसं सुतत्त्वविदाम् ।
परुषमपि सुजनवाक्यं मलयजरसवत्प्रमोदयति ॥(६)[उ०क्रि०]

क्रौञ्चाद्रिरुद्धामहपट्टढोऽयं
यन्मार्गणानर्गलशातपाते ।
अभून्नवाम्भोजदलाभिजातः,
स भार्गवः सत्यमपूर्वसर्गः (१२३) ॥ (७) [उ०द्र०]

परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।

---

(१२२) अत्र शफरत्वजातेर्जनार्दनेन द्रव्येण विरोधः ।

(१२३) नवाम्भोजदलस्य अभिजात नूतनकमलवंशीय, तज्जातीय, ततसदृश, सुकुमार इति फलितार्थः । कोमलत्वेन गुणेन क्रौञ्चाद्रिद्रव्यस्य विरोधः ।

विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर्जडयति च तापञ्च कुरुते (१२४) ॥(८)
[क्रि०क्रि०]

अयं वारामेको निलय इति रत्नाकर इति
श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः ।
क एवं जानीते निजकरपुटीकोटरगतं
क्षणादेनंताम्यत्तिमिमकरमापास्यतिमुनिः(१२५)॥(९)[क्रि०द्र०]

समद-मतङ्गज-मदजल-
निस्यन्दतरङ्गिणीपरिष्वङ्गात् ।
क्षितितिलक, त्वयि तटजुषि
शङ्करचूडापगापि कालिन्दी (१२६) ॥(१०)[द्र द्र०]

स्वभावोक्तिस्तु डिम्भादेःस्वक्रियारूपवर्णनम्॥२५॥(१२७)

---

(१२४) ड-लयोरैक्यात् जड़यति जलयति, शीतलयति ।

(१२५) मुनिरगस्त्य । पानक्रियाया अगस्त्येन कर्त्रा, मकरेण कर्मणा च द्रव्येण विरोध, नरविशेषस्य अगस्त्यस्य मकरपानासम्भवात् ।

(१२६) शङ्करचूडापगा गङ्गा । कालिन्दी यमुना । मदजलनीलिम्ना गङ्गाया नीलता, तेन इदं विरोधापादनम ।

(१२७) डिम्भादेरित्यादिना विवेकशक्तिरहितानां तिर्यगादीनां ग्रहणमिति मणेश्वरोद्योतौ । वस्तुत उपलक्षणञ्चैतत्, एवं क्रियारूपेत्यपि उपलक्षणम्, तेन यस्य कस्यचित् वस्तुनोऽसाधारणधर्मवर्णनमेव स्वभावोक्ति, यथा वस्तुनः स्वभावस्य तस्मात्तगतस्य प्रकृतिसिद्धस्य धर्मस्य प्रकाशो भवेत् तादृशी उक्तिरिति यावत् ।

स्वयोस्तदेकाश्रययोः । रूपं वर्णः संस्थानञ्च (१२८)।

उदाहरणम्,-

पश्चादङ्घ्री प्रसार्य त्रिक-नतिविततं द्राघयित्वाङ्गुलीभिः,
आसज्याभुग्नकण्ठो मुखमुरसि सटां धूलिधूम्रां विधूय ।
घासग्रासाभिलाषादनवरतचलत्प्रोथतुण्डस्तुरङ्गो
मन्दं शब्दायमानो विलिखति भयनादुत्थितः क्ष्मां खुरेण(१२९)॥

व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढिरन्यथा (१३०) ।

व्याजरूपा व्याजेन वा स्तुतिः । क्रमेणोदाहरणम्,-

क्षित्वा त्वामुपरोधबन्धप्रमनसां मन्ये न मौलिः परः,
लज्जावर्जनमन्तरेण न रमामन्यत्र सन्दृश्यते ।
यस्त्यागं तनुतेतरां सुखयतैरेत्याश्रितायाः श्रियः,
प्राप्य त्यागकृतावमाननमपि त्वय्येव यस्याः स्थितिः ॥ [सु०]

---

(१२८) तदेकाश्रययोः तत्कालतद्द्रव्योः । संस्थानं अङ्गप्रत्यङ्ग-विन्यासः, आकारो वा ।

(१२९) त्रिकस्य कोटिप्रदेशस्य नतिर्नमनं, विततं विस्तारि यथा स्यात् तथा व्याङ्गम् उच्चैः द्राघयित्वा दीर्घं कृत्वा, मुखं उरसि आसज्य संयुज्य व्याभुग्नकण्ठः भग्नीकृतकण्ठः । अनवरतं चलन् प्रोथो नासिका यत्र तादृशं तथा मुखं यस्य सः ।

(१३०) मुखे आपाततः । रूढिः पर्य्यवसाने प्रतीतिः । अन्यथा (यथाक्रमं) स्तुत्या निन्दया वा । स्तुतिपर्य्यवसायिनी निन्दा, निन्दापर्य्यवसायिनी वा स्तुतिर्व्याजस्तुतिरिति फलितम् । व्याजस्तुतिपदस्य एतदर्थद्वयं कृतौ स्पष्टम्।

हे हेलाजित-बोधिसत्व, वचसां किं विस्तरैस्तोयधे,
नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः।
त्यक्त्वात्मान्यजनोपकार-घटना-वैमुख्य-लब्धाश्रयो-
भारप्रोद्वहने करोषि कृपया साहायकं यन्मरोः ॥ [नि०]

सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम् ॥२९॥

एकार्थाभिधायकमपि सहार्थबलात् यद् उभयस्यावगमकं सा सहोक्तिः (१२१)। यथा,-

सह दिअसणिसाहिं दीहरा सासदण्डा:,
सह मणिवलएहिं वाष्पधारा गलन्ति।
तुह सुहअ, विओए तीअ उव्वेअणीए
सह अ तणुलदाए दुव्वला जीविदासा (१२२) ॥

श्वासदण्डादिगतं दीर्घत्वादि शाब्दम्, दिवसनिशादिगतं तु सहार्थसामर्थ्यात्प्रतिपद्यते।

---

(१२१) यथोदाहरणे 'दीर्घाः श्वासदण्डा भवन्ति' इति वाक्यं श्वासदण्डगतमेकं दीर्घभवनमभिधत्ते। तथापि सहशब्दस्य एकक्रियान्वयित्वरूपबोधकतया 'दिवसनिशादिः सह' इत्यत्र सहशब्देन प्रतीतायां एकस्यां दीर्घभवनक्रियायामन्वयलाभ इति श्वासदण्डदीर्घभवनवत् दिवसनिशादीर्घभवनस्य अवगम इति। 'पुत्रेण सह पिता गच्छति' इत्यादौ अलङ्कारामावात् अतिशयोक्तिमूलिका एव चमत्कारजनिका सहोक्तिरलङ्कारः।

(१२२) सह दिवसनिशाभिर्दीर्घाः श्वासदण्डाः,
सह मणिवलयैर्वाष्पधारा गलन्ति।
तव सुभग, वियोगे तस्या उद्वेगिन्याः
सह च तनुलतया दुर्बला जीविताशा ॥ इति सं०।

विनोक्तिः सा, विनान्येन, यत्रान्यः सन्न, नेतरः(१२३)

क्वचिदशोभनः, क्वचिच्छोभनः । क्रमेणोदाहरणम्,-

अरुचिर्निशया विना शशी,
शशिना सामि विना मरुत्तमः ।
उभयेन विना मनोभव-
स्फुरितं नैव चकास्ति कामिनोः ॥ [अमी०]

दृगलोचनया विना विचित्र व्यवहार-प्रतिभा-प्रभा-प्रगल्भः ।
अयतदुरतिसुन्दराशयोऽयं सुहृदा तेन विना नरेन्द्रसूनुः ॥
[यो०]

परिवृत्तिर्विनिमयो योऽर्थानां स्यात्समासमैः ॥२७॥

परिवृत्तिरलङ्कारः (१२४) । उदाहरणम्,-

लतानामेतासामुदितकुसुमानां मरुदयं
मतं लाभं दत्वा व्यथति भृशमामोदमसमम् ।
लताम्बध्वन्यानामहह ! दृशमादाय सरसा
ददात्याधिव्याधिभ्रमिरुदितमोहव्यतिकरम् ॥

अत्र प्रथमेऽर्द्धे समेन समस्य; द्वितीये उत्तमेन न्यूनस्य ।

---

(१२३) यत्र शोभनः, इतरः अशोभनः । शोभन इति वाक्येऽपि 'अशोभनो न' इत्यभावोपलक्षणाभिधानस्यायमभिप्रायः, यत् वर्णनीयवस्तुनो अशोभनत्वं प्रतीयते, तत् परवस्तुविशेषविशेषणमेव, वर्णनीयस्य वस्तुनः स्वभाविकमेव शोभनत्वमिति दर्शनाभिप्रायः ।

(१२४) कारिकायाम्, विनिमयः किञ्चित् दत्त्वा कञ्चित् वस्तुन आदानम् । समासमयोरन्यतरत्र दानपूर्वकमन्यतरस्यादानं परिवृत्तिरलङ्कारः । समत्वाधिक्ये एवाद्ययोरनुपादेयत्वात्तौ त्यक्त्वा ।

नानाविधप्रहरणैरट्ट, सम्प्रहारे
स्वीकृत्य दारुणनिनादयतः प्रहारान् ।
हम्मीरवीरविसरेण वसुन्धरेयं
निर्व्विघ्नलम्भपरिरम्भविधिर्वितीर्णा ॥

अत्र न्यूनेनोत्तमस्य ॥

प्रत्यक्षा इव यद्भावाः क्रियन्ते भूतभाविनः ।

तद्भाविकम्,

भूताश्च भाविनश्चेति द्वन्द्वः । भावः कवेरभिप्रायः (१२५)
अस्तीति भाविकम् । उदाहरणम्,-

आसीदञ्जनमत्रेति पश्यामि तव लोचने ।
भाविभूषणसम्भारां साक्षात्कुर्वे तवाकृतिम् ॥

अत्राद्ये भूतस्य, द्वितये भाविनो दर्शनम् ॥

कावयलिङ्गं हेतोर्वाक्यपदार्थता (१२६) ॥२८॥

---

(१२५) अभिप्रायः भूतभाविनोरपि प्रत्यक्षतयैव प्रतिपादनेच्छा । यथोदाहरणे, 'अत्र अञ्जनम् आसीत्' इति पश्यामि, 'भाविभूषण-सम्भारां तवाकृतिं साक्षात् कुर्वे' इत्यनेन भूतस्यापि अञ्जनस्य भविष्यतोऽपि च भूषणसम्भारस्य दर्शनक्रियया अन्वयात् वर्त्तमानतया प्रतिपादनं, वर्त्तमानस्यैव दर्शनस्यान्वयात् । भूतभविष्यतोरप्यनयोः कोऽपि सन्देहो नास्तीति प्रतिपत्त्यर्थं वर्त्तमानतयैव प्रतिपादनम् ।

(१२६) हेतोः, प्रतिपाद्यमानं कमप्यर्थं प्रति कारणस्य । वाक्यपदार्थतैव स्वरूपत एव (हेतुत्वप्रतिपादनं विनैव) वाक्यस्य पदस्य वा प्रतिपाद्यते । हेतुत्वस्य तु हिपद-प्रभृतीतिभ्रत्ययादिना वाच्यतेऽगूढतेन अचमत्कारितया

वाक्यार्थता यथा,-

वपुःप्रादुर्भावादनुमितमिदं, जन्मनि पुरा,
पुरारे, न प्रायः क्वचिदपि भवन्तं प्रणतवान् ।
नमन्मुक्तः सम्प्रत्यहमतनुरग्रेऽप्यनतिभाक्,
महेश, क्षन्तव्यं तदिदमपराधद्वयमपि (१३७) ॥

अनेकपदार्थता यथा,-

प्रणयिसखीसलीलपरिहासरसाधिगतै-
र्लक्षितगिरीशपुष्पधनुषोऽपि तान्यति यत् ।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः
पततु शिरस्यकाण्डयमदण्ड इवैष भुजः (१३८) ॥

एकपदार्थता यथा,-

भस्मोद्धूलन, भद्रमस्तु भवते रुद्राक्षमाले, शुभम्,
स्वा सोपानपरम्परां गिरिसुताकान्तालयारोहणम् ।
यद्याराधनतोषितेन विभुना दत्तस्त्वयाप्यूर्ध्वगो-
लोकोच्छेदनि मोक्षनामनि महामोहे निधीयामहे ॥

एषु, अपराधद्वये पूर्वापरजन्मनोरनमनं, भुजपाते शस्त्रोपक्षेपः महामोहे सुधालोकोच्छेदित्वञ्च यथाक्रममुक्तरूपो हेतुः ॥

पर्यायोक्तं विना वाच्यवाचकत्वेन, यद्वचः।

वाच्यवाचकभावव्यतिरिक्तेन अवगमनव्यापारेण (१२९) यत् प्रतिपादनं, तत् (पर्यायेण भङ्ग्यन्तरेण कथनात्) पर्यायोक्तम्। उदाहरणम्,

यं प्रेक्ष्य चिररूढापि निवासप्रीतिरुज्झिता।
मदेनैरावणमुखे मानेन हृदये हरेः ॥

अत्र ऐरावणशक्रौ मदमानमुक्तौ जाताविति व्यङ्ग्यमपि शब्देन

---

(१२९) अवगमन व्यञ्जना। प्रतिपादनम् बोधनम्, अर्थात् वक्तव्यस्य अर्थस्य। भङ्ग्यन्तर प्रकारः। विवक्षितमर्थं साक्षात् (स्ववाचकपदेन) अकथयित्वा (वैचित्र्यविशेषाय) प्रकारान्तरेण कथनम् पर्यायोक्तमिति। तदुक्तं दण्डिना,-

'अर्थमिष्टमनाख्याय साक्षात्, तस्यैव सिद्धये।
यत्प्रकारान्तराख्यानं पर्यायोक्तं तदिष्यते' ॥ इति।

यत्र वाक्यार्थव्यङ्ग्यार्थयोः पर्यवसाने ऐक्यम्, केवलं उक्तिप्रतीत्योः प्रकारभेदः, तत्र पर्यायोक्तमिति फलितार्थः, यथोदाहरणे, ऐरावणशक्रौ मदमानमुक्तौ जाताविति व्यङ्ग्यार्थ एव 'यं प्रेक्ष्य' इत्यादिना भङ्ग्यन्तर प्रकारभेदेन उच्यते; यथा, 'अनो गच्छति' 'अनेन गम्यते' इति, 'आत्मागम्यताम्', 'गमनेनालङ्क्रियतामिदं' इत्यादि। तत्र च य एवार्थः अभिधातुमभिप्रेयते, स एवार्थः व्यञ्जनया प्रतीयते, परन्तु येन प्रकारेणार्थो व्यज्यते, न तेन प्रकारेण उच्यते इति प्रकारभेद। वैचित्र्यविशेषाय साक्षादनुक्त्वा प्रकारान्तरेण कथनं न दोषायेति। अत्र यद्यपि व्यङ्ग्योऽर्थः अतिस्फुटतया न तथा व्यज्यते यथा उक्तैरावणशक्रौ इति न ध्वनित्वं, नापि गुणीभूतव्यङ्ग्यत्वमिति, किन्तु चित्रकाव्यत्वमिति विभावनीयम्।

उच्यते, तेन, यदेवोच्यते, तदेव व्यङ्ग्यं, यथा तु व्यङ्ग्यं न तथोच्यते; यथा (१४०) गवि शुक्ले चलति दृष्टे, 'गौः शुक्लश्चलति'-इति विकल्पः, यदेव दृष्टं तदेव विकल्पयति, नतु यथा दृष्टं तथा, यतोऽभिन्नासंसृष्टत्वेन दृष्टम्, भेदसंसर्गाभ्यां विकल्पयति ॥

---

(१४०) एकेन प्रकारेण अवगतस्यापि अर्थस्य प्रकारान्तरेण प्रतिपत्तौ दृष्टान्तमाह, 'यथा गवि' इति । 'वस्त्विदमिति इन्द्रियेण चक्षुरादिना सामान्यत प्रथममालोकयति, ततश्च 'इदमेवं, इदं नैवं' इत्यादिरीत्या विशेषेण विशेषणविशेष्यभावसम्बन्धादिना मनसा सम्यक् कल्पयति, विवेचयति इति मन विकल्पक सकल्पकमिति चोच्यते' इति वाक्यानियमेन चक्षुरादिना प्रथमत एव, गौ शुक्लश्चलतीतिरीत्या विशेषणविशेष्यभावेन गो-शुक्ल-चलनाना बोधो न जायते, किन्तु परस्परसम्बन्धानवगाहनेन तेषां ज्ञान जायते, पश्चात् मन विशेषणविशेष्यभावेन गो शुक्लगुण-चलनक्रियाभ्यां सम्बन्धावधारणात्मक 'गौ शुक्लश्चलति' इत्याकारकं विकल्पज्ञान जनयति इति ।

विकल्पे च ज्ञाने, गो शुक्लगुण-चलनक्रियाभ्यां भिन्नत्वेन तयोः आधार-रूपसम्बन्धित्वेन च प्रकारेण भासते, (गौ शुक्ल चलतीति विशिष्टज्ञानात्पूर्वं गवि शुक्लगुणादेर्भेदसम्बन्धयो समवायस्योदयात्), प्राथमिके तु ज्ञाने भेदसम्बन्धो न प्रकाराविति। यथा पूर्वं दृष्टानामपि गवादीनां विकल्पज्ञाने प्रकारान्तरेण पुन -प्रतीतिः, तथा प्रकृते वाच्यस्यापि प्रकारभेदेन व्यङ्ग्यस्य पुन -प्रतीतिरिति। यथा दृष्ट, येन प्रकारेण दृष्टम। तथा तेनैव रूपेणेत्यर्थः । अभिन्नासंसृष्टत्वेन दृष्टमित्यस्य भेदेन सम्बन्धेन च प्रकारेण अदृष्टमिति फलितोऽर्थः ।

प्राथमिके दर्शने गो-शुक्ल चलनानामभेद एव प्रतीयते, न तु भेद, परस्पर सर्गो वा प्रतीयत, तयां भेदसंसर्गौ तु मनसा पश्चात् कल्पयति इति न यथादृष्टानुसारेण व्याख्येयः।

उदात्तं वस्तुनः सम्पत्,

सम्पत् सद्भियोगः। यथा,-

मुक्ताः केलिविशृङ्खलहारगलिताः सम्मार्जनीभिर्हृताः
प्रातः प्राङ्गणसीम्नि मन्थरचलद्बालाङ्घ्रिलाक्षारुणाः।
दूराद्दाड़िमबीजशङ्कितधियः कर्षन्ति केलीशुकाः
यद्विद्वद्भवनेषु, भोजनृपतेस्तत् त्यागलीलायितम्॥

महतां चोपलक्षणम् (१४१)॥२६॥

उपलक्षणमङ्गभावः, अर्थादुपलक्षणीयेऽर्थे। उदाहरणम्,-

तदिदमरण्यं यस्मिन्द्यरथवचनानुपालनव्यसनी।
निवसन् बाहुसहायश्चकार रक्षः-क्षयं रामः।

नचात्र वीरो रसः (१४२), तस्येहाङ्गत्वात्॥

तत्सिद्धिहेतावेकस्मिन् यत्रान्यत्तत्करं भवेत्।
समुच्चयोऽसौ (१४३),

---

(१४१) उपलक्षणीयेऽङ्गिनि वर्णनीये वर्णनीयस्यार्थस्य विशेषणतया महत उपादानेऽपरमुदात्तमित्यर्थः।

(१४२) बाहुमात्रसहाय्यात् रक्षःक्षयकरणरूपेण अनुभावेन अभिव्यक्तस्य उत्साहस्यैव चमत्कारित्वादिति भावः। तथा च वीररसध्वनिरेवायं नतूदात्तध्वनिरिति पूर्वपक्षः। अङ्गत्वात् परम्परया उत्कर्षकत्वेन उपकारकत्वात्, उत्साहेन उत्कर्षितो हि रामः वर्णनीयमरण्यमुत्कर्षयति। अयमत्र सिद्धान्तः, नात्र वीरो रसो वर्णनीयः, किन्तु अरण्यम्, अतो न वीररसध्वनिरिति।

(१४३) काव्यलिङ्गे हेतुत्वमात्रं विवक्षितम्, यत्रमाणत्वमाक्षेपाङ्गतारे एकेन हेतुना कार्ये निष्पाद्यमाने आगन्तुकेनापरेण कार्यस्य दौष्कर्यकरणं

तस्य (प्रस्तुतस्य कार्य्यस्य) एकस्मिन् साधके स्थिते साधकान्तराणि यत्र सम्भवन्ति, स समुच्चयः । उदाहरणम्,-

दुर्वाराः स्मरमार्गणाः, प्रियतमो दूरे, मनोऽत्युत्सुकं,
गाढम् प्रेम, नवं वयोऽतिकठिनाः प्राणाः, कुलं निर्मलम् ।
स्फीतं धैर्य्यविरोधि, मन्मथसुहृत्कालः, कृतान्तोऽधमी,
नो सख्यश्चतुराः, कथं नु विरहः सोढव्य इत्यं शठः ॥ (अमो०)

यत्र विरहासहत्वं स्मरमार्गणा एव कुर्व्वन्ति, तदुपरि प्रियतमदूरस्थित्यादि उपात्तम् । एष एव समुच्चयः सद्योगेऽसद्योगे सदसद्योगे च पर्य्यवस्यतीति न पृथक् लक्ष्यते । तथाहि,

कुलममलिनं, भद्रा मूर्त्तिर्मतिः श्रुतशालिनी,
भुजबलमलं, स्फीता लक्ष्मीः, प्रभुत्वमखण्डितम् ।
प्रकृतिसुभगाः श्लेते भावाः, शमीभिरयं जनो
व्रजति सुतरां दर्पं, राजन्, त एव तवाङ्कुराः ॥

अत्र सतां योगः । उक्तोदाहरणे तु असतां योगः ।

शशी दिवसधूसरो, गलितयौवना कामिनी,
सरो विगतवारिजं, मुखमनक्षरं स्वाकृतेः ।
प्रभुर्धनपरायणः, सततदुर्गतः सज्जनो,
नृपाङ्गनगतः खलो मनसि सप्त शल्यानि मे ॥

विरहिणं, अत्र तु बहूनां कार्य्यकरणसमर्थानां साहित्यं विरहिणमिति परस्परभेदः ।

अत्र, शशिनि धूसरे शत्रेः शत्रान्तरागीति (१४४)। शोभनाशोभनयोगः (१४५)॥

स त्वन्यो, युगपद् या गुणक्रियाः ॥३०॥

गुणौ च क्रिये च गुणक्रिये च, गुणक्रियाः (१४६)। क्रमेणोदाहरणम्,-

विदलितसकलारिकुलं
तव बलमिदमभवदाशु विमलञ्च।
प्रखलमुखानि नराधिप,
मलिनानि च यातानि॥ [गु०गु०]

---

(१४४) धूसरशशिरूपसाम्यमेव मर्ममेदं करोति, तदुपरि शशित्व-शोभनादीनि उपात्तानीति सप्तत्वयस्य सामान्यलक्षणसमन्वय इति शेषः।

(१४५) शशिनः स्वतः शोभनत्वेऽपि दिवाधूसरत्वाद् अशोभनत्वेन शोभनाशोभनरूपस्य, तादृशैरेव कामिनीप्रभृतिभिः स्वतः शोभनैः शशित्व-शोभनत्वादिना अशोभनैः सप्तत्वयः। 'खलाद्वनगतः खल.'-इत्यत्र तु खलाद्वन-गतत्वेन शोभनत्वम्, खलत्वेन तु अशोभनत्वमिति रीत्या सदसद्रूपतासमर्थ-नेऽपि अस्मिन्संसर्गे नायमलङ्कारः, किन्तु स्वतः शोभनस्य धर्मविशेषसम्बन्धात् अशोभनरूपस्य सदसतः प्रकरणे स्वतोऽशोभनरूपस्य खलस्य पाठात्, सङ्घटना-भिन्नत्वप्रक्रमभङ्गदोषाभावेन च। इह सदसत्त्वम् उपादेयानुपादेयतया वक्तृभिप्रेतत्वम्, 'दुर्जनाः' इत्यत्र प्रियतमादयः स्वतःशोभना अपि वक्तुः विरक्तिप्रयोजकतया तदानीमनुपादेयतयैव विवक्षिता इत्यवसेयम्। इह तु शशिप्रभृतय उभयरूपतयैव विवक्षिता इति सदसत्त्वम्। एतदेव चन्द्रिकायाम्।

(१४६) तथाच सूत्रस्थ 'गुणक्रियाः' इति पदम् एकवचनान्तमपि, यथा, गुणौ च क्रिये च गुणक्रियाः, गुणश्च क्रिया च गुणक्रिये, गुणक्रियाश्च

भयमेकपदे तया वियोगः
प्रियया चोपनतः सुदुःसहो मे ।
नयनाम्बुधरोदयादशोभि-
र्भवितव्यश्च निरातपत्व-रम्यैः ॥ [क्रि०क्रि०]
कलुषश्च तवाहितेष्वकस्मात्
सितपङ्केरुहसोदरश्रि चक्षुः ।
पतितश्च महीपतीन्द्र, तेषां
वपुषि प्रस्फुटमापदाकटाक्षैः ॥ [गु०क्रि०]
'धुनोति चासिं तनुते च कीर्त्तिम्' इत्यादेः,
'कृपाणपाणिश्च भवान् रणक्षितौ
स साधुवादाश्च सुराः सुरालये।'-
इत्यादेश्च दर्शनात्,(१४७) व्यधिकरणे'इति,'एकस्मिन्देशे'
इति च न याचम् (१४८) ।

गुणक्रिये च गुणक्रिया इति । गुणक्रियासाहित्यं सहोक्तय । दीपके तु सतीष्वपि सहोक्ष क्रियासु साहित्यं न विवक्षितमिति ततो भेद. ।

(१४७) एतु कार्यकारणयोरेककालात्मकविपर्ययरूपातिशयोक्ति-मूलं न तु स एवालङ्कार, तस्येहाङ्गत्वात् ।

(१४८) न याच्यं लक्षणे न निवेश्यम्, तथा निवेशे एषामसंग्रहः स्यात, यत 'धुनोति, तनुते' इत्येतयोः एक एवकर्त्ता इति न क्रिययोः व्यधिकरणता, तथा 'रणक्षितौ भवान्, देवा. सुरालये' इति कथनात्, न वाणी-कृपाणकरणसाधुवादकरणयोः क्रिययोरेकदेवता इति । तथाच गुणक्रियासाहित्यमात्रं सहोक्त इत्यङ्गीकार्यम् ।

एकं क्रमेणानेकस्मिन् पर्य्यायः

एकं वस्तु क्रमेणानेकस्मिन् भवति क्रियते वा (१४९) स पर्य्यायः । क्रमेणोदाहरणम् (१५०),-

नन्वाश्रयस्थितिरियं तव कालकूट,
केनोत्तरोत्तरविशिष्टपदोपदिष्टा ।
प्रागर्णवस्य हृदये, दृषलक्ष्मणोऽद्य
कण्ठेऽधुना वससि वाचि पुनः खलानाम् ॥

यथा वा,

बिम्बौष्ठ एव रागस्ते तन्वि, पूर्वमदृश्यत ।
अधुना हृदयेऽप्येष दृगग्रावाप्ति, लक्ष्यते ॥ [भ०]

रागस्य वस्तुतो भेदेऽप्येकतया अध्यवसितत्वादेकत्वम् अविरुद्धम् (१५१) ।

---

(१४९) एकस्य वस्तुनोऽनेकत्र सम्बन्धो यत्र, 'निवेशित कृत समारोपित' इत्यादिक्रमेण नोक्त, तत्र एक वस्तु अनेकत्र भवति, यत्र तु तथा उक्त तत्र क्रियते इति विशेष ।

(१५०) 'श्रोणीभारेत्यजंती मन्थरतया, सेवते मध्यभाग,
गङ्गा शुक्लोत्तरङ्गमतय इव स्थिता लोचनाभ्याम ।
भक्ते यच्च कुचयुगचिबुकाम द्वितीयत्व वक्त्राम,
तत्कालाणा गुणनिधिमव कलिंतो यौवनेन ॥'

-इति पद्यम प्रदीपोद्योतनिदर्शनलब्धिरत्र नोदाहृतम, क्रममङ्गभीरुणा मङ्केश्वरेण च बिम्बौष्ठ एवेति पद्यस्थानन्तर, 'क्रियते' इत्यस्य उदाहरणतया अधारि, चन्द्रिकायान्तु प्रथममेवेदमुदाहरणतया व्याख्यातम । प्रयोजना भावात् प्रदीपाद्यनुसरणमेव श्रेय इति कृत्वा इद नोदृतम ।

(१५१) तथाच श्रेयमूलकातिशयोक्तिरेवात्रास्य मूल बोध्यम ।

तत्ताणं सिरिसहोअररअणाहरणम्मि हिअअमेकरसं ।
विंबाहरे पिआणं णिवेसिअं कुसुमबाणेण(१५२) ॥ [क्रि०]

अन्यस्ततोऽन्यथा (१५३) ।

अनेकमेकस्मिन् क्रमेण भवति क्रियते वा सोऽन्यः । क्रमेण उदाहरणम्,-

मधुरिमरुचिरं वचः खलानाम्
अमृतमहो प्रथमं पृथु व्यनक्ति ।
अथ कथयति मोहहेतुमन्त-
र्गतमिव हालाहलं विषं तदेव ॥ [भ०]

तन्नेदं नतभित्ति, मन्दिरमिदं लब्धावकाशं दिवः,
सा धेनुर्जरती, नदन्ति करिणामेता घनाभा घटाः ।
स क्षुद्रो मुखलध्वनिः, कलमिदं सङ्गीतकं योषिताम्
आश्चर्यं दिवसैर्हिजोऽयमियती भूमिं समारोपितः ॥ [क्रि०]

अनुमानं तदुक्तं यत्साध्यसाधनयोर्वचः ॥२१॥

पक्षधर्मान्वयव्यतिरेकित्वेन (१५४) त्रिरूपो हेतुः साधनं, धर्मिणि अयोगव्यवच्छेदो व्यापकस्य, साध्यत्वम् । यथा,-

---

(१५२) तत्तेषा श्रीसहोदररत्नाभरणे हृदयमेकरसम् ।
विम्बाधरे प्रियाणां निवेशितं कुसुमबाणेन ॥ इति छं० ।
श्रीसहोदररत्नम् कौस्तुभ, तदाभरणे हरौ इति उद्योतचन्द्रिका-कृच्छ्रोदाहाः । रत्नाभरणम्मि इत्यत्र रत्नाकरण इति केचित्पठन्ति ।
(१५३) "पर्य्यायोऽनेकतोऽन्यथा" इति धन्ये यत्तात् नात्र छन्दोभङ्गः ।
(१५४) पक्षधर्मत्वम्, पक्षे (यत्तानुमिनोति स पक्ष, 'पर्वतो वह्निमान् धूमात्' इत्र तौ पर्वतादिः) हेतोर्वर्त्तित्वम् । अन्वयित्वम्, सपक्षे

यत्रैता लहरीचलाचलदृशो व्यापारयन्ति भ्रुवं,
यत् तत्रैव पतन्ति सन्ततमसौ मर्मण्यमो मार्गणाः।
तच्चक्रीकृत-चापमञ्चितशर-प्रेङ्खत्करः क्रोधनो
धावत्यग्रत एव यासनधरः सत्यं सदासौ स्मरः॥

साध्यसाधनयोः पौर्वापर्यविकल्पे न किञ्चिद्वैचित्र्यमिति न तथा दर्शितम् (१५५)॥

विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु सः। अर्थाद्विशेष्यस्य। उदाहरणम्,-

---

(निश्चितसाध्यवति महानसादौ) हेतोर्वृत्तित्वम्। व्यतिरेकित्वम्, विपक्षे (निश्चितसाध्यवद्भिन्ने जलादौ) हेतोरवृत्तित्वम्। धर्मिणि, हेतुमति पक्षे (पर्वतादौ) व्यापकत्वं, हेत्वपेक्षया अन्यूनदेशस्थितत्वं (वह्न्याद्यं) अयोगव्यवच्छेदं निश्चित सम्बन्ध। यथा 'पर्वतो वह्निमान् धूमात्' इत्यादौ पर्वते पक्षे धूमस्य हेतोर्वृत्तित्वमस्ति, एव वह्निरूपसाध्यनिश्चयवति महानसेऽपि धूमस्य हेतोर्वृत्तित्वमस्ति, तथा वह्निरूपस्य साध्यस्याभावनिश्चयवति जलाधारे धूमस्य हेतोरवृत्तित्व नास्तीति त्रिरूपेण धूमेन हेतुना पर्वते पक्षे साध्यस्य वह्नेरनुमान भवति। परन्तु 'पर्वतो वह्निमान् धूमात्'-इत्यादौ चमत्कारामावान्नायमलङ्कार इति कविप्रतिभाकल्पितम यत् एकस्मिन् धर्मिण्यि साधनेन साध्यस्य उक्तयनम् तदनुमानमिति तु निष्कर्ष। यथोदाहरणे नारीदृष्टिपातप्रदेशे साध्यप्रसेपपक्षधर्मत्वेन हेतुना एकस्मिन् धर्मिणि कन्दर्पे नारीवामयतो धावनमनुभूयते।

(१५५) ननु साध्यस्य पूर्वभवृत्तौ एव, साध्यस्य चरमवृत्तौ चैव इति भेदद्वयमादाय कथ विभागो न कृत इत्यत आह साध्यसाधनयोरिति।

महौजसो मानधना धनार्चिता
धनुर्भृतः संयति लब्धकीर्तयः ।
न संहतास्यस्य न भेदशङ्कितः
प्रियाणि वाञ्छन्त्यसुभिः समीहितम् ॥

यद्यपि च पुष्टार्थस्य दोषताभिधानात्तन्निराकरणेन पुष्टार्थं स्वीकार कृत., तथाप्येकनिष्ठत्वेन बन्धना विशेषणानामेवमुपन्यासे वैचित्र्यमित्यलङ्कारमध्ये गणितः (१५६) ।

व्याजोक्तिश्छद्मनोद्भिन्न-वस्तु-रूपनिगूहनम् ॥३२॥

निगूढमपि (१५७) वस्तुनो रूपं कथमपि प्रभिन्नं केनापि व्यपदेशेन यदपह्नूयते, सा व्याजोक्ति.। न चैषा अपह्नुतिः, प्रस्तुताप्रस्तुतोभयनिष्ठस्य साम्यस्येहासम्भवात् ।

---

(१५६) अपुष्टार्थ. अपुष्टार्थता । पुष्टार्थं पुष्टार्थता । अलार्थं भाव, न अपुष्टार्थत्वदोषाभावेन परिकरस्य वैफल्य । निर्विशेषणतात्पर्ये सत्यपि अपुष्टार्थत्वदोषाभावे सार्थकबहुविशेषणोपादानजचमत्काराभावेन परिकराभावादिति । तथाच सार्थकबहुविशेषणैर्यस्य परिपोषण परिकर इति फलितम । एकस्मिन्नपि सार्थके विशेषणे चमत्कारानुभवाच्च तत्राप्ययमलङ्कार - इति तु प्रदीप ।

(१५७) निगूढमपि, गुप्तमपि परं अतद्भावनीयमपि अनुपलक्षितमपि । रूप स्वभाव प्रकृतावस्था । कथमपि विचित्रविशेषादिना (कथञ्चित्) । प्रभिन्नं, बुद्धिस्थ स्फुट परैरुद्भावनीय उपलक्षितम् । केनापि व्यपदेशेन, येन केनचित् अर्थान्तरन्यासादिनोपन्यासेन । साम्यमूलोऽपह्नोऽपह्नुति, अत्र तु न साम्यविवक्षेति भेद । इदमुपलक्षणम्, सर्वोपमाप्रतिषेधपूर्वकसमर्पणीयव्याख्यानम्, अत्र तु किञ्चिदनिर्दिश्यैव कथञ्चिद्बुद्धिस्थ वस्तु निमित्त कल्पयदुत्तरवाक्यमित्यपि बोध्यमिति कृद्योत ।

उदाहरणम्,-

शैलेन्द्रप्रतिपादयमानगिरिजा-हस्तोपगूढोल्लस-
द्रोमाञ्चादिविसंष्ठुलाखिलविधिव्यासङ्गभङ्गाकुलः।
आः शैत्यं तुहिनाचलस्य करयोरित्यूचिवान्,:सस्मितं
शैलान्तःपुरमात्मखण्डलगणैर्दृष्टोऽवताद्: शिव:॥

अत्र पुलकवेपथू सात्विकरूपतया प्रस्तौ शैत्यकारणतया प्रकाशितत्वादपलपितस्वरूपौ व्याजोक्तिं प्रयोजयतः॥

किञ्चित्पृष्टमपृष्टं वा कथितं यत्प्रकल्पते।
तादृगन्यव्यपोहाय परिसङ्ख्या तु सा स्मृता॥२३॥

प्रमाणान्तरावगतमपि वस्तु शब्देन प्रतिपादितं (प्रयोजनान्तराभावात्) तादृग्वस्त्वन्तरव्यवच्छेदाय यत् पर्य्यवस्यति, सा भवेत्परिसङ्ख्या (१५८)। अत्र च कथनं प्रश्नपूर्व्वकं तदन्यथा च परिदृष्टं, तथा उभयत्र व्यपोह्यमानस्य प्रतीयमानता, वाचत्वं चेति चत्वारो भेदाः। क्रमेणोदाहरणम्,-

किमासेव्यं पुंसा? सविधमनवद्यं द्रुसरितः,
किमेकान्ते ध्येयं? चरणयुगलं कौस्तुभभृतः।
किमाराध्यं? मुख्यं, किमभिलषणीयञ्च? करुणा,
यदासक्त्या चेतो निरवधि विमुक्तौ प्रभवति॥ [प्र०प्र०]

---

(१५८) तदन्यस्य निषेधाय वस्त्वोक्ति परिसङ्ख्येति फलितम्। यदुदाहरणे, गङ्गातीरादेः सेव्यत्वादि सर्व्वावगतमेवेति न तदवगमनायेदं पद्यमुक्तम्, किन्तु गङ्गाभिन्ननदीतीरादेरसेव्यत्वादिप्रतिपादनाय गङ्गातीरस्य सेव्यत्वमुक्तमिति। उभयत्र प्रश्नपूर्व्वकाप्रश्नपूर्व्वकत्वनस्यते।

किं भूषणं ? सुहृद्वचनं यशो, न रत्नं,
किं कार्यमार्यचरितं सुकृतं, न दोषः ।
किं चक्षुरप्रतिहतं धिषणा, न नेत्रं,
जानाति कश्चिदपरः सदसद्विवेकम् ॥ [प्र०वा०]
कौटिल्यं कचनिचये, करचरणाधरदलेषु रागस्ते ।
काठिन्यं कुचयुगले तरलत्वं नयनयोर्वसति (१५६)॥ [च०प्र०]
भक्तिर्भवे, न विभवे, व्यसनं शास्त्रे, न युवति-कामास्त्रे ।
चिन्ता यशसि, न वपुषि, प्रायः परिदृश्यते महताम् ॥[च०वा०]

यथोत्तरं चेत् पूर्वस्य-पूर्वस्यार्थस्य हेतुता ।
तदा कारणमाला स्यात्

उत्तरम् उत्तरं प्रति यथोत्तरम् । उदाहरणम्,-

जितेन्द्रियत्वं विनयस्य कारणं,
गुणप्रकर्षो विनयाद्वाप्यते ।
गुणप्रकर्षेण जनोऽनुरज्यते,
जनानुरागप्रभवा हि सम्पदः (१६०) ॥

'हेतुमता सह हेतोरभिधानमभेदतो हेतुः' इति हेत्वलङ्कारो (१६१) न लक्षितः आयुर्घृतमित्यादिरूपो ह्येष न भूषणतां कदाचिदर्हति, वैचित्र्याभावात् ।

---

(१५९) न हृदयादिषु इति व्याख्यम् । अत्र हेयमूह्यम् ।

(१६०) 'जितेन्द्रियत्वं विनयस्य कारणम्' इत्युपक्रम्य 'विनयादवाप्यते' इत्युपसंहारादत्र भग्नप्रक्रमतादोषोऽस्तीति विभावनीयम् । अन्यथोत्तरत्रोक्तिर्दोषाय तत्रोऽपि प्रक्रमभङ्गो न दोषादेति क्वचित् ।

(१६१) अनुद्भटप्रदर्शितम् ।

अविरलकमलविकासः सकलालिमदश्च कोकिलानन्दः।
रम्योऽयमेति सम्प्रति लोकोत्कण्ठाकरः कालः॥

-इत्यत्र काव्यरूपतां कोमलानुप्रासमहिम्नैव समाम्नासिषुः न पुनर्हेत्वलङ्कारकल्पनयेति, पूर्वोक्तकाव्यलिङ्गमेव हेतुः(१६२)।

क्रियया तु परस्परम् ॥३४॥

वस्तुनोर्जननेऽन्योन्यम्,

अर्थयोरेकक्रियामुखेन (१६३) परस्परं कारणत्वे सति अन्योन्यनामा अलङ्कारः। उदाहरणम्,-

हंसाणं सरोहिं सिरी सारिज्जइ अह सराणं हंसेहिं।
अन्नोन्नं विअ एए अप्पाणं णवर गरुअन्ति (१६४)॥

अत्र उभयेषामपि परस्परजनकता मिथः-श्रीसारतासम्पादनद्वारेण॥

---

(१६२) अयं भावः, प्राचीना अस्य श्लोकस्य सालङ्कारतया यत् काव्यत्वमूचुः, तत् न उक्तहेत्वलङ्कारवत्तया, येन एतत्श्लोकात् आवश्यकं, किन्तु अनुप्रासादिमत्तयेति। हेतुरिति भाग च काव्यलिङ्गस्यैवेति।

(१६३) एकक्रियासुखेन एकजातीयक्रियाजननद्वारा। कारणत्वे कारणत्वकल्पने। परस्परं अन्यजनकभावाभावेऽपि परस्परगतक्रियाजननमादाय परस्परं अन्यजनकभावः कल्पते इत्यर्थः। परस्परं परस्परगतयोरेकजातीयक्रिययोर्जननेऽन्योन्यमिति फलितोऽर्थः। अत्र क्रियेति गुणस्यापि उपलक्षणमिति उद्योतकृत्।

(१६४) हंसानां सरोभिः श्रीः सार्यते, अथ सरसां हंसैः।
अन्योन्यमिव एते आत्मानं गौरवं नयन्ति। इति संस्कृतम्।
गौरवेण गुरुत्वेनेति।

उत्तरस्तुतिमाश्रितः ।
प्रश्नस्योन्नयनं यत्र क्रियते, तत्र वा सति ॥६५॥
असकृद् यदसम्भाव्यमुत्तरं स्यात्तदुत्तरम् (१६५) ।

प्रतिवचनोपलम्भादेव पूर्ववाक्यं यत्र कल्प्यते, तदेकं तावदुत्तरम् । उदाहरणम्,-

वाणिइअ, हत्थिदन्ता कुतो अम्हाणं वग्घकत्तीअ ।
जाव ललिआलअमुही घरम्मि परिसक्कइ सोण्हा(१६६)॥

हस्तिदन्तव्याघ्रकृत्तीनामहमर्थी, ताः मूल्येन प्रयच्छेति क्रेतुर्वचनम् (१६७) अमुना वाक्येन समुन्नीयते । नचैतत् काव्यलिङ्गम्, उत्तरस्य तादृश्यानुपपत्तेः (१६८), न हि प्रश्नस्य प्रतिवचनं जनको हेतुः, नापीदमनुमानम्, एकधर्मिनिष्ठतया साध्यसाधनयोरनिर्देशादित्यलङ्कारान्तरमेवोत्तरं साधीयः ।

---

(१६५) असम्भाव्यम् सर्वैरेव सम्भावयितुमशक्यं इत्येवम ।

(१६६) वाणिजिक हस्तिदन्ता कुतोऽस्माक व्याघ्रकृत्तयश्च ।
यावत् ललितालकमुखी गृहे परिष्वष्कते स्नुषा ॥ इति छ० ।
वधूकेशकलापो मे सुत मूल्यार्थं न गच्छतीति व्यज्यते ।

(१६७) अस्य प्रश्नरूपत्वाभावेऽपि प्रश्नपदं पूर्ववाक्यमात्रपरमित्यदोष । यद्वा हस्तिदन्तव्याघ्रकृत्तय किं नव सन्तीति प्रश्नवाक्यसिद्धोऽयमिति प्रदीप ।

(१६८) उत्तरस्य उत्तरालङ्कारस्य । तादृश्यं काव्यलिङ्गरूपता । प्रश्नस्य प्रतिवचन न जनको हेतु किन्तु वाक्यैक्य न वाक्यैकहेतोश्च न काव्यलिङ्गविषयतेति भाव । एकधर्मिनिष्ठतया एकव्यक्तिवृत्तितया । प्रकृते साध्य प्रश्नः क्रेतृवणिग्गतत्वेन उन्नीयते, साधनम उत्तरम्तु विक्रेतृवणिग्गतमिति नयोरेकधर्मिनिष्ठतया निर्देश ।

प्रश्नादनन्तरं लोकातिक्रान्तगोचरतया यत् असम्भाव्यरूपं प्रतिवचनं स्यात् तत् अपरमुत्तरम् । अनयोश्च (१६६) सकृदुपादाने न चारुताप्रतीतिरित्यसकृदित्युक्तम् । उदाहरणम्,-

का विसमा ? दैव्वगई, किं दुल्लहं ? जं जणो गुणग्गाही ।
किं सोक्खं ? सुकलत्तं, किं दुःखं ? जं खलो लोओ(१७०)॥

प्रश्नपरिसङ्ख्यायामन्यव्यपोह एव तात्पर्यम्, इह तु वाच्य एव विश्रान्तिरित्यनयोर्विवेकः (१७१)।

कुतोऽपि लक्षितः सूक्ष्मोऽप्यर्थोऽन्यस्मै प्रकाश्यते ॥३६॥

धर्मेण केनचिद्यत्र तत् सूक्ष्मं परिचक्षते ।
कुतोऽपि चाकारादङ्गितादा (१७२), सूक्ष्मधीग्रहणमति-संवेद्यः । उदाहरणम्,-

वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धै-
र्हृद्या भिन्नं कुङ्कुमं कापि कण्ठे ।

---

(१६६) अनयोश्च प्रश्नप्रतिवचनयोश्च । प्रश्नोत्तरयोरन्यतरस्याकृतगर्भत्वे सकृदुपादानेऽपि चमत्कारोऽस्त्येव, यथा,

'किमिति जगति जयोदरि ? किं तव परकीयवचनं ?' ।

-इत्यादौ प्रश्नेन प्रतिकारसामर्थ्यम्, उत्तरेण च यानिदत्वं व्यज्यते इति, तत्रापि उत्तरमेवाङ्गतया उपन्यस्तम् ।

(१७०) का विसमा ? दैवगतिः, किं दुर्लभं ? यत् जनो गुणग्राही । किं सौख्यम् ? सुकलत्रम्, किं दुःखं ? यत् खलो लोकः । इति छः ।

(१७१) विश्रान्तिः पर्यवसानं तात्पर्यम्, वैलक्षण्यादेवानयोरात्मा दुर्घटत्वात् । अनुवदन एव तात्पर्यम् ।

(१७२) उदाहरणेऽर्थालंकार, भेदादिदमेव दर्शितम् इति नेदम् ।

पुंस्त्वं तन्वया व्यञ्जयन्ती वयसा
स्मित्वा पाणौ पद्मलेखा लिलेख ॥ [आ०]

अत्राङ्गुलिमालोक्य कयापि वितर्कितं पुरुषायितम् असिलतालेखनेन वैदग्ध्यादभिव्यक्तिमुपनीतं, पुंसामेव कृपाणपाणिता, योग्यत्वात् । यथा वा,-

सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया ।
दूत्यन्यैवार्पिताकूतं लीलापद्मं निमीलितम् ॥[इ०]

अत्र, जिज्ञासित सङ्केतकाल. कयाचिदिङ्गितमात्रेण विदितो निशासमयशंसिना कमलनिमीलनेन लीलया प्रतिपादितः ।

उत्तरोत्तरमुत्कर्षो भवेत्सारः परावधिः ॥३७॥

परः पर्यन्तभाग. (१७३), अवधिर्यस्य धाराधिरोहितया तत्रैवोत्कर्षस्य विश्रान्तेः । उदाहरणम्,-

राज्ये सारं वसुधा, वसुधायां पुरं, पुरे सौधम् ।
सौधे तल्पं, तल्पे वराङ्गनाऽनङ्गसर्वस्वम् ॥

भिन्नदेशतयाऽत्यन्तं कार्यकारणभूतयोः ।
युगपद्धर्मयोर्यत्र ख्याति· सा स्यादसङ्गतिः ॥३८॥

---

(१७३) परभागः (अर्थात् वाक्यानां) येषाम् । अवधिः चरमसीमा, धाराधिरोहितया प्रवाहरूपेण । विश्रान्तेः पर्यवसानात् । उत्तरोत्तरम् अधिकतया वर्णनीयस्य उत्कर्षस्य वाक्यसमूहे चरमसीमागामिनि सारः इति भावः । उत्कर्षश्च श्राव्यगुणानामश्राव्यगुणानाञ्च भवतीति, तदुभयमुदाहृतम् । अन्यत् यथा,

तृणाल्लघुतरस्तूलस्तूलादपि च याचकः ।
वायुना किं न नीतोऽसौ ? मामयं प्रार्थयिष्यते ॥ इति उद्योतः ।

इह यद्ध्येयङ्कारणं, तद्ध्येयमेव कार्य्यमुत्पद्यमानं दृष्टम्, यथा धूमादि, यत्र हेतुफलरूपयोरपि धर्म्मयोः केनाप्यतिशयेन (१७४) नानादेशतया युगपदवभासनं, सा अनयोः स्वभावोत्पन्नपरस्परसङ्गतित्यागादसङ्गतिः । उदाहरणम्,-

जस्सेअ वणो तस्सेअ वेअणा भणइ जणो तं अलिअं ।
दन्तक्खअं कवोले पहुए वेअणा सवत्तीणं (१७५) ॥

एषा(१७६)च विरोधबाधिनी न विरोधः, भिन्नाधरतयैव

---

(१७४) अतिशयेन विशेषेण । नानादेशतया भिन्नस्थानतया । युगपदिति स्वरूपकथनं, कार्यकारणयोः एकदा भिन्नदेशतया प्रतीतावेव असङ्गतिः स्फुटं प्रतीयते इति । विशेषप्रतिपत्तये कार्यकारणयोर्भिन्नस्थानस्थितत्वेन अभिधाने असङ्गतिः यथोदाहरणे सपत्न्याः कपोले स्वामिप्रियदन्तक्षतादि' , नारीणामतीव स्नेहदायकः-इत्यर्थं विशेषप्रतिपत्तये कार्यकारणयोः भिन्नदेशताभिधानमिति । स्वभावोत्पन्ना स्वाभाविकी । असङ्गतिः एकदेशत्वस्य सम्बन्धः । कार्यकारणयोरित्युपलक्षणम्, एकदेशस्थितत्वेन प्रसिद्धयोः ययोः-कयोश्चिदपीति बोध्यम् । तेन,

'नेत्रे निरञ्जने तन्वाः शून्यास्तु वचसङ्गमम् ।'
इत्यत्रापि सङ्गतिः, इति केचित् प्राहुः ।

(१७५) यस्यैव व्रणः तस्यैव वेदना भणति जनस्तदलीकम् ।
दन्तक्षतं कपोले सपत्न्याः, वेदना सपत्नीनाम् ।-इति सं० ।

अत्र यतस्य एकस्य व्रणपदेन अपरस्य क्षतपदेनोपादानात् एकदेशसङ्गतिरस्ति ।

(१७६) नन्वत्र विरोधाभाव एवास्तु, असङ्गतिस्तु विरोधः, सा च भिन्नदेशयोरेकदेशत्वे स्यात्, एकदेशयोर्भिन्नदेशत्वेऽपि सपत्नीति पूर्वपक्षं

द्वयोरिह विरोधिताया: प्रतिभासात्, विरोधे तु विरोधित्वम् एकाश्रयनिष्ठमनुक्तमपि पर्य्यवसितम्, अपवादविषयपरिहारेणोत्सर्गस्य व्यवस्थितेः, तथा चैवं निदर्शितम् ॥

समाधिः सुकरं कार्य्यं कारणान्तरयोगतः ।

साधनान्तरोपकृतेन (१७७) कर्त्रा यद् अक्लेशेन, कार्य्यम् आरब्धं, समाधीयते, स समाधिर्नाम । उदाहरणम्,-

मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः ।
उपकाराय दिष्टेरदसुदीर्णं घनगर्ज्जितम् ॥

समं योग्यतया योगो यदि सम्भावितः क्वचित् ॥३८॥

इदमनयोः श्लाघ्यमिति योग्यतया (१७८) सम्बन्धस्य नियत-

निराकरोति एषा चेति । इदमत्र निराकरणम्, एकदेशयोर्भिन्नदेशत्वे एव असङ्गतिः सम्भवति, विरोधस्तु अन्यत्रापीति, चमत्कारान्तरविधायिनी विशेषरूपा असङ्गतिः सामान्यविशेषन्यायेन विरोधं बाधते, इत्यतो विरोधाभावो भिन्नदेशयोरेकदेशत्वे एव पर्य्यवस्यति, अत एव विरोधाभासोदाहरणानि पूर्वं तथैव दत्तानीति । एकाश्रयनिष्ठं भिन्नदेशयोरेकदेशत्वमप्रयुक्तम् अनुक्तम् विरोधलक्षणे इति शेषः । अपवादो विशेषः । उत्सर्गः सामान्यम् । 'एवम्' भिन्नदेशयोरेकदेशत्वप्रयुक्ता विरोधः । निदर्शितम् विरोधोदाहरणतयेति शेषः । 'विरोधबाधिनी' इत्यत्र विरोधबोधिनीति पाठः प्रदीपसम्मतः, तदर्थस्त्वसङ्गत एव बोध्यः ।

(१७७) तथाच यत्र एकमेव कारणं प्रधानतया विवक्षितम्, अपरस्तु सहकारितया, तत्र समाधेयमलङ्कारः । उभयोः प्राधान्ये विवक्षिते सङ्कर इति ।

(१७८) योग्यतया उपयुक्ततया, अक्ष, अध्यक्षाभिमतेन अन्यथा । सम्बन्धस्य (अङ्गाङ्गयोः) भेदस्य । नियतविषयं भिन्नदेशम् ।

विषयमध्यवसानं चेत्तदा समम्। तत् सदृयोगेऽसदृयोगे च। उदाहरणम्,-

धातुः शिल्पातिशयनिकषस्थानमेषा दृगाच्ची,
रूपे देवोऽप्ययमनुपमो दत्तपत्रः स्मरस्य।
जातं दैवात्सदृशमनयोः सङ्गतं यत्, तदेतत्
शृङ्गारस्योपनतमधुना राज्यमेकातपत्रम्॥ [७०]
चित्रं चित्रं बत बत महच्चित्रमेतद्विचित्रं,
जातो दैवादुचितरचनासंविधाता विधाता।
यन्निष्पाना परिणतफलश्लीतिरास्वादनीया,
यच्चैतस्याः कवलनकलाकोविदः काकलोकः॥ [७१०]

क्वचिद्दूयदतिवैधर्म्यान्न श्लेषो घटनामियात्(१७९)।
कर्तुः क्रियाफलावाप्तिर्नैवानर्थश्च यद्भवेत्॥४०॥
गुणक्रियाभ्यां कार्यस्य कारणस्य गुणक्रिये।
क्रमेण च विरुद्धे यत् स एष विषमो मतः॥४१॥

अध्यवसान प्रतीति। यत्र समनामा अलङ्कार। अतद्रूपयोर्योगो हि साध्य, स च उतोरपि अतद्रूपतोक्ताद्द तदिति।

(१७८) अतिवैधर्म्यात् अत्यन्तवैसादृश्यात्। श्लेष एव सम्बन्ध। घटनाम् साध्यतद्रूपाऽप्यपद्यमानताम्। क्रमेणेति कार्यस्य गुणेन कारणगुणो विरुद्ध-रूपेण, कार्यस्य क्रियया कारणस्य क्रिया विरुद्धेत्यपर एति हौ। एतद्-भेदद्वये च कार्यकारणयोर्विरुद्धगुणक्रियायोग एव चमत्कारी, विरोधेत्र भिन्नदेशयोरेकदेशत्वम्, अन्यत्रालङ्कारे एकदेशयोर्भिन्नदेशत्वमेव चमत्कारीति विशेष।

द्वयोरत्यन्तविलक्षणतया यत् अनुपपद्यमानतयैव योग. प्रतीयते [१], यच्च किञ्चिदारभमाणः कर्त्ता क्रियायाः प्रणाशात् (१८०) न केवलमभीष्टं फलं न लभेत, यावद-प्रार्थितमप्यनर्थं विषयमासादयेत् [२], तथा सत्यपि कार्य्यस्य कारणरूपानुकारे यत् तयोर्गुणौ क्रियेच परस्परविरुद्धतां वदतः [३।४।], स विपर्य्ययात्मा षड्रूपो विषमः । क्रमेण उदाहरणम्,

गिरीपादपि षड्पद्भ्यो केयमायतलोचना ।
क्व च कुक्कुलाग्निकर्कश्यो मदनानलः ॥ [१]
सिंहिकासुतसन्तप्तः शशः शीतांशुमाश्रितः ।
जग्रसे साश्रयं तत्र तमन्यः सिंहिकासुतः ॥ [२]
सद्यःकरस्पर्शमवाप्य चित्रं !
रणे रणे यस्य कृपाणरेषा ।
तमालनीला शरदिन्दुपाण्डु
यशस्तिलोक्याभरणं प्रसूते ॥ [३]

आनन्दनमन्दमिमं कुवलयदललोचने, ददासि त्वम् ।
विरहव्यथैव जनितसापत्नतितरां शरीरं मे ॥ [४]

अत्रानन्दरूपं शरीरतापेन विरुध्यते । एवं,

विपुलेन सागरगतस्य पुरुषेण
भुवनानि यस्य पपिरे युगक्षये ।

---

(१८०) प्रणाशात् प्रतिबन्धकसमवधानात्। कारणसद्भावे इति अवश्यमुत्पादेऽपि अनर्थिनि विरुद्धात्, न हि कारणविदि मेघदर्शनोत्पादेऽपि अवर्षति कार्यदर्शनो दृश्यविरुद्धः ।

मदविभ्रमासकलया पपे पुनः
स पुरस्त्रियैकतमयैकया दृशा ॥

-इत्यादावपि विषमत्वं यथायोगमवगन्तव्यम् (१८१) ॥

महतोर्यन्महीयांसावाश्रितास्रययोः क्रमात्(१८२)।
आश्रयाश्रयिणौ स्यातां तनुत्वेऽप्यधिकन्तु तत्॥४२॥

आश्रितमाश्रेयम् आश्रयस्तदाधारः तयोर्महतोरपि विषये(१८३), तदपेक्षया तनू अप्याश्रयाश्रयिणौ प्रस्तुतवस्तुप्रकर्षविवक्षया यथाक्रमं यत् अधिकतरतां व्रजतः, तदिदं द्विविधम् अधिकं नाम । क्रमेणोदाहरणम्,

अहो विशालं भूपाल, भुवनत्रितयोदरम् ।
माति मातुमशक्योऽपि यद्योराशिर्यदत्र ते ॥ [आश्व०त०]

युगान्तकालप्रतिसंहृतात्मनो
जगन्ति यस्यां सविकाशमासत ।

---

(१८१) जगत्त्राणकर्तुरुदरस्य कुक्षिणः अखिलभक्षीकरिष्णुतेन अक्षयविना (विष्णुना) अक्षयवटविभावः सम्बन्धोऽनुपपद्यमान इति प्रथमप्रकारोऽत्र विषम इति प्रदीपाभिप्रायः । उपादानकारणरूपस्य कुक्षिणः जगत्त्राणक्रियया उपादेयस्य (विष्णुपरोरस्य) एकतमक्षीकर्तृकक्षपणक्रियया विरहेति चतुर्थप्रकारो विषम इति तु मणेश्वरः ।

(१८२) महतोर्नृपतेः । महीयांसौ महत्तया विवक्षितौ । क्रमादिति वस्तुतोऽमहतामपि महतः आश्रितत्वाश्रयत्वेन महत्तया विवक्षित आश्रयः स्यात्, वस्तुतोऽमहतामपि महदाश्रयाश्रितत्वेन महत्तया विवक्षितः आश्रितः स्यादिति ।

(१८३) विषये सम्बन्धे सतीति शेषः । अत्र अधिकतरतां व्रजत इत्यनेनाश्रयः ।

तनौ ममुस्तव न कैटभद्विष-
स्तपोधनाभ्यागमसम्भवा मुदः ॥ [कुमा०]

प्रतिपक्षमशक्तेन प्रतिकर्त्तुं तिरस्क्रिया ।
या तदीयस्य तत्तुल्यै प्रत्यनीकं तदुच्यते ॥४३॥

न्यक्कृतिपरमपि विपक्षं साक्षान्निरसितुमशक्तेन केनापि यत्, तमेव प्रतिपक्षमुत्कर्षयितुं तदाश्रितस्य तिरस्करणं, तत् (अनीकप्रतिनिधितुल्यत्वात्) प्रत्यनीकमभिधीयते। यथाऽनीके अभियोज्ये तत्प्रतिनिधीभूतमपरं मूढतया केनचिदभियुज्यते तथेह प्रतियोगिनि विजेये तदीयोऽन्यो विजीयते इत्यर्थः। उदाहरणम्,

त्वं विनिर्जितमनोभवरूपः, सा च सुन्दरि, भवत्यनुरक्ता ।
पञ्चभिर्युगपदेव शरैस्तां तापयत्यनुशयादिव कामः ॥

यथा वा,

यस्य किञ्चिदपकर्त्तुमक्षमः कायनिग्रहगृहीतविग्रहः(१८४)।
कान्तवक्त्रसदृशाकृतिं कृती राजरिन्दुमधुनापि बाधते ॥

इन्दोरत्र तदीयता सम्बन्धिसम्बन्धात् (१८५) ॥

---

(१८४) यस्य श्रीकृष्णस्य। कायनिग्रहगृहीतविग्रहः, कायस्य शिरश्छेदेन निराकरणेन गृहीतोऽङ्गीकृतः विग्रहः युद्धं शत्रुता येन सः। कान्तवक्त्रसदृशाकृतिं, कान्तं कमनीयं यत् वक्त्रं (अर्थात् श्रीकृष्णस्य) तेन सदृशी याकृतिरर्थात् (इन्दो) तम्। कृती समर्थवान्। विष्णुः राहुशिरश्छेदेति पुराणगाथा।

(१८५) श्रीकृष्णसम्बन्धिनो मुखस्य सादृश्यसम्बन्धात्।

समेन लक्षणा वस्तु वस्तुना यत् निगद्यते।
निजेनागन्तुना वापि तन्मीलितमिति स्मृतम्॥४४॥

सहजम् (१८६) आगन्तुकं वा किमपि साधारणं यत् अवर्णं, तद्वारेण, यत्, किञ्चित्केनचिद्वस्तु वस्तुस्थित्यैव बलीयसा तिरोधीयते, तत् मीलितमिति द्विधा स्मरन्ति। क्रमेण उदाहरणम्,

अपाङ्ग-तरले दृशौ, मधुर-वक्र-वर्णा गिरः,
विलासभरमन्थरा गतिरतीव कान्तं मुखम्।
इति स्फुरितमङ्गके भगवत्यः स्तनौ लीलया
तदत्र न मदोदयः क्षतपदोऽपि संलक्ष्यते॥ [८०]

अत्र हक्तरलतादिकमङ्गस्य लिङ्गं स्वाभाविकं, साधारणस्य मदोदयेन, तत्राप्येतस्य दर्शनात्।

ये कन्दरासु निवसन्ति सदा हिमाद्रे-
स्त्वत्पादपङ्कजधियो विषया द्विषन्ते।
अप्यङ्ग-मुत्पुलक मुद्वहता सकम्पं
तेषामहो बत भिया न बुधोऽप्यभिख्यः॥ [८१]

---

(१८६) सहजं वस्तुस्वभावसिद्धम्। आगन्तुकं निमित्तविशेषसम्पर्क-जनितम्। साधारणम् तिरोधीयमानतिरोधायकबोधयोरेकानुभवत्वम्। अवर्णम् चिह्नम्। वस्तुस्थित्या वस्तुसत्या, स्वभावत। यथाभवत्तयोरपि वस्तुनोरेकस्य स्वभावस्य प्रबलतया, तेन यदि अपरस्य तिरोधानम् अनर्थाय अनुद्बोधोऽप्रकाशो भवेत् तदा लिङ्गिनम्। आलोको तिरोधानं न वस्तुस्वभावजनितं किन्तु कथञ्चिद्दृष्टं वस्तु कथित् तिरोधात् भवति इति विवक्षितम्, दृष्ट च वस्तु गोपितम्। तत्रापि च तिरोधानं वाक्यविशेषता विवक्षित भवति भेदः।

यत्र तु सामर्थ्यात् (१८७) अवस्थितस्य चैत्यस्यागन्तुकत्वात् तत्प्रभवयोरपि कम्पपुलकयोस्तादूप्यं, समानता च, भयेऽपि तयोरुपलक्षितत्वात् ॥

स्थाप्यतेऽपोह्यते वापि यथापूर्वं परम्परम् ।
विशेषणतया यत्र वस्तु, सैकावली द्विधा ॥४५॥

पूर्वं पूर्वं प्रति यथोत्तरस्य वस्तुनो वीप्सया (१८८) विशेषणभावेन यत् स्थापनं निषेधो वा सम्भवति, सा द्विधा बुधैः एकावली भण्यते । क्रमेणोदाहरणम्,-

पुराणि यस्या सवराङ्गनानि,
वराङ्गना रूपपुरस्कृताङ्ग्यः ।
रूपं समुन्मीलितसंविलासम्,
अस्त्रं विलासाः कुसुमायुधस्य ॥ [स्या०]
न तज्जलं, यन्न सुचारुपङ्कजं,
न पङ्कजं तत्, यदलीनषट्पदम् ।

---

(१८७) सामर्थ्यात् हिमाद्रिकन्दरनिवासवशात् । अवस्थितस्य अधिगतस्य । तादूप्यम् आगन्तुकत्वम् । समानता चैत्यभयोभयत्राधारत्वता । उपलक्षितत्वात् अनुभवात् ।

(१८८) वीप्सया वाङ्ल्येन । स्थापन विधानम् । विशेषणतयेत्युपलक्षणम्, विशेष्यतयेत्यपि बोध्यम्, यथा,-

धर्मेण धृतिस्तव देव यशो, धृत्या निहता सकलैव कलुषी ।
कलया च तया भुवि सर्वलोका, लोकेन च नीता भुवनेषु कीर्त्तिं ॥

इति चन्द्रोन्मीलने । दर्पणेऽप्येवम् ।

न षट्पदोऽसौ, कलगुञ्जितो न यः,
न गुञ्जितं तत्, न जहार यन्मनः ॥ [नि०]

पूर्ववत्, पुराणा वराङ्गनाः, तासाम् अङ्गविशेषणसुखेन (१८८) रूपं, तस्य विलासाः, तेषामप्यङ्गमित्यनुना क्रमेण विशेषणं विधीयते। उत्तरत्र प्रतिषेधेऽप्येवं योज्यम् ॥

यथानुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः।

स्मरणम्,

यः पदार्थः केनचिदाकारेण नियतः (१९०) यदा-कदाचित् अनुभूतोऽभूत्, स कालान्तरे स्मृतिप्रतिबोधाधायिनि तत्सदृशे वस्तुनि दृष्टे सति, यत्, तथैव स्मर्यते, तत् भवेत् स्मरणम्।

---

(१८८) अङ्गस्य विशेषणभावद्वारा।

(१९०) नियत निर्धारित विशेषित। स्मृतिप्रतिबोधाधायिनि स्मृते स्मरणस्य अनुगुण य प्रतिबोध (संस्कारोद्बोध) तदाधायिनि (तज्जनके) तत्सदृशे तत्सदृशे। अत्राय सार, यादृशं वस्तु यदा अनुभूयते, तादृशमेव तत् अन्यदा स्मर्यते इति नियमात् स्मृतौ अनुभव कारणम्। अनुभवोऽपि न यावादेव कारणम्,(अन्धजनस्य पथि दृष्टस्यादेरस्मरणात्) किन्तु संस्कारद्वारा, (ततश्च तत्तोपेक्षया तत्तादेर्दर्शनात् न संस्कार, अनुपेक्षात्मक एव अनुभव संस्कार जनयतीति न दोष), संस्कारश्च तादृश एव स्मृतिं जनयति, न तदृशः (अतएव संस्कारस्य सर्वदा सत्त्वेऽपि न सर्वदा स्मृतिप्रसङ्ग)। तद्बोधकाश्च तत्सदृशादिरूपा मता, यदा क्वचिद्दर्शनात् संस्कारोद्बोधद्वारा पूर्वानुभवस्य स्मरणमिति स्मृतिप्रकाशो। यत्तु यादृशस्यानुभवस्यैव तादृशस्य स्मरणम् स्मरणाङ्गत्वं इति प्रकाशाभिप्रायं। वस्तुत वैचित्र्यजनकत्वं स्मरणमात्रस्यैव स्मरणाङ्गत्वं इति मुख्यम।

उदाहरणम्,-

निम्ननाभिकुहरेषु यद्भ्रमः-
प्लावितं चलदृशां लहरीभिः ।
तद्भवैः कुङ्कुमैः सुरनार्य्यः
स्मारिताः सुरतकण्ठरुतानाम् ॥

यथा वा,

करजुअगहिअ-जसोआ-थणमुह-विणिवेसिआहरपुडस्स ।
समरिअ-मच्छजसस्स णमह कण्हस्स रोमञ्चम् (२८१) ॥

भ्रान्तिमानन्य-संवित्तत्तुल्यदर्शने ॥४६॥

तदिति (२८२) अन्यत् अप्राकरणिकं निर्दिश्यते, तेन सदृशम् (यथोदिह) प्राकरणिकम् (चार्प्यते), तस्य तथाविधस्य दृष्टौ सत्यां, यत्, अप्राकरणिकतया संवेदनम्, स भ्रान्तिमान्, न चैष रूपकं प्रथमातिशयोक्तिर्वा (२८३), तत्

---

(२८१) करयुगगृहीतयशोदास्तनस्थविनिवेशिताधरपुटस्य ।
कृतमत्स्यजयस्य नमत कृष्णस्य रोमाञ्चम् ॥ इति छं० ।

(२८२) 'तत्तुल्यदर्शने' इत्यत्र तत्पदेन पूर्वोक्तम् अन्यदवोध्यम् अप्राकरणिकमेव परामृश्यते इत्यर्थः । तेन अप्राकरणिकेन । तस्य प्राकरणिकस्य । तथाविधस्य अप्राकरणिकसदृशस्य । दृष्टौ दर्शने । अप्राकरणिकतया अप्राकरणिकसदृशेन । संवेदनम् अध्यवसायम् । तथाच भ्रान्त्यमूलकतेऽर्थे अप्रस्तुतार्थस्य अयं भ्रान्तिमानिति फलितम् । वस्तुतः, वस्तुसम्भावित-रज्वादिभ्रमविलक्षणः अयमुत्प्रेक्षितः एषमेवस्य उपमानतया भ्रम एव तथेति युक्तम् ।

(२८३) प्रथमातिशयोक्तिः निगीर्याध्यवसानरूपा । अयं च भ्रान्तिमदितिशब्दार्थस्य भ्रमस्वभावस्य । अनुगमनेन अन्वयेन । धर्मादयः भ्रान्तिमदितिशब्दाः । तस्य भ्रमस्य ।

वस्तुतो भ्रमस्याभावात्, इह च (अर्थानुगमनेन संज्ञायाः प्रवृत्तेः) तस्य स्पष्टमेव प्रतिपन्नत्वात्। उदाहरणम्,-

कपाले मार्जारः पय इति करान् लेढि शशिनः,
तरुच्छिद्रप्रोतान् विसमिति करी सङ्कलयति।
रतान्ते तल्पस्थान् हरति वनिताऽप्यंशुकमिति,
प्रभामत्तश्चन्द्रो जगदिदमहो विप्लवयति॥

आक्षेप उपमानस्य, प्रतीपमुपमेयता।
तस्यैव यदि वा कल्प्या तिरस्कारनिबन्धनम्॥४७॥

अस्य (१८४) धुरं सुतरामुपमेयमेव वोढुं, प्रौढमिति कैमर्थ्येन, यत्, उपमानमाक्षिप्यते, यदपि, तस्यैवोपमानतया प्रसिद्धस्योपमानान्तरविवक्षयाऽनादरार्थमुपमेयभावः कल्प्यते, तत् (उपमेयस्योपमानप्रतिकूलवर्त्तित्वात्) उभयरूपं प्रतीपम्। क्रमेणोदाहरम्,—

लावण्यौकसि सप्रतापगरिमण्यग्रेसरे त्यागिनाम्,
देव, त्वय्यवनीभरक्षमभुजे निष्पादिते वेधसा।

---

(१८३) अस्य उपमानस्य। धुरम् प्रयोजनम्। प्रौढ समर्थम्। कैमर्थ्येन किमर्थमिदमिति न्यायेन प्रयोजनविरहेण वा। आक्षिप्यते निन्द्यते। उपमेयत्वे उपमानस्य वैफल्येन निन्दा एव प्रतीपमित्यर्थः। तस्यैव उपमानस्यैव। उपमानान्तरमत्र वर्ण्यनीयम् उपमेयमेव। उपमाननिन्दार्थम् उपमानस्य उपमेयेन उपमाकल्पनम् अपरं प्रतीपमिति फलितम्। द्वितीये उपमानतिरस्कारश्च कचित् कल्पितायाः उपमायाः अनिष्पत्तिद्वारा, कचिच्च निष्पन्नायाः उपमायाश्चेति उदाहरणेनैतत् स्फुटीभविष्यति।

इन्दुः किं घटितः, किमेष विहितः पूषा, किमुत्पादितं
चिन्तारत्नमदो, मुधैव किमसौ सृष्टाः कुलज्माभृतः(१२५)॥
ए एहि दाव सुंदरि, कर्णं दाऊण सुणसु वअणिज्जं ।
तुमए मुहेण किसोअरि, चंदो उवमिज्जइ जणेण (१२६) ॥

अत्र मुखेनोपमीयमानस्य शशिनः स्वल्पतरगुणत्वात् उपमित्यनिष्पत्त्या 'वचनीयम्'-दूतिवचनीयपदाभिव्यङ्ग्यस्तिरस्कारः (१२७) । क्वचित्तु निष्पन्नैवोपमितिक्रिया अनादरनिबन्धनम् । यथा,

गर्वमसंवाह्यमिमं लोचनयुगलेन किं वहसि मुग्धे ।
सन्तीदृशानि दिशि दिशि सरःसु ननु नील-नलिनानि॥
दूरोपमेयीकरणमेवोत्पलानामनादरः (१२८) । अनयैव रीत्या, यत्(१२९),असामान्यगुणयोगात्, न, उपमानभावमपि

---

(१२५) चिन्तारत्नम् चिन्तामणिनामा मणिः । अत्र यथासंख्यमस्ति ।

(१२६) यदि एहि तावत् सुन्दरि, कर्णं दत्वा शृणुष्व वचनीयम् ।
तव मुखेन शशोदरि, चन्द्र उपमीयते जनेन ॥ इति च ।
वचनीयम् निन्द्यम् । नवेति वचनीयमित्यत्र मुखेनेत्यत्र च अन्वेति ।

(१२७) वचनीयमित्यनेन उपमित्यनिष्पत्तिः, तया च यस्मिन् स्वल्पगुणत्वरूपस्तिरस्कार इति तात्पर्यार्थः ।

(१२८) ऊनगुणस्यैव उपमेयत्वात् ।

(१२९) अतएवपूर्वमपि उपमानभावं, यत्, असामान्यगुणयोगात् (असाधारणगुणसम्बन्धात् अर्थात् अभिहितात्) न सङ्गत इत्यन्वयः । उपमानत्वेन प्रसिद्धस्यापि (चन्द्रिकोदयत्वप्रतीतिविषयस्य) असाधारणगुणसम्बन्ध-

अनुभूतपूर्वं सहते, तस्य तत्कल्पनायामपि भवति प्रतीपमिति प्रत्येतव्यम्। यथा,

अहमेव गुरुः सुदारुणानाम्
-इति हालाहल, तात, मा स्म दृप्यः।
ननु सन्ति भवादृशानि भूयो
भवनेऽस्मिन् वचनानि दुर्जनानाम्॥

अत्र, हालाहलस्योपमानत्वमसम्भाव्यम् (२००)एवोपनिबद्धम्॥

प्रस्तुतस्य यदन्येन(२०१) गुणसाम्यविवक्षया।
ऐकात्म्यं बध्यते योगात्तत्सामान्यमिति स्मृतम्॥४८॥

अतादृशमपि (२०२) तादृशतया विवक्षितुं, यत्, अप्रस्तुतार्थेन संपृक्तमपरित्यक्तनिजगुणमेव (२०३) तदैकात्म्यतया निबध्यते, तत् (समानगुणनिबन्धनात्) सामान्यम्।

अभिधाय उपमानत्वकल्पनम् (उपमेयस्यापि तादृशगुणसत्त्वं ख्यापयत् तस्यासाधारण्यं व्याहन्तीति) उपमानप्रतिकूलतया प्रतीपमिति तात्पर्यम्। तथाच कारिकायां 'उपमेयता'-इत्युपलक्षणम्, उपमानतापि बोध्या।

(२००) पूर्वम् अहमेवेत्यादिना असाधारण्याभिधानेन, सम्भावनानर्हम्।

(२०१) अन्येन अप्रस्तुतेन। ऐकात्म्यम् ऐक्यम्। बध्यते निबध्यते प्रतिपाद्यते। योगात् सम्बन्धात्। तुल्यतया विवक्षितयोर्वस्तुनोर्भेदनात् तयोरुभयोरेव एकतया प्रतीतौ सामान्यमिति फलितार्थः। भेदिते तु एकस्यैव प्रतीतिः अन्यस्य तु तिरोधानमिति ततो भेदः। रूपकातिशयोक्त्योस्तु उपमेयस्य उपमानतया प्रतीतिः, अत्र तु न तथेति ततोऽपि भेद इति द्योतयति।

(२०२) अतादृशमपि वस्तुतोऽप्रस्तुतार्थासमानमपि।

(२०३) तेन वक्ष्यमाणात् तद्गुणसद्भावात् भेदः।

उदाहरणम्,-

मलयज-रस-विलिप्त-तनवो नव-हार-लता-विभूषिताः
सिततर-दन्तपत्र-कृत-पत्त्र-रुचो रुचिरामलांशुकाः ।
यशश्चरति विततधाम्नि धवलयति धरामविभाव्यतां गताः
प्रियवसतिं प्रयान्ति सुखमेव निरस्तभियोऽभिसारिकाः ॥

अत्र प्रस्तुततदन्ययोः (२०४) अन्यूनानतिरिक्ततया निबद्धं धवलत्वमेकात्मताहेतुः, अत एव पृथग्भावेन न तयोः उपलक्षणम् । यथा वा (२०५),

येनत्वचा तुल्यरुचां बधूनां कर्णाग्रतो गण्डतलागतानि ।
भद्राः सहेलं यदि नापतिष्यन् को वेदयिष्यन्नवचम्पकानि ॥

अत्र निमित्तान्तरजनितापि (२०६) नानात्वप्रतीतिः प्रथमप्रतिपन्नमभेदं न व्युदसितुमुत्सहते, प्रतीतत्वात्तस्य, प्रतीतेश्च बाधायोगात् ।

विना प्रसिद्धमाधारमाधेयस्य व्यवस्थितिः (२०७)।
एकात्मा युगपद्वृत्तिरेकस्यानेकगोचरा ॥४६॥

---

(२०४) प्रस्तुताप्रस्तुतयो. अभिसारिकाचन्द्रिकयो । उपलक्षणम् प्रतीतिः ।

(२०५) उत्तरार्धं भेदप्रतीत्या पूर्वार्धाश्रिताया ऐक्यप्रतीतेरपीयमानत्वेऽपि एतत् सम्भवतीत्याह यथा वेति ।

(२०६) निमित्तान्तरं भङ्गपतनम् । 'प्रतीतेः' इत्यस्य उत्पत्तावा इति शेषः । अयं भावः, बाधोऽनुत्पादः उत्पत्तायाश्च सादृश्यादः सम्भवतीति पूर्वम् उत्पन्ना ऐक्यप्रतीत्या एव सामान्याकारस्य सम्भव इति ।

(२०७) आधारान्तरगतत्वेनाभेदबुद्धेरित्यर्थः, यथा,-

मतेऽपि खल्वे दीपस्यालमस्मिन्नि तरुरा: । इति उद्योत ।

अन्यत्प्रकुर्वतः कार्यमशक्यान्यस्य वस्तुनः ।
तथैव करणं चेति विशेषस्त्रिविधः स्मृतः ॥५०॥

प्रसिद्धाधारपरिहारेण, यत्, आधेयस्य विशिष्टा स्थितिः अभिधीयते, स प्रथमो विशेषः । उदाहरणम्,-

दिवमप्युत्पपयातानामाकल्पमनल्पगुणगणा येषाम् ।
रमयन्ति जगन्ति गिरः कथमिह कवयो न ते वन्द्याः ॥

एकमपि वस्तु, यत्, एकेनैव स्वभावेन युगपदनेकत्र वर्त्तते, स द्वितीयः । उदाहरणम्,-

सा वसइ तुम्ह हिअए, सा चेअ अच्छीसु, सा अ वअणेसु ।
अम्हारिसाणं सुन्दर, ओआसो णत्थि पावाणं (२०८) ॥

यदपि किञ्चिद्प्रभेनारभमाणस्तेनैव यत्नेनाशक्यमपि कार्यान्तरमारभते, सोऽपरो विशेषः । उदाहरणम्,-

स्फुरदद्भुतरूपमुत्प्रताप-ज्वलनं त्वां सृजताऽनवद्यविद्यम् ।
विधिना सृजे नवो मनोभू-र्भुवि, सत्यं, सविता बृहस्पतिश्च ॥

यथा वा,

सखिनी सचिवः सखी मिथः, प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम् ॥

एकस्येति एक आत्मा स्वभावो वर्त्मा वा, तेन यथाशब्दाग्र भेदः । युगपदिति यद्योदनिरारम्भाय । तथैवेति 'धुनोति चासितनुते च कीर्त्तिम्' इत्यादिसमुच्चयव्यावर्त्तनायेति प्रदीपः ।

(२०८) सा वसति तव हृदये सा चैवाक्षिषु सा च वचनेषु ।
अस्मादृशीनां, सुन्दर, अवकाशो नास्ति पापानाम् । इति संः ।

सर्व्वत्र (२०६) एवंविधविषयेऽतिशयोक्तिरेव प्राणत्वेन अवतिष्ठते, तां विना प्रायेणालङ्कारत्वायोगात् ; अत एवोक्तं,

सैषा सर्व्वत्र वक्रोक्तिः, अनयार्थो विभाव्यते (२१०) ।
यत्नोऽस्यां कविना कार्य्यः, कोऽलङ्कारोऽनया विना ॥-इति ॥

स्वमुत्सृज्य गुणं योगादत्युज्ज्वलगुणस्य यत् ।
वस्तु तद्गुणतामेति, भण्यते स तु तद्गुणः ॥५१॥

वस्तु तिरस्कृतनिजरूपं केनापि समीपगतेन प्रगुणतया स्वगुणसम्पदोपरक्तं तत्प्रतिभासमेव(२११), यत् समासादयति, स तद्गुणः, (तस्य अप्रकृतस्य गुणोऽत्रास्तीति) । उदाहरणम्,-

विभिन्नवर्णा गरुड़ाग्रजेन सूर्य्यस्य रथ्याः, परितः स्फुरन्त्या ।
रत्नैः पुनर्यत्र रुचा रुचं स्वामानिन्यिरे वंशकरीरनीलैः ॥

---

(२०६) नन्व आधारं विना आधेयस्यावस्थानम्, एकस्य एकदा अनेकत्रावस्थानम्, एतेन यत्नेन कार्य्यद्वयकरणञ्च वस्तुनो नोपपद्यमिति कथमेतेषामलङ्कारत्वमिति पूर्वपक्षे उत्तरम् सर्व्वत्रेति । अयमत्र उत्तराभिप्रायः, वास्तविकानामेतेषामनुपपद्यमानत्वमस्तु, वैचित्र्यविशेषप्रतिपत्तये प्रतिभाकल्पितानामेतेषामलङ्कारत्वे का हानिः, अविद्यैव गिरां वास्तविको आधारः, किन्तु आधारतया अविद्यमयत्वेन इति तादृशाधारं विना आधेयानां गिरामवस्थितिर्नानुपपन्नेति । अतिशयोक्तिः अतिशयेन (वैचित्र्यविशेषप्रतिपत्तये) लोकसीमातिक्रमेण उक्तिः कथनम् । स्वभावोक्त्यादौ तथा चमत्कारात् प्रायेणेति उक्तम् ।

(२१०) वक्रोक्तिः वक्रा वैचित्र्याधायिका लोकातिशायिनी उक्तिः कथनम् । विभाव्यते अवधार्य्यते ।

(२११) वस्तु प्रतिभासं स्वरूपम् । तिरस्कृते धर्म्मिणोऽपि तिरस्कारः, सामान्ये अप्रस्तुतनिजगुणसाहचर्यप्रतिभासः, यत्र तु गुणमात्रमेव

अत्र रवितुरगापेक्षया गरुडाग्रजस्य, तदपेक्षया च हरिन्नयनीना प्रगुणवर्णता (२१२)॥

तद्भूताननुकारस्त्वेदस्य, तत् स्यादतद्गुणः।

यदि तु तदीयं (२१३) वर्णं सम्भवन्त्यामपि योग्यतायां हृदं न्यूनगुणं न गृह्णीयात्, तदा भवेदतद्गुणो नाम। उदाहरणम्,-धवलोऽसि जइवि सुंदर, तहवि तुए मज्झ रंजिअं हिअअं। रायभरिए वि हिअए सुहअ, णिहित्तो ण रत्तोऽसि (२१४)॥ अत्यातिरेकेणापि मनसा संयुक्तो न रक्ततामुपगत इत्यतद्गुणः। किञ्च तदिति अप्रकृतम्, अस्येति च प्रकृतमत्र निर्दिश्यते, तेन, यत्, अप्रकृतस्य रूपं प्रकृतेन कुतोऽपि निमित्तात् न अनुविधीयते, सोऽतद्गुणः इत्यपि प्रतिपत्तव्यम् (२१५)।

तिरस्कार, धर्म्मिणश्च पृथगवभास इति भेद,-इति उद्योत। गुणभेदादेव भेद इति तु वयम्।

(२१२) तथाच्यात्र गरुडापत्यवर्णस्यापि, शीघ्ररत्नवर्णस्यापि हरेरिति प्रगुणत्वं बोध्यम्।

(२१३) तदीय प्रस्तुतसम्बन्धि। योग्यतायां तद्वर्णपक्षपोषाये। इदम अप्रस्तुतम कर्म्म। गुणापकर्षकृतविच्छित्तिविशेषाभावात् विशेषोक्तेर्भेद इति दर्पणकृत्।

(२१४) धवलोऽसि यद्यपि सुन्दर, तथापि त्वया रञ्जितं मम हृदयम्। रागभरितेऽपि हृदये, सुभग, निहितो न रक्तोऽसि।-इति सं०। उक्तरूपभेदोदाहरणम्। तत्र सद्धृदयत्वापादनमेवाभिप्रेतमिति हृदयं प्रकृतम। शेषोऽत्र सुगम।

(२१५) तथा च कार्य्यायां तद्भूतेऽत्र तत्त्वम्, अतोऽत्र चेदंभूतं प्रकृतापनुत्तोऽवयवो बोध्य।

सर्व्वत्र (२०९) एवंविधविषयेऽतिशयोक्तिरेव प्राणत्वेन अवतिष्ठते, तां विना प्रायेणालङ्कारत्वायोगात्; अत एवोक्तं,

सैषा सर्व्वत्र वक्रोक्तिः, अनयार्थो विभाव्यते (२१०)।
यत्नोऽस्यां कविना कार्य्यः, कोऽलङ्कारोऽनया विना ॥-इति॥

स्वमुत्सृज्य गुणं योगादत्युज्ज्वलगुणस्य यत्।
वस्तु तद्गुणतामेति, भण्यते स तु तद्गुणः ॥५१॥

वस्तु तिरस्कृतनिजरूपं केनापि समीपगतेन प्रगुणतया स्वगुणसम्पदोपरक्तं तत्प्रतिभासमेव(२११), यत् समासादयति, स तद्गुणः, (तस्य अप्रकृतस्य गुणोऽत्रास्तीति)। उदाहरणम्,-

विभिन्नवर्णा गरुडाग्रजेन सूर्य्यस्य रथ्याः, परितः स्फुरन्त्या।
रत्नैः पुनर्यत्र रुचा रुचं स्वामानिन्यिरे वंशकरीरनीलैः ॥

---

(२०९) नन्तु आधार विना आधेयस्यावस्थानम्, एकस्य एकदा अनेकत्रावस्थानम, एवेन यत्नेन कार्य्यद्वयकरणञ्च वस्तुतो नोपपन्नमिति कथमेतेषामलङ्कारत्वमिति पूर्व्वपक्षे उत्तरम् सर्व्वत्रेति। अयमत्र उत्तराभिप्राय, वास्तविकानामेतेषामनुपपद्यमानत्वमस्तु, वैचित्र्यविशेषप्रतिपत्तये प्रतिभाकल्पितानामेतेषामलङ्कारत्वे का हानि, कविहि गिरां वास्तविको नाधार, किन्तु आधारतया कविसमयसिद्ध इति तादृशाधार विना आधेयानां गिरामवस्थितिर्नानुपपन्नेति। अतिशयोक्ति अतिशयेन (वैचित्र्यविशेषप्रतिपत्तये) लोकसीमातिक्रमेण उक्ति कथनम्। स्वभावोक्त्यादौ व्यथा व्यवस्थानात् प्रायेणेति उक्तम।

(२१०) वक्रोक्ति वक्रा वैचित्र्याधायिका लोकातिशायिनी उक्ति कथनम। विभाव्य अवधार्य्यते।

(२११) तद्गुण तस्य गुणस्य तद्गुणत्वम्। लक्ष्यते यस्मिन्नेवोक्ति तिरस्कारः, सामान्ये अपरित्यक्तनिजगुणस्वाधयत्वप्रतिभास, स्व तु गुणमात्रस्यैव

अत्र रवितुरगापेक्षया गरुडाग्रजस्य, तदपेक्षया च हरि न्मणीना प्रगुणवर्णता (२१२)॥

तद्भूषाननुहारश्चेदस्य, तत् स्यादतद्गुणः।

यदि तु तदीयं (२१३) वर्णं सम्भवन्त्यामपि योग्यतायान् इदं न्यूनगुणं न गृह्णीयात् तदा भवेदतद्गुणो नाम। उदाहरणम्,- धवलोऽसि जइवि सुंदर, तहवि तुए मज्झ रंजिअं हिअअं। रायभरिए वि हिअए सुहअ, णिहित्तो ण रत्तोऽसि (२१४)॥ अत्रातिरक्तेनापि मनसा संयुक्तो न रक्ततामुपगत इत्यतद्गुण.। किञ्च तदिति अप्रकृतम्, अस्येति च प्रकृतमत्र निर्दिश्यते, तेन, यत्, अप्रकृतस्य रूपं प्रकृतेन कुतोऽपि निमित्तात् न चानुविधीयते, सोऽतद्गुणः इत्यपि प्रतिपत्तव्यम् (२१५)।

तिरस्कार, धर्मिणश्च पृथगवभास इति भेद,-इति उद्योत। गुणभेदादेश भेद इति तु वयम।

(२१२) तथाचात्र गरुडाग्रजवर्णस्यापि, नीलरत्नवर्णस्याग्रिमेति तद्गुणत्वम बोध्यम।

(२१३) तदीय प्रस्तुतसम्बन्धि। योग्यतायां तद्वर्णग्रहणोपाये। इदम अप्रस्तुतम कर्तृ। गुणाग्रहणरूपविच्छित्तिविशेषाश्रयणात् विशेषोक्तेर्भेद इति दर्पणवत्।

(२१४) धवलोऽसि यद्यपि सुन्दर, तथापि त्वया रञ्जितं मम हृदयम। रागभरितेऽपि हृदये, सुभग, निहितो न रक्तोऽसि॥-इति छ०। उक्तार्थभेदोदाहरणम। तत्र स्वहृदयरञ्जनमवाभिप्रेतमिति हृदय प्रकृतम। श्लेषोऽत्र मूलम।

(२१५) तथा च कारिकाया तद्भूपेत्यत्र तच्छब्द, अस्येत्यत्र चेदयन्द प्रस्तुताप्रस्तुतोभयपरो बोध्य।

यथा,

गाङ्गमम्बु सितमम्ब यामुनं कज्जलाभमुभयत्र मज्जतः ।
राजहंस, तव सैव शुभ्रता चीयते न च न चापचीयते ॥

यद्यथा साध्यितं केनाप्यपरेण तदन्यथा ॥ ५२ ॥

तथैव यद्विधीयेत, स व्याघात इति स्मृतः ।

येनोपायेन यत् एकेनोपकल्पितं, तस्यान्येन जिगीषुतया तदुपायकमेव, यत् अन्यथाकरणं, स (स्वसाधितवस्तुव्याहति-हेतुत्वात् (२१६)) व्याघातः । उदाहरणम्,-

हृत्वा दग्धं मनसिजं जीवयन्ति हृतैव याः ।
विरूपाक्षस्य जयिनीस्ताः स्तुमो वामलोचनाः ॥

सैषा संसृष्टिरेतेषां भेदेन यदिह स्थितिः ॥ ५३ ॥

एतेषां समनन्तरमेवोक्तस्वरूपाणां यथासम्भवमन्योन्य-निरपेक्षतया, यत्, एकत्र (शब्दभागे एव, अर्थविषये एव, उभयत्रापि वा) अवस्थानं, सा एकार्थसमवायस्वभावा (२१७) संसृष्टिः । तत्र शब्दालङ्कारसंसृष्टिर्यथा,-

वदनसौरभ-लोभ-परिभ्रमद्भ्रमर-सभ्रम-सम्भृतशोभया ।
चलितया विदधे कल-मेखला-कलकलोऽलकलोलदृशान्यया ॥

---

(२१६) अत्र स्वयम् उपायपरः । हेतुत्वादिति उपायत्वेति शेषः ।

(२१७) एकस्मिन् अर्थे शब्दभागादौ, समवायः (अर्थात् अलङ्कारयोः) सम्बन्धः एव स्वभावः स्वरूपं यस्याः सा, संसृष्टिरलङ्कारद्वयम् । अलङ्कारयोः समवधानं चमत्कारान्तरादलङ्कारान्तरमेव भवतीत्यभिप्रायः ।

अर्थालङ्कारसङ्कृष्टिस्तु,-

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः। [उत्०]

असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता ॥ [उप०]

पूर्वत्र परस्परनिरपेक्षौ यमकानुप्रासौ संसृष्टिं प्रयोजयतः; उत्तरत्र तु तथाविधे उपमोत्प्रेक्षे। शब्दार्थालङ्कारयोस्तु संसृष्टिः,-

सो णत्थि एत्थ गामे जो एवं महमहन्तलावण्णं।

तरुणाणं हिअअलुडिं परिसक्कन्ती णिवारेइ (२१८) ॥

अत्रानुप्रासो रूपकस्यान्योन्यानपेक्षे, संसर्गश्च तयोरेकत्र वाक्ये छन्दसि वा समवेतत्वात्।

अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वन्तु सङ्करः।

एते एव(२१९)यत्रात्मनि अनासादितस्वतन्त्रभावाः परस्परम् अनुग्राह्यानुग्राहकता दधति, स(एषा सङ्कीर्यमाणस्वरूपत्वात्) सङ्करः।

---

(२१८) स नास्यत्र ग्रामे य एनां महमहीयमानलावण्याम्।

तरुणानां हृदयलुण्ठाकीं परिष्वङ्गमाणाम् निवारयति ॥-इति स० महमहीयमानम् उल्लसोल्लसायमानम्। परिष्वङ्गमाणां सङ्गच्छमानाम्। निवारयति उपभोगेच्छात इति शेषः। हृदयलुण्ठाकीमित्यत्र रूपकम्।

(२१९) एते अलङ्काराः। स्वतन्त्रभाव इतरानपेक्षिता। परस्परम् अनुग्राह्यानुग्राहकता अन्योन्यस्योपकार्योपकारकभाव, तेन यत्र एकः अलङ्कारः आसादितस्वतन्त्रभाव इतरमलङ्कारमुपकरोति तत्र नायं सङ्कर, यथा, "सङ्कल्पसङ्कल्पि" इत्यादौ रूपकक्षेत्रे सैव शब्दशक्त्या स्वत सिद्ध रूपकमुपकरोतीति नायं सङ्करः, किन्तु रूपकमेव। तत्रालङ्काराणां यथाकथञ्चित् परस्परमुपकार्योपकारकभाव सङ्कर एकस्य स्वतःसिद्धस्य अपरालङ्कारोपकारत्वे तु एकमूलकोऽपरोऽलङ्कार इति फलितम्।

उदाहरणम्,-

यात्ते सीमन्तरत्ने मरकतनि, हृते हेमताटङ्कपत्रे,
लुप्ताया मेखलाया, झटिति मणि-तुलाकोटियुग्मे गृहीते ।
योगं विम्बौष्ठकान्त्या, त्वदरिदृगदृशामित्वरीणामरण्ये,
राजन्, गुञ्जाफलाना व्रज इति शबरा नैव हारं हरन्ति ॥[दशो]

अत्र तद्गुणमपेक्ष्य भ्रान्तिमता प्रादुर्भूतं, तदाश्रयेण च तद्गुणः सचेतसा प्रभूतचमत्कृतिनिमित्तमित्यनयोरङ्गाङ्गिभावः (२२०) । यथा वा,

जटाभाभिर्भीमैः करधृतकलङ्काच्चवलयो ।
वियोगिव्यापत्तेरिव कलितवैराग्यविषदः ।
परिप्रेङ्खत्तारापरिकर कपालाङ्कितततले
शशी भस्मापाण्डुः पिटवन इव व्योम्नि चरति (२२१)॥

[वक्र०]

---

(२२०) विम्बौष्ठकान्त्या योगमिति दृष्ट्वा 'गुञ्जाफलानां व्रज' इतिभ्रान्तिमत्तम स्वरूपनिश्चायकमुत्पद्यते, तद्गुणस्य च भ्रमजनकतया भ्रान्तिमदाश्रयेण चारुत्वातिशय इत्यभिप्राय ।

(२२१) भामिरुपलक्षित । कर किरणम इवल । वियोगी विरही (वियोगं योजयतीति) विषयम् । व्यापत्तिर्विनाशः । वैराग्यम विगत-रक्तता विषयसंहाराद्विशेषम् । विषद शुभ्र शुद्धम् । पिटवनम शुक्लवर्णम । अत्र यो गगनमारोहात् स्थितापि समासोक्तिरनिष्कृष्टत्वात प्रकाशता भोक्तेति प्रदीप । वस्तुत व्याप्नोति भामिरिति च विशेषणम् योगिनि न सम्भवतीति नात्र समासोक्तिरिति । पिटवन इव व्योम्नीति आधारयोरुपमाश्रयात् तारापरिकरकपालेत्यत्रापि आधेययोरुपमैव अत्र रूपकम् । अत्र प्रथमचरणे उपमारूपकयोरुभयोरेकोपादान न समीचीन-मिति विभावनीयम ।

उपमा, रूपकम्, उत्प्रेक्षा, श्लेषश्चेति चत्वारोऽत्र पूर्ववत् अङ्गाङ्गितया प्रतीयन्ते (२२२)। कलङ्क एवाच्चवलयमिति-रूपकपरिग्रहे (२२३)करधृतत्वमेव साधकप्रमाणता प्रतिपद्यते, अस्य हि रूपकत्वे तिरोहितकलङ्करूपम् अच्चवलयमेव मुख्य-तयाऽवगम्यते, तस्यैव च करग्रहणयोग्यतायां सार्वत्रिकी

---

(२२२) कलितवैराग्यशिखद इति श्लेष, वियोगिव्यापकैरिवेत्युत्प्रेक्षामुप-करोति, उत्श्लेषसमधिगतविषयनिस्तृष्णरूपहीनोपायसमवलम्बेव उत्प्रेक्षायाः प्रवृत्ते। तया च उत्प्रेक्षया श्लेष उपकुरुते, तया श्लेषस्य समर्थनेन श्लेष-प्रकर्षचमत्कारस्यातिशयनात्। एवं जटाभाभिर्भोभिरिति पिङ्गल इव व्योम्नीति च उपमा, करधृतकलङ्कालवलय इति रूपकं, ते च श्लेषोत्प्रेक्षे-इति चत्वार एवालङ्कारा चन्द्रस्य योगित्वप्रचायने परस्परमुपकुर्वन्ति, सकार-णवैराग्यसहितेन जटादिधारणेन, जटादिधारणसहितेन वा सकारणेन वैराग्येण चन्द्रस्य योगित्वं सुष्ठु समर्थितं भवतीति। पिङ्गल इव व्योम्नीत्युपमाया तारापरिकरकपालेत्युपमा अङ्गमिति अत्र उपमामूले-वोपमा न सङ्कर इति। केचित्तु अत्रापि इदमेव सङ्करमाहुः।

(२२३) कलङ्क एवाच्चवलयमिति कलङ्कोऽच्चवलयमिवेति चोभयरूपस्या-पि समासस्य सम्भवेन किम् करधृतकलङ्काच्चवलयमित्यत्रापे वक्ष्यमाणोऽनयो-सन्देहसङ्करः। अत रूपकमेवेति सशय निराकरोति कलङ्क इति। इदमत्र निराकरणम्, अलङ्काराणामेकतरसाधकबाधकप्रमाणाभावे एव सन्देह-सङ्करो भवति, न चात्र तथा, करधृतेतिविशेषणस्यैव रूपकसाधकत्वात्, तथा हि उपमायाम् (चन्द्रस्य मुखम् इति रीत्या) सादृश्यांशे उपमानं विशेषणीकृत्य उपमेयमेव प्राधान्येन विशेष्यत्वेन निर्दिश्यते इति उपमेये मुख्यतया सम्भवदेव विशेषणमुपादीयते, रूपके तु(चन्द्र एव मुखमितिरीत्या) उपमेयामेदेन उपमेय तिरोधाय, उपमानमेव प्राधान्येन विशेष्यतया निर्दिश्यते इति उपमाने मुख्यतया अन्वययोग्यमेव विशेषणमुपादीयते, तच्च विशेषणम् उपमेये कथञ्चिदुपपद्यते इति नियम, एवञ्च प्रकृते

प्रसिद्धिः; श्लेषच्छायया तु कलङ्कस्य करधारणम् असदेव प्रत्यासत्त्या उपचर्य्य योज्यते, यथाङ्केन केवलं कलङ्कस्य मूर्त्यैव उद्बहनात्; कलङ्कोऽत्रवलयमिवेति तु उपमायां कलङ्कस्य उत्कटतया प्रतिपत्तिः, नचास्य करधृतत्वं तत्त्वतोऽस्तीति मुख्येऽप्युपचार एव शरणं स्यात् ।

एवंरूपश्च सङ्करः शब्दालङ्कारयोरपि परिदृश्यते । यथा,-

राजति तटीयमभिहत-दानव-रासाऽतिपाति-सारव-नदा ।
गजता च यूथमविरत-दान-वरा साऽतिपाति सारा वनदा॥(२२४)

करधृतत्वविशेषणम् उपमानोभूतेऽत्रवलये एव मुख्यतया सम्भवत् रूपकमेव पाठयति । तथा सति हि अत्रवलये उपमाने मुख्ये अर्थे करधृतत्वं मुख्यतयैकं अन्वेति । उपमाङ्गीकारे तु कलङ्कस्य मुख्यतया प्रतीतौ तस्य करधृतत्वं नासम्भवीति कदापि मुख्यतयाऽन्वयो न स्यात् । एवमेव अत्रवलये करधृतत्वस्य मुख्यतयान्वयसिद्धौ सत्यां कलङ्के उपचारात् कथञ्चित् करधृतत्वमुपपादनीयं, तथाहि, करसदृश्यसंबन्धादुपस्थितस्य किरणस्य कलङ्काधारमण्डलसान्निध्यसम्बन्धेन कलङ्काधारत्वमुपचर्यते इति । श्लेषच्छायेति, किरणधृतरूपहितोपार्थस्य अकलङ्कतया प्रतीयमानत्वात् वास्तविको नात्र श्लेष इति श्लेषच्छायेत्युक्तम् । प्रत्यासत्त्या कलङ्काधारमण्डलस्य सान्निध्यसम्बन्धेन । उपचर्य्य आरोप्य । मूर्त्या मण्डलाकारेण शरीरेण । उत्कटतया मुख्यतया प्राधान्येन ।

(२२४) अभिहतोऽभिघातं प्राप्तः दानवानां रासः सिंहनादशब्दो यस्याम् सा अभिहतदानवरासा । अतिपाती शीघ्रगामी सारावश्च (आरावेण शब्देन सहितः) नदो यस्याम् सा अतिपाति-सारव-नदा । सा गजता (गजसमूहः) यूथम् (सङ्घम्) अतिपाति (अतिशयम् रक्षति) श्लेषवत्यः । अविरतेन दानेन (मदजलेन) वरा (श्रेष्ठा) अविरतदानवरा । सारा बलिष्ठा । वनदा (वनं ददाति खण्डयति) वनखण्डिका ।

अत्र यमकमनुलोमप्रतिलोमञ्च (२२५) चित्रभेदः पादद्वयगते परस्परापेक्षे॥

एकस्मिंश्च ग्रहे न्यायदोषाभावादनिश्चयः ॥५४॥

द्वयोर्बहूनां वा अलङ्काराणाम् एकत्र समावेशेऽपि विरोधात् न (२२६) यत्र युगपदवस्थानं, नचैकतरस्य परिग्रहे साधकं, तदितरस्य परिहारे बाधकमस्ति, येनैकतर एव परिगृह्येत, स निश्चयाभावरूपो द्वितीयः सङ्करः, उभयोच्चयेन सङ्करस्येवाक्षेपात्। उदाहरणम्,-

जह गहिरो जह रयणणिब्भरो
जह अ णिम्मलच्छाओ।

---

(२२५) अत्र द्वितीयचतुर्थपादयो प्रथमाक्षरमारभ्य अनुलोमेन (अनुक्रमेण) पाठे यादृशी पदावली, तयोरन्त्याक्षरमादाय प्रतिलोमेन (व्यतिक्रमेण) पाठेऽपि सादृश्येणायातीति। पादद्वयगतश्च पादद्वयगतश्चेति-रीत्या एकवचने 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्' (१।२।६९ पा०सू०) इत्यनेन स्त्रीत्वमेव सिध्यते, अत. पादद्वयगते इति नपुंसकतोपपत्तिः, एवं परत्र। पादयमकानुलोमप्रतिलोमयो प्रत्येकमेव दुष्करतया विदग्धमनोऽनुरञ्जकम्, तयो सङ्घिरन्तु सुतरामतिशयेन विदग्धमनोऽनुरञ्जकमिति परस्परापेक्षत्वातिशये परस्परमपेक्षेत इत्यभिप्राय।

(२२६) विरोधात् यद्धि हि द्वयोरपि एकत्रावस्थानमपेक्षाभावात्। उभयोच्चयेन 'एकस्य च', इत्यत्र चकारेण। आक्षेपात् पूर्वकारिकातोऽनुषङ्गः। तथाच 'एकस्य च' इत्यस्य चकारः 'अनिश्चय' इत्यनेनाप्येति।

तह किं विहिणा एसो
सरसपाणियअओ जलणिही ण किओ (२२७)॥

अत्र, समुद्रे प्रस्तुते (विशेषणसाम्यादप्रस्तुतार्थप्रतीतेः) किमसौ समासोक्तिः, किम् (अन्येरप्रस्तुतस्य सुखेन, कस्यापि तत्समगुणतया प्रस्तुतस्य प्रतीतेः) दूयमप्रस्तुतप्रशंसा?—इति सन्देहः। यथा वा,

नयनानन्ददायीन्दोर्बिम्बमेतत्प्रसीदति।
अधुना विनिरुद्धाग्रमविश्रीर्णमिदन्तमः?॥

अत्र, किं, (कामस्योद्दीपकः कालो वर्त्तते इति भङ्ग्यन्तरेण अभिधानात् (२२८)) पर्य्यायोक्तम्, उत, (वदनस्येन्दुबिम्बतया अध्यवसानात्) अतिशयोक्तिः, किं वा (एतदिति यत्किं निर्दिश्य तद्रूपारोपवशात्) रूपकं, अथवा (तयोः समुच्चयविवक्षायां (२२९))

---

(२२७) यथा गभीरो यथा रत्ननिर्भरो यथा च निर्मलच्छायः।
तथा किं विधिना एष सरसपानीयको जलनिधिर्न कृतः?॥
इति सं०। पुरुषपक्षे सरसपानीयशब्देन परोपभोग्यवस्तुमात्रम् लक्ष्यते इति महेश्वरः।

(२२८) कामस्य उद्दीपकोऽयं कालः इत्यतद्भङ्ग्या अस्मिन् काले चन्द्रबिम्बं नयनानन्ददायीत्यनेन भङ्ग्यन्तरेण कथनात्; नयनानन्ददायिचन्द्रबिम्बत्वं कामोद्दीपकत्वनियतमिति एकतरस्य प्रतिपादने अन्यतरस्य प्रतीतिरेवेति। एतेन दैरयमपि पर्य्यायोक्तं भवतीत्यायाति।

(२२९) समुच्चयार्थक-चकारादिकल्पनया बिम्बं प्रसीदति, वदनञ्च प्रसीदतीति विवक्षायाम् एकतरस्यैव प्रकृतत्वे दीपकम्, उभयोरेव प्रकृतत्वे तुल्ययोगितेत्यर्थः। प्रदीपकल्पत्वे वर्णनीये इति भावः। बिम्बपक्षे आश्रादिक्, तमोऽन्धकारः। वदनपक्षे आशा अभिलाषः, तमो विरहजन्यदुःखता।

दीपकम्, अथवा तुल्ययोगिता, किंतु (प्रदीपसमये विशेषण-साम्यादाननस्यावगतौ) समासोक्तिः, (आहोस्वित् मुख-त्वैर्मल्यप्रस्तावात्) अप्रस्तुतप्रशंसा?-इति बहूनां सन्देहादयमेव सङ्करः।

यत्र तु न्यायदीपयोरन्यतरस्यावतारः, तत्र एकतरस्य निश्चयात् न संशयः। न्यायश्च साधकत्वम् (अनुकूलता)। दीपोऽपि बाधकत्वं (प्रतिकूलता)। तत्र

सौभाग्यं वितनोति वक्त्रशशिनो ज्योत्स्नेव हासद्युतिः।
-इत्यत्र मुख्यतया अवगम्यमाना हासद्युतिर्वक्त्रे (२३०) एवानुकूल्यं भजते इत्युपमायाः साधकं, शशिनि तु न तथा प्रतिकूलेति रूपकं प्रति तस्य अबाधकता।

वक्त्रेन्दौ तव सत्यं यदपरः शीतांशुरभ्युद्यतः।
-इत्यत्रापरत्वमिन्दोरनुगुणं (२३१) न तु वक्त्रस्य प्रतिकूल-मिति रूपकस्य साधकतां प्रतिपद्यते, न तूपमाया बाधकताम्।

---

(२३०) वक्त्रे विशेष्यतया वक्त्रे प्रतीते, वक्त्रस्य प्रधानतया प्रतीता-वित्यर्थः, एवं 'शशिनि' इत्यत्रापि बोध्यं। तथा चानुकूल्यानुरूपेण। हासद्युतेः वक्त्रे मुख्यतयैवान्वयसम्भवात् हासद्युतिर्वक्त्रस्य प्रतीतौ यथा अनुकूला, न तथा शशिनः प्रतीतौ प्रतिकूला, हासद्युतेः विकाशपरत्वं परित्यज्य कथञ्चित् शशिन्यपि अन्वयसम्भवात्।

(२३१) यथा 'अयमपरः पण्डितः' इत्यत्र पण्डितस्य विशेषणम् 'अपरत्वं' पण्डितान्तरस्य पूर्वोक्तताम् प्रत्याययति, तथा 'अपरः शीतांशुः'-इत्यत्रापि शीतांशुः विशेषणतया उपात्तम् अपरत्वं चन्द्रान्तरस्य पूर्वोक्तताम् प्रत्याय-यति; चन्द्रान्तरस्य पूर्वोक्तत्वन्तु 'वक्त्रेन्दौ' इत्यत्र रूपक एव भवति,

राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भरम् ।

-इत्यत्र पुनरालिङ्गनमुपमा निरस्यति, सदृशं प्रति परमेश्वरी-प्रयुक्तस्यालिङ्गनस्यासम्भवात् ।

पादाम्बुजं भवतु नो विजयाय मञ्जु-
मञ्जीरशिञ्जितमनोहरमम्बिकायाः ।

-इत्यत्र मञ्जीरशिञ्जितम् अम्बुजे प्रतिकूलम्, असम्भवादिति रूपकस्य बाधकं, न तु (२३२), पादेऽनुकूलमित्युपमायाः साधकमभिधीयते, विध्युपमर्दिनो बाधकस्य तदपेक्षया उत्कटत्वेन प्रतिपत्तेः । एवमन्यत्रापि सुधीभिः परीक्ष्यम् ॥

स्फुटमेकत्र विषये शब्दार्थालङ्कृतिद्वयम् ।
यत्रावस्थितञ्च,

अभिन्ने एव पदे स्फुटतया, यत्, उभावपि शब्दार्थौ-

तस्यैव उपमानस्य चन्द्रेण -प्रधान्यतया द्योतितत्वादिति । न तु मञ्जीरस्य प्रतिकूलमिति, सामान्यशब्दस्य विशेषपरत्वमभ्युपगम्य वक्त्रपदसान्निध्यात् व्यपरशब्दस्य वक्त्रापेक्षया अपर इति यद्वदितस्यार्थस्यापि कल्पनसम्भवात् ।

(२३२) ननु मञ्जीरशिञ्जितं यथा अम्बुजप्रतिकूलत्वेन बाधकतया व्यपदिश्यते, तथा पादेऽनुकूलत्वेन साधकतयापि कथं न व्यपदिश्यते इति शङ्का निराकरोति नचेति । इदमत्र निराकरणम्, प्राधान्य हि व्यपदेशनियामकं 'प्राधान्येन व्यपदेशा भवन्ति' इति नियमात्, प्राधान्यञ्च बलवत्त्वम्, भवति च (स्वपक्षरक्षणात् परपक्षनिराकरणस्यैव) उपमासाधनात् रूपकबाधनस्यैव बलीयस्त्वमिति बाधकतयैव व्यपदेशो युक्त इति । विधे विधानस्य (अर्थात् पादेऽम्बुजत्वविधानरूपस्य रूपकस्य) । उपमर्दिनः निराकर्तुः । तदपेक्षया उपमासाधकापेक्षया । उत्कटत्वेन बलीयस्त्वेन ।

सङ्करौ (२३३) व्यवस्था समासादयतः, सोऽप्यपर सङ्करः।

उदाहरणम्,-

स्फटोल्लसत्किरण-केसर-सूर्यबिम्ब-
विस्तीर्ण कर्णिकमधो दिवसारविन्दम्।
श्लिष्टाटदिग्दल-कलाप-सुपावतार-
बद्धान्धकारमधुपावलि सङ्कुकोच॥

अत्रैकपदानुप्रविष्टौ रूपकानुप्रासौ।

तेनासौ त्रिरूपः परिकीर्तितः ॥५५॥

तदयमनुग्राह्यानुग्राहकतया, सन्देहेन, एकपदप्रतिपाद्यतया च व्यवस्थितत्वात्त्रिप्रकार एव सङ्करो व्याख्यातः। प्रकारान्तरेण तु (२३४) न शक्यो व्याकर्तुम्, आनन्त्यात्तत्प्रभेदानामिति प्रतिपादिताः शब्दार्थोभयगतत्वेन त्रैविध्यजुषोऽलङ्काराः।

---

(२३३) शब्दार्थालङ्कारविषुपलक्षणम्, 'कलकलोऽलकलोलटशाऽन्यया'-इत्यादौ शब्दालङ्कारयोरनुग्राह्यानुग्राहकयो, 'वक्त्रारविन्दमधुलुब्धमधुव्रतास्य धावन्त्यमी वकुलयूथुलकुञ्जमध्ये' इत्यादावर्थालङ्कारयो रूपकातिशयोक्त्योरायमेव सङ्करोऽवधेय।

(२३४) "सङ्कीर्तिरिति विज्ञेया सर्वालङ्कारसङ्कर।
सा तु व्यक्ता तथाऽव्यक्ता व्यक्ताव्यक्तेति च त्रिधा॥
तिलतण्डुलवद्व्यक्ता क्षीरनीरवदेव च।
अव्यक्ता क्षीरजलवत्पाथसुपानीयस्य च सा।
व्यक्ताव्यक्ता च सङ्कीर्तिरविज्ञेयदिष्यते।
चित्रवर्णघटन्यायेन, भामहभूरिसङ्करे॥'
-इति भोजराजोक्तप्रकारेण।

कुतः पुनरेष नियमो यदेतेषां तुल्येऽपि काव्यशोभातिशयहेतुत्वे कश्चिदलङ्कारः शब्दस्य, कश्चिदर्थस्य, कश्चिच्च उभयस्य ?—इति चेत् । उक्तम् [२०७१०] अत्र, यथा काव्ये दोषगुणालङ्काराणां शब्दार्थोभयगतत्वेन व्यवस्थायामन्वयव्यतिरेकावेव प्रभवतः, निमित्तान्तरस्याभावात्, ततश्च योऽलङ्कारो यदीयान्वयव्यतिरेकावनुविधत्ते, स तदलङ्कारो व्यवस्थाप्यते-इति, एवञ्च यथा पुनरुक्तवदाभासः परम्परितरूपकञ्च उभयोर्भावाभावानुविधायितया उभयालङ्कारौ, तथा शब्दहेतुकार्थान्तरन्यासप्रभृतयोऽपि (२३५) द्रष्टव्याः, अर्थस्य तु तत्र वैचित्र्यम् उत्कटतया प्रतिभासते इति वाच्यालङ्कारमध्ये वस्तुस्थितिमनपेक्ष्यैव लक्षिताः । 'योऽलङ्कारो यदाश्रितः स तदलङ्कारः' इत्यपि कल्पनायाम्(२३६) अन्वयव्यतिरेकावेव समाश्रयितव्यौ, तदाश्रयणमन्तरेण विशिष्टस्याश्रयाश्रयिभावस्याभावादित्यलङ्काराणां यथोक्तनिमित्त एव परस्परव्यतिरेको ज्यायान् ॥

---

(२३५) उत्पादयति लोकस्य प्रीतिं मलयमारुतः ।
तत्तु दाक्षिण्यसम्पन्ने सर्वस्य भवति प्रिये ॥ इति दाक्षिण्यशब्दमूलोऽर्थान्तरन्यासः । प्रभृतिपदात् 'अलमलमुपमेतत् जातम्'-इत्युपमादीनां संग्रहः ।

(२३६) अलङ्कारसर्वस्वकारादयभिमताव[illegible], तत् तात्पर्यं अन्वयव्यतिरेकरूपं यत् अ[illegible] वि[illegible] विश[illegible] प्रविशतीति यावत् । यावद[illegible] आ[illegible] दिति सम्भावनादिरूपस्य परस्परव्यतिरेकोऽन्योन्यभेद

एषां दोषा यथायोगं सम्भवन्तोऽपि केचन ।
उक्तेष्वन्तर्भवन्तीति न पृथक् प्रतिपादिताः ॥५६॥

तथा हि अनुप्रासस्य असिद्धभावो वैफल्यं वृत्तिविरोधः (२३७) इति ये त्रयो दोषाः, ते असिद्धिविरुद्धताम्, अपुष्टार्थत्वं, प्रतिकूलवर्णताश्च यथाक्रमं न व्यतिक्रामन्ति, तत्स्वभावत्वात् ।

क्रमेणोदाहरणम्,-

चक्री चक्कारपङ्क्तिं, हरिरपि च हरीन्, धूर्जटिर्धूर्जटाक्तान्,
अर्कं नक्तंचरेशोऽरुणमपि वरुणः, कूबरागं कुबेरः ।
रंहः सङ्गः सुराणां, जगदुपशमतये नित्ययुक्तस्य यस्य
स्तौति प्रीतिप्रसन्नोऽन्वहमहिमरुचेः सोऽवतात्स्यन्दनो वः(२३८)॥

अत्र कर्तृकर्मप्रतिनियमेन (२३९) स्तुतिः अनुप्रासानुरोधेनैव कृता, न पुराणेतिहासादिषु तथा प्रतीतेति असिद्धिविरोधः ।

भण, तरुणि, रमणमन्दिर,-मानन्दस्यन्दि-सुन्दरेन्दुमुखि ।
यदि सङ्गीलोलापिनि, गच्छसि तत् किं त्वदीयं मे ॥
अनगुरुणन्मणिमेखल,-मविरलझिङ्कान-मञ्जु-मञ्जीरम् ।
परिसरणमरुणचरणे, रणरणकमकारणं कुरुते (२४०) ॥

---

(२३७) द्रष्टव्यः उपनागरिकादेः (१६५०), विरोध प्रतिकूलता ।

(२३८) अत्र चार-चुर्-चक्र-कूबर-रथ-यन्त्राः क्रमेण चौरक-यातायात-चक्र-युगन्धर-रेगार्थका । हरिरिन्द्र । हरीन् अश्वान् ।

(२३९) चक्री चक्कारपङ्क्तिं स्तौतीति रीत्या ।

(२४०) अकुण्ठस्वभावं क्षणमात्रधारणं प्रति उपनायकस्योक्तिरियम् । युग्ममिदं । हे तरुणि, यदि रमणमन्दिरं गच्छसि, तत् (तदा) त्वदीयं

अत्र वाच्यस्य विचिन्त्यमानं न किञ्चिदपि चारुत्वं प्रतीयते -इत्यपुष्टार्थतैवानुप्रासस्य वैफल्यम् (२४१) ।

अकुण्ठोत्कण्ठयेति [१२६ पृ०], अत्र ष्टङ्कारे परुष-वर्णाडम्बरः पूर्वोक्तरीत्या (२४२) विरुध्यते इति परुषानुप्रासोऽत्र प्रतिकूलवर्णतैव वृत्तिविरोधः ।

यमकस्य पादत्रयगतत्वेन यमनमप्रयुक्तत्वं दोषः । यथा, भुजङ्गमस्येव मणि सद्मभाः, ग्राहावकीर्णेव नदी सद्मभाः । दुरन्ततां निर्णयतोऽपि जन्तोः कर्षन्ति चेतः प्रसभं स-दम्भाः (२४३)॥

उपमायाम्, उपमानस्य जाति प्रमाण-गतन्यूनत्वम्, अधिकता वा तादृशी अनुचितार्थत्वं दोषः; धर्म्मात्र्ये तु न्यूनाधिकत्वे यथाक्रमं हीनपदत्वमधिकपदत्वञ्च न व्यभिचरतः । क्रमेणोदाहरणम्,-

चाण्डालैरिव युष्माभिः साहसं परमं कृतम् । [जा०न्यू०]

वह्निस्फुलिङ्ग इव भानुरयं चकास्ति । [प्र०न्यू०]

परिसरणम् (गमनम्) यमे (यमः) अकारणं (निमित्तं विना) रणरणकम् (उत्कण्ठाम्) किम (कथं) कुरुते, (तत्) मयं (वदं) इत्यन्वय इति चन्द्रिका ।

(२४१) अत्र परिसरणविशेषणानि व्यनक्ति रणन्मणिमेखलेत्यादीनि, 'त्वदीयं परिसरणमकारणं रणरणकं कुरुते'-इति-वाच्यार्थस्य, तेन व्यङ्ग्यस्य भाविविरहस्य च न किञ्चिदुपकारे अर्हन्ति, केवलमनुप्रासार्थमेव तानुपात्तानीति भावः ।

(२४२) अटमोद्घाषोक्तानुसारेण ।

(२४३) सदम्भा इति पदत्रयस्य यथाक्रमं विदूषकैकदेशः,-हेलोल्लिखितः, समीचीनलक्षा, दुष्टानिसन्धानयुक्तायेति ।

अयं पद्मासनासीनचक्रवाको विराजते ।
दुर्गादौ भगवान् सेवा विनिर्मिमुरिव प्रजाः ॥ [का०अ०]
पातालमिव ते नाभिः स्तनौ क्षितिधरोपमौ ।
वेणीदण्डः पुनरयं कालिन्दीपातसन्निभः ॥ [प्र०क०]

अत्र चाण्डालादिभिरुपमानैः प्रस्तुतोऽर्थोऽत्यर्थमेव कदर्थितः (२४४) इत्यनुचितार्थता ।

स मुनिर्लक्षितो मौञ्जया कृष्णाजिनपटं वहन् ।
वरालबीजजीमूतभागाश्लिष्ट इवांशुमान् ॥ [ध०न्यू०]

अत्रोपमानस्य मौञ्जीस्थानीयखण्डित्वादेर्धर्मः केनापि पदेन न प्रतिपादित इति हीनपदत्वम् ।

सपीतवासाः प्रगृहीतशार्ङ्गो
मनोज्ञमीमं वपुराप कृष्णः ।
यतक्रदेन्द्रायुधवानिवाग्रयं
संरुध्यमानः प्रथिनेव मेघः ॥ [ध०क०]

अत्रोपमेयस्य (२४५) महादेरनिर्देशे प्रथिनो ग्रहणमतिरिच्यते-इत्यधिकपदत्वम् ।

लिङ्गवचनभेदोऽपि (२४६) उपमानोपमेययोः साधारणं चेत् धर्ममन्यरूपं कुर्यात्, तदा एकतरस्यैव तद्धर्मसमन्वया-

यगते· सविशेषणस्यैव तस्योपमानत्वमुपमेयत्वं वा प्रतीयमानेन धर्म्मेण प्रतीयते इति प्रक्रान्तस्यार्थस्य स्फुटमनिर्वाहाद् अस्य भग्नप्रक्रमरूपत्वम् । यथा,

चिन्तारत्नमिव च्युतोऽसि करतो धिक् मन्दभाग्यस्य मे।[वि०भ०]

शक्तवो भक्षिता देव, शुद्धाः, कुलवधूरिव। [वे०भे०]

यत्र तु नानात्वेऽपि लिङ्गवचनयो, सामान्याभिधायि पदं स्वरूपभेदं नापद्यते, न तत्रैतद्दूषणावतारः, उभयथापि अस्य अनुगमत्वमस्वभावत्वात् (२४७) ।

साधर्म्म्यवाचक यद् पद स्यात्, तेनैव तस्यान्वय स्यात्, न तूभाभ्यामपि ; विशेषणविशेष्यभावान्वये समानलिङ्गवचनयोरेवत्वात्, उभयत्र (उपमानोपमेययो) अन्वयाभावे च तस्य साधर्म्म्यत्वमेव व्याहन्येत, तत्स्वरूपत्वात् तस्य, तदभावे च सदृशोपमा ? उपात्तस्य साधारणधर्म्मस्य एकत्र (उपमेये उपमाने वा) अन्वयबलेन, अपरत्र च प्रतीतिबलेन सम्बन्धमङ्गीकृत्य उपमानिर्व्वाहस्तु न समीचीनः, सर्व्वत्र झटिति प्रतीत्युदयादिति । एतच्च दोषद्वय भग्नप्रक्रमतायामेवान्तर्भवति, उक्तरीत्या उपमाने प्रतीयमानतया वाच्यतया वा उपक्रान्तस्य साधर्म्म्यस्य उपमेये तदन्यथा (वाच्यतया प्रतीयमानतया वा) उपसंहारादिति प्रकाशकारादिति प्रक्रमभङ्गत्वम् ।

(२४७) भोजराजादयस्तु, पर्य्यायान्तराभावे लिङ्गवचनभेदोऽपि न दोषाय इत्याहुः, यथा,

यस्य त्रिवर्गसम्पन्नानि दिनान्यायान्ति यान्ति च।
स लोहकारभस्त्रेव श्वसन्नपि न जीवति ॥

अत्र भस्त्रायाः पर्य्यायान्तराभावादिति । दण्डिनापि

"न लिङ्गवचने भिन्ने न हीनाधिकतापि वा।
उपमादूषणायालं यत्रोद्वेगो न धीमताम् ॥
प्राप्ता दश दिशो यस्य गे, विद्या भुवनविश्रुता ।

यथा,-

गुणैरनर्घैः प्रथितो रत्नैरिव महार्णवः। [वि०मे०]
तद्देयोऽसद्दयोऽन्याभिः स्त्रीभिर्मधुरतामृतः (२४८)।
दधते स्म परा शोभां तदीया विभ्रमा इव ॥ [वि०मे०]

कालयुग्मयविश्रादिभेदेऽपि न तथा(२४९) प्रतीतिरस्खलित-रूपतया विश्रान्तिमास्वादयतीत्यसावपि भग्नप्रक्रमतायैव व्याप्तः। यथा,-

अतिथिं नाम काङ्क्षन्त्याः पुत्रमाप कुमुद्वती।
पश्चिमात् यामिनीयामात् प्रसादमिव चेतना ॥

अत्र चेतना प्रसादमाप्नोति न पुरा आपेति कालभेदः।

प्रत्यग्रमज्जनविशेषपरिविक्तमूर्त्तिः
कौसुम्भरागरुचिरक्षुरदंशुकान्ता।
विभ्राजसे मकरकेतनमर्चयन्ती
बालप्रवालविटपप्रभवा लतेव ॥

अत्र, लता विभ्राजते नतु विभ्राजसे इति सम्बोध्यमान-

निष्ठस्य परभागस्य (२५०) असम्बोध्यमानविषयतया व्यत्यासात् पुरुषभेदः।

गङ्गेव प्रवहतु ते सदैव कीर्त्तिः।-इत्यादौ च गङ्गा प्रवहति न तु प्रवहतु इति अप्रवृत्तप्रवर्त्तनात्मनो विधेः। एवञ्जातीयकस्य च अन्यस्यार्थस्य (२५१) उपमानगतस्यासम्भवाद्विध्यादिभेदः॥

'नन्वसमानम् उच्चारितं प्रतीयमानं धर्म्मान्तरम् उपादाय पर्य्यवसितायाम् उपमायाम् उपमेयस्य प्रकृतधर्म्माभिसम्बन्धान्न कश्चित्कालभेदोऽस्ति (२५२)। यत्नाप्युपात्तेनैव (२५३) सामान्यधर्म्मेण उपमा अवगम्यते, यथा, युधिष्ठिर इवायं सत्यं वदतीति, तत्र युधिष्ठिर इव सत्यवादयं सत्यं वदतीति प्रतिपत्तिप्रसङ्गे (२५४)। सत्यवादी सत्यं वदतीति च न पौनरुक्त्यम् आशङ्कनीयम्, रैभ्योऽयं युष्यातीतिवत् युधिष्ठिर इव

---

(२५०) परभागस्य विभाजके इति क्रियाविशेषणभूतस्य ते-शब्दस्य व्यत्यासाद् परिवर्त्तनात्।

(२५१) 'चिरं जीवतु ते पुत्रो मार्कण्डेयो मुनिर्यथा' इत्यादौ दीर्घादि-रूपस्य।

(२५२) काम इव सुन्दरः, स राजेव राजते-इत्यादौ, काम इव स राजेत्यादौ च यथाक्रमं उच्चारितस्य प्रतीयमानस्य सौन्दर्यरूपं धर्म्मान्तरमवलम्ब्य उपमा प्रतीयते, राजेति क्रिया च उपमेये तस्मिन्नेव अन्वेति, न तूपमानीभूते कामेऽपीति सप्तदशार्थः।

(२५३) यत्र साधारणधर्म्मान्तरमुपात्तम्। उपात्तेनैव भिन्नकालादि-तया प्रतिपादितेनैव।

(२५४) तथा च सत्यं वदतीति न साधारणधर्म्मवाचकम् किन्तु प्रतीयमानं सत्यवादीति परम्।

सत्यवदनेन सत्यवाद्ययमित्यर्थावगमात् (२५५)।' सत्यम् एतत्, किन्तु स्थितेषु प्रयोगेषु समर्थनमिद नतु सर्व्वथा निरवद्यम्, प्रस्तुतवस्तुप्रतीतिविघातात् (२५६) इति, सचेतस एवात्र प्रमाणम्।

असाहस्रासम्भवावप्युपमायाम् अनुचितार्थतायामेव मर्य्यवस्यत। यथा,-

ग्रथ्नाति काव्यशशिनं विततार्थरश्मिम्। [अष०]

अत्र काव्यस्य शशिना, अर्थानाञ्च रश्मिभि. साधर्म्यम् कुत्रापि न प्रतीतमित्यनुचितार्थत्वम्।

निपेतुरास्यादिव तस्य दीप्ता
शरा धनुर्मण्डलमध्यभाजः।
जाज्वल्यमाना इव वारिधारा
दिनार्द्धभाज परिवेषिणोऽर्कात्॥ [अष०]

अत्रापि ज्वलन्त्योऽम्बुधारा सूर्य्यमण्डलात् निष्पतन्त्यो न सम्भवन्तीत्युपनिबध्यमानोऽर्थोऽनौचित्यमेव पुष्णाति॥

उत्प्रेक्षायामपि सम्भावनं भुवेवादय एव शब्दा वक्तु

---

(२५५) रूपोप पुष्णातीत्यत्र यथा (कायिकान्यासकारादिमते) धन कर्मणकपोषणाभिक्षा पुष्टिरितिरीत्या धात्वर्थस्य सामान्यविशेषभावेन विशेषणविशेष्यभावाच्च पौनरुक्त्यम्, तथात्रापीति। एवमेव निदर्शनम्। अत्र युधिष्ठिर इवेत्यनेन सत्यवदनस्वभावत्व प्रतीयते।

(२५६) प्रस्तुतस्य प्राकरणिकस्य वस्तुन उपमाया। साधर्म्यस्य भ्रू टतिप्रतीत्यनुदयेन प्रतीतेरिसम्बन्धरूपो विघात।

यथा,-

आङ्गतेषु विहङ्गमेषु मशको नायान् पुरो वार्यते,
मध्ये-वारिधि वा वसंस्तृणमणिर्धत्ते मणीना रुचम् ।
खद्योतोऽपि न कम्पते प्रचलितुं मध्येऽपि तेजस्विनां
धिक् सामान्यमचेतसं प्रभुमियानाश्रष्टतत्त्वान्तरम्(२६३)॥

अत्र, अचेतनस्य प्रभोरप्रस्तुत-विशिष्ट-सामान्य-द्वारेण(२६४) अभिव्यक्तौ न युक्तमेव पुनःकथनम् ।

तदेतेऽलङ्कारदोषाः यथासम्भविनोऽन्येऽप्येवञ्जातीयकाः (२६५) पूर्वोक्तयैव दोषजात्या अन्तर्भाविताः, न पृथक् प्रतिपादनमर्हन्तीति

सम्पूर्णमिदं काव्यलक्षणम् ॥

इति काव्यप्रकाशेऽर्थालङ्कारनिर्णयो नाम
दशम उल्लासः ॥

॥ समाप्तश्चायं श्रीमम्मटभट्टकृतः काव्यप्रकाशः ॥

---

(२६३) तृणमणिः काचादिमणिः प्रवालं वा। एवेत्यस्य सामान्यमित्यनेनान्वयः । मध्ये वा धुरि वेति क्वचित् पाठः ।

(२६४) अप्रस्तुतं यद्वै विशिष्टम् (आङ्गतेत्यादिविशेषणयुक्तम्) सामान्यं, तद्द्वारेण तन्मुखेन; धिक् सामान्यमित्यनेनेत्यर्थः ।

(२६५) समासोक्तौ अपुंसके नायकव्यवहारसमारोपः, उपमायां उपमाविरुद्धोक्तिः, एवं विरोधे भिन्नाधरयोर्विरोधवर्णनमित्येवञ्जातीयकाः । एतेऽनुचितार्थत्वादौ अन्तर्भावमर्हन्ति । दृश्यतां विवरणम् ।

अत्रैव निगमः ।

सम्पूर्णमिदं श्रीमच्चेतश्चन्द्रन्यायरत्नमहोपाध्यायविरचितम् ।
कलिकातासंस्कृतविद्यालयः
संवत् १८८२ । शकाब्दः १८४६ ।

शुद्धिपत्रम् ।

पृष्ठम्	पङ्क्तौ	अशुद्धम्	शुद्धम्
२	२०	विभावादि सम्बलन	विभावादिसम्बलन
४	१८	एतन्मूलकसन्देह	एतन्मूलकसन्देह
४	२२	प्राधानीभूत	प्रधानीभूत
४	२३	निर्यासः	निर्यासः
८	६	चतुर्भेदो	चतुर्भेदो
९	९	खड्ग	खड्ग
१०	१५	व्याहत्तिदर्शनाच्च	व्याहत्तिदर्शनाच्च
११	२१	अस्मद्भावादिति	अस्मद्भावादिति
१२	२१	स्वरूपस्वाख्यं	स्वरूपस्वाख्यं
१२	२३	ताटस्थं	ताटस्थ्यम्
१३	१३	असत्याङ्गभेद	असत्याङ्गभेद
१४	२४	जाद्यादि	जाड्यादि
१५	१८	इदंशब्देन	इदंशब्देन
१८	२२	विषदेन	विषदेय
२१	१५	श्रमखेद	श्रमस्वेद
२५	१०	भणामि	भणामि
२६	२०	गुरुजन परत्व	गुरुजनपरत्व
२६	२०	भनामि	भणामि
२६	१८	इयो	इयो.
२७	६	तिरस्कृतम्	तिरस्कृतम्
२७	०	यत्व स,	यत्व स',
२८	१	परिलाभितम्	परिलाभितम्

पृष्ठम्	पङ्क्तौ	अशुद्धम्	शुद्धम्
१९९	२१	मानससर	मानससर
२०१	१	अवस्थेयं	अवस्थेयं
२०१	२६	अनयो	अनयोः
२०४	७	त्वत्प्रसादात्	तत्प्रसादात्
२०४	८	स्वाचन्द्रिता	स्वाचन्दिता
२०४	१४	यत्वे	यत्व
२०७	१०	विभक्तिवतया	विभक्तिकतया
२०९	१	क्रियासाम्य	क्रियासाम्ये
२०९	१९	समाधत्ते	समाधत्ते
२१२	१	स्तत्व	स्तत्व
२१२	८	व्यवस्थिति	व्यवस्थिति
२१२	१७	अनुकुल	अनुकूल
२१२	२५	एकप्रयत्नोच्चार्यत्व	एकप्रयत्नोच्चार्यत्व
२१४	१	खड्ग	खड्ग
२१५	१	सुरजवन्धः	सुरजबन्धः
२१६	१	प्रथमादि	प्रथमादि
२१६	७	वर्णयेरेका	वर्णयोरेका
२१८	१०	सतिसत्	सतिसत्
२२०	२५	सभङ्गः	सभङ्गः
२२२	१	अर्थालङ्कारानाह	अर्थालङ्कारानाह
२२१	८	कल्पेते	कल्पेते
२२१	१२	सधर्म्मणो	सधर्म्मणो
२२२	१२	व्युत्पत्तिलभ्यं	व्युत्पत्तिलभ्यं
२२१	१४	परैः	परैः
२२१	२८	कमलमिव	कमलमिव
२२५	२६	जनयन्तो	जनयन्तः
२२८	२५	उपलक्ष्या	उपलक्ष्या
११	२१	विधिष्टो	विधिष्टो

पृष्ठम्	पङ्क्तौ	अशुद्धम्	शुद्धम्
२१२	१६	अवोपमाना	मेवोपमाना
२१२	२६	अनुक्त्	अनुक्त्
२१२	२८	प्रतिपादविष्याम	प्रतिपादविष्यामः
२१४	१६	अनुप्रतीतुभंवति	अनुप्रतीतिर्भवति
२१५	६	कुतमेव	कुतमेव
२१६	७	ऽध्यवसयात्	ऽध्यवसायात्
२१६	८	नैक्ष्मधर्म्म	नैकात्मधर्म्म
२१८	७	यद्देनोच्यमानं	यद्देनोच्यमानं
२१८	१६	पुरुषो	पुरुषो
२१०	६	अद्भवक्ष्मोः	अद्भवक्ष्मीम्
२१०	१२	अवागत	अवागत
२१२	२	स्रोतसः	स्रोतसः
२१३	१	स्त्रोतृस्त्राभ्य	स्त्रोतृस्त्राभ्य
२१३	६	अद्भवद्भा	अद्भवद्भा
२१६	३	अक्ष	अक्षत
२१६	३	कुर्वंतक्ष	कुर्वंतक्ष
२१६	१२	आधाकात्	आधात्
२१७	२	अवस्तात्कृोच	अवस्तात्कृोच
२१७	३	विश्वदयात्मभाव	विश्वदयात्मभाव
२१७	६	वैरिचे	वैरिचे
२१७	११	अनुभवो	अनुभवो
२१८	१	अवैरिच	अवोरिच
२२१	८	अवृष्टिंद्वारक्ता	अवृष्टिंद्वारक्ता
२२२	१३	दार्तिरेव	दर्तिरेव
२२२	१८	विश्वदवर्धिनि	विश्वेदवर्धिनि
२२१	१६	विश्वोर्वंतरिक्ष	विश्वोर्वंतरिक्ष
२२१	१७	विश्वदर्शिक्ष	विश्वदर्शिन
२२८	२	विश्वदुर्वंदे	विश्वदुर्वंदे

पृष्ठस्य	पङ्क्तौ	अशुद्धम्	शुद्धम्
२५६	१७	करीषाम्	करिणाम्
२५६	२०	सच्छिन्द्र	सच्छिद्र
२६०	१३	तथा	तथा
२६१	१६	मन्यमानः	मन्यमानाः
२६१	१३	यत्र	यातु
२६३	१	पुनरेतेषां	पुनरेतेषां
२६३	११	साधारणधर्म्मस्य	साधारणधर्म्मस्य
२६४	१०	रूपमेति	रूपमेति
२६४	२५	रूपमानोमेय	रूपमानोपमेय
२६६	१५	रिक्तुत्कर्ष	रिक्तुत्कर्षं.
२७१	२०	अनुपेक्षणीयापि	अनुपेक्षणीयस्या
२७१	१८	(४६०)	(३६०)
२७१	७	कोत्तदी	कोसदी
२७३	१४	प्रत्याप्यते	प्रत्याप्यते
२८८	१५	वङ्कीषु	वङ्कीषु
२८०	१५	पक्षधर्म्मान्वय	पक्षधर्म्मान्वयि
२८५	१७	आत्मान	आत्मानं
२८७	१६	वचने.	वचनैः
२८८	७	भिन्नाधरत्वैव	भिन्नाधरत्वैव
३१०	१५	नं, उपमान	न उपमान
३११	१५	कारिकार्या	कारिकायां
३१७	१५	गडगडीयमान	गडगडायमान
३१७	१७	गडगडीयमानम्	गडगडायमानम्
३१४	२४	१७८६)	२७१६०